॥ अर्हम् ॥

कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यविरचिते

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## [ पञ्चमो विभागः ]

[ पञ्चमाध्यायस्य प्रथमपादत आरभ्य पञ्चमाध्यायस्य चतुर्थपादपर्यन्तम् ]

सम्पादकः

आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः

मुनि-विमलकीर्तिविजयः




प्रकाशकः

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति

संस्कार शिक्षणनिधि- अहमदाबाद.

ई. २०१२ • वि.सं. २०६८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यविरचिते

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## [ पञ्चमो विभागः ]

### [ पञ्चमाध्यायस्य प्रथमपादत आरभ्य पञ्चमाध्यायस्य चतुर्थपादपर्यन्तम् ]

सम्पादकः
आचार्य-श्रीविजयशीलचन्द्रसूरि-शिष्यः
**मुनि-विमलकीर्तिविजयः**




प्रकाशकः
**कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी**
**स्मृति संस्कार शिक्षणनिधि - अहमदाबाद.**
ई. २०१२ ● वि.सं. २०६८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका (पञ्चमो विभागः)**
सम्पादकः **मुनि-विमलकीर्तिविजयः ।**

प्रकाशकः **कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि**
अहमदाबाद

प्रथमावृत्तिः ई.स. २०१२ | वि.सं. २०६८ | वीर नि.सं. २५३८

प्रतयः २५०

पृष्ठानि १६ + ३८२

प्राप्तिस्थानः (१) श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर,
१२, भगतबाग, नवा शारदामंदिर रोड,
शेठ आणंदजी कल्याणजीनी पेढी पासे,
पालडी, अहमदाबाद-३८०००७.
फोन : २६६२२४६५

(२) सरस्वती पुस्तक भण्डार
११२, हाथीखाना, रतनपोल,
अहमदाबाद-३८०००१.
फोन : २५३५६६९२

मूल्यम् ₹ ३५०/-

मुद्रकः किरीट ग्राफिक्स,
४१६, वृंदावन शोपींग सेन्टर, रतनपोल, अहमदाबाद-१
(मो.) ०९८९८४९००९१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## પ્રકાશકીય નિવેદન...

પરમપૂજ્ય આચાર્ય શ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મહારાજની શુભ ભાવના તેમજ પ્રેરણાથી વિ.સં. ૨૦૪૫ના વર્ષે સ્થપાયેલ, કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય ભગવંતના નામ સાથે જોડાયેલ આ ટ્રસ્ટે, પૂજ્ય આચાર્યશ્રીના શિષ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરિજી મહારાજના માર્ગદર્શનમાં અનેક સાહિત્યિક પ્રવૃત્તિઓ કરી છે. તેમાં આપણા મૂર્ધન્ય વિદ્વજ્જનોને 'શ્રીહેમચન્દ્રાચાર્ય ચન્દ્રક' અર્પણ કરી તેમનું બહુમાન કરવામાં આવે છે. વિદ્વજ્જનોને આમંત્રણ આપીને વિવિધ વિષયો પર પરિસંવાદ અને સંગોષ્ઠીનું આયોજન થાય છે અને પ્રાચીન સાહિત્યના ગ્રંથોનું સંશોધન-સંપાદન કરાવવાપૂર્વક તેનું પ્રકાશન કરવામાં આવે છે. આજ પર્યંત આ ટ્રસ્ટના આશ્રયે આવા અનેક ગ્રંથોનું પ્રકાશન થયેલ છે, જે જૈન સંઘમાં જ નહિ પણ દેશ-વિદેશના અસંખ્ય વિદ્વાનોમાં પણ પ્રશંસાપાત્ર તથા ઉપાદેય બનેલા છે. 'अनुसन्धान' નામે એક શોધપત્રિકા પણ આ ટ્રસ્ટના ઉપક્રમે પ્રકાશિત કરવામાં આવે છે, જેના અદ્યાવધિમાં ૫૯ અંકો થઈ ચૂક્યા છે.

આજે આ ટ્રસ્ટના ઉપક્રમે શ્રીહેમચન્દ્રાચાર્યના सिद्धहेमव्याकरण ઉપર લખાયેલા ढुण्ढिका નામના અપ્રગટ વિવરણનો પાંચમો ભાગ (અધ્યાય ૫/૧ થી ૫/૪) પ્રકાશિત થઈ રહ્યો છે, જેનો અમને આનંદ છે. આ ગ્રંથનું હસ્તલિખિત પ્રતિઓ પરથી પ્રતિલિપિ-લેખન તેમજ સંપાદન, પૂજ્ય આ.શ્રીવિજયશીલચન્દ્રસૂરિ મહારાજના શિષ્ય મુનિરાજ શ્રીવિમલકીર્તિવિજયજી મહારાજે કરેલ છે. આવું સરસ કાર્ય કરવા બદલ તેઓ અભિનંદનના અધિકારી છે.

શ્રીહેમચન્દ્રાચાર્યના ગ્રંથ પરની અપ્રકાશિત ટીકાના ગ્રંથના ચોથા ભાગનું પ્રકાશન થઈ ગયેલ છે. પાંચમા ભાગનું પ્રકાશન કરવાનો લાભ અમારા ટ્રસ્ટને સાંપડ્યો, તે અમારું સદ્‌ભાગ્ય છે. અમો આશા રાખીએ છીએ કે બાકીના ભાગ પણ આ જ રીતે તૈયાર થશે અને તેના પ્રકાશનનો લાભ પણ અમોને-અમારા ટ્રસ્ટને જ પ્રાપ્ત થશે. ગ્રંથનું સુંદર અક્ષરાંકન-મુદ્રણ કરી આપવા બદલ શ્રી કિરીટ ગ્રાફિક્સ (અમદાવાદ)ને ધન્યવાદ.

લિ.

જ્ઞાનપંચમી, વિ.સં. ૨૦૬૮

કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્ય નવમજન્મ
શતાબ્દી સ્મૃતિ સંસ્કાર-શિક્ષણનિધિ
અમદાવાદ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## સંપાદકીય નિવેદન...

ગૂર્જરેશ્વર સિદ્ધરાજ જયસિંહની વિનંતીથી કલિકાલસર્વજ્ઞ શ્રીહેમચન્દ્રાચાર્યે વિ.સં. ૧૧૯૪ આસપાસ પંચાંગી સિદ્ધહેમચન્દ્રશબ્દાનુશાસન નામના વ્યાકરણની રચના કરી હતી. તે વ્યાકરણની સ્વોપજ્ઞ તત્ત્વપ્રકાશિકા નામની બૃહદ્વૃત્તિ ઉપર ઢુંઢિકાની રચના થઈ હતી. જેમાં વ્યાકરણના દરેક સૂત્રની વૃત્તિમાં આવતાં ઉદાહરણો-પ્રત્યુદાહરણોની સાધનિકા આપવામાં આવી છે અને તે ટીકામાંથી પંચમ અધ્યાય (કૃદંત પ્રકરણ)નું સંપાદન કર્યું છે. શેષ બાકી રહેલ તદ્ધિત પ્રકરણ (છઠ્ઠો-સાતમો અધ્યાય) બે ભાગમાં પ્રકાશિત કરવામાં આવશે.

ટિપ્પણમાં શબ્દમહાર્ણવન્યાસ-ધાતુપારાયણાદિ અનેકવિધ ગ્રંથોનાં ઉદ્ધરણો આપવામાં આવ્યા છે. ટિપ્પણમાં P સંજ્ઞા પાઠાંતર સૂચવે છે. અધ્યયન-અધ્યાપનમાં સુગમતા રહે તે હેતુથી બે પરિશિષ્ટો આપ્યા છે. પ્રથમ પરિશિષ્ટમાં લગભગ ૧૦૬ પ્રત્યયોની સૂચિ આપી છે. તેમાં અનુબંધ સહિતના પ્રત્યયો Bold ટાઈપમાં આપ્યા છે. અનુબંધ રહિત પ્રત્યયો કૌંસમાં આપ્યા છે. બીજા પરિશિષ્ટમાં ઉદાહરણ-પ્રત્યુદાહરણોની સૂચિ બે ભાગમાં આપી છે. પહેલા ભાગમાં નાના ઉદાહરણો અને બીજા ભાગમાં વાક્યાત્મક ઉદાહરણો આપીયાં છે.

શ્રીહેમચન્દ્રાચાર્ય જૈન જ્ઞાનમંદિર-પાટણના જ્ઞાનભંડારમાં રહેલી "શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસન બૃહદ્વૃત્તિ ઢુંઢિકા પંચમાધ્યાયપર્યંત" (ચતુષ્ક-આખ્યાત-કૃદ્વૃત્તિ ઢુંઢિકા) પત્ર-૩૫૭, ડા. નંબર-૯૭, પ્રતિનંબર-૨૪૦૦ તથા શ્રીહંસવિજયજી-કાંતિવિજયજી મહારાજ સંગૃહીત જ્ઞાનભંડાર (જાની શેરી-વડોદરા)માં રહેલી "શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસન ઢુંઢિકાવૃત્તિ પંચમાધ્યાયપર્યંત" પત્ર-૨૯૫, પ્રતિનંબર-૨૦૨૦ને આધારે પ્રસ્તુત પાંચમા ભાગનું સંપાદન કર્યું છે.

બાલબ્રહ્મચારી તપાગચ્છાધિપતિ શાસનસમ્રાટ આચાર્ય શ્રીવિજયનેમિસૂરીશ્વરજી મ.સા.ના સમુદાયના પ્રવચન પ્રભાવક તેજોમૂર્તિ પરમ પૂજ્ય આચાર્ય શ્રીવિજયસૂર્યોદયસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન વિદ્વદ્વર્ય પરમપૂજ્ય આચાર્ય શ્રીવિજયશીલચન્દ્રસૂરીશ્વરજી મ.સા.ની પ્રેરણા-આશીર્વાદથી જ આ સંપાદન કાર્ય થયું છે.

સંપાદન કાર્યમાં શંકાસ્પદ સ્થાનોનું સમાધાન કરી આપવા બદલ મુનિ ત્રૈલોક્યમંડનવિજયજી મહારાજનો ઘણો ઉપકાર-આભાર.

ગ્રંથનું સંપાદન કરતાં કોઈ પણ ક્ષતિ રહી ગઈ હોય તો સુધારી લેવા વિનંતી.

**મુનિ વિમલકીર્તિવિજય**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# સમર્પણ

મારા જન્મદાતા અને ધર્મદાતા
પરમોપકારી માતુશ્રી ચંપકબેન ધરમશીભાઈ ગલાલચંદ,
પિતાશ્રી ધરમશીભાઈ ગલાલચંદ મહેતાની
પુણ્યસ્મૃતિમાં
સાદર સમર્પણ...

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ सम्पादनोपयुक्तग्रन्थसूचिः ॥

(१) श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।
[स्वोपज्ञतत्त्वप्रकाशिकाभिधबृहद्वृत्ति - स्वोपज्ञशब्दमहार्णवन्यास-तदनुसंधानसंवलितम्] पञ्चमोऽध्यायः ।

(२) श्रीसिद्धहेमचन्द्रशब्दानुशासनं स्वोपज्ञमध्यमवृत्त्यवचूरिभ्यामलङ्कृतम् । द्वितीयो विभागः ।

(३) श्रीमद्विजयलावण्यसूरिप्रणीतो धातुरत्नाकरः [भाग १ थी ७] ।

(४) श्रीहेमचन्द्रसूरिभगवद्विरचितं धातुपारायणम् ।

(५) श्रीहैमव्याकरणसत्का उणादिगणविवृत्तिः ।

(६) आचार्यगुणरत्नसूरिविरचितः क्रियारत्नसमुच्चयः ।

(७) श्रीहेमहंसगणिविरचितो न्यायसंग्रहः ।

(८) हैमकृदन्तश्रेणिः । सम्पादिका - साध्वी अमीरत्नाश्रीजी ।

(९) शब्दरत्नमहोदधिः १-२-३ । संकलनकर्त्ता - पंन्यासप्रवरमुक्तिविजयो गणिः ।

(१०) श्रीसिद्धहेमचन्द्रशब्दानुशासनाभिहितानां कृत्प्रत्ययानां महायन्त्रम् । रचयिता - श्रीमद्विजयलावण्यसूरीश्वरः ।

(१२) श्रीहेमचन्द्राचार्यरचिता अभिधानचिन्तामणिनाममाला ।


### आर्थिक सहयोग

**आ ग्रंथना प्रकाशनमां**

**भावनगर श्वेतांबर मूर्तिपूजक जैन तपा. संघे**

**ज्ञानद्रव्यमांथी उदारतापूर्वक संपूर्ण लाभ लीधो छे.**


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ संक्षेपतो विषयानुक्रमः ॥

## पञ्चमाध्यायस्य प्रथमः पादः । कृदन्तप्रकरणम् ।
## सूत्रसंख्या - १७४ । पत्राङ्कः १-१२०


| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| त्यादिवर्जित-तुमभिव्याप्यप्रत्ययानां **कृत्**संज्ञाविधानम् । | ५।१।१ | १ |
| **बहुलम**ित्यधिकारविधानम् । | ५।१।२ | २ |
| कर्तरि **कृत्**प्रत्ययविधानम् । | ५।१।३ | २ |
| कर्मकर्तरि **घुर-केलिम**प्रत्ययौ **कृष्टपच्य**निपातनं च । | ५।१।४ | ३ |
| सङ्गते कर्तरि **अजर्य**निपातनम् । | ५।१।५ | ४ |
| कर्तरि **रुच्या**दिनिपातनम् । | ५।१।६ | ४ |
| कर्तरि **भव्या**दिनिपातनम् । | ५।१।७ | ४ |
| कर्तरि **अनीय**प्रत्ययान्त-**प्रवचनीया**दिनिपातनम् । | ५।१।८ | ५ |
| कर्तरि **क्त**(-त)प्रत्ययविधानम् । | ५।१।९, ५।१।११ | ६, ९ |
| कर्तरि आरम्भे **क्त** (-त)प्रत्ययविधानम् । | ५।१।१० | ८ |
| आधारे **क्त** (-त)प्रत्ययविधानम् । | ५।१।१२ | १० |
| भूते **क्त** (-त)प्रत्ययविधानम् । | ५।१।१७४ | १२० |
| भावे **क्त्वा** (-त्वा) - **तुम्** - **अम्**प्रत्ययविधानम् । | ५।१।१३ | १२ |
| अपादाने **भीमा**दिनिपातनम् । | ५।१।१४ | १२ |
| भावे कारके च **उण्** (-उ)आदिप्रत्ययविधानम् । | ५।१।१५ | १३ |
| अपवादे **असरूप उत्सर्ग**प्रत्ययविधानम् । | ५।१।१६ | १४ |
| **घ्यण्** (-य)प्रत्ययविधानम् । | ५।१।१७ - ५।१।२० | १५-१७ |
| **घ्यण्** (-य)प्रत्ययान्त-**अमावस्या**दिनिपातनम् । | ५।१।२१ - ५।१।२६ | १८-२० |
| **तव्य**प्रत्ययविधानम् । | ५।१।२७ | २१ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| **अनीय**प्रत्ययविधानम्। | ५।१।२७ | २१ |
| **य**प्रत्ययविधानम्। | ५।१।२८ - ५।१।३१, | २१-२३ |
| | ५।१।३५ | २५ |
| यप्रत्ययान्त - **वर्या**दिनिपातनम्। | ५।१।३२ - ५।१।३४ | २४-२५ |
| **क्यप्** (-य)प्रत्ययविधानम्। | ५।१।३५, ५।१।४० - ५।१।४६ | २५, २८-३२ |
| **क्यप्** (-य)प्रत्ययान्त - **हत्या**दिनिपातनम्। | ५।१।३६ - ५।१।३९ | २६-२७ |
| घ्यणादिपञ्चप्रत्ययानां **कृत्य**संज्ञाविधानम्। | ५।१।४७ | ३२ |
| **णक** (-अक)प्रत्ययविधानम्। | ५।१।४८ | ३३ |
| **तृच्** (-तृ)प्रत्ययविधानम्। | ५।१।४८ | ३३ |
| **अच्** (-अ)प्रत्ययविधानम्। | ५।१।४९, ५।१।५०, | ३३ |
| | ५।१।९१ - ५।१।९६ | ६४-६७ |
| **अच्** (-अ)प्रत्ययान्त - **ब्रुव**निपातनम्। | ५।१।५१ | ३५ |
| **अन**प्रत्ययविधानम्। | ५।१।५२ | ३५ |
| **णिन्** (-इन्)प्रत्ययविधानम्। | ५।१।५३, ५।१।८२, ५।१।११६ | ३८, ६०, ७७ |
| | ५।१।१५३ - ५।१।१५८, ५।१।१६० | १०७-११०, १११ |
| **क** (-अ)प्रत्ययविधानम्। | ५।१।५४, ५।१।५५, ५।१।१४२ | ४१, ४२, ९३ |
| **क** (-अ)प्रत्ययान्त - **शोकापनुदा**दिनिपातनम्। | ५।१।१४३, ५।१।१४४ | ९४, ९५ |
| **ड** (-अ)प्रत्ययविधानम्। | ५।१।५६, ५।१।७६ - ५।१।८१ | ४२, ५७-५९ |
| | ५।१।१३१, ५।१।१६८ - ५।१।१७१ | ८६, ११६-११७ |
| **ड** (-अ)प्रत्ययान्त - **व्याघ्रा**दिनिपातनम्। | ५।१।५७, | ४४ |
| | ५।१।१३२, ५।१।१३३ | ८९ |
| **श** (-अ)प्रत्ययविधानम्। | ५।१।५८ - ५।१।६१ | ४४-४७ |
| **ण** (-अ)प्रत्ययविधानम्। | ५।१।६२ - ५।१।६४, ५।१।७३ | ४७-४९, ५५ |
| **अकट्** (-अक)प्रत्ययविधानम्। | ५।१।६५ | ५० |
| **थक**प्रत्ययविधानम्। | ५।१।६६ | ५१ |
| **टनण्** (-अन)प्रत्ययविधानम्। | ५।१।६७, ५।१।६८ | ५१ |
| **अक**प्रत्ययविधानम्। | ५।१।६९ | ५१ |
| **अकन्** (-अक)प्रत्ययविधानम्। | ५।१।७० | ५२ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| **तिक्** (-ति)प्रत्ययविधानम्। | ५।१।७१ | ५३ |
| **कृत्**संज्ञकप्रत्ययविधानम्। | ५।१।७१ | ५३ |
| **अण्** (-अ)प्रत्ययविधानम्। | ५।१।७२, ५।१।१०५ | ५४, ७३ |
| **अण्** (-अ)प्रत्ययान्त - **क्रव्याद**निपातनम्। | ५।१।१५१ | १०६ |
| **टक्** (-अ)प्रत्ययविधानम्। | ५।१।७४, ५।१।७५ | ५६ |
| | ५।१।८३ - ५।१।८७, ५।१।१५२ | ६१-६३, १०६ |
| **टक्** (-अ)प्रत्ययान्त - **राजघादि**निपातनम्। | ५।१।८८, ५।१।८९ | ६४ |
| **खि** (-इ)प्रत्ययविधानम्। | ५।१।९० | ६४ |
| **इ**प्रत्ययविधानम्। | ५।१।९७ - ५।१।१०० | ६८-६९ |
| **अ**प्रत्ययविधानम्। | ५।१।१०१, ५।१।१३४ - ५।१।१३७ | ६९, ८९-९१ |
| **ट** (-अ)प्रत्ययविधानम्। | ५।१।१०२ - ५।१।१०४, | ७०-७२ |
| | ५।१।१३८ - ५।१।१४१ | ९२-९३ |
| **ख** (-अ)प्रत्ययविधानम्। | ५।१।१०५ - ५।१।१०७ | ७३-७४ |
| | ५।१।१०९ - ५।१।११३ | ७४-७७ |
| | ५।१।१३०, ५।१।१३१ | ८५-८६ |
| **ख** (-अ)प्रत्ययान्त-**द्विषन्तपादि**निपातनम्। | ५।१।१०८ | ७४ |
| | ५।१।११४, ५।१।११५ | ७७ |
| **खश्** (-अ)प्रत्ययविधानम्। | ५।१।११७ - ५।१।१२६ | ७८-८३ |
| **खश्** (-अ) प्रत्ययान्त - **इरम्मद**निपातनम्। | ५।१।१२७ | ८३ |
| **खिष्णु** (-इष्णु)प्रत्ययविधानम्। | ५।१।१२८ | ८३ |
| **खुकञ्** (-उक)प्रत्ययविधानम्। | ५।१।१२८ | ८३ |
| **खनट्** (-अन)प्रत्ययविधानम्। | ५।१।१२९ | ८४ |
| **खड्** (-अ)प्रत्ययविधानम्। | ५।१।१३१ | ८६ |
| **डुघ** (-उघ)प्रत्ययविधानम्। | ५।१।१४५ | ९६ |
| **विण्**प्रत्ययविधानम्। | ५।१।१४६ | ९६ |
| **मन्**प्रत्ययविधानम्। | ५।१।१४६ | ९६ |
| **वन्**प्रत्ययविधानम्। | ५।१।१४७ | ९७ |
| **क्वनिप्** (-वन्)प्रत्ययविधानम्। | ५।१।१४७, ५।१।१६६, ५।१।१६७ | ९७, ११६ |
| **विच्**प्रत्ययविधानम्। | ५।१।१४७ | ९७ |
| **क्विप्**प्रत्ययविधानम्। | ५।१।७१, ५।१।१४८ - ५।१।१५० | ५३, ९८-१०५ |
| | ५।१।१५२, | १०६ |
| | ५।१।१६१ - ५।१।१६५ | १११-११५ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| **क्विप्**प्रत्ययान्त - **क्रव्यात्**निपातनम् । | ५।१।१५१ | १०६ |
| **सक्** (-स)प्रत्ययविधानम् । | ५।१।१५२ | १०६ |
| **इन्**प्रत्ययविधानम् । | ५।१।१५९ | ११० |
| ङ्वनिप् (-वन्)प्रत्ययविधानम् । | ५।१।१७२ | ११९ |
| अतृ (-अत्)प्रत्ययविधानम् । | ५।१।१७३ | ११९ |
| क्तवतु (-तवत्)प्रत्ययविधानम् । | ५।१।१७४ | १२० |


## पञ्चमाध्यायस्य द्वितीयः पादः । कृदन्तप्रकरणम् ।

## सूत्रसंख्या - ९३ । पत्राङ्कः १२१ - १८७


| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| भूते **परोक्षा**-विभक्तिविधानम् । | ५।२।१ | १२१ |
| भूते परोक्षाविषये **क्वसु** (-वस्) - **कान** (-आन)प्रत्ययविधानम् । | ५।२।२ | १२२ |
| भूते **क्वसु** (-वस्) - **कान** (-आन)प्रत्ययान्त - **ईयिवसा**दिनिपातनम् । | ५।२।३ | १२४ |
| भूते **अद्यतनी**-विभक्तिविधानम् । | ५।२।४-५।२।६ | १२५-१२६ |
| भूतेऽनद्यतने **ह्यस्तनी**-विभक्तिविधानम् । | ५।२।७, ५।२।८, ५।२।१० | १२७, १२९ |
| | ५।२।१३, ५।२।१४ | १३१-१३२ |
| भूतेऽनद्यतने **भविष्यन्ती**-विभक्तिविधानम् । | ५।२।९, ५।२।१० | १२८, १२९ |
| भूतेऽनद्यतने **परोक्षा**-विभक्तिविधानम् । | ५।२।११ - ५।२।१३ | १२९-१३१ |
| भूतेऽनद्यतने **अद्यतनी**-विभक्तिविधानम् । | ५।२।१५ | १३२ |
| भूतेऽनद्यतने **वर्तमाना**-विभक्तिविधानम् । | ५।२।१६ | १३३ |
| भूते वर्तमान इव **वर्तमाना**-विभक्तिविधानम् । | ५।२।१७ | १३४ |
| भूते **वर्तमाना**-विभक्तिविधानम् । | ५।२।१८ | १३५ |
| सति **वर्तमाना**-विभक्तिविधानम् । | ५।२।१९ | १३५ |
| सति **शतृ** (-अत्) - **आनश्** (-आन)प्रत्ययविधानम् । | ५।२।२० | १३६ |
| एष्यति **स्यसहित आनश्** (-आन)प्रत्ययविधानम् । | | |
| सति-असति **शतृ** (-अत्) - **आनश्** (-आन)प्रत्ययविधानम् । | ५।२।२१ | १४० |
| सति **क्वसु** (-वस्)प्रत्ययविधानम् । | ५।२।२२ | १४१ |
| सति **शान** (-आन)प्रत्ययविधानम् । | ५।२।२३, ५।२।२४ | १४२ |
| सति **अतृश्** (-अत्)प्रत्ययविधानम् । | ५।२।२५, ५।२।२६ | १४३ |
| सति शीले-धर्मे-साधौ **तृन्** (-तृ)प्रत्ययविधानम् । | ५।२।२७ | १४४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| सति शीलादौ **इष्णु**प्रत्ययविधानम्। | ५।२।२८, ५।२।२९ | १४५, १४६ |
| सति शीलादौ **ष्णुक्** (-ष्णु)प्रत्ययविधानम्। | ५।२।३० | १४६ |
| सति शीलादौ **स्नु**प्रत्ययविधानम्। | ५।२।३१ | १४७ |
| सति शीलादौ **क्नु** (-नु)प्रत्ययविधानम्। | ५।२।३२ | १४७ |
| सति शीलादौ **उ**प्रत्ययविधानम्। | ५।२।३३ | १४८ |
| सति शीलादौ उप्रत्ययान्त-**विन्दु**-**इच्छु**निपातनम्। | ५।२।३४ | १४८ |
| सति शीलादौ **आरु**प्रत्ययविधानम्। | ५।२।३५ | १४८ |
| सति शीलादौ **रु**प्रत्ययविधानम्। | ५।२।३५ | १४९ |
| सति शीलादौ **आलु**प्रत्ययविधानम्। | ५।२।३७ | १४९ |
| सति शीलादौ **डौ सासहि** आदिनिपातनम्। | ५।२।३८ | १५० |
| सति शीलादौ डौ **सस्त्रि** आदिनिपातनम्। | ५।२।३९ | १५१ |
| सति शीलादौ **उकण्** (-उक)प्रत्ययविधानम्। | ५।२।४०, ५।२।४१ | १५१, १५३ |
| सति शीलादौ **अन**प्रत्ययविधानम्। | ५।२।४२ - ५।२।४६ | १५३-१५८ |
| सति शीलादौ **अन**प्रत्ययनिषेधः। | ५।२।४५ | १५७ |
| सति शीलादौ **ऊक**प्रत्ययविधानम्। | ५।२।४७, ५।२।४८ | १५९, १६० |
| सति शीलादौ **घिनण्** (-इन्)प्रत्ययविधानम्। | ५।२।४९ - ५।२।६६ | १६०-१६७ |
| सति शीलादौ **णक** (-अक)प्रत्ययविधानम्। | ५।२।६७ - ५।२।६९ | १६७-१६९ |
| सति शीलादौ **टाक** (-आक)प्रत्ययविधानम्। | ५।२।७० | १६९ |
| सति शीलादौ **इन्**प्रत्ययविधानम्। | ५।२।७१, ५।२।७२ | १७० |
| सति शीलादौ **मरक्** (-मर)प्रत्ययविधानम्। | ५।२।७३ | १७१ |
| सति शीलादौ **घुर** (-उर)प्रत्ययविधानम्। | ५।२।७४ | १७१ |
| सति शीलादौ **किद् घुर** (-उर)प्रत्ययविधानम्। | ५।२।७५ | १७१ |
| सति शीलादौ **किद् रु-रुक-लुक**प्रत्ययविधानम्। | ५।२।७६ | १७२ |
| सति शीलादौ **द्वरप्** (-वर)प्रत्ययविधानम्। | ५।२।७७ | १७२ |
| सति शीलादौ **द्वरप्** (-वर)प्रत्ययान्त-**गत्वर**निपातनम्। | ५।२।७८ | १७२ |
| सति शीलादौ **र**प्रत्ययविधानम्। | ५।२।७९ | १७२ |
| सति शीलादौ नजिङ् (-नज्)प्रत्ययविधानम्। | ५।२।८० | १७३ |
| सति शीलादौ **वर**प्रत्ययविधानम्। | ५।२।८१ | १७४ |
| सति शीलादौ **वर**प्रत्ययान्त-**यायावर** निपातनम्। | ५।२।८२ | १७४ |
| सति शीलादौ **क्विप्**प्रत्ययान्त-**दिद्युदा**दिनिपातनम्। | ५।२।८३ | १७४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| सति **डु** (-उ)प्रत्ययविधानम् । | ५।२।८४ | १७८ |
| सति कर्तरि करणे **इत्र**प्रत्ययविधानम् । | ५।२।८५ - ५।२।८७ | १७९ |
| सति करणे त्रट् (-त्र)प्रत्ययविधानम् । | ५।२।८८, ५।२।८९ | १८०, १८१ |
| सति करणे **त्र**प्रत्ययविधानम् । | ५।२।९० | १८१ |
| सति कर्मणि **त्रट्** (-त्र)प्रत्ययान्त-**धात्री** निपातनम् । | ५।२।९१ | १८१ |
| सति **क्त** (-त)प्रत्ययविधानम् । | ५।२।९२ | १८२ |
| सति **उण्**(-उ) आदिप्रत्ययविधानम् । | ५।२।९३ | १८६ |

## पञ्चमाध्यायस्य तृतीयः पादः । कृदन्तप्रकरणम् ।

## सूत्रसंख्या - १४१ । पत्राङ्कः १८८ - २७३

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| वर्त्स्यति **इन्**प्रत्ययान्त - **गमी**आदिनिपातनम् । | ५।३।१ | १८८ |
| वर्त्स्यति **क्त** (-त)प्रत्ययविधानम् । | ५।३।२, ५।३।३ | १८९ |
| वर्त्स्यति **भविष्यन्ती** - विभक्तिविधानम् । | ५।३।२, ५।३।४ | १८९, १९० |
| | ५।३।८ - ५।३।११, ५।३।१३ | १९१-१९२-१९३ |
| वर्त्स्यति **श्वस्तनी** - विभक्तिविधानम् । | ५।३।५, ५।३।६ | १९० |
| | ५।३।८ - ५।३।११ | १९१-१९२ |
| वर्त्स्यति **वर्तमाना** - विभक्तिविधानम् । | ५।३।७ - ५।३।११, ५।३।१२ | १९०-१९२-१९३ |
| वर्त्स्यति **सप्तमी** - विभक्तिविधानम् । | ५।३।१२ | १९३ |
| वर्त्स्यति **तुम्**प्रत्ययविधानम् । | ५।३।१३ | १९३ |
| वर्त्स्यति **णकच्** (-अक)प्रत्ययविधानम् । | ५।३।१३ | १९३ |
| वर्त्स्यति **अण्** (-अ)प्रत्ययविधानम् । | ५।३।१४ | १९४ |
| वर्त्स्यति **घञ्** (-अ)आदिप्रत्ययविधानम् । | ५।३।१५ | १९५ |
| कर्तरि **घञ्** (-अ)प्रत्ययविधानम् । | ५।३।१६, ५।३।१७ | १९५ |
| भावा-ऽकर्त्रोः **घञ्** (-अ)प्रत्ययविधानम् । | ५।३।१८ - ५।३।२२ | १९६-१९८ |
| | ५।३।५४ - ५।३।८१ | २१४-२२३ |
| भावा-ऽकर्त्रोः **अल्** (-अ)प्रत्ययविधानम् । | ५।३।२३ | १९९ |
| | ५।३।२५ - ५।३।२८ | २००-२०१ |
| | ५।३।३० - ५।३।३२ | २०३-२०४ |
| | ५।३।४१ - ५।३।४४ | २०८-२१० |
| | ५।३।४७ - ५।३।५३ | २११-२१३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| भावा-ऽकर्त्रोः **अल्** (-अ)प्रत्ययान्त - **न्यादा**दिनिपातनम्। | ५।३।२४, ५।३।२९ | २००, २०३ |
| | ५।३।३३ - ५।३।३७ | २०५-२०७ |
| करणे **अल्** (-अ)प्रत्ययान्त - **विघना**दिनिपातनम्। | ५।३।३८ - ५।३।४० | २०७-२०८ |
| भावे **अल्** (-अ)प्रत्ययविधानम्। | ५।३।४५, ५।३।४६ | २१० |
| भावा-ऽकर्त्रोः **क**(-अ)प्रत्ययविधानम्। | ५।३।८२ | २२४ |
| भावा-ऽकर्त्रोः **अथु**प्रत्ययविधानम्। | ५।३।८३ | २२५ |
| भावा-ऽकर्त्रोः **त्रिमक्** (-त्रिम)प्रत्ययविधानम्। | ५।३।८४ | २२६ |
| भावा-ऽकर्त्रोः **न**प्रत्ययविधानम्। | ५।३।८५ | २२६ |
| भावा-ऽकर्त्रोः **नङ्**(-न)प्रत्ययविधानम्। | ५।३।८६ | २२७ |
| भावा-ऽकर्त्रोः **कि** (-इ)प्रत्ययविधानम्। | ५।३।८७ | २२७ |
| आधारे **कि** (-इ)प्रत्ययविधानम्। | ५।३।८८ | २२८ |
| भावा-ऽकर्त्रोः **कि** (-इ)प्रत्ययान्त-**अन्तर्धि** निपातनम्। | ५।३।८९ | २२८ |
| भावे **अन**प्रत्ययविधानम्। | ५।३।९० | २२८ |
| भावे **ञिन्** (-इन्)प्रत्ययविधानम्। | ५।३।९० | २२८ |
| भावा-ऽकर्त्रोः स्त्रियां **क्ति** (-ति)प्रत्ययविधानम्। | ५।३।९१ - ५।३।९३ | २२९-२३२ |
| भावा-ऽकर्त्रोः स्त्रियां **क्ति** (-ति)प्रत्ययान्त - **साति** आदिनिपातनम्। | ५।३।९४ | २३२ |
| भावे स्त्रियां **क्ति** (-ति)प्रत्ययविधानम्। | ५।३।९५, ५।३।९६ | २३३ |
| भावे स्त्रियां **क्यप्** (-य)प्रत्ययविधानम्। | ५।३।९७, ५।३।९८ | २३४ |
| भावा-ऽकर्त्रोः स्त्रियां **क्यप्** (-य)प्रत्ययविधानम्। | ५।३।९९, ५।३।१०० | २३४-२३५ |
| भावा-ऽकर्त्रोः स्त्रियां **श**(-अ)प्रत्ययविधानम्। | ५।३।१०० | २३५ |
| भावा-ऽकर्त्रोः स्त्रियां **मृगया**दिनिपातनम्। | ५।३।१०१ | २३६ |
| भावा-ऽकर्त्रोः स्त्रियां **य**प्रत्ययविधानम्। | ५।३।१०२ - ५।३।१०४ | २३७ |
| भावा-ऽकर्त्रोः स्त्रियां **अ**प्रत्ययविधानम्। | ५।३।१०४ - ५।३।१०६ | २३७-२३९ |
| भावा-ऽकर्त्रोः स्त्रियां **अङ्**(-अ)प्रत्ययविधानम्। | ५।३।१०७ - ५।३।११० | २४०-२४४ |
| भावा-ऽकर्त्रोः स्त्रियां **अन**प्रत्ययविधानम्। | ५।३।१११ - ५।३।११३ | २४५-२४६ |
| भावा-ऽकर्त्रोः स्त्रियां **क्विप्**प्रत्ययविधानम्। | ५।३।११४, ५।३।११५ | २४६, २४९ |
| भावे स्त्रियां **ञ**(-अ)प्रत्ययविधानम्। | ५।३।११६ | २५१ |
| भावा-ऽकर्त्रोः स्त्रियां **अनि**प्रत्ययविधानम्। | ५।३।११७, ५।३।११८ | २५२, २५३ |
| भावा-ऽकर्त्रोः स्त्रियां **इञ्** (-इ)प्रत्ययविधानम्। | ५।३।११९ | २५३ |
| भावा-ऽकर्त्रोः स्त्रियां **णक**(-अक)प्रत्ययविधानम्। | ५।३।१२० - ५।३।१२२ | २५४-२५८ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| भावे क्लीबे **क्त** (-त)प्रत्ययविधानम् । | ५।३।१२४ | २५९ |
| भावे क्लीबे **अनट्** (-अन)प्रत्ययविधानम् । | ५।३।१२५ | २५९ |
| कर्तरि **अनट्** (-अन)प्रत्ययविधानम् । | ५।३।१२६ | २६० |
| कर्तरि **अनट्** (-अन)प्रत्ययान्त-**कारणं** निपातनम् । | ५।३।१२७ | २६१ |
| कर्मापादाने **अनट्** (-अन)प्रत्ययविधानम् । | ५।३।१२८ | २६१ |
| करणाऽऽधारे **अनट्** (-अन)प्रत्ययविधानम् । | ५।३।१२९ | २६२ |
| करणाऽऽधारे **घ** (-अ)प्रत्ययविधानम् । | ५।३।१३०, ५।३।१३७ | २६३, २६९ |
| करणाऽऽधारे **घ** (-अ)प्रत्ययान्त-गोचर आदिनिपातनम् । | ५।३।१३१ | २६५ |
| करणाऽऽधारे **घञ्** (-अ)प्रत्ययविधानम् । | ५।३।१३२, ५।३।१३३, ५।३।१३७ | २६६, २६७-२६९ |
| करणाऽऽधारे **घञ्** (-अ)प्रत्ययान्त-**न्याय** आदिनिपातनम् । | ५।३।१३४ - ५।३।१३६ | २६७-२६९ |
| करणाऽऽधारे **ड** (-अ)प्रत्ययविधानम् । | ५।३।१३७ | २६९ |
| करणाऽऽधारे **डर** (-अर)प्रत्ययविधानम् । | ५।३।१३७ | २६९ |
| करणाऽऽधारे **इक**प्रत्ययविधानम् । | ५।३।१३७ | २६९ |
| करणाऽऽधारे **इकवक**प्रत्ययविधानम् । | ५।३।१३७ | २६९ |
| धातोः स्वरूपेऽर्थे **इ**प्रत्ययविधानम् । | ५।३।१३८ | २६९ |
| धातोः स्वरूपेऽर्थे **कि** (-इ)प्रत्ययविधानम् । | ५।३।१३८ | २६९ |
| धातोः स्वरूपेऽर्थे **श्तिव्** (-ति)प्रत्ययविधानम् । | ५।३।१३८ | २६९ |
| भाव-कर्मणोः **खल्** (-अ)प्रत्ययविधानम् । | ५।३।१३९ | २७० |
| च्व्यर्थे **खल्** (-अ)प्रत्ययविधानम् । | ५।३।१४० | २७१ |
| भाव-कर्मणोः **अन**प्रत्ययविधानम् । | ५।३।१४१ | २७२ |


## पञ्चमाध्यायस्य चतुर्थः पादः । कृदन्तप्रकरणम् ।

## सूत्रसंख्या - ९० । पत्राङ्कः २७४-३३४


| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| वर्तमानसामीप्ये **वर्तमानवत्** - प्रत्ययविधानम् । | ५।४।१ | २७४ |
| आशंस्ये **भूतवत्** - **वर्तमानवच्च** प्रत्ययविधानम् । | ५।४।२ | २७५ |
| आशंस्ये क्षिप्रार्थ उपपदे **भविष्यन्ती** - विभक्तिविधानम् । | ५।४।३ | २७६ |
| आशंस्ये आशंसार्थ उपपदे **सप्तमी** - विभक्तिविधानम् । | ५।४।३ | २७६ |
| सम्भावने **भूतवत्**- प्रत्ययविधानम् । | ५।४।४ | २७७ |
| अनद्यतनविहितप्रत्ययाभावविधानम् । | ५।४।५ - ५।४।८ | २७८-२८१ |

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| भविष्यति सप्तम्यर्थे **क्रियातिपत्ति** - विभक्तिविधानम् । | ५।४।९ | २८१ |
| भूते सप्तम्यर्थे **क्रियातिपत्ति** - विभक्तिविधानम् । | ५।४।१०, ५।४।११ | २८२, २८३ |
| क्षेपे **वर्तमाना** - विभक्तिविधानम् । | ५।४।१२ | २८४ |
| क्षेपे **वर्तमाना-सप्तमी**- विभक्तिविधानम् । | ५।४।१३ | २८४ |
| क्षेपे **सप्तमी-भविष्यन्ती** च विभक्तिविधानम् । | ५।४।१४ | २८५ |
| अश्रद्धा-ऽमर्षे अकिंवृत्ते किंवृत्ते च **सप्तमी-भविष्यन्ती** च विभक्तिविधानम् । | ५।४।१५ | २८६ |
| अश्रद्धा-ऽमर्षे **भविष्यन्ती** - विभक्तिविधानम् । | ५।४।१६ | २८७ |
| अश्रद्धा-ऽमर्षे **सप्तमी** - विभक्तिविधानम् । | ५।४।१७ | २८७ |
| क्षेपेऽश्रद्धा-ऽमर्षे **सप्तमी** - विभक्तिविधानम् । | ५।४।१८ | २८७ |
| चित्रे **सप्तमी**-विभक्तिविधानम् । | ५।४।१९ | २८८ |
| चित्रे **भविष्यन्ती** - विभक्तिविधानम् । | ५।४।२० | २८९ |
| बाढे **सप्तमी** - विभक्तिविधानम् । | ५।४।२१ | २८९ |
| संभावनेऽलमर्थे तदर्थानुक्तौ **सप्तमी** - विभक्तिविधानम् । | ५।४।२२ | २९० |
| संभावनेऽलमर्थे **सप्तमी** - **भविष्यन्त्या**दिविभक्तिविधानम् । | ५।४।२३ | २९१ |
| सति **सप्तमी** - **वर्तमाना** च विभक्तिविधानम् । | ५।४।२४ | २९१ |
| वर्त्स्यति हेतु-फले **सप्तमी** - **भविष्यन्ती** च विभक्तिविधानम् । | ५।४।२५ | २९२ |
| कामोक्तौ **सप्तमी** - विभक्तिविधानम् । | ५।४।२६ | २९३ |
| कामोक्तौ **सप्तमी** - **पञ्चमी** च विभक्तिविधानम् । | ५।४।२७ | २९३ |
| विध्यादिविशिष्टेषु **सप्तमी** - **पञ्चमी** च विभक्तिविधानम् । | ५।४।२८ | २९४ |
| प्रैषादिविशिष्टेषु **कृत्यप्रत्ययाः** - **पञ्चमी** च विभक्तिविधानम् । | ५।४।२९ | २९६ |
| ऊर्ध्वमौहूर्तिके प्रैषादिविशिष्टेषु **सप्तमी-कृत्याः** - **पञ्चमी** च विभक्तिविधानम् । | ५।४।३० | २९६ |
| ऊर्ध्वमौहूर्तिके प्रैषादिविशिष्टेषु **पञ्चमी** - विभक्तिविधानम् । | ५।४।३१ | २९७ |
| अध्येषणायां **पञ्चमी** - विभक्तिविधानम् । | ५।४।३२ | २९७ |
| अवसरे **तुम्-तव्यश्च** प्रत्ययविधानम् । | ५।४।३३ | २९७ |
| यदि **सप्तमी** - विभक्तिविधानम् । | ५।४।३४ | २९८ |
| शक्तेऽर्हे च **कृत्याः सप्तमी** च विभक्तिविधानम् । | ५।४।३५ | २९८ |
| आवश्यके आधमर्ण्ये च **णिन्** (-इन्)- **कृत्याश्च** प्रत्ययविधानम् । | ५।४।३६ | २९९ |
| अर्हे **तृच्** (-तृ)प्रत्ययविधानम् । | ५।४।३७ | ३०० |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | सूत्राङ्कः | पत्राङ्कः |
|---|---|---|
| आशिषि **आशीः-पञ्चमी** च विभक्तिविधानम् । | ५।४।३८ | ३०० |
| माङि **अद्यतनी** - विभक्तिविधानम् । | ५।४।३९ | ३०१ |
| माङि स्मे **अद्यतनी** - **ह्यस्तनी** च विभक्तिविधानम् । | ५।४।४० | ३०१ |
| धातोः संबन्धे अयथाकालप्रत्ययविधानम् । | ५।४।४१ | ३०१ |
| भृशा-ऽऽभीक्ष्ण्ये सर्वविभक्तिवचने पञ्चमीसंबन्धिनौ **हि-स्वौ,** तद्युष्मदि च पञ्चमीसंबन्धिनौ **त-ध्वमौ** प्रत्ययौ विधानम् । | ५।४।४२ | ३०२ |
| समुच्चये सामान्यार्थधातुसंबन्धे **हि-स्वौ,** तद्युष्मदि च **त-ध्वमौ** प्रत्ययौ विधानम् । | ५।४।४३ | ३०५ |
| निषेधाद्यर्थेषु **क्त्वा** (-त्वा)प्रत्ययविधानम् । | ५।४।४४ - ५।४।४८ | ३०७-३१० |
| | ५।४।८४ - ५।४।८८ | ३३०-३३३ |
| आभीक्ष्ण्याद्यर्थेषु **खणम्** (-अम्)प्रत्ययविधानम् । | ५।४।४८ - ५।४।५३ | ३१०-३१२ |
| **णम्** (-अम्) प्रत्ययविधानम् । | ५।४।५४ - ५।४।८८ | ३१३-३३३ |
| इच्छार्थे धातावुपपदे तुल्यकर्तृके **सप्तमी** - विभक्तिविधानम् । | ५।४।८९ | ३३४ |
| शक्याद्यर्थेषु धातुषु समर्थार्थेषु नामसु च इच्छार्थेषु धातूपपदेषु **तुम्**प्रत्ययविधानम् । | ५।४।९० | ३३४ |


•••

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितं
## श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

# श्रीसिद्धहेमचन्द्रशब्दानुशासने अज्ञातकर्तृका ढुण्ढिका ॥

## ॥ अथ पञ्चमाध्यायस्य प्रथमः पादः ॥

### आ तुमोऽत्यादिः कृत् ॥ ५।१।१ ॥

**[आ]** आ प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[तुमः]** तुम् पञ्चमी ङसि ।

**[अत्यादिः]** तिरादिर्यस्याऽसौ त्यादिः । न त्यादिरत्यादिः । प्रथमा सि ।

**[कृत्]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कृत् । क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[घनघात्यः]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्यत इति घनः । 'मूर्त्ति-निचिताऽभ्रे घनः' (५।३।३७) अल्प्र०-घनादेशश्च । घन-हन् । घनेन हन्यते = घनघात्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति घात्' (४।३।१००) हन्० → "घात्"आदेशः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । 'कारकं कृता' (३।१।६८) समासः ।

**[उदकेविशीर्णम्]** कृ (१५२९) - मृ (१५३०)-'शृश् हिंसायाम्' (१५३१) शृ, विपूर्व० । विशीर्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । सि-अम् । उदके विशीर्णम् । 'क्तेन' (३।१।९२) समासः । 'तत्पुरुषे कृति' (३।२।२०) इत्यलुप् ।

**[गोदायो व्रजति]** 卐गो 'दां दाने' (७) दा । दीयते । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत ऐः कृञ्औ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । गवां दायः = गोदायः । 'ङस्युक्तं कृता' (३।१।४९) इति समासः ।

---

卐 श० म० न्या० - 'डुदांग्क् दाने' (११३८) दा । गां ददातीति गोदायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'आत ऐः कृञ्औ' (४।३।५३) आ० → ऐ० । तस्यायादेशः । 'ङस्युक्तं कृता' (३।१।४९) समासः । यद्वा गां दास्यतीति 'कर्मणोऽण्' (५।३।१४) इत्यणि गोदायो व्रजतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रणिंस्ते ]** 'णिसुकि चुम्बने' (११२१) णिस्, प्रपूर्व० । 'पाठे धात्वादेर्णो नः' (२।३।९७) निस् । वर्त्त० ते । 'उदितः स्वरान्नोऽन्तः (४।४।९८) नोऽन्तः । अदुरुपसर्गान्तरो ण-हिनु-मीनाऽऽनेः' (२।३।७७) न० → ण० ।।छा।

## बहुलम् ।। ५।१।२ ।।

**[ बहुलम् ]** बहु 'लांक् आदाने' (१०६८) ला । बहूनर्थान् लातीति बहुलम् । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'क्रियाविशेषणात्' (२।२।४१) अम् । प्रथमं 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक्, ततोऽम् ।

**[ पादहारकः ]** पाद 'हृंग् हरणे' (८८५) हृ । पादाभ्यां ह्रियते = पादहारकः । अनेन 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'कारकं कृता' (३।१।६८) समासः ।

**[ गलेचोपकः ]** गले 'चुप मन्दायाम्' (३४२) चुप् । गले +चुप्यत इति । अनेन 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ मोहनीयं कर्म ]** 'मुहौच् वैचित्त्ये' (१२३८) मुह् । मुह्यत्यनेनात्मेति मोहनीयम् । अनेन अनीयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ स्नानीयं चूर्णम् ]** 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । स्नात्यनेनेति । अनेन अनीयप्र० । सि-अम् ।

**[ यानीयोऽश्वः ]** 'यांक् प्रापणे' (१०६२) या । याति = गच्छत्यनेनेति यानीयः । अनेन अनीयप्र० । अश्व प्रथमा सि ।

**[ दानीयोऽतिथिः ]** 'डुदांग्क् दाने' (११३८) दा । दीयते तस्मा इति दानीयः । अनेन अनीयप्र० ।

**[ संप्रदानम् ]** सम्-प्रपूर्व० दा । संप्रदीयतेऽस्मा इति संप्रदानम् । अनेन अनट्प्र० ।

**[ स्पृहणीया विभूतिः ]** 'स्पृहण् ईप्सायाम्' (१९२८) स्पृह । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । स्पृह्यतेऽस्यै । अनेन अनीयप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'स्पृहेर्व्याप्यं वा' (२।२।२६) इति व्याप्यस्य वा संप्रदानसंज्ञा ।

**[ समावर्त्तनीयो गुरुः ]** 'वृतूङ् वर्त्तने' (९५५) वृत्, सम्-आङ्पूर्व० । समावर्त्तते तस्मादिति । अनेन अनीयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ उद्वेजनीयः खलः ]** उत् 'ओविजैति भय-चलनयोः' (१४६८) विज् । उद्विजन्ते लोका अस्मात् । अनेन अनीयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । खल प्रथमा सि ।

**[ स्थानीयं नगरम् ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्षस्कार (१)/सूत्र(२९)स्था । तिष्ठन्त्यस्मिन्निति स्थानीयं नगरम् । अनेन अनीयप्र० ।

**[ शयनीयः पल्यङ्कः ]** शेतेऽस्मिन्निति शयनीयः । अनेन अनीयप्र० । 'एदैतोऽयाय्' (१।२।२३) अय् । पल्यङ्क प्रथमा सि ।।छा।

## कर्त्तरि ।। ५।१।३ ।।

**[ कर्त्तरि ]** 'डुकृंग् करणे' (८८८) कृ । करोतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर्, तस्मिन् । 'अर्ङौ च' (१।४।३९) अर् ।

+ बृहद्वृत्तौ - श० म० न्यासानुसन्धाने च - चोप्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कारकः ]** 'डुकृंग् करणे' (८८८) कृ । करोतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि ।

**[ कर्ता ]** कृ । करोतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ पचः ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ नन्दनः ]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे 'णिग्' (३।४।२०) णिग्प्र० । नन्दयतीति । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छा।

## व्याप्ये घुर-केलिम-कृष्टपच्यम् ॥ ५।१।४ ॥

**[ व्याप्ये ]** व्याप्य सप्तमी ङि ।

**[ घुरकेलिमकृष्टपच्यम् ]** घुरश्च केलिमश्च कृष्टपच्यश्च = घुरकेलिमकृष्टपच्यम् ।

**[ भङ्गुरं काष्ठम् ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । भनक्ति काष्ठं देवदत्तः, स एवं विवक्ष्यते नाहं भनज्मि, किन्तु भज्यते काष्ठं स्वयमेवेत्येवंशीलम् । 'भञ्जि-भासि-मिदो घुरः' (५।२।७४) घुरप्र० → उर । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । सि-अम् ।

**[ भिदुरः कुशूलः ]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्ति कुसू(शू)लं देवदत्तः, स एवं विवक्ष्यते नाहं भिनद्मि, किन्तु भिद्यते स्वयमेवेत्येवंशीलः । 'वेत्ति-च्छिद-भिदः कित्' (५।२।७५) घुरप्र० → उर ।

**[ छिदुरा रज्जुः ]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छिनत्ति रज्जुं देवदत्तः, स एवं विवक्ष्यते नाहं छिनद्मि, किन्तु छिद्यते स्वयमेवेत्येवंशीलः । 'वेत्ति-च्छिद-भिदः कित्' (५।२।७५) घुरप्र० → उर । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भासुरः ]** 'भासि दीप्तौ' (८४६) भास् । भासत इत्येवंशीलः । 'भञ्जि-भासि-मिदो घुरः' (५।२।७४) घुरप्र० → उर ।

**[ मेदुरः ]** 'ञिमिदाच् स्नेहने' (११८०) मिद् । मेद्यतीत्येवंशीलः । 'भञ्जि-भासि-मिदो घुरः' (५।२।७४) घुरप्र० → उर । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ विदुरः ]** 'विदक् ज्ञाने । (१०९९) विद् । वेत्तीत्येवंशीलः । 'वेत्ति-च्छिद-भिदः कित्' (५।२।७५) घुरप्र० → उर । सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ पचेलिमा माषाः ]** 'डुपचींष् पाके' (८९२) पच् । पचति माषान् देवदत्तः, स एवं विवक्षते नाहं पचामि, किन्तु पच्यते(न्ते) स्वयमेव । 'विहा-विशा-पचि-भिद्यादेः केलिमः' (उणा० ३५४) केलिमप्र० → एलिम । प्रथमा जस् ।

**[ भिदेलिमास्तण्डुलाः ]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्ति तण्डुलान् देवदत्तः, स एवं विवक्षते नाहं भिनद्मि, किन्तु भिद्यते(न्ते) स्वयमेव = भिदेलिमाः । 'विहा-विशा-पचि-भिद्यादेः केलिमः' (उणा० ३५४) केलिमप्र० → एलिम । प्रथमा जस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कृष्टपच्याः शालयः ]** कृष्ट 'डुपचींष् पाके' (८९२) पच् । कृष्टे पच्यन्ते स्वयमेव = कृष्टपच्याः । अत एव सूत्रनिर्देशात् यप्र० । प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छा।

### संगतेऽजर्यम् ॥ ५।१।५ ॥

**[ संगते ]** सम् अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । संगमनं = संगतम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक्, तस्मिन् ।

**[ अजर्यम् ]** अजर्य सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ अजर्यमार्यसंगतम् ]** 'जॄष् जरसि' (११४५) जॄ । न जीर्यतीति । अनेन यप्र० निपात्यते, गु० अर् । 'नञत्' (३।२।१२५) न० → अ० । 'यांक् प्रापणे' (१०६२) या । आरात् दूरे याताः सर्वहेयधर्मेभ्य इति आर्याः । यद्वा आरात् दूरे याताः सर्वपापेभ्यः-कर्मभ्य इत्यार्याः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । आर्याणां संगतम् ।

**[ "तेन संगतमार्येण रामाजर्यं कुरु द्रुतम्" ]** 'ऋं प्रापणे च' (२६) ऋ । 'ऋंक् गतौ' (११३५) ऋ । अर्य्यन्ते = प्राप्यन्ते सदाचारेणेति आर्याः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । आर्याणां संगतं = आर्यसंगतम् । मैत्रीकरणमित्यर्थः ।

**[ अजरः पटः ]** न जीर्यतीति अजरः । 'अच्' (५।१।४९) अच्प्र० → अ । गु० अर् ।

**[ अजरिता कम्बलः ]** न जीर्यतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गु० अर् । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'ऋदुशनस् - पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । कम्बल प्रथमा सि ।

**[ अजार्यं संगतेन ]** न जीर्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । सि-अम् ।।छा।

### रुच्या-ऽव्यथ्य-वास्तव्यम् ॥ ५।१।६ ॥

**[ रुच्याऽव्यथ्यवास्तव्यम् ]** रुच्यश्च अव्यथ्यश्च वास्तव्यश्च = रुच्याऽव्यथ्यवास्तव्यम् ।

**[ रुच्यो मोदको मैत्राय ]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचत इति रुच्यः । अनेन क्यप्प्र० निपातः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अव्यथ्यो मुनिः ]** 'व्यथिष् भय-चलनयोः' (१००२) व्यथ्, नञ्पूर्व० । न व्यथत इति अव्यथ्यः । अनेन क्यप्प्र० निपातः । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वास्तव्यः ]** 'वसं निवासे' (९९९) वस् । वसतीति वास्तव्यः । अनेन तव्यणप्रत्ययो निपात्यते-तव्य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छा।

### भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा ॥ ५।१।७ ॥

**[ भव्यगेयजन्यरम्याऽऽपात्याऽऽप्लाव्यम् ]** भव्यश्च गेयश्च जन्यश्च रम्यश्च आपात्यश्च आप्लाव्यश्च = भव्यगेयजन्यरम्याऽऽपात्याऽऽप्लाव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ नवा ]** नवा प्रथमा सि ।

**[ भव्यः ]** 'भू सत्तायाम्' (१) भू । 卐 भवत्यसाविति । अनेन भव्यनिपातः ।

**[ भव्यमनेन ]** भूयते इति भव्यम् । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । सि-अम् । इदम् तृतीया टा । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'टौस्यनः' (२।१।३७) इद० → अन० । 'टा-ङसोरिन-स्यौ' (१।४।५) टा० → इन० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[ गेयो माणवकः साम्नाम् ]** कैं (३६)-'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । गायतीति । अनेन गेयनिपातः ।

**[ गेयानि माणवकेन सामानि ]** गीयते(न्ते) = गेयानि । 'य एच्चाऽऽतः' (५।१।२८) यप्र० - आ० → ए० । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ जन्यः ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायतेऽसाविति । अनेन जन्यनिपातः ।

**[ जन्यमनेन ]** जायते - जन्यत इति जन्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'न जन-बधः' (४।३।५४) वृद्धिनिषेधः । सि - अम् ।

**[ रम्यः ]** 'रमिं क्रीडायाम्' (९८९) रम् । रममाणं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । रमयत्यसौ रम्यः । अनेन रम्यनिपातः ।

**[ रम्यः ]** रम्यते । 卐यप्र० ।

**[ आपात्यः ]** 'पत्लृ गतौ (९६२) । पत्, आङ्पूर्व० । आपतत्यसाविति । अनेन आपात्यनिपातः ।

**[ आपात्यमनेन ]** आपत्यत इति आपात्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । सि-अम् ।

**[ आप्लाव्यः ]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - प्रुंङ् (५९७) - 'प्लुंङ् गतौ (५९८) प्लु, आङ्-पूर्व० । आप्लवतेऽसाविति । अनेन आप्लाव्यनिपातः ।

**[ आप्लाव्यमनेन ]** अवश्यं आप्लूयत इति आप्लाव्यम् । 'उवर्णादावश्यके' (५।१।१९) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् । सि-अम् ।।छ।।

**प्रवचनीयाऽऽदयः ॥ ५।१।८ ॥**

**[ प्रवचनीयाऽऽदयः ]** प्रवचनीय आदिर्येषां ते = प्रवचनीयाऽऽदयः । प्रथमा जस् ।

**[ प्रवचनीयो गुरुः शासनस्य ]** 'वचंक् भाषणे' (१०९६) वच् । 'ब्रूंगुक् व्यक्तायां वाचि' (११२५) ब्रू । प्रवक्ति-प्रब्रूते वा । अनेन अनीयप्र० । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) ब्रू० → वचादेशः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

---

卐 टिप्पनकम्-भवति विशिष्टपरिणामेन इति भव्यः ।

卐 श० म० न्या० - ण्यन्ताद् रमिधातोश्च 'य एच्चातः' (५।१।२८) यप्र० विधीयते । मध्यमवृत्तौ - 'शकि-तकि-चति-यति०' (५।१।२९) यप्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रवचनीयं गुरुणा शासनम् ]** प्रोच्यते । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० । सि-अम् ।

**[ उपस्थानीयः शिष्यो गुरोः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या०सं० वक्ष०(१)/सूत्र(२९)) स्था, उपपूर्व० । उपतिष्ठत इति । अनेन अनीयप्र० ।

**[ उपस्थानीयः शिष्येण गुरुः ]** उपस्थीयते । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० ।

**[ रमणीयो देशः ]** 'रमिं क्रीडायाम्' (९८९) रम् । रममाणं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । रमयति चित्तं जनानामिति । अनेन अनीयप्र० निपातः ।

**[ दीपनीयं चूर्णम् ]** 'दीपैचि दीप्तौ' (१२६६) दीप् । दीप्यमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । दीपयति जठरोदरे क्षुधामिति । अनेन अनीयप्र० निपातः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ मोहनीयं कर्म ]** 'मुहौच् वैचित्त्ये' (१२३८) मुह् । मुह्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । मोहयति सर्वेषां प्राणिनां मानसमिति । अनेन अनीयप्र० निपातः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ ज्ञानावरणीयम् ]** ज्ञान 'वृग्ट् वरणे' (१२९४) वृ, आङ्पूर्व० । ज्ञानमावृणोति जीवस्येति । अनेन अनीयप्र० निपातः । गु० अर् । सि-अम् । अनेन

**[ दर्शनावरणीयम् ]** दर्शनमावृणोति । अनेन अनीयप्र० निपातः । गु० अर् । सि-अम् ॥ छ ॥

### श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः ॥ ५।१।९ ॥

**[ श्लिषशीङ्स्थाऽऽसवसजनरुहजॄभजेः ]** श्लिषश्च शीङ् च स्थाश्च आसश्च वसश्च जनश्च रुहश्च जॄश्च भजिश्च = श्लिषशीङ्स्थाऽऽसवसजनरुहजॄभजि, तस्मात् ।

**[ क्तः ]** क्त प्रथमा सि ।

**[ आश्लिष्टः कान्तां कामुकः ]** 'श्लिषंच् आलिङ्गने' (१२१०) श्लिष्, आङ्पूर्व० । आश्लिष्यति स्म । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) त० → ट० ।

**[ आश्लिष्टा कान्ता कामुकेन ]** आश्लिष्यते स्म । क्तप्र० → त । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आश्लिष्टं कामुकेन ]** आश्लेषणं = आश्लिष्टम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां०' (१।३।६०) त० → ट० । सि-अम् ।

**[ अतिशयितो गुरुं शिष्यः ]** 'शीङ्क् स्वप्ने' (११०५) शी, अतिपूर्व० । अतिशेते स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'न डीङ्-शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः' (४।३।२७) इति न कित्त्वम् । गुणे सति 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ अतिशयितो गुरुः शिष्येण ]** अतिशय्यते स्म । क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अतिशयितं शिष्येण]** अतिशयनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[उपस्थितो गुरुं शिष्यः]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्ष०(१)/सूत्र०(२९)) स्था, उपपूर्व० । उपतिष्ठति(ते) स्म । अनेन क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

**[उपस्थितो गुरुः शिष्येण]** उपस्थीयते स्म । क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

**[उपस्थितं शिष्येण]** उपस्थानम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

**[उपासितो गुरुं शिष्यः]** 'आसिक् उपवेशने' (१११९) आस्, उपपूर्व० । उपास्ते स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[उपासितो गुरुः शिष्येण]** उपास्यते स्म । क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[उपासितं शिष्येण]** उपासनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितो०' (४।४।३२) इट् ।

**[अनूषितो गुरुं भवान्]** 'वसं निवासे' (९९९) वस्, अनुपूर्व० । अनुवसति स्म । अनेन क्तप्र० → त । 'क्षुध-वसस्तेषाम्' (४।४।४३) इट् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । 'घस्-वसः' (२।३।३६) षत्वम् । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

**[अनूषितो गुरुर्भवता]** अनूष्यते स्म । क्तप्र० → त । 'क्षुध-वसस्तेषाम्' (४।४।४३) इट् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । 'घस्-वसः' (२।३।३६) षत्वम् । 'समानानां०' (१।२।१) दीर्घः ।

**[अनूषितं भवता]** अनुवसनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'क्षुध-वसस्तेषाम्' (४।४।४३) इट् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । 'घस्-वसः' (२।३।३६) षत्वम् । 'समानानां०' (१।२।१) दीर्घः ।

**[अनुजातो माणवको माणविकाम्]** 'जनैचि प्रादुर्भावे' (१२६५) जन्, अनुपूर्व० । अनुजायते स्म । अनेन क्तप्र० → त । आः खनि-सनि-जनः' (४।२।६०) नस्य आ । 'समानानां०' (१।२।१) दीर्घः ।

**[अनुजाता माणविका माणवकेन]** अनुजन्यते स्म । क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) नस्य आ । 'समानानां०' (१।२।१) दीर्घः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[अनुजातं माणवकेन]** अनुजननम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) नस्य आ । 'समानानां०' (१।२।१) दीर्घः ।

**[विजाता वत्सं गौः]** विजायते स्म । अनेन क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) नस्य आ । 'समानानां०' (१।२।१) दीर्घः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[विजातो वत्सो गवा]** विजायते स्म । क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) नस्य आ । 'समानानां०' (१।२।१) दीर्घः ।

**[विजातं गवा]** विजननम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) नस्य आ । 'समानानां०' (१।२।१) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[आरूढो वृक्षं भवान्]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहति स्म । अनेन क्तप्र० → त । 'हो धुट् - पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्वस्वरस्य दीर्घत्वम् ।

**[आरूढो वृक्षो भवता]** आरुह्यते स्म । क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः-पूर्वस्वरस्य दीर्घत्वम् ।

**[आरूढं भवता]** आरोहणम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) । त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः-पूर्वस्वरस्य दीर्घत्वम् ।

**[अनुजीर्णो वृषलीं चैत्रः]** 'जॄष् जरसि' (११४५) जॄ, अनुपूर्व० । अनुप्राप्य जीर्यति स्म । अनेन क्तप्र० → त । 'ॠ - ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ।

**[अनुजीर्णा वृषली चैत्रेण]** अनुप्राप्य जीर्यते स्म । क्तप्र० → त । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[अनुजीर्णं चैत्रेण]** अनुजरणम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० त । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[विभक्ता भ्रातरो रिक्थम्]** 'भजीं सेवायाम्' (८९५) भज्, विपूर्व० । विभजन्ति स्म । अनेन क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । प्रथमा जस् ।

**[विभक्तं भ्रातृभी रिक्थम्]** विभज्यते स्म । क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । सि-अम् ।

**[विभक्तं भ्रातृभिः]** विभजनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । सि-अम् ।

अकर्मका अपि हि धातव उपसर्गसम्बन्धात् सकर्मका भवन्तीति शीङादिग्रहणम्, अन्यथा अकर्मकत्वादुत्तरेणैव सिद्धम् । श्लिष-भजी केवलावपि सकर्मकौ ।।छा।

**आरम्भे ॥ ५।१।१० ॥**

**[आरम्भे]** आरम्भ सप्तमी ङि ।

**[प्रकृतः कटं भवान्]** 'डुकृंग् करणे' (८८८) कृ, प्रपूर्व० । कर्तुमारब्धः । अनेन क्तप्र० → त ।

**[प्रकृतः कटो भवता]** कर्तुमारभ्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

**[प्रकृतं भवता]** प्रक्रियते स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । सि-अम् ।

**[प्रभुक्त ओदनं चैत्रः]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । प्रभोक्तुमारब्धः । अनेन क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रभुक्त ओदनश्चैत्रेण ]** प्रभुज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[ प्रभुक्तं चैत्रेण ]** प्रभु(भो)जनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।।छ।।

## गत्यर्था-ऽकर्मक-पिब-भुजेः ॥ ५।१।११ ॥

**[ गत्यर्थाऽकर्मकपिबभुजेः ]** गतिरर्थो येषां ते = गत्यर्थाः । अविद्यमानं अविवक्षितं वा कर्म येषां ते = अकर्मकाः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । गत्यर्थाश्च अकर्मकाश्च पिबश्च भुजिश्च = गत्यर्थाऽकर्मकपिबभुजि, तस्मात् ।

**[ गतो मैत्रो ग्रामम् ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छति स्म । अनेन क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक् ।

**[ गतो मैत्रेण ग्रामः ]** गम् । गम्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलुक् ।

**[ गतं मैत्रेण ]** गम् । गमनं = गतम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि०' (४।२।५५) मलुक् ।

**[ यातास्ते ग्रामम् ]** 'यांक् प्रापणे' (१०६२) या । यान्ति स्म=याताः । अनेन क्तप्र० → त । प्रथमा जस् ।

**[ यातस्तैर्ग्रामः ]** या । यायते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

**[ यातं तैः ]** या । यानं = यातम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त ।

**[ आसितो भवान् ]** 'आसिक् उपवेशने' (१११९) आस् । आस्ते स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ शयितो भवान् ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेते स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ आसितं भवता ]** आस् । आस्यते स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ शयितं भवता ]** शी । शय्यते स्म । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पठितो भवान् ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठति स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ प्रख्यातः ]** प्र 'ख्यांक् प्रथने' (१०७१) ख्या । प्रख्याति स्म । अनेन क्तप्र० → त ।

**[ विदितः ]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्ति स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कृतो देवदत्तः ]** 'डुकृंग् करणे' (८८८) कृ । क्रियते स्म । क्तप्र० → त । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ हृतो देवदत्तः ]** 'हृंग् हरणे' (८८५) हृ । ह्रियते स्म । क्तप्र० → त । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सुप्तो भवान् मासम् ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपिति स्म । अनेन क्तप्र० → त । 'स्वपेर्यङ् - ङे च' (४।१।८०) य्वृत् व० → उ० ।

**[ सुप्तो भवता मासः ]** स्वप् । सुप्यते स्म । क्तप्र० → त । 'स्वपेर्यङ् - ङे च' (४।१।८०) य्वृत् व० → उ० ।

**[ सुप्तं भवता मासम् ]** स्वप् । स्वपनं = सुप्तम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्वपेर्यङ् - ङे च' (४।१।८०) य्वृत् व० → उ० ।

**[ ओदनपाकं सुप्तो भवान् ]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पाकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । ओदनस्य पाकं = ओदनपाकम् । सुप्तः पूर्ववत् ।

**[ पयः पीता गावः ]** पयस् । 'पां पाने' (२) पा । पिबन्ति स्म । अनेन क्तप्र० → त । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

**[ इदं गोभिः पीतम् ]** पा । पीयते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

**[ इह गोभिः पीतम् ]** पा । पानं = पीतम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'ईर्व्यजनेऽयपि' (४।३।९७) आ० → ई० ।

**[ अन्नं भुक्तास्ते ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जते स्म । अनेन क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[ इदं तैर्भुक्तम् ]** भुज् । भुज्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[ इह तैर्भुक्तम् ]** भुज् । भोजनं = भुक्तम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ॥छा॥

### अद्यर्थाच्चाऽऽधारे ॥ ५।१।१२ ॥

**[ अद्यर्थात् ]** अदिरर्थो यस्य सः = अद्यर्थः, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ आधारे ]** आधार सप्तमी ङि ।

**[ इदमेषां जग्धम् ]** इदम् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । इदम् षष्ठी आम् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) इद० → अ० । 'अवर्णस्याऽऽमः साम्' (१।४।१५) आम्० → साम्० । 'एद् बहुस्भोसि' (१।४।४) अ० → ए० । 'नाम्यन्तस्था-कवर्गात्

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पदान्तः कृतस्य सः शिड्-नान्तरेऽपि' (२।३।१५) षत्वम् । 'अदं भक्षणे' (१०५९) अद् । 卐 अद्यते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'यपि चाऽदो जग्ध्' (४।४।१६) अद्० → जग्ध्० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटो धुटि स्वे वा' (१।३।४८) धलुक् । सि-अम् ।

**[ इदं तैर्जग्धम् ]** अद् । अद्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यपि चाऽदो जग्ध्' (४।४।१६) अद्० → जग्ध्० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटो धुटि स्वे वा' (१।३।४८) धलुक् । सि-अम् ।

**[ इह तैर्जग्धम् ]** अद् । अदनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'यपि चाऽदो जग्ध्' (४।४।१६) अद्० → जग्ध्० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटो धुटि स्वे वा' (१।३।४८) धलुक् । सि-अम् ।

**[ इदमेषामभ्यवहृतम् ]** 'हृंग् हरणे' (८८५) हृ, अभि-अवपूर्व० । अभ्यवह्रियते स्म अस्मिन्निति । अनेन क्तप्र० → त ।

**[ इदं तैरभ्यवहृतम् ]** अभ्यवह्रियते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

**[ इह तैरभ्यवहृतम् ]** अभ्यवहरणम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त ।

**[ इदं तेषामशितम् ]** 'अशश् भोजने' (१५५८) अश् । अश्यते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । सि-अम् ।

**[ इदं तैरशितम् ]** अश् । अश्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । सि-अम् ।

**[ इह तैरशितम् ]** अश् । अशनम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । सि-अम् ।

**[ इह ते अन्नं प्राशिताः ]** प्र-'अशश् भोजने' (१५५८) अश् । प्राशितुमारभते(न्ते) स्म अस्मिन्निति । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा जस् ।

**[ इह ते मधु प्रलीढाः ]** प्र-'लिहींक् आस्वादने' (११२९) लिह् । प्रलेढुमारभन्ते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्वस्वरस्य दीर्घः । प्रथमा जस् ।

**[ इदं तेषां यातम् ]** इदम् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप । तद् षष्ठी आम् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अवर्णस्याऽऽमः साम्' (१।४।१५) आम्० → साम्० । 'एद् बहुस्भोसि' (१।४।४) अ० → ए० । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नान्तरेऽपि' (२।३।१५) षत्वम् । 'यांक् प्रापणे' (१०६२) या । यायते स्म अस्मिन्निति । अनेन क्तप्र० → त । सि-अम् ।

**[ इदमहेः सृप्तम् ]** 'सृप्लृं गतौ' (३४१) सृप् । सृप्यते स्म अस्मिन्निति । अनेन क्तप्र० → त । सि-अम् ।

**[ इदमेषामासितम् ]** 'आसिक् उपवेशने' (१११९) आस् । आस्यते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । सि-अम् ।

---

P. 卐 अदन्ति स्म ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इदमेषां शयितम्]** 'शीङ्क् स्वप्ने' (११०५) शी । शय्यते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । सि-अम् ।

**[इदं गवां पीतम्]** 'पां पाने' (२) पा । पीयते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ → ई । सि-अम् ।

**[इदं तेषां भुक्तम्]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यते स्म अस्मिन्निति । अनेन क्तप्र० → त । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । सि-अम् ॥छ॥

## क्त्वा-तुमम् भावे ॥ ५।१।१३ ॥

**[क्त्वातुमम्]** क्त्वा च तुम् च अम् च = क्त्वातुमम् । प्रथमा सि ।

**[भावे]** भाव सप्तमी ङि ।

वेति निवृत्तम् ।

**[कृत्वा व्रजति]** 'डुकृंग् करणे' (८८८) कृ । करणं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[कर्तुं व्रजति]** कृ । करणाय । 'क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती' (५।३।१३) तुम्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[कारं कारं व्रजति]** कृ । अभीक्ष्णं करणं पूर्वम् । 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) द्विः । 'क्रियाविशेषणात्' (२।२।४१) अम् ।

**[चोरंकारमाक्रोशति]** चोरस्य करणं पूर्वम् । 'शापे व्याप्यात्' (५।४।५२) ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[अतिथिवेदं भोजयति]** अतिथि 'विदक् ज्ञाने' (१०९९) विद् । अतिथीन् (२) विदित्वा । 'विद्-दृग्भ्यः कार्त्स्न्ये णम्' (५।४।५४) णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । प्र० सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## भीमादयोऽपादाने ॥ ५।१।१४ ॥

**[भीमादयः]** भीम आदिर्येषां ते = भीमादयः ।

**[अपादाने]** अपादीयते यस्मात् तदपादानम् । 'भुजि-पत्यादिभ्यः कर्मा-ऽपादाने' (५।३।१२८) अनट्प्र० → अन, तस्मिन् ।

**[भीमः, भीष्मः]** 'ञिभींक् भये' (११३२) भी । बिभेत्यस्मादिति । 'भियः षोऽन्तश्च वा' (उणा० ३४४) किद् मप्र० - षोऽन्तश्च वा ।

**[भयानकः]** भी । बिभेत्यस्मादिति । शी-भी-राजेश्चानकः (उणा० ७१) आनकप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ चरुः ]** 'चर भक्षणे च' (४१०) चर्। चरन्त्यस्मात् पायसमादये इति चरुः। 'मि-वहि-चरि-चटिभ्यो वा' (उणा० ७२६) उप्र०।

**[ समुद्रः ]** 'उन्दैप् क्लेदने' (१४९१) उन्द्, सम्पूर्व०। समुन्दन्ति = आर्द्रीभवन्ति वेलाकाले नद्योऽस्मादिति समुद्रः।' 'ऋज्यजि-तञ्चि-वञ्चि-रिपि-सृपि-तृपि-दृपि-चुपि-क्षिपि-क्षुपि-क्षुदि-मुदि-रुदि-छिदि-भिदि-खिद्युन्दि-दम्भि-शुभ्युम्भि-दंशि-चि-सि-वहि-विसि-वसि-शुचि-सिधि-गृधि-वीन्धि-श्विति-वृति-नी-शी-सु-सूभ्यः कित्' (उणा० ३८८) किद् रप्र०। 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक्।

**[ स्रुवः ]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु। 卐卐स्रवन्ति ध्वनंजंना (?) (घृतादीनि) अस्या इति।' निघृषीष्यृषि-स्रु-प्रुषि-किणि-विशि-विल्यवि-पृभ्यः कित्' (उणा० ५११) किद् वप्र०।

**[ स्रुक् ]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु। *स्रवन्ति(ति) कुसुमगन्धमस्या इति स्रुक्। स्रोश्चिक् (उणा० ८७१) चिक्प्र०।

**[ रक्षः ]** 'रक्ष पालने' (५६७) रक्ष्। रक्षति अपायेभ्यः जनान् इति रक्षः। 'अस्' (उणा० ९५२) अस्प्र०।

**[ खलतिः ]** 'खल सञ्चये च' (४४९) खल्। वंधं (?) प्राप्नोति (खलन्ति केशा अस्मादिति)। 'खल्यमि-रमि-वहि-वस्यर्तेरतिः' (उणा० ६५३) अतिप्र०। सर्वत्र प्रथमा सि। 'सो रुः' (२।१।७२) स० → र०। 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥छ॥

**संप्रदानाच्चान्यत्रोणादयः ॥ ५।१।१५ ॥**

**[ संप्रदानात् ]** 'डुदांग्क् दाने' (११३८) दा, सम्-प्रपूर्व०। संप्रदीयते यस्मै तत् = संप्रदानम्, तस्मात्। 'बहुलम्' (५।१।२) अनट्प्र० → अन।

**[ च ]** च प्रथमा सि।

**[ अन्यत्र ]** अन्य। अन्यस्मिन् = अन्यत्र। 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र।

**[ उणादयः ]** उण् आदिर्येषां ते = उणादयः।

**[ कारुः ]** 'डुकृंग् करणे' (८८८) कृ। 卐 करोतीति - क्रियत इति कारुः। 'कृ-वा-पा-जि-स्वदि-साध्यशौ-दृ-स्ना-सनि-जा-निरहीण्भ्य उण्' (उणा० १) उण्प्र० → उ। 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्।

**[ वायुः ]** 'वांक् गति-गन्धनयोः' (१०६३) वा। वाति-वायते इति वायुः। 'कृ-वा-पा-जि-स्वदि०' (उणा० १) उण्प्र० → उ। 'आत ऐः कृञ्चौ' (४।३।५३) आ → ऐ। 'एदैतोऽयाय्' (१।२।२३) आय्।

**[ कषिः ]** 'कष हिंसायाम्' (५०७) कष्। कषितोऽसाविति। कर्मणि 'कृ-शृ-कुटि-ग्रहि-खन्यणि-कष्यलि-पलि-चरि-वसि-गण्डिभ्यो वा (उणा० ६१९) इप्र०।

**[ तनुः ]** 'तनूयी विस्तारे' (१४९९) तन्। तन्यतेऽसाविति। 'रुद्यर्ति-जनि-तनि-धनि-ग्रन्थि-पृ-तवि-त्रपि-वपि-यजि-प्रादि-वेपिभ्य उस्' (उणा० ९९७) उस्प्र०।

**[ ऋक् ]** 'ऋचत् स्तुतौ' (१३४०) ऋच्। ऋचन्ति तयेति क्विप्। 'अप्रयोगीत्' (१।१।३७) क्विप्लुक्। 'च-जः क-गम्' (२।१।८६) च० → क०।

---

卐卐 अभिधानचिन्तामणिनाममालायाम्-धातुपारायणे च स्रवत्यस्मादिति स्रुवः।

* अभिधानचिन्तामणिनाममालायाम् - स्रवति हविरस्याः।

P. 卐 करोति शिल्पादिकर्मेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वर्त्म ]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वृत्तं तत्रेति । 'मन्' (उणा० ९११) मन्प्र० ।

**[ चर्म ]** 'चर भक्षणे च' (४१०) चर् । चरितं तत्रेति । 'मन्' (उणा० ९११) मन्प्र० ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'अनतो लुप्' (१।४।५९) सिलुप् ॥छा।

**असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः** ॥ ५।१।१६ ॥

**[ असरूपः ]** 卐न सरूपः = असरूपः । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि ।

**[ अपवादे ]** अपोद्यते-अपवदनं वा = अपवादः, तस्मिन् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः, तस्मिन् ।

**[ प्राक् ]** प्राक् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ क्तेः ]** क्ति पञ्चमी ङसि ।

**[ अवश्यलाव्यम् ]** अवश्यम् 'लूगृश् छेदने' (१५१९) लू । अवश्यं लूयते = अवश्यलाव्यम् । 'उवर्णादावश्यके' (५।१।१९) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) मलुक् । सि-अम् ।

**[ अवश्यलवितव्यम् ]** अवश्यं लूयते = अवश्यलवितव्यम् । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) । मलुक् । सि-अम् ।

**[ अवश्यलवनीयम् ]** अवश्यं लूयते = अवश्यलवनीयम् । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) । मलुक् । सि-अम् ।

**[ ज्ञः ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । जानातीति । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[ ज्ञाता ]** ज्ञा । जानातीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० → आ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ ज्ञायकः ]** ज्ञा । जानातीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ नन्दनः ]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । नन्दयतीति । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ नन्दकः ]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । नन्दयतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

---

P. 卐 समानं रूपं यस्य सः = समानरूपः, न समानरूपः = असमानरूपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[नन्दयिता]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । नन्दयतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[कार्यम्]** 'डुकृंग् करणे' (८८८) कृ । क्रियत इति कार्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । घ्यणि यो न स्यात् ।

**[गोदः]** 'डुदांग्क् दाने' (११३८) दा, गोपूर्व० । गां ददातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । डविषयेऽत्राऽण् न स्यात् ।

**[कृतिः]** 'डुकृंग् करणे' (८८८) कृ । करणं = कृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[चितिः]** 'चिंग्ट् चयने' (८८८) चि । चयनं = चितिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[रक्षितम्]** 'रक्ष पालने' (५६७) रक्ष् । रक्षणं = रक्षितम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[रक्षणम्]** रक्ष पालने (५६७) रक्ष् । रक्ष्यते = रक्षणम् । यजि-स्वपि-रक्षि-यति-प्रच्छो नः' (५।३।८५) नप्र० न भवति । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे (१।३।६०) न० → ण० । घञादिर्न भवति ।

**[चिकीर्षा]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) द्विः । 'क-ङश्च-ञ्' (४।१।४६) कि० → चि० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । चिकीर्षणं = चिकीर्षा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अतः' (४।३।८२) अलोपः ।

**[जिहीर्षा]** 'हृंग् हरणे' (८८५) हृ । हर्तुमिच्छति । 'तुमर्हादिच्छायां०' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) द्विः । 'ग-होर्जः' (४।१।४०) हि० → जि० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । जिहीर्षणं = जिहीर्षा । शंसि-प्रत्ययात् (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । अत्र क्तिर्न स्यात् ।

**[ईषत्पानः]** ईषत् 'पां पाने' (२) पा । ईषत् पीयते । 'शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः' (५।३।१४१) अनप्र० ।

**[सुपानः]** सुखेन पीयते । 'शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः' (५।३।१४१) अनप्र० । अत्र खल् न स्यात् ॥छ॥

## ऋवर्ण-व्यञ्जनाद् घ्यण् ॥ ५।१।१७ ॥

**[ऋवर्णव्यञ्जनाद्]** ऋवर्णश्च व्यञ्जनं च = ऋवर्णव्यञ्जनम्, तस्मात् ।

**[घ्यण्]** घ्यण् प्रथमा सि ।

**[कार्यम्]** 'डुकृंग् करणे' (८८८) कृ । क्रियत इति । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हार्यम्]** 'हृंग् हरणे' (८८५) हृ । ह्रियत इति । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[पाक्यम्]** 'डुपचींष् पाके' (८९२) पच् । पच्यत इति । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० → क० । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[वाक्यम्]** 'वचंक् भाषणे' (१०९६) वच् । उच्यते इति । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः०' (४।१।१११) च० → क० । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

णकारो वृद्ध्यर्थः ॥छ॥

## पाणि-समवाभ्यां सृजः ॥ ५।१।१८ ॥

**[पाणिसमवाभ्याम्]** पाणिश्च समवश्च = पाणिसमवौ, ताभ्याम् ।

**[सृजः]** सृज् पञ्चमी ङसि ।

ऋदुपान्त्यात् क्यपोऽपवादः ।

**[पाणिसर्ग्या रज्जुः]** 'सृजीं(जं)त् विसर्गे' (१३४९) सृज्, पाणिपूर्व० । पाणिभ्यां सृज्यत इति । अनेन घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[समवसर्ग्यः]** सृज्, सम्-अवपूर्व० । समवसृज्यत इति । अनेन घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० ।

**[सृज्यम्]** सृज्यते इति । ऋदुपान्त्यादकृपि चृदृचः' (५।१।४१) क्यप्प्र० → य । सि-अम् ।

**[संसृज्यम्]** संसृज्यत इति । 'ऋदुपान्त्यादकृपि-चृदृचः' (५।१।४१) क्यप्प्र० → य । सि-अम् ।

"समव" इति समुदायपरिग्रहार्थं द्विवचनम् ॥छ॥

## उवर्णादावश्यके ॥ ५।१।१९ ॥

**[उवर्णात्]** उवर्ण पञ्चमी ङसि ।

**[आवश्यके]** अवश्यस्य भावोऽवश्यं भाव इति वा । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । 'चोरादेः' (७।१।७३) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आं, तस्मिन् ।

**[लाव्यम्]** अवश्यं लूयते । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् ।

**[पाव्यम्]** अवश्यं पूयते । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् ।

यत्र(त्) नियोगात् कर्त्तव्यमर्थप्रकरणादिना निश्चितं तत्रायं प्रत्ययः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[लाव्यमवश्यम्]** लूयते । अनेन घ्यण्प्र० → य । 'प्रायोऽव्ययस्य' (७।४।६५) म्लोपः (?) । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् । अवश्यम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[पाव्यमवश्यम्]** 'पूग्श् पवने' (१५१८) पू । पूयते । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् ।

**[अवश्यलाव्यम्]** पूर्ववत् । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) मलुक् ।

**[अवश्यपाव्यम्]** पूर्ववत् । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) मलुक् ।

अत्राऽवश्यंशब्देनाप्यवश्यंभावो द्योत्यते, मयूरव्यंसकादित्वाच्च समासः ।

**[अवश्यस्तुत्यः]** अवश्यम् 'ष्टुंगूक् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे०' (न्या० सं० वक्ष० (१)/सूत्र (२९) स्तु । अवश्यं स्तूयते । परत्वात् 'दृ-वृग्-स्तु-जुषेति-शासः' (५।१।४०) क्यप्प्र० → य । ह्रस्वस्य तः पित्कृति (४।४।११३) तोऽन्तः ।

**[लव्यम्]** लूयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् ।

**[पव्यम्]** पूयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् ।।छा।

### आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमः ॥ ५।१।२० ॥

**[आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानमः]** आसुश्च युश्च वपिश्च रपिश्च लपिश्च त्रपिश्च डिपिश्च दभिश्च चमिश्च आनम् च = आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानम्, तस्मात् ।

**[आसाव्यम्]** 'षुंगट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु, आङ्पूर्व० । आसूयते । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् ।

**[याव्यम्]** 'युक् मिश्रणे' (१०८०) यु । यूयते । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'य्यक्ये' (१।२।२५) आव् । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[वाप्यम्]** डुवपीं बीजसन्ताने (९९५) वप् । उप्यते = वाप्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[राप्यम्]** 'रप व्यक्ते वचने' (३३५) रप् । रप्यते = राप्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[लाप्यम्]** रप (३३५)-'लप व्यक्ते वचने' (३३६) लप् । लप्यते = लाप्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[अभिलाप्यम्]** अभिलप्यते = अभिलाप्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[अपत्राप्यम्]** त्रपौषि लज्जायाम् (७६२) त्रप्, अपपूर्व० । अपत्रप्यते = अपत्राप्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[डेप्यम्]** 'डिपत् क्षेपे' (१४५८) डिप् । डिप्यते = डेप्यम् । अनेन घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[दाभ्यम्]** दभिः सौत्रो बन्धने वर्त्तते । दभ्यते । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[अवदाभ्यम्]** अवदभ्यते = अवदाभ्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[आचाम्यम्]** 'चमू अदने' (३८०) चम्, आङ्पूर्व० । आचम्यते = आचाम्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[आनाम्यम्]** णमं प्रह्वत्वे (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम्, आङ्पूर्व० । आनम्यते = आनाम्यम् । अनेन घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

नमिरत्र ण्यर्थः सकर्मकः, अकर्मका अपि हि धातवो ण्यर्थे वर्त्तमानाः सकर्मका भवन्ति, यथा-नेमिं नमन्ति । नामयन्ति चक्रधारामित्यर्थः ।

डिपेः कुटादित्वात् पवर्गद्वारेण ये गुणो न लभ्यते इति घ्यण् विधीयते ॥छ॥

### वाऽऽधारेऽमावस्या ॥ ५।१।२१ ॥

**[वा]** वा प्रथमा सि ।

**[आधारे]** आधार सप्तमी ङि ।

**[अमावस्या]** अमावस्या प्रथमा सि ।

**[अमावस्या, अमावास्या]** अमा 'वसं निवासे' (९९९) वस् । अमाशब्दः सहार्थः, सह वसतोऽस्यां सूर्या-चन्द्रमसाविति । अनेन घ्यण्प्र० । पक्षे धातोरेव ह्रस्वनिपातनं च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । रूढ्या तिथिविशेषः । पक्षे यमकृत्वा ह्रस्वनिपातनम् । 'अश्च वाऽमावास्यायाः' (६।३।१०४) इत्यत्रैकदेशविकृतस्याऽनन्यत्वादमावास्याशब्देन अमावस्याशब्दस्यापि ग्रहणार्थम् ॥छ॥

### संचाय्य-कुण्डपाय्य-राजसूयं क्रतौ ॥ ५।१।२२ ॥

**[संचाय्यकुण्डपाय्यराजसूयम्]** संचाय्यश्च कुण्डपाय्यश्च राजसूयश्च = संचाय्यकुण्डपाय्यराजसूयम् ।

**[क्रतौ]** क्रतु सप्तमी ङि ।

आधारे कर्मणि वा, निपातनादेवायादेशदीर्घत्वे अपि भवतः ।

**[संचाय्यः क्रतुः, संचेयोऽन्यः]** 'चिंगट् चयने' (१२९०) चि, सम्पूर्व० । संचीयते सोमोऽस्मिन्, संचीयते वाऽसाविति । अनेन संचाय्यनिपातः । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कुण्डपाय्यः क्रतुः, कुण्डपानोऽन्यः]** कुण्डैः पीयते सोमोऽस्मिन्, कुण्डैः पीयत इति वा । अनेन कुण्डपाय्यनिपातः । ससोमको हि यागः क्रतुरुच्यते, वल्लीरसो यत्र यागे पीयते इति भावार्थः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन ।

**[राजसूयः क्रतुः]** 'षुंग्ट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु, राजन्पूर्व० । राज्ञा(जा) सूयतेऽस्मिन्, राज्ञा वा सोतव्यः । अनेन राजसूयनिपातः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छा॥

## प्रणाय्यो निष्कामा-ऽसंमते ॥ ५।१।२३ ॥

**[प्रणाय्यः]** प्रणाय्य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[निष्कामाऽसंमते]** निर्गतः कामोऽस्मात् सः = निष्कामः, निष्कामश्च असंमतश्च = निष्कामाऽसंमतम्, तस्मिन् ।

**[प्रणाय्योऽन्तेवासी]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी, प्रपूर्व० । प्रणीयते । अनेन घ्यण्प्र० → य, आय्निपातः । अन्ते = गुरूणां समीपे वसतीत्येवंशीलम् । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रथमा सि । 'इन् - हन् - पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्-याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । विषयेष्वनभिलाष इत्यर्थः ।

**[प्रणाय्यश्चौ(चो)रः]** प्रणाय्यः पूर्ववत्, चोरः । सर्वलोकासंमत इत्यर्थः ।

**[प्रणेयः]** प्रणीयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छा॥

## धाय्या-पाय्य-सान्नाय्य-निकाय्यमृङ्-मान-हवि-र्निवासे ॥ ५।१।२४ ॥

**[धाय्यापाय्यसान्नाय्यनिकाय्यम्]** धाय्या च पाय्यं च सान्नाय्यं च निकाय्यश्च = धाय्यापाय्यसान्नाय्यनिकाय्यम् ।

**[ऋक्मानहविर्निवासे]** ऋक् च मानं च हविश्च निवासश्च = ऋक्मानहविर्निवासम्, तस्मिन् ।

निपातनादेव सर्वत्रायादेशः ।

**[धाय्या ऋक्, अन्यत्र धेया]** 'डुधांग्क् धारणे च' (११३९) धा । धीयते समिदग्नावनयेति । अनेन घ्यण्प्र० → य । 'आत ऐः कृञ्चौ' (४।३।५३) आ → ऐ, आयादेशश्च निपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ । ऋक् प्रथमा सि । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र०, आ० → ए० ।

**[पाय्यं मानम्, मेयमन्यत्]** 'मांङ्क् मान-शब्दयोः' (११३७) मा । मीयते येन तन्मानम् । अनट्प्र० → अन । मीयतेऽनेनेति । अनेन मस्य पा-आय् च निपातः । सि-अम् । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र०, आ० → ए० ।

**[सान्नाय्यं हविः, संनेयमन्यत्]** सम्-'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी । संनीयते । अनेन समो दीर्घत्वं-घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । आय् च निपात्यते । म्नां धुड्वर्गेऽन्त्योऽपदान्ते (१।३।३९) म० → न० । सि-अम् । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ निकाय्यो निवासः, निचेयमन्यत् ]** नि 'चिंग्ट् चयने' (१२९०) चि । निचीयते । अनेन चस्य कत्वं-घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । आय् च निपात्यते । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'वसं निवासे' (९९९) वस्, निपूर्व० । निवसन्ति त(अ)स्मिन्निति निवासः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।।छा।

## परिचाय्योपचाय्या-ऽऽनाय्य-समूह्य-चित्यमग्नौ ॥ ५।१।२५ ॥

**[ परिचाय्योपचाय्याऽऽनाय्यसमूह्यचित्यम् ]** परिचाय्यश्च उपचाय्यश्च आनाय्यश्च समूह्यश्च चित्यश्च = परिचाय्योपचाय्याऽऽनाय्यसमूह्यचित्यम् ।

**[ अग्नौ ]** अग्नि सप्तमी ङि ।

**[ परिचाय्योऽग्निः, परिचेयोऽन्यः ]** 'चिंग्ट् चयने' (१२९०) चि, परिपूर्व० । परिचीयते = सेव्यत इत्यर्थः । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ, आय् च निपातः । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ उपचाय्यः, उपचेयोऽन्यः ]** 'चिंग्ट् चयने' (१२९०) चि, उपपूर्व० । उपचीयते । अनेन घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ, आय् च निपातः । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ आनाय्यो दक्षिणाग्निः, आनेयोऽन्यः ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, आङ्-पूर्व० । गार्हपत्यादानीयत इति । अनेन घ्यण्प्र० - आय् च निपातः । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए, दक्षिणाग्निः । स ह्याहवनीयेन सहैकयोनिरेवोच्यते ।

**[ आनाय्यो गोधुक् ]** आनाय्यो गो 'दुहींक् क्षरणे' (११२७) दुह् । गां दोग्धि । 'क्विप्' (५।१।१४८) 'क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये' (२।१।७७) दु० → धु० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[ समूह्यः, अन्यः संवाह्यः ]** 'वहीं प्रापणे' (९९६) वह्, सम्पूर्व० । समुह्यत इति । अनेन घ्यण्प्र० - वस्य ऊत्वं च निपात्यते । अन्यत्र 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।७७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ चित्योऽग्निः, चेयोऽन्यः ]** चीयत इति चित्यः । मतान्तरे क्यप्प्र० → य । ह्रस्वस्य तः पित्कृति (४।४।११३) तोऽन्तः । अन्यत्र 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । प्रथमा सि ।।छा।

## याज्या दानर्चि ॥ ५।१।२६ ॥

**[ याज्या ]** याज्या प्रथमा सि ।

**[ दानर्चि ]** दान-ऋच् । दानाय ऋक् = दानर्च्(र्क्), तस्याम् = दानर्चि । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अर् ।

**[ याज्या ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । इज्यतेऽनयेति । अनेन घ्यण्प्र० → य - दीर्घत्वं च निपातः । 'आत्' (२।४।१८) आप्प्र० → आ ।।छा।

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

### तव्या-ऽनीयौ ॥ ५।१।२७ ॥

**[ तव्याऽनीयौ ]** तव्यश्च अनीयश्च = तव्याऽनीयौ ।

**[ शयितव्यम् ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेते । अनेन तव्यप्र० । 'स्ताद्यशितोऽत्रोणादेरिट्', (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । सि-अम् ।

**[ शयनीयम् ]** शी । शेते । अनेन अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । सि-अम् ।

**[ वस्तव्यम् ]** 'वसं निवासे' (९९९) वस् । उष्यते । अनेन तव्यप्र० । सि-अम् ।

**[ वसनीयम् ]** वस् । उष्यते । अनेन अनीयप्र० । सि-अम् ।

**[ कर्तव्यम् ]** 'डुकृंग् करणे' (८८८) कृ । क्रियत इति । अनेन तव्यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ करणीयं भवता ]** कृ । क्रियत इति । अनेन अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । एवमग्रेऽपि ॥छा॥

### य एच्चाऽऽतः ॥ ५।१।२८ ॥

**[ यः ]** य प्रथमा सि ।

**[ एत् ]** एत् प्रथमा सि ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ आतः ]** आत् षष्ठी ङस् ।

**[ दित्स्यम् ]** 卐'डुदांग्क् दाने' (११३८) दा । दीयते । अनेन यप्र० । 'अस् च लौल्ये' (४।३।११५) सोऽन्तः(?)। 'मि-मी-मा-दामित् स्वरस्य' (४।१।२०) आ० → इत्० ।

**[ धित्स्यम् ]** 卐'डुधांग्क् धारणे च' (११३९) धा । धीयते । अनेन यप्र० । 'अस् च लौल्ये' (४।३।११५) सोऽन्तः(?) । 'मि-मी-मा-दामित् स्वरस्य' (४।१।२०) आ० → इत्० ।

**[ चेयम् ]** 'चिग्ट् चयने' (१२९०) चि । चीयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ जेयम् ]** 'जिं अभिभवे' (८) जि । जीयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ नेयम् ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नीयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ शेयम् ]** 'शीङ्क् स्वप्ने' (११०५) शी । शय्यते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ नव्यम् ]** 'णुक् स्तुतौ' (१०८१) णु । 'पाठे धात्वादेर्णो नः' (२।३।९७) नु । नूयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् ।

---

卐 श० म० न्या० - दातुं धातुं वा इच्छेति सनि अनुस्वारेत्त्वादिडभावे 'मि-मी-मा-दामित् स्वरस्य' (४।१।२०) इति स्वरस्य इत् इत्यादेशे द्वित्वाभावे च दित्स-धित्स इति धातू, ततः स्वरान्तत्वादनेन ये 'अतः' (४।३।८२) इत्यकारलोपे दित्स्यम्, धित्स्यमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

+ **[ हव्यम् ]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । हूयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् ।

**[ लव्यम् ]** 'लूग्श् छेदने' (१५१९) लू । लूयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् ।

**[ भव्यम् ]** 'भू सत्तायाम्' (१) भू । भूयते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् ।

**[ देयम् ]** 'डुदांग्क् दाने' (११३८) दा । दीयते । अनेन यप्र० आ० → ए० । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ धेयम् ]** 'डुधांग्क् धारणे च' (११३९) धा । धीयते । अनेन यप्र०, आ० → ए० । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ॥छा॥

### शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् ॥ ५।१।२९ ॥

**[ शकितकिचतियतिशसिसहियजिभजिपवर्गात् ]** शकिश्च तकिश्च चतिश्च यतिश्च शसिश्च सहिश्च यजिश्च भजिश्च पवर्गश्च = शकितकिचतियतिशसिसहियजिभजिपवर्गम्, तस्मात् ।

**[ शक्यम् ]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्यते । अनेन यप्र० । सि-अम् ।

**[ तक्यम् ]** 'तक हसने' (५१) तक् । तक्यते । अनेन यप्र० । सि-अम् ।

**[ चत्यम् ]** 'चतेग् याचने' (८९९) चत् । चत्यते । अनेन यप्र० । सि-अम् ।

**[ यत्यम् ]** 'यतैङ् प्रयत्ने' (७११) यत् । यत्यते । अनेन यप्र० । सि-अम् ।

**[ शस्यम् ]** 'शसू हिंसायाम्' (५४९) शस् । शस्यते । अनेन यप्र० । सि-अम् ।

**[ सह्यम् ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । सह्यते । अनेन यप्र० । सि-अम् ।

**[ यज्यम् ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । इज्यते । अनेन यप्र० । सि-अम् ।

**[ भज्यम् ]** 'भजीं सेवायाम्' (८९५) भज् । भज्यते । अनेन यप्र० । सि-अम् ।

**[ तप्यम् ]** 'तपं संतापे' (३३३) तप् । तप्यते । अनेन यप्र० । सि-अम् ।

**[ लभ्यम् ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लभ्यते । अनेन यप्र० । सि-अम् ।

**[ गम्यम् ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । 'गम्यते । अनेन यप्र० । सि-अम् ।

**[ याज्यम् ]** यज् । इज्यते । बाहुलकात् 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् ।

---

+ इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[भाग्यम्]** भज् । भज्यते । बाहुलकात् 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[असिवध्यः]** 卐卐वधि बन्धने (७४६) वध् । वध्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । न जन-वधः (४।३।५४) वृद्धिनिषेधः ।

**[मुशलवध्यः]** वध्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'न जन-वधः' (४।३।५४) वृद्धिनिषेधः । मुसलेन वध्यः = मुसलवध्यः ।।छा।

**यम-मद-गदोऽनुपसर्गात्** ॥ ५।१।३० ॥

**[यममदगदः]** 卐यमश्च मदश्च गद् च = यममदगद्, तस्मात् ।

**[अनुपसर्गात्]** न विद्यते उपसर्गो यस्य तदनुपसर्गम्, तस्मात् ।

**[यम्यम्]** 'यमूं उपरमे' (३८६) यम् । यम्यते । अनेन यप्र० । सि-अम् ।

**[मद्यम्]** 'मदै हर्ष-ग्लपनयोः' (१०४८) मद् । मद्यते । अनेन यप्र० । सि-अम् ।

**[गद्यम्]** 'गद व्यक्तायां वाचि' (२९७) गद् । गद्यते । अनेन यप्र० । सि-अम् ।

**[आयाम्यम्]** आयम्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[प्रमाद्यम्]** प्रमाद्यते । ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[निगाद्यम्]** निगद्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

पवर्गान्तत्वात् सिद्धे यमो नियमार्थं वचनम्-**अनुपसर्गादेव यथा स्यात्-**

**[मद्यम्]** 'मदैच् हर्षे' (१२३६) मद् । माद्यत्यनेनेति । 'बहुलाधिकारात् अनेन यप्र० ।

**[नियम्यम्]** नियम्यतेऽनेनेति । बहुलाधिकारात् अनेन यप्र० । सोपसर्गादपि ।।छा।

**चरेराङस्त्वगुरौ** ॥ ५।१।३१ ॥

**[चरेः]** चरि पञ्चमी ङसि ।

**[आङः]** आङ् पञ्चमी ङसि ।

**[तु]** तु प्रथमा सि ।

**[अगुरौ]** न गुरुरगुरु(:), तस्मिन् ।

**[चर्यं भवता]** 'चर भक्षणे च' (४१०) चर् । चर्यते = चर्यम् । अनेन यप्र० ।

---

卐卐 धातुपाठे 'बधि बन्धने' । ब-वयोरैक्यम् ।

P.卐 यमिश्च मदिश्च गद् च = यमिमदिगद् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ चर्यो देशः ]** चर् । चर्यते इति चर्यः । अनेन यप्र० । प्र० सि ।

**[ आचर्यं भवता ]** आचर्यते । अनेन यप्र० ।

**[ आचर्यो देशः ]** आचर्यते । अनेन यप्र० । प्र० सि ।

**[ अभिचार्यम् ]** अभिचर्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) पान्त्यवृद्धिः आ ।

**[ आचार्यो गुरुः ]** आचर्यते विनयार्थं विद्याग्रहणार्थं वा शिष्यैरित्याचार्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

**वर्योपसर्या-ऽवद्य-पण्यमुपेयर्तुमती-गर्ह्य-विक्रेये** ॥ ५।१।३२ ॥

**[ वर्योपसर्याऽवद्यपण्यम् ]** वर्या च उपसर्या च अवद्यश्च पण्यं च = वर्योपसर्याऽवद्यपण्यम् ।

**[ उपेयर्तुमतीगर्ह्यविक्रेये ]** उपेया च ऋतुमती च गर्ह्यश्च विक्रेयं च = उपेयर्तुमतीगर्ह्यविक्रेयम्, तस्मिन् ।

**[ वर्या उपेया चेद्भवति ]** 'वृङ्श् सम्भक्तौ' (१५६७) वृ । व्रियत इति । अनेन वर्या निपातः । 'इं गतौ' (११) इ, उपपूर्व० । उपेयत इति । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'उपसर्गस्यानिणेधेदोति' (१।२।१९) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । वरयोग्यात् चेद्भवति ।

**[ वृत्याऽन्या ]** 'वृग्ट् वरणे' (१२९४) वृ । व्रियते । 'दृ-वृग्-स्तु-जुषेति-शासः' (५।१।४०) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वार्या ऋत्विजः ]** व्रियत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ उपसर्या गौः ]** 'सृं गतौ' (२५) सृ, उपपूर्व० । उपस्रियते । अनेन निपातः । गर्भग्रहणे प्राप्तकाला गौरित्यर्थः ।

**[ उपसार्या शरदि मथुरा ]** 'सृं गतौ' (२५) सृ, उपपूर्व० । उपस्रियते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अवद्यं गर्ह्यं चेत् ]** 'वद व्यक्तायां वाचि' (९९८) वद्, नञ्पूर्व० । नोद्यत इति । अनेन अवद्यनिपातः । सि-अम् । गर्ह्यं चेत् ।

**[ अवद्यं पापम् ]** नोद्यते । अनेन निपातः । पापमित्यर्थः ।

**[ अवद्या हिंसा ]** अवद्या पूर्ववत् । हिंसा-गर्ह्येत्यर्थः ।

**[ अनुद्यम् ]** नोद्यत इति अनुद्यम् । 'नाम्नो वदः क्यप् च' (५।१।३५) क्यप्प्र० → य । 'यजादि-वचेः किति' (४।१।९७) य्वृत् व० → उ० । 'अन् स्वरे' (३।२।१२९) अन् ।

**[ अवाद्या ]** वद् । उद्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । न वाद्या = अवाद्या । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ पण्यं विक्रेयं चेत् ]** 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । पणाय्यते । अनेन पण्यनिपातः । सि-अम् । विक्रेयं चेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पण्या गौः]** पण्य 'आत्' (२।४।१८) आप्प्र० → आ, गौः । विक्रेयेत्यर्थः ।

**[पाण्यः साधुः]** पण् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**स्वामि-वैश्येऽर्यः** ॥ ५।१।३३ ॥

**[स्वामिवैश्ये]** स्वामी च वैश्यश्च = स्वामिवैश्यम्, तस्मिन् ।

**[अर्यः]** अर्य प्रथमा सि ।

**[अर्यः स्वामी]** 'ऋंक् गतौ' (११३५) ऋ । 'ऋं प्रापणे च' (२६) ऋ । अर्यतेऽर्यः । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'सो रुः' (२।१।७१) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । स्वामिन् प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[अर्यो वैश्यः]** ऋ । अर्यते । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।४।१) गु० अर् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[आर्यः]** ऋ । अर्यते = आर्यः, साधुरित्यर्थः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ॥छ॥

**वह्यं करणे** ॥ ५।१।३४ ॥

**[वह्यम्]** वह्य प्रथमा सि ।

**[करणे]** करण सप्तमी ङि ।

**[वह्यं शकटम्]** 'वहीं प्रापणे' (९९६) वह् । 卐वहन्ति तेन । अनेन यप्र० ।

**[वाह्यम्]** वह् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

**नाम्नो वदः क्यप् च** ॥ ५।१।३५ ॥

**[नाम्नः]** नामन् पञ्चमी ङसि ।

**[वदः]** वद् पञ्चमी ङसि ।

**[क्यप्]** क्यप् प्रथमा सि ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

'यम-मद-गदोऽनुपसर्गात्' (५।१।३०) इत्यतोऽनुपसर्गग्रहणं वर्त्तते ।

**[ब्रह्मोद्यम्, ब्रह्मवद्यम्]** ब्रह्मन् 'वद व्यक्तायां वाचि' (९९८) वद् । ब्रह्मणा उद्यते । अनेन क्यप्-यश्च । यत्र क्यप्प्र० तत्र 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । सि-अम् ।

---

P. 卐 वहन्ति येन कृत्वा । अभि० नाममालायाम् - उह्यतेऽनेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सत्योद्यम्, सत्यवद्यम् ]** सत्य-वद् । सत्येन उद्यते । अनेन क्यप्प्र० - यश्च । यत्र क्यप्प्र० तत्र 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । सि-अम् ।

**[ वाद्यम् ]** उद्यत इति वाद्यम् = आतोद्यमित्यर्थः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[ प्रवाद्यम् ]** प्रकर्षेण उद्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् ।

**[ अनुवाद्यम् ]** अनु = पश्चात् उद्यते । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् ।

ककारः कित्कार्यार्थः । पकार उत्तरत्र तागमार्थः ।।छ।।

**हत्या-भूयं भावे** ॥ ५।१।३६ ॥

**[ हत्याभूयम् ]** हत्या च भूयश्च = हत्याभूयम् ।

**[ भावे ]** भाव सप्तमी ङि ।

**[ ब्रह्महत्या ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हननं = वधः । 'हनो वा वध् च' (५।३।४६) अल्प्र० → अ-वध् आदेशश्च । ब्रह्मन् - हन् । ब्रह्मणो वधः = ब्रह्महत्या । अनेन क्यप्प्र० → य - नस्य तकारश्च निपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भ्रूणहत्या ]** भ्रूणस्य वधः = भ्रूणहत्या । अनेन क्यप्प्र० → य - नस्य तकारश्च । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ दरिद्रहत्या ]** दरिद्रस्य वधः = दरिद्रहत्या । अनेन क्यप्प्र० → य - नस्य तकारश्च । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ श्वहत्या ]** शुनो वधः । अनेन क्यप्प्र० → य - नस्य तकारश्च निपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ब्रह्मभूयं गतः ]** ब्रह्मन् 'भू सत्तायाम्' (१) भू । ब्रह्मणो भवनम् । अनेन क्यप्प्र० → य । द्वितीया अम् । गत प्रथमा सि । ब्रह्मत्वं गत इत्यर्थः ।

**[ देवभूयं गतः ]** देव 'भू सत्तायाम्' (१) भू । देवस्य भवनम् । अनेन क्यप्प्र० → य । 'द्वितीया अम् । गत प्रथमा सि । देवत्वं गत इत्यर्थः ।

**[ श्वघात्या वृषली ]** श्वन् - हन् । 卐श्वा हन्यतेऽनया । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ हतिः ]** हननं = हतिः । 'साति-हेति०' (५।३।९४) इति बाधनार्थं 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलुक् ।

**[ घातः ]** हननं = घातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात् ।

---

卐 श० म० न्या० - शुना हन्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[भव्यम्]** भूयते । 'य एच्वाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । सि-अम् ।

**[उपहतिः]** उपहननम् । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'यमि-रमि-नमि-गमि-हनि०' (४।२।५५) नलुक् ।

**[प्रभव्यम्]** प्रभूयते । 'य एच्वाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । सि-अम् ॥छ॥

## अग्निचित्या ॥ ५।१।३७ ॥

**[अग्निचित्या]** अग्निचित्या प्रथमा सि । अखण्डमिदम् । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[अग्निचित्या]** अग्नि 'चिंग्ट् चयने' (१२९०) चि । अग्नेश्चयनम् = उपचयनमित्यर्थः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## खेय-मृषोद्ये ॥ ५।१।३८ ॥

**[खेयमृषोद्ये]** 卐खेयं च मृषोद्यं च = खेयमृषोद्ये । औ । 'औरीः' (१।४।५६) औ० → ई० ।

अनुपसर्गादिति नाम्न इति च निवृत्तम् । खनेर्घ्यणोऽपवादः क्यप् ।

**[खेयम्]** 'खनूग् अवदारणे' (९१३) खन् । खन्यते । अनेन क्यप्प्र० - खेयनिपातः ।

**[निखेयम्]** निखन्यते । अनेन क्यप्प्र० - खेयनिपातः ।

**[उत्खेयम्]** उत्खन्यते । अनेन क्यप्प्र० - खेयनिपातः ।

पक्षे 'वयोपसर्या०' (५।१।३२) इत्यादिना ये प्राप्ते नित्यं क्यप् ।

**[मृषोद्यम्]** मृषा 'वद व्यक्तायां वाचि' (९९८) वद् । मृषोद्यते । अनेन मृषोद्यनिपात्यते । सि-अम् । नात्र भाव एवेति योगविभागः ॥छ॥

## कुप्य-भिद्योद्ध्य-सिध्य-तिष्य-पुष्य-युग्या-ऽऽज्य-सूर्यं नाम्नि ॥ ५।१।३९ ॥

**[कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याऽऽज्यसूर्यम्]** कुप्यं च भिद्यश्च उद्ध्यश्च सिध्यश्च तिष्यश्च पुष्यश्च युग्यश्च आज्यश्च सूर्यश्च = कुप्यभिद्योद्ध्यसिध्यतिष्यपुष्ययुग्याऽऽज्यसूर्यम् ।

**[नाम्नि]** नामन् सप्तमी ङि ।

**[कुप्यं धनम्, + गोप्यमन्यत्]** 'गुपौ रक्षणे' (३३२) गुप् । गोपाय्यते तदिति । अनेन क्यप्प्र० → य - गोः कत्वं च निपात्यते । सि-अम्, धनम् । अन्यत्र 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । सि-अम् ।

---

P.卐 खेयश्च ।

+ श० म० न्यासानुसन्धाने-**गोपाय्यमन्यत्**- अत्र स्वरान्तलक्षणो यः पूर्वाकारस्य लोपश्च । आयप्रत्ययस्य वैकल्पिकत्वेन 'शकि-तकि०' (५।१।२९) इति पवर्गान्तलक्षणे ये गोप्यमित्यपि भवति । दैवादिकस्यापि गोप्यमिति भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ भिद्यः, अन्यत्र भेत्ता ]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्ति कूलानीति भिद्यः । अनेन क्यप्प्र० → य । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५२) विसर्गः । अन्यत्र 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ उद्ध्यः, अन्यत्र उज्झिता ]** 'उद्झत् उत्सर्गे' (१३५५) उद्झ् । उज्झत्युदकमिति उद्ध्यः । अनेन क्यप्प्र० → य - उज्झेर्धत्वं च निपात्यते । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । अन्यत्र 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ सिध्यः, अन्यत्र सेधनः ]** 'षिधूंच् संराद्धौ' (११८५) षिध् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिध् । सिध्यन्ति कार्याण्यस्मिन्निति सिध्यः । अनेन क्यप्प्र० → य । अन्यत्र सिध्यते = सेधनः । अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ तिष्यः, अन्यत्र त्वेषणः ]** 'त्विषीं दीप्तौ' (९३०) त्विष् । त्वेषन्ति कार्याण्यस्मिन्निति तिष्यः । अनेन क्यप्प्र० → य - वलोपश्च निपात्यते । अन्यत्र त्विष्यते = त्वेषणः । अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्याऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६३) न० → ण० ।

**[ पुष्यः, अन्यत्र पोषणः ]** 'पुषंच् पुष्टौ' (११७५) पुष् । पुष्यन्त्यस्मिन् कार्याणीति पुष्यः । क्यप्प्र० → य । अन्यत्र पुष्यते । अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ युग्यं वाहनं गजाश्वादि, योग्यमन्यत् ]** 'युजंपी योगे' (१४७६) युज् । युञ्जन्ति तदिति युग्यम् । अनेन क्यप्प्र० → य - ज् → गत्वं च निपात्यते । युज्यते = योग्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । सि-अम् ।

**[ आज्यं घृतम्, आञ्जनमन्यत् ]** 'अञ्जू(ञ्जौ)प् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज्, आङ्पूर्व० । आञ्जन्त्यनेनेति आज्यम् । अनेन क्यप्प्र० → य । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । सि-अम् । आज्यतेऽनेनेति । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । सि-अम् ।

**[ सूर्यो देवता ]** 'सृं गतौ' (२५) सृ । सरति कर्मसु लोकानिति सूर्यः । अनेन क्यप्प्र० → य - ऋकारस्य उर् आदेशश्च निपात्यते । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः । यद्वा 'षूत् प्रेरणे' (१३३२) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू । सुवति कर्मसु लोकानिति सूर्यः । अनेन क्यप्प्र० → य-रोऽन्तश्च निपात्यते ॥छा॥

### दृ-वृग्-स्तु-जुषेति-शासः ॥ ५।१।४० ॥

**[ दृवृग्स्तुजुषेतिशासः ]** दृश्च वृग् च स्तुश्च जुष् च एतिश्च शास् च = दृवृग्स्तुजुषेतिशास्, तस्मात् ।

**[ आदृत्यः ]** 'दृंङ्त्卐आदरे' (१४६६) दृ, आङ्पूर्व० । आद्रियते = आदृत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

P. 卐 अनादरे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रावृत्यः]** 'वृग्ट् वरणे' (१२९४) वृ, प्र-आङ्पूर्व० । प्राव्रियते = प्रावृत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[वार्या ऋत्विजः]** 'वृङ्श् संभक्तौ' (१५६७) वृ । व्रियत इति वार्या । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा जस् । याज्ञिक प्रथमा जस् ।

**[स्तुत्यः]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० सं० वक्ष०(१) सूत्र(२९) स्तु । स्तूयते = स्तुत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[अवश्यस्तुत्यः]** अवश्यं स्तूयते = अवश्यस्तुत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः । 'कृत्येऽवश्यमो लुक्' (३।२।१३८) मलुक् ।

**[जुष्यः]** 'जुषैति प्रीति-सेवनयोः' (१४७२) जुष् । जुष्यते = जुष्यः । अनेन क्यप्प्र० → य ।

**[इत्यः]** 'इंण्क् गतौ' (१०७५) इ । ईयते = इत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः ।

**[अधीत्यः]** 'इंक् स्मरणे' (१०७४) इ, अधिपूर्व० । अधीयते = अधीत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः ।

**[उपेयम्]** 'इं गतौ' (११) इ, उपपूर्व० । उपेयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'उपसर्गस्यानिणेधेदोति' (१।२।१९) अलुक् ।

**[अध्येयम्]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'ईंङ्च् गतौ' (१२५२) ई इत्यस्य उपेयमिति स्यात् ।

**[शिष्यः]** 'शासूक् अनुशिष्टौ' (१०९५) शास् । शिष्यते = शिष्यः । अनेन क्यप्प्र० → य । 'इसासः शासोऽङ्-व्यञ्जने' (४।४।११८) आस्० → इस्० ।

**['आशास्यमन्यत् पुनरुक्तभूतम्" (रघुवंशे)]** शास्, आङ्पूर्व० । आशिष्यते = आशास्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'आङः' (४।४।१२०) क्वावेवेति नियमात् न शिषादेशः ।

**["अनिवार्यो गजैरन्यैः स्वभाव इव देहिनाम्"]** 'वृङ्श् संभक्तौ' (१५६७) वृ, निपूर्व० । न निव्रियते = अनिवार्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा सि ॥छा।

## ऋदुपान्त्यादकृपि-चृदृचः ॥ ५।१।४१ ॥

**[ऋदुपान्त्यात्]** 'ऋत्卐उपान्त्ये यस्य सः = ऋदुपान्त्यः, तस्मात् ।

**[अकृपिचृदृचः]** कृपिश्च चृत् च ऋच्च = कृपिचृदृच्, न कृपिचृदृच् = अकृपिचृदृच् । 'नञत्' (३।२।१२५) न० → अ०, तस्मात् ।

**[वृत्यम्]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वृत्यते = वृत्यम् । अनेन क्यप्प्र० → य । सि-अम् ।

---

P. 卐 उपान्त्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वृध्यम् ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वृध्यते = वृध्यम् । अनेन क्यप्प्र० → य । सि-अम् ।

**[ गृध्यम् ]** 'गृधूच् अभिकाङ्क्षायाम्' (११८७) गृध् । गृध्यते = गृध्यम् । अनेन क्यप्प्र० → य । सि-अम् ।

**[ शृध्यम् ]** 'शृधूङ् शब्दकुत्सायाम्' (९५८) शृध् । शृध्यते = शृध्यम् । अनेन क्यप्प्र० → य । सि-अम् ।

**[ कल्प्यम् ]** 'कृपू(पौ)ङ् सामर्थ्ये' (९५९) कृप् । कृप्यते = कल्प्यम् । 'शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) र० → ल० । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ चर्त्यम् ]** 'चृतैत् हिंसा-ग्रन्थयोः' (१३६९) चृत् । चृत्यते = चर्त्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ अर्च्यम् ]** 'रु(ऋ)चत् स्तुतौ' (१३४०) ऋच् । ऋच्यते = अर्च्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ॥छ॥

## कृ-वृषि-मृजि-शसि-गुहि-दुहि-जपो वा ॥ ५।१।४२ ॥

**[ कृवृषिमृजिशंसिगुहिदुहिजपः ]** कृश्च वृषिश्च मृजिश्च शंसिश्च गुहिश्च दुहिश्च जप् च = कृवृषिमृजिशंसिगुहिदुहिजप्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ कृत्यम्, कार्यम् ]** 'डुकृंग् करणे' (८८८) कृ । क्रियते । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । पक्षे-'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ वृष्यम्, वर्ष्यम् ]** जिषू (५२२)-विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । वृष्यते । अनेन क्यप्प्र० → य । पक्षे-घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ मृज्यम्, मार्ग्यम् ]** 'मृजौक् शुद्धौ' (१०९७) मृज् । मृज्यते = मृज्यम् । अनेन क्यप्प्र० → य । पक्षे-घ्यण्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'मृजोऽस्य वृद्धिः' (४।३।४२) वृ० आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[ शस्यम्, शंस्यम् ]** 'शंसू स्तुतौ च' (५५०) शंस् । शस्यते । अनेन क्यप्प्र० → य । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । पक्षे-'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य ।

**[ गुह्यम्, गोह्यम् ]** 'गुहौग् संवरणे' (९३५) गुह् । गुह्यते । अनेन क्यप्प्र० → य । पक्षे-'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ दुह्यम्, दोह्यम् ]** 'दुहींक् क्षरणे' (११२७) दुह् । दुह्यते । अनेन क्यप्प्र० → य । पक्षे-'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ जप्यम्, जाप्यम् ]** 'जप मानसे च' (३३८) जप् । जप्यते । अनेन क्यप्प्र० → य । पक्षे-'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## जि-विपू-न्यो हलि-मुञ्ज-कल्के ॥ ५।१।४३ ॥

**[ जिविपून्यः ]** पूश्च नीश्च = पून्यौ, विपूर्वौ पून्यौ = विपून्यौ, जिश्च विपून्यौ च = जिविपूनी, तस्मात् ।

**[ हलिमुञ्जकल्के ]** हलिश्च मुञ्जश्च कल्कश्च = हलिमुञ्जकल्कम्, तस्मिन् ।

**[ जित्या जित्यो वा हलिः ]** 'जिं अभिभवे' (८) जि । जीयते निपुणेनेति जित्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ । महद्धलं हलिः ।

**[ विपूयो मुञ्जः ]** 'पूङ् पवने' (६००) पू । 'पूग्श् पवने' (१५१८) पू वा । विपवितव्यः = विपूयः । अनेन क्यप्प्र० → य । मुञ्जस्तृणविशेषः ।

**[ विनीयः कल्कः ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, विपूर्व० । विनेतव्यस्तैलादिना मध्ये इति विनीयः । अनेन क्यप्प्र० → य । तैलादिना कर्त्रात्मनो मध्ये विनेतव्यः, कोऽर्थः ? प्रापयितव्यः, यद्वा मध्ये वर्त्तमानेन तैलादिना उत्कर्षं विनेतव्यः । कल्कस्त्रिफलादीनाम् ।

**[ जेयम् ]** जीयते = जेयम् । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । सि-अम् ।

**[ विपव्यम् ]** विपूयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । सि-अम् ।

**[ विनेयम् ]** विनीयते । 'य एच्चाऽऽतः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । सि-अम् ॥छ॥

## पदा-ऽस्वैरि-बाह्या-पक्ष्ये ग्रहः ॥५।१।४४ ॥

**[ पदाऽस्वैरिबाह्यापक्ष्ये ]** पदश्च अस्वैरी च बाह्या च पक्ष्यश्च = पदाऽस्वैरिबाह्यापक्ष्यम्, तस्मिन् ।

**[ ग्रहः ]** ग्रह् पञ्चमी ङसि ।

**विभक्त्यन्तं पदम् । अस्वैरी = परतन्त्रः । बाह्या = बहिर्भवा । पक्ष्यो वर्गः ।**

घ्यणोऽपवादः ।

**[ प्रगृह्यं पदम् ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह्, प्रपूर्व० । प्रगृह्यते-विशेषेण ज्ञायते = प्रगृह्यम् । अनेन क्यप्प्र० → य । 'ग्रह-व्रस्व-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० ।

**[ अवगृह्यं पदम् ]** ग्रह्, अवपूर्व० । अवगृह्यते - नानावयवसात् क्रियते = अवगृह्यम् । अनेन क्यप्प्र० → य । 'ग्रह-व्रस्व-भ्रस्ज०' (४।१।८४) य्वृत् ग्र० → गृ० ।

**[ गृह्याः कामिनः ]** गृह्यन्ते = गृह्याः । अनेन क्यप्प्र० → य । 'ग्रह-व्रस्व-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० ।प्रथमा जस् । कामिनः = रागादिपरतन्त्रा इत्यर्थः ।

**[ ग्रामगृह्या श्रेणिः ]** गृह्यते = गृह्या । अनेन क्यप्प्र० → य । ग्रामात् गृह्या = ग्रामगृह्या श्रेणिः । 'आत्' (२।४।१८) आप्प्र० → आ । बाह्येत्यर्थः ।

**[ नगरगृह्या सेना ]** नगरात् गृह्या = नगरगृह्या । 'आत्' (२।४।१८) आप्प्र० → आ । सेना, बाह्येत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ त्वद्गृह्यः ]** गृह्यते = गृह्यः । तव गृह्यः = त्वद्गृह्यः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ मद्गृह्यः ]** गृह्यते = गृह्यः । मम गृह्यः = मद्गृह्यः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ "गुणगृह्या वचने विपश्चितः" (किराते) ]** गुणेषु गृह्या = गुणगृह्याः ।

**[ ग्राह्यं वचः ]** गृह्यते = ग्राह्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सि-अम् । वचस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् ॥छा॥

## भृगोऽसंज्ञायाम् ॥ ५।१।४५ ॥

**[ भृगः ]** भृग् पञ्चमी ङसि ।

**[ असंज्ञायाम् ]** न संज्ञा = असंज्ञा, तस्याम् ।

**[ भृत्यः ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । भ्रियते = भृत्यः । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः, पोष्य इत्यर्थः ।

**[ भार्यो नाम क्षत्रियः ]** भ्रियते = भार्यः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ भार्या पत्नी ]** भ्रियते = भार्या । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

ननु च संज्ञायामपि स्त्रियां 'भृगो नाम्नि' (५।३।९८) इति क्यबस्ति यथा-

**[ कुमारभृत्या ]** कुमार-भृ । 卐कुमारेण भ्रियते = कुमारभृत्या । 'भृगो नाम्नि' (५।३।९८) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ । नैवं तस्य क्यपो भावे स्त्रियां विधानादित्यर्थः ॥छा॥

## समो वा ॥ ५।१।४६ ॥

**[ समः ]** सम् पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ संभृत्यः, संभार्यः ]** सम् 'टुडुभृंग्क् पोषणे च' (११४०) भृ । संभ्रियते । अनेन क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । पक्षे-'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छा॥

## ते कृत्याः ॥ ५।१।४७ ॥

**[ ते ]** तद् प्रथमा जस् । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

---

卐 श० म० न्या० - कुमारस्य भरणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कृत्याः ]** कृत्य प्रथमा जस् ॥छ॥

## णक-तृचौ ॥ ५।१।४८ ॥

**[ णकतृचौ ]** णकश्च तृच् च = णकतृचौ ।

कृत्त्वात् कर्तरि ।

**[ पाचकः ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ पक्ता ]** पचतीति । अनेन तृच्प्र० → तृ । 'च-जः क-गम्' (२।१।८६) च० → क० । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ पाठकः ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठतीति । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ पठिता ]** पठ् । पठतीति । अनेन तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

णकारो वृद्ध्यर्थः ॥छ॥

## अच् ॥ ५।१।४९ ॥

**[ अच् ]** अच् प्रथमा सि ।

कृत्त्वात् कर्तरि ।

**[ करः ]** 'डुकृंग् करणे' (८८८) कृ । करोतीति करः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ हरः ]** 'हृंग् हरणे' (८८५) हृ । हरतीति हरः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ पचः ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति पचः । अनेन अच्प्र० → अ ।

**[ पठः ]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठतीति पठः । अनेन अच्प्र० → अ ।

**[ उद्वहः ]** उत् 'वहीं प्रापणे' (९९६) वह् । उद्वहतीति उद्वहः । अनेन अच्प्र० → अ ।

चकारः 'अचि' (३।४।१५) इत्यत्र विशेषणार्थः ॥छ॥

## लिहादिभ्यः ॥ ५।१।५० ॥

**[ लिहादिभ्यः ]** लिह् आदिर्येषां ते = लिहादयः, तेभ्यः = लिहादिभ्यः । पञ्चमी भ्यस् ।

**[ लेहः ]** 'लिहींक् आस्वादने' (११२९) लिह् । लेढीति लेहः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ शेषः ]**卐卐 'शिष्लृंप् विशेषणे' (१४९२) शिष् । शिनष्टीति शेषः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

---

卐卐 श० म० न्या० 'शिषण् असर्वोपयोगे' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सेवः ]** 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । सीव्यतीति सेवः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ देवः ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यतीति देवः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ मेथः ]** 'मेथृग् सङ्गमे च' (९०२) मेथ् । मेथतीति मेथः । अनेन अच्प्र० → अ ।

**[ मेषः ]** जिषू (५२२) - विषू (५२३) - 'मिषू सेचने (५२४) मिष् । मेषतीति मेषः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ मेघः ]** 'मिहं सेचने' (५५१) मिह् । मेहति = सिञ्चति सर्वपदार्थान् इति मेघः । अनेन अच्प्र० → अ । 'न्यङ्-कूद्ग-मेघाऽऽदयः' (४।१।११२) मेघनिपातः ।

**[ देहः ]** 'दिहींक् लेपे' (११२८) दिह् । देग्धीति देहः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

+**[ आरोहः ]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहतीति । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ न्यग्रोधः ]** न्यग् रोहतीति न्यग्रोधः । अनेन अच्प्र० । 'वीरुत् - न्यग्रोधौ' (४।१।१२१) ह० → ध० निपात्यते ।

**[ कोपः ]** 'कुपच् क्रोधे' (११९१) कुप् । कुप्यतीति कोपः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ गोपः ]** 卐'गुपच् व्याकुलत्वे' (११९२) गुप् । गुप्यतीति गोपः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ सर्पः ]** 'सृप्लृं गतौ' (३४१) सृप् । सर्पतीति सर्पः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ नर्तः ]** 'नृतैच् नर्त्तने' (११५२) नृत् । नृत्यतीति नर्तः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ दर्शः ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यतीति दर्शः । अनेन अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

एषु नाम्युपान्त्यलक्षणं कं दृशेस्तु वा शं बाधते ।

**[ श्वपचः ]** श्वन् - पच् । श्वानं पचतीति । अनेन अच्प्र० → अ ।

**[ पारापतः ]** पारं - तटमापततीति - आगच्छतीति पारापतः । अनेन अच्प्र० → अ ।

**[ कद्वदः ]** कु 'वद व्यक्तायां वाचि' (९९८) वद् । कुत्सितं वदतीति कद्वदः । अनेन अच्प्र० → अ । 'रथ-वदे (३।२।१३१) कु० → कद्० भवति ।

---

+ बृहद्वृत्तौ - प्ररोहः ।

卐 श० म० न्या० - "गुपौ रक्षणे" गोपायतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ यद्वदः ]** 卐卐यत् वदतीति । अनेन अच्प्र० → अ ।

**[ अरिव्रणा शक्तिः ]** अरि 'व्रणण् गात्रविचूर्णने' (१८६९) व्रण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलुक् । अरीन् व्रणयतीति । अनेन अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ जारभरा ]** जार 'भृंग् भरणे' (८८६) भृ । 'टुडुभृंग्क् पोषणे च' (११४०) भृ । 'भृश् भर्जने च' (१५३४) भृ । जारं भरति-बिभर्त्ति-भृणाति वा । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ कन्यावरः ]** कन्या 'वृग्ट् वरणे' (१२९४) वृ । कन्यां वृणोतीति । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ रघूद्वहः ]** रघु उत् 'वहीं प्रापणे' (९९६) वह् । रघुमुद्वहतीति । अनेन अच्प्र० → अ ।

**[ रसावहः ]** रसमावहतीति रसावहः । अनेन अच्प्र० → अ ।

एषु 'कर्मणोऽण्' (५।१।७२) इत्यनेन अणं बाधते । बहुवचनमाकृतिगणार्थम् ॥छ॥

## ब्रुवः ॥ ५।१।५१ ॥

**[ ब्रुवः ]** ब्रू पञ्चमी ङसि । 'संयोगात्' (२।१।५२) उव् ।

**[ ब्राह्मणब्रुवः ]** ब्राह्मण 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । ब्राह्मणमात्मानं ब्रूते । अनेन 'अच्' (५।१।४९) अच्प्र०-ब्रुवः । अण्-वचादेश-गुणबाधनार्थं निपातनम् ॥छ॥

## नन्द्यादिभ्योऽनः ॥ ५।१।५२ ॥

**[ नन्द्यादिभ्यः ]** नन्दिरादिर्येषां ते = नन्द्यादयः, तेभ्यः = नन्द्यादिभ्यः । पञ्चमी भ्यस् ।

**[ अनः ]** अन प्रथमा सि ।

**[ नन्दनः ]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । नन्दयतीति नन्दनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ वाशनः ]** 'वाशिच् शब्दे' (१२७९) वाश् । वाश्यमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । वास(श)यतीति वास(श)नः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ मदनः ]** 卐'मदिण् तृप्तियोगे' (१८०७) मद । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । मदयतीति मदनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ दूषणः ]** 'दुषंच् वैकृत्ये' (१२०९) दुष् । दुष्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ऊद् दुषो णौ' (४।२।४०) दूष् । दूषयतीति दूषणः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे (२।३।६३) न० → ण० ।

---

卐卐 श० म० न्या० - यं वदतीति ।

卐 धातुपारायणे - "मदैच् हर्षे" णौ हर्ष-ग्लपनयोः, घटादित्वात् ह्रस्वे मदयतीति मदनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ साधनः ]** राधं (१३०४) – 'साधंट् संसिद्धौ' (१३०५) साध् । साध्नुवन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । साधयतीति साधनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ वर्धनः ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । वर्धयतीति वर्धनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ शोभनः ]** 'शुभि दीप्तौ' (९४७) शुभ् । शोभमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । शोभयतीति शोभनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ रोचनः ]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । रोचयतीति रोचनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ सहनः ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । सहते = सहनः । अनेन अनप्र० ।

**[ रमणः ]** 'रमिं क्रीडायाम्' (९८९) रम् । रमते = रमणः । अनेन अनप्र० । णत्वम् ।

**[ दमनः ]** शमू (१२३०)–'दमूच् उपशमे' (१२३१) दम् । दाम्यतीति दमनः । अनेन अनप्र० ।

卐**[ रोचनः ]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचते = रोचनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ विरोचनः ]** वि 'रुचि अभिप्रीत्यां च' (९३८) रुच् । विशेषेण रोचते = विरोचनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ विकर्तनः ]** कृतैत् छेदने (१३२५) कृत्, विपूर्व० । विकृन्ततीति विकर्तनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ तपनः ]** 'तपं संतापे' (३३३) तप् । तपति जगतीमिति तपनः = सूर्यः । अनेन अनप्र० ।

**[ प्रतर्दनः ]** 'उतृदृपी हिंसा-ऽनादरयोः' (१४८१) तृद्, प्रपूर्व० । प्रतृणत्तीति प्रतर्दनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ दहनः ]** 'दहं भस्मीकरणे' (५५२) दह् । दहति सर्वं वस्तु इति दहनोऽग्निः । अनेन अनप्र० ।

**[ यवनः ]** 'युक् मिश्रणे' (१०८०) यु । यौतीति यवनः । अनेन अनप्र०.। 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ पवनः ]** 'पूङ् पवने' (६००) पू । 'पूग्श् पवने' (१५१८) पू । पवते-पुनातीति वा पवनः । अनेन अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ लवणः ]** 'लूग्श् छेदने' (१५१९) लू । लुनातीति लवणः । अनेन अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । निपातनाण्णत्वम् ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ संक्रन्दनः ]** 卐कदुङ् (१००६) - 'क्रदुङ् वैक्लव्ये' (१००७) क्रद्, सम्पूर्व० । 'उदितः स्वराम्नोऽन्तः' (४।४।९८) संक्रन्द् । संक्रन्दति(ते) = संक्रन्दनः = इन्द्रः । अनेन अनप्र० ।

**[ संकर्षणः ]** +'कृषींत् विलेखने' (१३१९) कृष्, सम्पूर्व० । संकृषति-संकर्षयति वा संकर्षणः = बलदेवः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ संहर्षणः ]** 'हृषू अलीके' (५३५) हृष्, सम्पूर्व० । तुषं (१२१३) 'हृषच् तुष्टौ' (१२१४) हृष्, सम्पूर्व० । 'संहर्षति-संहृष्यति-संहर्षयति वा = संहर्षणः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

अकर्मका अपि हि धातवो ण्यर्थे वर्त्तमानाः सकर्मका भवन्त्येतेषु उदाहरणेष्वग्रेतनेष्विति ज्ञेयः ।

**[ सर्वदमनः ]** शमू (१२३०)-'दमूच् उपशमे' (१२३१) दम् । दाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । सर्वपूर्व०, सर्वं दमयतीति । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ जनार्दनः ]** 'अर्द गति-याचनयोः' (३०१) अर्द् । अर्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । जनपूर्व०, जनमर्दयतीति । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ वित्तविनाशनः ]** 'नशौच् अदर्शने' (१२०२) नश्, विपूर्व० । विनश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वित्तपूर्व०, वित्तं विनाशयतीति । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ मधुसूदनः ]** 'षूदण् आस्रवणे' (१७४०) षूद । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सूद । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'षूदि क्षरणे' (७३६) षूद् वा । 'षः सोऽष्ट्यै०' (२।३।९८) सूद् । सूद्यमानं-सूदमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । मधुपूर्व०, मधुं सूदयतीति । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

असंज्ञायामपि-

**[ रिपुदमनः ]** रिपून् दमयतीति । अनेन अनप्र० । शेषं पूर्ववत् ।

**[ कुलदमनः ]** कुलं दमयतीति । अनेन अनप्र० । शेषं पूर्ववत् ।

**[ परानर्दनः ]** परान् अर्दयतीति । अनेन अनप्र० । शेषं पूर्ववत् ।

**[ रोगनाशनः ]** रोगान् नाशयतीति । अनेन अनप्र० । शेषं पूर्ववत् ।

**[ अरिसूदनः ]** अरीन् सूदयतीति । अनेन अनप्र० । शेषं पूर्ववत् ।

**[ नर्दनः ]** नर्द शब्दे (३०२) नर्द् । नर्दमानं(नर्दन्तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । नर्दयतीति । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

---

P. 卐 कदु (३१५) - 'क्रदु रोदनाह्वानयोः' (३१६) क्रद् । 'उदितः स्वराम्नोऽन्तः' (४।४।९८) क्रन्द्, सम्पूर्व० । संक्रन्दतीति ।

+ श० म० न्या० 'कृषं विलेखने' (५०६) कृष् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ विभीषणः ]** 'ञिभींक् भये' (११३२) भी, विपूर्व० । विबिभ्यन्तं(तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'बिभेतेर्भीष् च' (३।३।९२) भी → "भीष्"आदेशः । विभीषयते । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ भूषणः ]** 'भूष अलङ्कारे' (१७५६) भूष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । भूषयतीति । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ दर्पणः ]** 'दृपौच् हर्ष-मोहनयोः' (११९०) दृप् । दृप्यतीति । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० ।

**[ जल्पनः ]** रप (३३५) - लप (३३६) - 'जल्प व्यक्ते वचने' (३३७) जल्प् । जल्पतीति । अनेन अनप्र० । सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ॥छ॥

## ग्रहादिभ्यो णिन् ॥ ५।१।५३ ॥

**[ ग्रहादिभ्यः ]** ग्रह् आदिर्येषां ते = ग्रहादयः, तेभ्यः = ग्रहादिभ्यः । पञ्चमी भ्यस् ।

**[ णिन् ]** णिन् प्रथमा सि ।

**[ ग्राही ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । गृह्णातीति । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ स्थायी ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० वक्ष०(१)/सूत्र(२९)) स्था । तिष्ठतीति । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उपस्थायी ]** स्था, उपपूर्व० । उपतिष्ठतीति(उपतिष्ठते) । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ मन्त्री ]** 'मन्त्रिण् गुप्तभाषणे' (१८४०) मन्त्र । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । मन्त्रयतीति(यते) । अनेन णिन्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ संमर्दी ]** 'मृदश् क्षोदे' (१५५०) मृद्, सम्पूर्व० । संमृद्नातीति । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उपरोधी ]** 'रुधृंपी आवरणे' (१४७३) रुध्, उपपूर्व० । उपरुणद्धीति । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अवरोधी ]** 'रुधृंपी आवरणे' (१४७३) रुध्, अवपूर्व० । अवरुणद्धीति । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अपराधी ]** अप 'राधं संसिद्धौ' (१३०४) राध् । अपराध्नोतीति । अनेन णिन्प्र० → इन् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उत्साही ]** उत् 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । उत्सहते । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उद्दासी ]** उत् 'दासृग् दाने' (९३३) दास् । उद्दासते-उद्दासतीति । अनेन णिन्प्र० → इन् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उद्भासी ]** उत् 'भासि दीप्तौ' (८४६) भास् । उद्भासते । अनेन णिन्प्र० → इन् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ निश्रावी ]** नि 'श्रुंट् श्रवणे' (१२९६) श्रु । निशृणोति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ निशायी ]** 卐नि'शीङ्क् स्वप्ने' (११०५) शी । निशेते । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ निवेशी ]** नि 'विशंत् प्रवेशने' (१४१५) विश् । निविशते । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ निवासी ]** नि 'वसं निवासे' (९९९) वस् । निवसतीति । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ निवापी ]** नि 'डुवपीं बीजसन्ताने' (९९५) वप् । निवसतीति । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ निरक्षी ]** नि 'रक्ष पालने' (५६७) रक्ष् । निरक्षतीति । अनेन णिन्प्र० → इन् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

---

卐 श० म० न्या० – 'शोंच् तक्षणे' । निश्यतीति णिनि ओकारस्य 'आत् सन्ध्यक्षरस्य' (४।२।१) इत्याकारे तस्य 'आत ऐः कृञ्वौ' (४।३।५३) इत्यैकारे तस्यायादेशे च निशायी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अव्याहारी]** 'हृंग् हरणे' (८८५) हृ, नञ्-वि-आङ्पूर्व० । न व्याहरति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[असंव्याहारी]** हृ, नञ्-सम्-वि-आङ्पूर्व० । न संव्याहरति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[असंव्यवहारी]** हृ, नञ्-सम्-वि-अवपूर्व० । न संव्यवहरति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक्। 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[अयाची]** डुयाचृग् याच्ञायाम् (८९१) याच्, नञ्पूर्व० । न याचते = न प्रार्थयतीति । अनेन णिन्प्र० → इन् । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[अव्राजी]** धृज (१३०) - धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) ध्रज (१३४) - ध्रजु (१३५) - वज (१३६) - व्रज गतौ (१३७) व्रज्, नञ्पूर्व० । न व्रजति = न गच्छतीति । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[अवादी]** 'वद व्यक्तायां वाचि' (९९८) वद्, नञ्पूर्व० । न वदते(तीति) । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[अवासी]** 'वसं निवासे' (९९९) वस्, नञ्पूर्व० । न वसतीति । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

नञ्पूर्वात् स्वरान्ताद**चित्तवत्कर्तृकात्**-

**[अचित्तवत्कर्तृकात्]** चित्तं विद्यते यस्य सः = चित्तवान्, न चित्तवान् = अचित्तवान्, स कर्त्ता यस्य, तस्मात् ।

**[अकारी धर्मस्य बालातपः]** 'डुकृंग् करणे' (८८८) कृ, नञ्पूर्व० । न करोतीति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'नञत्' (३।२।१२५) न० → अ० । धर्मस्य, बालातप प्रथमा सि ।

**[अहारी शीतस्य शिशिरः]** 'हृंग् हरणे' (८८५) हृ, नञ्पूर्व० । न हरतीति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'नञत्' (३।२।१२५) न० → अ० । शीतस्य, शिशिर प्रथमा सि ।

चित्तवत्कर्तृकान्न भवति-

**[अकर्ता कटस्य चैत्रः]** डुकृंग् करणे (८८८) कृ, नञ्पूर्व० । न करोतीति । णक-तृचौ (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

व्यभिभ्यां भुवोऽतीते-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[ विभावी ]** 'भू सत्तायाम्' (१) भू, विपूर्व० । विभवति स्म । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अभिभावी ]** 'भू सत्तायाम्' (१) भू, अभिपूर्व० । अभिभवति स्म । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ विभावी, विभवी ]** विभवतीति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । तेनैव ह्रस्वः । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ परिभावी, परिभवी ]** परिभवतीति । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । ओदौतोऽवाव् (१।२।२४) आव् । तेनैव ह्रस्वः । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ विशयी ]** 'शीङ्क स्वप्ने' (११०५) शी, विपूर्व० । विशेते । अनेन णिन्प्र० → इन् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ विषयी प्रदेशः ]** 'षिंगट् बन्धने' (१२८७) षि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सि, विपूर्व० । विसिनोतीति । अनेन णिन्प्र० → इन् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । निपातनात् षत्वम् ।

ग्रहादिराकृतिगणः ॥छ॥

## नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः ॥ ५।१।५४ ॥

**[ नाम्युपान्त्यप्रीकृगृज्ञः ]** 卐उपगतोऽन्त्यः = उपान्त्यः । 卐नामी उपान्त्यो येषां ते = नाम्युपान्त्याः । नाम्युपान्त्याश्च प्रीश्च कृश्च गृश्च ज्ञाश्च = तत्, तस्मात् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ कः ]** क प्रथमा सि ।

ककारः कित्कार्यार्थः, तस्य फलं गुणो न भवति ।

**[ विक्षिपः ]** 'क्षिपंच् प्रेरणे' (११५८) क्षिप् । 'क्षिपींत् प्रेरणे' (१३१७) क्षिप्, विपूर्व० । विक्षिप्यति विक्षिपतीति वा । अनेन कप्र० → अ ।

**[ विलिखः ]** 'लिखत् अक्षरविन्यासे' (१३३६) लिख्, विपूर्व० । विलिखतीति । अनेन कप्र० → अ ।

**[ बुधः ]** 'बुधिं ज्ञाने' (१२६२) बुध् । बुध्यते । अनेन कप्र० → अ ।

**[ युधः ]** 'युधिंच् सम्प्रहारे' (१२६०) युध् । युध्यते । अनेन कप्र० → अ ।

---

P. 卐 उपगतोऽन्तः = उपान्तः । नामी उपान्तो यस्य सः = नाम्युपान्तः । नाम्युपान्तश्च प्रीश्च..... ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कृशः ]** 'कृशच् तनुत्वे' (१२०७) कृश् । कृश्यत्यसौ । अनेन कप्र० → अ ।

**[ प्रियः ]** 'प्रींग्श् तृप्ति-कान्त्योः' (१५१०) प्री । प्रीणातीति । अनेन कप्र० → अ । 'संयोगात्' (२।१।५२) इय् ।

**[ किरः ]** 'कृत् विक्षेपे' (१३३४) कृ । किरतीति । अनेन कप्र० → अ । 'ऋतां क्ङितीर्' (४।४।११६) इर् ।

**[ उत्किरः ]** उत्किरतीति । अनेन कप्र० → अ । 'ऋतां क्ङितीर्' (४।४।११६) इर् ।

**[ गिलः ]** 'गृत् निगरणे' (१३३५) गृ । +गिरतीति । अनेन कप्र० → अ । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) इति व्यवस्थितविभाषाविज्ञानात् नित्यमेव लत्वम् ।

**[ निगिलः ]** 卐卐निगिरतीति । अनेन कप्र० → अ । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'नवा स्वरे' (२।३।१०२) इति व्यवस्थितविभाषाविज्ञानात् नित्यमेव लत्वम् ।

**[ ज्ञः ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । जानातीति । अनेन कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[ काष्ठभेदः ]** काष्ठ 'भिदृंपी विदारणे' (१४७७) भिद् । काष्ठं भिनत्तीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।।छा।

## गेहे ग्रहः ॥ ५।१।५५ ॥

**[ गेहे ]** गेह सप्तमी ङि ।

**[ ग्रहः ]** ग्रह् पञ्चमी ङसि ।

**[ गृहम् ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । गृह्णाति पुरुषोपार्जितं वित्तमिति गृहम् । अनेन कप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० ।

**[ गृहाणि गृहाः ]** गृह्णन्ति पुरुषोपार्जितानि वित्तानि इति गृहाणि गृहा वा । अनेन कप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० । प्र० जस् । पुंसि बहुवचनान्त एव ।

उपचारात् "**दारा गृहाः**" दारा एव गृहा इत्यर्थः । यत उक्तं-"**गृहिणी गृहमुच्यते**" ।।छा।

## उपसर्गादातो डोऽश्यः ॥ ५।१।५६ ॥

**[ उपसर्गात् ]** उपसर्ग पञ्चमी ङसि ।

**[ आतः ]** आत् पञ्चमी ङसि ।

**[ डोऽश्यः ]** ड प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । न श्या = अश्या(:), तस्मात् = अश्यः । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् । 'अतोऽति रोरुः' (१।३।२०) र० → उ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

---

+ श० म० न्या० - गिलतीति ।

卐卐 श० म० न्या० - निगिलतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आह्वः ]** 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा, आङ्पूर्व० । आह्वयतीति । अनेन डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) आलुक् ।

**[ प्रह्वः ]** प्रह्वयतीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ संव्यः ]** 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या, सम्पूर्व० । संव्ययतीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ परिव्यः ]** परिव्ययतीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ प्रज्यः ]** 'ज्यांश् हानौ' (१५२४) ज्या, प्रपूर्व० । प्रकर्षेण जिनातीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ अनुज्यः ]** अनु जिनातीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ प्रस्थः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) स्था । 'निमिताभावे०' (न्या० सं० वक्ष०(१)/सूत्र(२९)) स्था, प्रपूर्व० । प्रतिष्ठतीति(ते) । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ सुग्लः ]** 'ग्लै हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ग्ला, सुपूर्व० । सुष्ठु ग्लायतीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ सुम्लः ]** 'म्लैं गात्रविनामे' (३२) म्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) म्ला, सुपूर्व० । सुष्ठु म्लायतीति । अनेन डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) आलुक् ।

**[ सूत्रः ]** 'त्रैङ् पालने' (६०५) त्रै । 'आत् सन्ध्यक्षरस्य' (४।२।१) त्रा, सुपूर्व० । सुष्ठु त्रायते । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ व्यालः ]** वि-आङ् 'लांक् आदाने' (१०६८) ला । व्यालातीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ सुरः ]** 'रांक् दाने' (१०६९) रा, सुपूर्व० । सुष्ठु रातीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**केनैव सिद्धे डविधानं य्वृन्निषेधार्थम् ।**

**[ दायः ]** 'डुदांग्क् दाने' (११३८) दा । ददातीति दायः । 'तन्-व्यधीण्-श्वसातः' (५।१।६४) णप्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ धायः ]** 'डुधांग्क् धारणे च' (११३९) धा । दधातीति धायः । 'तन्-व्यधीण्-श्वसातः' (५।१।६४) णप्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ आहर्ता ]** आहरतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ अवश्यायः ]** 'श्यैंङ् गतौ' (६०६) श्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) श्या, अवपूर्व० । अवश्यायते । 'तन्-व्यधीण्-श्वसातः' (५।१।६४) णप्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रतिश्याय: ]** प्रतिश्यायते । 'तन्-व्यधीण्-श्वसात:' (५।१।६४) णप्र० → अ । 'आत ऐ: कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

'पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (न्या० सं० वक्ष०(१)/सूत्र(३६)) इति णो बाध्यते नाण्, तेन-

**[ गोसंदाय: ]** 'डुदांग्क् दाने' (११३८) दा, गो-सम्पूर्व० । गां संददातीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । आत ऐ: कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ वडवासंदाय: ]** वडवां संददातीति । 'कर्मणोऽण् (५।१।७२) अण्प्र० → अ । 'आत ऐ: कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ॥छ॥

## व्याघ्रा-ऽऽघ्रे प्राणि-नसो: ॥ ५।१।५७ ॥

**[ व्याघ्राऽऽघ्रे ]** व्याघ्रश्च आघ्रा च = व्याघ्राऽऽघ्रे । औ । 'औता' (१।४।२०) ए ।

**[ प्राणिनसो: ]** प्राणी च नासिका च = प्राणिनासिके, तयो: = प्राणिनसो: । सप्तमी ओस् । 'दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नसहृदसन्यूषन्नुदन्दोषन्यकञ्छकन् वा (२।१।१०१) नासिकाया "नस्"आदेश: ।

**[ व्याघ्र: प्राणी ]** 'घ्रां गन्धोपादाने' (३) घ्रा, वि-आङ्पूर्व० । विविधमाजिघ्रति व्याघ्र: । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादे:' (२।१।११४) आलुक् ।

**[ आघ्रा नासिका ]** 'घ्रां गन्धोपादाने' (३) घ्रा, आङ्पूर्व० । आजिघ्रतीति आघ्रा । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादे:' (२।१।११४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

शस्यापवाद: ॥छ॥

## घ्रा-ध्मा-पा-ट्धे-दृश: श: ॥ ५।१।५८ ॥

**[ घ्राध्मापाट्धेदृश: ]** घ्राश्च ध्माश्च पाश्च ट्धेश्च दृश् च = घ्राध्मापाट्धेदृश्, तस्मात् ।

**[ श: ]** श प्रथमा सि ।

**[ जिघ्र: ]** 'घ्रां गन्धोपादाने' (३) घ्रा । जिघ्रतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सद: शृ-कृ-धि-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-शीय-सीदम्' (४।२।१०८) "जिघ्र" आदेश: ।

**[ विजिघ्र: ]** वि-घ्रा । विजिघ्रतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) "जिघ्र" आदेश: ।

**[ उज्जिघ्र: ]** उत्-घ्रा । उज्जिघ्रतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) "जिघ्र"आदेश: ।

**[ धम: ]** 'ध्मां शब्दा-ऽग्निसंयोगयो:' (४) ध्मा । धमतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सद: शृ-कृ-धि-पिब-जिघ्र-धम०' (४।२।१०८) "धम"आदेश: ।

**[ विधम: ]** वि-ध्मा । विधमतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) "धम"आदेश: ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ उद्धमः ]** उत्-ध्मा । उद्धमतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) "धम"आदेशः ।

**घ्रादिसाहचर्यात् "पा" इति पिबतेर्ग्रहणं, न पातेः ।**

**[ पिबः ]** 'पां पाने' (२) पा । पिबतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा०' (४।२।१०८) "पिब"आदेशः ।

**[ निपिबः ]** नि-पा । नितरां पिबतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा०' (४।२।१०८) "पिब"आदेशः ।

**[ उत्पिबः ]** उत्-पा । उत्पिबतीति । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) "पिब"आदेशः ।

**[ धयः ]** 'ट्धें पाने' (२८) धे । धयतीति धयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) सर्वत्र अलुक् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ विधयः ]** वि-धे । विशेषेण धयतीति विधयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ उद्धयः ]** उत्-धे । उद्धयतीति उद्धयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पश्यः ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । पश्यतीति पश्यः । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्०' (४।२।१०८) "पश्य"आदेशः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ विपश्यः ]** वि-दृश् । विशेषेण पश्यतीति विपश्यः । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा०' (४।२।१०८) "पश्य"आदेशः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ उत्पश्यः ]** उत्-दृश् । उत्पश्यतीति उत्पश्यः । अनेन शप्र० → अ । 'श्रौति-कृवु-धिवु-पा-घ्रा०' (४।२।१०८) "पश्य"आदेशः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ उद्धयी ]** उद्धय पूर्ववत् ज्ञेयः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ विधयी ]** विधय पूर्ववत् ज्ञेयः । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

शकारः शित्कार्यार्थः ॥छा॥

## साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात् ॥ ५।१।५९ ॥

**[ साहिसातिवेद्युदेजिधारिपारिचेतेः ]** साहिश्च सातिश्च वेदिश्च उदेजिश्च धारिश्च पारिश्च चेतिश्च = साहिसातिवेद्युदेजिधारिपारिचेति, तस्मात् ।

**[ अनुपसर्गात् ]** न विद्यते उपसर्गो यस्य सः = अनुपसर्गः, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ साहयः ]** 卐'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः (२।३।९८) सह् । सहमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । साहयतीति साहयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ सातयः ]** सातिः सौत्रो धातुः-सात् । सातन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । सातयतीति सातयः । अवेन शप्र० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ वेदयः ]** 'विदक् ज्ञाने' (१०९९) विद् । विदन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । वेत्ति-विद्यते-विन्दति-विनत्ति वा कश्चित्, तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० → इ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । वेदयतीति वेदयः । अनेन शप्र० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ उदेजयः ]** 'एजृ कम्पने' (१४८) एज् । 'एजृङ् दीप्तौ' (६५९) एज्, उत्पूर्व० इति वा । उदेजन्तं-उदेजमानं वा प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । उदेजयतीति उदेजयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ धारयः ]** 'धृंग् धारणे' (८८७) धृ । 卐卐धरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । धारयतीति धारयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ पारयः ]** 'पार कर्मसमाप्तौ' (१९०१) पार । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । पारयतीति पारयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ चेतयः ]** 'चितिण् संवेदने' (१८२६) चित् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । चेतयत इति चेतयः । अनेन शप्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ प्रसाहयिता ]** सह्, प्रपूर्व० । प्रसहमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । प्रसाहयतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्य०' (२।१।११३) अन्त्यस्वरादिलोपः ।

**[ छत्रधारः ]** छत्र ण्यन्त-धारि । छत्रं धारयतीति । 'कर्मणोऽण्' (५।१।७२) अणप्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।।छ।।

---

P. 卐 'षहण् मर्षणे' (१९८२) षह् ।

P. 卐卐 धरमाणं प्रयुङ्क्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## लिम्प-विन्दः ॥ ५।१।६० ॥

**[ लिम्पविन्दः ]** लिम्पश्च विन्द् च = लिम्पविन्द्, तस्मात् ।

**[ लिम्पः ]** 'लिपींत् उपदेहे' (१३२४) लिप् । लिम्पतीति । अनेन शप्र० । 'तुदादेः शः' (३।४।८१) शप्र० । 'मुचादि-तृफ-दृफ-गुफ-शुभोभः शे' (४।४।९९) नागमः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → म० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ विन्दः ]** 'विद्लृंती लाभे' (१३२२) विद् । विन्दतीति । अनेन शप्र० । 'तुदादेः शः' (३।४।८१) शप्र० । 'मुचादि-तृफ-दृफ-गुफ-शुभोभः शे' (४।४।९९) नागमः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

लिप्साहचर्यात् विन्देस्तौदादिकस्य ग्रहः, न तु 'विदु अवयवे' (३१०) इत्यस्य ।

**[ प्रलिपः ]** प्रलिम्पतीति प्रलिपः । 'नाम्युपा०' (५।१।५४) कप्र० → अ ॥छा॥

## नि-गवादेर्नाम्नि ॥ ५।१।६१ ॥

**[ निगवादेः ]** 卐गौरादिर्येषां ते = गवादयः, निश्च गवादयश्च = निगवादि, तस्मात् ।

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ईङौ वा' (२।१।१०९) अलोपः ।

**[ निलिम्पा नाम देवाः ]** 'लिपींत् उपदेहे' (१३२४) लिप्, निपूर्व० । निलिम्पन्तीति निलिम्पाः । अनेन शप्र० । 'तुदादेः शः' (३।४।८१) शप्र० । मुचादि- तृफ-गुफ-दृफ-शुभोभः शे' (४।४।९९) नागमः । 'म्नां धुड्वर्गे०' (१।३।३९) न० → म० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा जस् । देव प्रथमा जस् ।

**[ गोविन्दः ]** 'विद्लृंती लाभे' (१३२२) विद्, गोपूर्व० । गां विन्दतीति । अनेन शप्र० । 'तुदादेः शः' (३।४।८१) शप्र० । 'मुचादि-तृफ०' (४।४।९९) नागमः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ कुविन्दः ]** कु-विद् । 卐卐कुं विन्दतीति । अनेन शप्र० । 'तुदादेः शः' (३।४।८१) शप्र० । 'मुचादि-तृफ०' (४।४।९९) नागमः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ अरविन्दः ]** अर-विद् । अरान् विन्दतीति अरविन्दः । अनेन शप्र० । 'मुचादि-तृफ०' (४।४।९९) नागमः । 'लुगस्यादे०' (२।१।११३) अलोपः । चक्रावयवविशेषः, अब्जे तु क्लीबत्वम्, कश्चित्त्वब्जेऽपि पुंस्त्वमाह, राजा च ।

**[ कुरुविन्दः ]** कुरु - विद् । कुरून् विन्दतीति । अनेन शप्र० । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'मुचादि - तृफ०' (४।४।९९) नागमः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ निलिपः ]** निलिम्पतीति । 'नाम्युपा०' (५।१।५४) कप्र० → अ । सर्वत्र प्रथमा सि ॥छा॥

## वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्त्रोर्णः ॥ ५।१।६२ ॥

**[ वा ]** वा प्रथमा सि ।

**[ ज्वलादिदुनीभूग्रहाऽऽस्त्रोः ]** +ज्वल आदिर्येषां ते = ज्वलादयः, ज्वलादयश्च दुश्च नीश्च भूश्च ग्रहश्च आस्रुश्च = ज्वलादिदुनीभूग्रहाऽऽस्रु, तस्मात् ।

---

P. 卐 गौरादिर्यस्य सः = गवादिः, निश्च गवादिश्च.... ।

P. 卐卐 कु = ईषत् विन्दतीति ।

P. + ज्वल आदिर्यस्य सः = ज्वलादिः, ज्वलादिश्च दुश्च.... ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ णः ] ण प्रथमा सि ।

षहिपर्यन्ता ज्वलादयो वृत्करणात् ।

[ ज्वलः, ज्वालः ] 'ज्वल दीप्तौ' (९६०) ज्वल् । ज्वलतीति ज्वलः । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

[ चलः, चालः ] 'चल कम्पने' (९७२/१०५५) चल् । चलतीति । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

[ निपातः ] 'पत्लृ गतौ' (९६२) पत्, निपूर्व० । निपततीति निपातः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

[ उत्क्रोशः ] 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, उत्पूर्व० । उत्क्रोशतीति । अनेन णप्र० → अ । बहुलाधिकारात् सोपसर्गादपीत्यर्थः ।

[ दवः, दावः ] 'टुदुंट् उपतापे' (१२९७) दु । दुनोतीति दवः-दावः । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२३) आव् ।

[ नयः, नायः ] 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयतीति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

[ भवः, भावः ] 'भू सत्तायाम्' (१) भू । भवतीति । 'अच्' (५।१।४९) अच्प्र० → अ । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२३) आव् ।

[ ग्राहो मकरादिः, ग्रहः सूर्यादिः ] 'ग्रहीश् उपादाने' (१५१७) ग्रह् । गृह्णातीति । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ आस्रवः, आस्रावः ] इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु, आङ्पूर्व० । आस्रवतीति । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ प्रज्वलः ] प्रज्वलतीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ प्रदवः ] प्रदुनोतीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ प्रणयः ] प्रनयतीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ प्रभवः ] प्रभवतीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ प्रग्रहः ] प्रगृह्णातीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

[ प्रस्रवः ] प्रस्रवतीति । 'अच्' (५।१।४९) अच्प्र० → अ ।

ज्वल (९६०) - कुच (९६१) - पत्लृ (९६२) - पथे (९६३) - क्वथे (९६४) - मथे (९६५) - षद्लृं (९६६) - शद्लृं (९६७) - बुध (९६८) - टुवमू (९६९) - भ्रमू (९७०) - क्षर (९७१) - चल (९७२) - जल (९७३) - टल (९७४) - ट्वल (९७५) - ष्ठल (९७६) - हल (९७७) - णल (९७८) - बल (९७९) - पुल

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(९८०) - कुल (९८१) - पल (९८२) - फल (९८३) - शल (९८४) - हुल (९८५) - क्रुशं (९८६) - कस (९८७) - रुहं (९८८) - रमिं (९८९) - षहि (९९०) इति वृत्ज्वलादिः ॥३१॥छा॥

**अवहृ-सा-संस्रोः ॥ ५।१।६३ ॥**

**[ अवहृसासंस्रोः ]** हृश्च साश्च = हृसौ, अवात् हृसौ = अवहृसौ, सम्पूर्वः स्रुः = संस्रुः, अवहृसौ च संस्रुश्च = अवहृसासंस्रु, तस्मात् ।

**[ अवहारः ]** 'हृंग् हरणे' (८८५) हृ, अवपूर्व० । अवहरतीति अवहारः । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ अवसायः ]** 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा, अवपूर्व० । अवस्यतीति अवसायः । अनेन णप्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ संस्रावः ]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु, सम्पूर्व० । संस्रवतीति संस्रावः । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छा॥

**तन्-व्यधीण्-श्वसातः ॥ ५।१।६४ ॥**

**[ तन्व्यधीण्श्वसातः ]** तन् च व्यधिश्च इण् च श्वस् च आच्च = तन्व्यधीण्श्वसात्, तस्मात् ।

**[ तानः ]** 'तनूयी विस्तारे' (१४९९) तन् । तनोतीति तानः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ उत्तानः ]** तन्, उत्पूर्व० । उत्तनोतीति उत्तानः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अवतानः ]** तन्, अवपूर्व० । अवतनोतीति अवतानः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

卐**[ वितानः ]** तन्, विपूर्व० । वितनोतीति वितानः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ व्याधः ]** 'व्यधंच् ताडने' (११५७) व्यध् । +व्यधनं = व्याधः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रत्यायः ]** 'इंण्क् गतौ' (१०७५) इ, प्रतिपूर्व० । प्रत्येतीति प्रत्यायः । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ अत्यायः ]** इ, अतिपूर्व० । अत्येतीति अत्यायः । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ अन्तरायः ]** इ, अन्तर्पूर्व० । *अन्तरेतीति अन्तरायः । अनेन णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति    * श० म० न्या० - अन्तरा एतीति ।    P. + विध्यतीति ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

**[ श्वासः ]** । अन (१०८९) - 'श्वसक् प्राणने' (१०९०) श्वस् । 卐卐श्वसनं = श्वासः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ आश्वासः ]** श्वस्, आङ्पूर्व० । आश्वसनं = आश्वासः । अनेन णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अवश्यायः ]** 'श्यैङ् गतौ' (६०६) श्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) श्या, अवपूर्व० । अवश्यायतीति (ते इति) अवश्यायः । अनेन णप्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ प्रतिश्यायः ]** श्या, प्रतिपूर्व० । प्रतिश्यायते । अनेन णप्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ ग्लायः ]** 'ग्लैं हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ग्ला । ग्लायतीति ग्लायः । अनेन णप्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ म्लायः ]** 'म्लैं गात्रविनामे' (३२) म्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) म्ला । म्लायतीति म्लायः । अनेन णप्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ ददः ]** 'ददि दाने' (७२७) दद् । ददत इति ददः । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[ दधः ]** 'दधि धारणे' (७४५) दध् । दधत इति दधः । 'अच्' (५।१।४९) अच्प्र० → अ ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।।छ।।

**नृत्-खन्-रञ्जः शिल्पिन्यकट्** ।। ५।१।६५ ।।

**[ नृत्खन्रञ्जः ]** नृत् च खन् च रञ्ज् च = नृत्खन्रञ्ज्, तस्मात् ।

**[ शिल्पिनि ]** शिल्पं = विज्ञानमस्याऽस्तीति शिल्पी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः, तस्मिन् । शिल्पं = कर्मकौशलम्, तद्वान् शिल्पी ।

**[ अकट् ]** अकट् प्रथमा सि ।

**[ नर्तकः, नर्तकी ]** 'नृतैच् नर्तने' (११५२) नृत् । नृत्यतीत्येवंशिल्पी-शिल्पिनी । अनेन अकट्प्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ खनकः, खनकी ]** 'खनूग् अवदारणे' (९१३) खन् । खनतीत्येवंशिल्पी-शिल्पिनी । अनेन अकट्प्र० → अक । अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ रजकः, रजकी ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रजतीत्येवंशिल्पी-शिल्पिनी । अनेन अकट्प्र० → अक । 'अकट्-घिनोश्च रञ्जेः' (४।२।५०) नलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

---

P. 卐卐 श्वसितीति ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[ नर्तिका ]** नृत्यतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[ खानकः ]** खनतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ रञ्जकः ]** रजतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । प्रथमा सि ।

टकारो ङ्यर्थः ॥छ॥

**गस्थकः** ॥ ५।१।६६ ॥

**[ गः ]** गा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ थकः ]** थक प्रथमा सि ।

**[ गाथकः ]** कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । गायतीति गाथकः । अनेन थकप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**टनण्** ॥ ५।१।६७ ॥

**[ टनण् ]** टनण् प्रथमा सि ।

**[ गायनः, गायनी ]** कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । गायतीत्येवंशिल्पी । अनेन टनण्प्र० → अन । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

टकारो ङ्यर्थः । णकार ऐकारार्थः । योगविभाग उत्तरार्थः ॥छ॥

**हः काल-व्रीह्योः** ॥ ५।१।६८ ॥

**[ हः ]** हा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ कालव्रीह्योः ]** कालश्च व्रीहिश्च = कालव्रीही, तयोः ।

**[ हायनः संवत्सरः ]** 'ओहांक् त्यागे' (११३१) हा । 'ओहांङ्क गतौ' (११३६) हा । जहाति-जिहीते वा卐भावान् । अनेन टनण्प्र० → अन । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । संवत्सर प्रथमा सि ।

**[ हायना नाम व्रीह्यः ]** जहत्युदकं दूरोत्थानात् जिहते वा द्रुतमिति । अनेन टनण्प्र० → अन । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा जस् । व्रीहि प्रथमा जस् ।

**[ हाता ]** जहाति-जिहीते वा = हाता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

**प्रु-सृ-ल्वोऽकः साधौ** ॥ ५।१।६९ ॥

**[ प्रुसृल्वः ]** प्रुश्च सृश्च लूश्च = प्रुसृलू, तस्मात् ।

---

P. 卐 कालान्तरमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अकः ]** अक प्रथमा सि ।

**[ साधौ ]** साधु सप्तमी ङि ।

**[ प्रवकः ]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - 'प्रुंङ् गतौ' (५९७) प्रु । साधु प्रवत इति प्रवकः । अनेन अकप्र० । नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ सरकः ]** 'सृं गतौ' (२५) सृ । साधु सरतीति सरकः । अनेन अकप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ लवकः ]** 'लूग्श् छेदने' (१५१९) लू । साधु लुनातीति लवकः । अनेन अकप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ प्रावकः ]** प्रवत इति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ सारकः ]** सरतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ लावकः ]** लुनातीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ॥छा।

**आशिष्यकन्** ॥ ५।१।७० ॥

**[ आशिषि ]** आशिष् सप्तमी ङि ।

**[ अकन् ]** अकन् प्रथमा सि ।

**इष्टस्य प्रार्थनमाशीः ।**

**[ जीवकः ]** 'जीव प्राणधारणे' (४६५) जीव् । जीवतादित्याशास्यमानः = जीवकः । अनेन अकन्प्र० → अक ।

**[ नन्दकः ]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दतादित्याशास्यमानः = नन्दकः । अनेन अकन्प्र० → अक ।

**[ भवकः ]** 'भू सत्तायाम्' (१) भू । भवतादित्याशास्यमानः = भवकः । अनेन अकन्प्र० → अक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । ओदौतोऽवाव् (१।२।२४) अव् ।

**[ जीविका ]** जीवतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[ नन्दिका ]** नन्दतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ भाविका ]** भवतीति । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।१।२४) आव् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

अग्रेतनेषूदाहरणेषु **[ जीवका-नन्दका-भवका ]** पूर्ववत् वाक्यम् । अनेनैव अकन्प्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । अत्र इर्न भवति । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) इत्यनेन निषेधः ॥छा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## तिक्कृतौ नाम्नि ॥ ५।१।७१ ॥

**[ तिक्कृतौ ]** तिक् च कृत् च = तिक्कृतौ ।

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलुक् ।

**[ शान्तिः ]** 'शमू उपशमे' (१२३०) शम् । शम्यादित्याशास्यमानः । अनेन तिक्प्र० → ति । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० । अहन्पञ्चमस्य क्वि-क्ङिति (४।१।१०७) दीर्घः ।

**[ तन्तिः ]** 'तनूयी विस्तारे' (१४९९) तन् । तन्यादित्याशास्यमानः । 'न तिकि दीर्घश्च' (४।२।५९) इति प्रतिषेधात् अत्र पञ्चमलुक्-दीर्घश्च न भवति । अनेन तिक्प्र० → ति । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → न० ।

**[ सन्तिः ]** 'षणूयी दाने' (१५००) षण् । 'षः सोऽष्ट्यै०' (२।३।९८) सन् । सन्यादित्याशास्यमानः । 'न तिकि दीर्घश्च' (४।२।५९) इति प्रतिषेधात् अत्र पञ्चमलुक्-दीर्घश्च न भवति । अनेन तिक्प्र० → ति । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → न० ।

**[ रन्तिः ]** रमि क्रीडायाम् (९८९) रम् । रम्यादित्याशास्यमाना(नः) = रन्ति । 'न तिकि दीर्घश्च' (४।३।५९) इति प्रतिषेधात् अत्र पञ्चमलुक्-दीर्घश्च न भवति । अनेन तिक्प्र० → ति । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[ वीरभूः ]** वीर 'भू सत्तायाम्' (१) भू । वीरो भूयादित्याशास्यमानः । अनेन क्विपप्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् ।

**[ मित्रभूः ]** मित्र 'भू सत्तायाम्' (१) भू । मित्रं भूयादित्याशास्यमानः । अनेन क्विपप्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् ।

卐**[ इन्द्रभूतिः ]** इन्द्रोऽस्य भूयादित्याशास्यमानः । अनेन क्तिप्र० → ति ।

**[ अग्निभूतिः ]** अग्निरस्य भूयादित्याशास्यमानः । अनेन क्तिप्र० → ति ।

+**[ वायुभूतिः ]** वायुरस्य भूयादित्याशास्यमानः । अनेन क्तिप्र० → ति ।

**[ सोमभूतिः ]** सोमोऽस्य भूयादित्याशास्यमानः । अनेन क्तिप्र० → ति ।

**[ कुमारनीतिः ]** कुमार 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी । कुमारोऽस्य दुरितानि नयतामित्याशंसितः । अनेन क्तिप्र० → ति ।

**[ मित्रवृद्धिः ]** मित्र 'वृधूङ् वृद्धौ' (९५७) वृध् । मित्रमेनं वर्धिषीष्ट = मित्रवृद्धिः । अनेन क्तिप्र० → ति । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

**[ देवदत्तः ]** देव 'डुदांग्क् दाने' (११३८) दा । *देवाय एनं देयासुर्देवदत्तः । अनेन क्तप्र० → त । 'दत्' (४।४।१०) दा० → दत्० ।

**[ यज्ञदत्तः ]** यज्ञ 'डुदांग्क् दाने' (११३८) दा । °यज्ञाय एनं देयासुर्यज्ञदत्तः । अनेन क्तप्र० → त । 'दत्' (४।४।१०) दा० → दत् ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति । + इदमुदाहरणं बृहद्वृत्तौ नास्ति । * श० म० न्या० - देवा० । ० श० म० न्या० - यज्ञ एनं देयात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ विष्णुश्रुतः ]** विष्णु 'श्रुंट् श्रवणे' (१२९६) श्रु । विष्णुरेनं श्रूयादित्याशास्यमानः । अनेन क्तप्र० → त ।

**[ शर्ववर्मा ]** शर्व 'वृगट् वरणे' (१२९४) वृ । शर्व एनं वृषीष्ट । अनेन मन्प्र० । गु० अर् ।

**[ गङ्गामित्रः ]** गङ्गा 'ञिमिदाच् स्नेहने' (११८०) मिद् । गङ्गा एनं मिद्यादित्याशास्यमानः । उणादीनां कृत्त्वात् 'चि-मि-दि-शंसिभ्यः कित्' (उणा० ४५४) कित् त्रप्र० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[ वर्धमानः ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धिषीष्ट इत्याशास्यमानः । अनेन आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । सर्वत्र प्रथमा सि ॥छ॥

## कर्मणोऽण् ॥ ५।१।७२ ॥

**[ कर्मणः ]** कर्मन् पञ्चमी ङसि । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६३) न० → ण० ।

**[ अण् ]** अण् प्रथमा सि ।

निर्वर्त्यं-विकार्यं-प्राप्यं च कर्म, तस्मात् = कर्मणः । अजाद्यपवादः ।

निर्वर्त्यात् - **[ कुम्भकारः ]** कुम्भ 'डुकृंग् करणे' (८८८) कृ । कुम्भं करोतीति । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ नगरकारः ]** नगर 'डुकृंग् करणे' (८८८) कृ । नगरं करोतीति । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

विकार्यात्- **[ काण्डलावः ]** काण्ड 'लूग्श् छेदने' (१५१९) लू । काण्डं लुनातीति । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ शरलावः ]** शर 'लूग्श् छेदने' (१५१९) लू । शरान् लुनातीति । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

प्राप्यात्- **[ वेदाध्यायः ]** वेद 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वेदानधीते । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ चर्चापारः ]** चर्चा 'पार कर्मसमाप्तौ' (१९०१) पार् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । चर्चां पारयतीति । अनेन अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ भारहारः ]** भार 'हृंग् हरणे' (८८५) हृ । भारं हरतीति । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ सूत्रधारः ]** सूत्र 'धृंग् धारणे' (८८७) धृ । धरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । सूत्रं धारयतीति । अनेन अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ भारवाहः ]** भार 'वहीं प्रापणे' (९९६) वह् । भारं वहतीति । अनेन अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ द्वारपालः ]** द्वार 'पलण् रक्षणे' (१६९९) पल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । द्वारं पालयतीति द्वारपालः । अनेन अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ उष्ट्रप्रणायः ]** उष्ट्र प्र 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । उष्ट्रं प्रणयति प्रापयतीति वा । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । ('अदुरुपसर्गा०' (२।३।७७) न० → ण०) ।

**[ कमण्डलुग्राहः ]** कमण्डलु 'ग्रहीश् उपादाने' (१५१७) ग्रह् । कमण्डलुं गृह्णातीति । अनेन अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

बहुलाधिकारात् निर्वर्त्य-विकार्याभ्यामपि क्वचिन्न भवति-

**[ संयोगं जनयति ]** संयोग द्वितीया अम् । 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायन्तं(मानं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'कगे-वनू-जनै-जृष्-क्नस्-रञ्जः' (४।२।२५) ह्रस्वः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ स्रजं विरचयति ]** 'रचण् प्रतियत्ने' (१८५३) रच्, विपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० तिव् । 'कर्त्तर्यनदभ्यः शव्' (३।४।७१) शव् ।'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ कन्यां मण्डयति ]** कन्या द्वितीया अम् । 'मडुण् भूषायाम्' (१६३३) मड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

**शीलि-कामि-भक्ष्याऽऽचरीक्षि-क्षमो णः** ॥ ५।१।७३ ॥

**[ शीलिकामिभक्ष्याचरीक्षिक्षमः ]** शीलिश्च कामिश्च भक्षिश्च आचरिश्च ईक्षिश्च क्षम् च = शीलिकामिभक्ष्याऽऽचरीक्षिक्षम्, तस्मात् ।

**[ णः ]** ण प्रथमा सि ।

**[ धर्मशीलः, धर्मशीला ]** धर्म 'शीलण् उपधारणे' (१९१३) शील् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'शील समाधौ' (४२१) शील् । शीलन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । धर्मं शीलयतीति । अनेन णप्र० → अ । 'णेरनिटि' (४।३।८३) णिच्-णिग्लुक् । विकल्पेन 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ धर्मकामः, धर्मकामा ]** धर्म 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । धर्मं कामयते । अनेन णप्र० → अ । 'णेरनिटि' (४।३।८३) णिङ्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वायुभक्षः, वायुभक्षा ]** वायु 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वायुं भक्षयतीति । अनेन णप्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कल्याणाचारः, कल्याणाचारा ]** कल्याण 'चर भक्षणे च' (४१०) चर्, आङ्पूर्व० । कल्याणमाचरतीति । अनेन णप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ सुखप्रतीक्षः, सुखप्रतीक्षा ]** सुख प्रति 'ईक्षि दर्शने' (८८२) ईक्ष् । सुखं प्रतीक्षते । अनेन णप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ बहुक्षमः, बहुक्षमा ]** बहु 'क्षमू(मौ)षि सहने' (७८८) क्षम् । बहु क्षमते' । 'क्षमू(मौ)च् सहने' (१२३५) क्षम् । बहु क्षाम्यतीति । अनेन णप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अम्भोऽतिगमा ]** अम्भस् अम (३९२) - द्रम (३९३) - हम्म (३९४) मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, अतिपूर्व० । अतिगमनं = अतिगमः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० । अम्भसोऽति-गमोऽस्याः सा ।

**[ अम्भोऽतिगामी ]** अम्भांसि अतिगच्छतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अणञेयेकण्-नञ-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ पयस्कामी ]** पयस् 'कमूङ् कान्तौ' (७८९) कम् । पयः कमते(कामयते) । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । 'अतः कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य' (२।३।५) र० → स० ॥छा॥

### गायोऽनुपसर्गाट्टक् ॥ ५।१।७४ ॥

**[ गायः ]** गाय् पञ्चमी ङसि ।

**[ अनुपसर्गात् ]** न विद्यते उपसर्गो यस्य सः = अनुपसर्गः, तस्मात् ।

**[ टक् ]** टक् प्रथमा सि ।

**[ वक्रगः, वक्रगी ]** वक्र कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । वक्रं गायतीति । अनेन टक्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ सामगः, सामगी ]** सामन् कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । सामानि गायतीति(न्तीति) । अनेन टक्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ वक्रसंगायः ]** वक्रं संगायतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ खरुसंगायः ]** खरु संगायतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

वक्रादयो गीतविशेषाः । गायतिनिर्देशो गाङ् निवृत्त्यर्थः ॥छा॥

### सुरा-सीधोः पिबः ॥ ५।१।७५ ॥

**[ सुरासीधोः ]** सुरा च सीधुश्च = सुरासीधु, तस्मात् ।

**[ पिबः ]** पिब् पञ्चमी ङसि ।

**[ सुरापः, सुरापी ]** सुरा 'पां पाने' (२) पा । सुरां पिबतीति । अनेन टक्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सीधुपः, सीधुपी ]** सीधु 'पां पाने' (२) पा । सीधुं पिबतीति । अनेन टक्प्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ क्षीरपा बाला ]** क्षीरं पिबतीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । बाला प्रथमा सि ।

**[ सुरापा ]** सुरा 'पांक् रक्षणे' (१०६७) पा । सुरां पातीति ॥छ॥

## आतो डोऽह्वा-वा-मः ॥ ५।१।७६ ॥

**[ आतः ]** आत् पञ्चमी ङसि ।

**[ डः ]** ड प्रथमा सि ।

**[ अह्वावामः ]** ह्वाश्च वाश्च माश्च = तत्, तस्मात् । पश्चान्नञा समासः ।

**[ गोदः ]** गो 'डुदांग्क् दाने' (११३८) दा । गां ददातीति गोदः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ कम्बलदः ]** कम्बलं ददातीति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ पार्ष्णित्रम् ]** पार्ष्णि देंङ् (६०४) - 'त्रैंङ् पालने' (६०५) त्रै । 'आत् सन्ध्यक्षरस्य' (४।२।१) त्रा । पार्ष्णिं त्रायते । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ अङ्गुलित्रम् ]** अङ्गुलिं त्रायते । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ ब्रह्मज्यः ]** ब्रह्मन् 'ज्यांश् हानौ' (१५२४) ज्या । ब्रह्माणं जिनाति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ वपुर्व्यः ]** वपुस् 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । वपुर्वीतवान् । '**अनिर्दिष्टाः प्रत्ययास्त्रिष्वपि कालेषु भवन्तीति भूतेऽपि डः** । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ स्वर्गह्वायः ]** स्वर्ग 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । स्वर्गं ह्वयतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

वाति-वायत्योरकर्मकत्वान्न ग्रहणम् । 'अदाद्यनदाद्योनदादेरेव' (न्या० सं० वक्ष०(२)/सूत्र(३)) इति न्यायाद्वा वातेर्ग्रहणाभावः ।

**[ तन्तुवायः ]** 'वेंग् तन्तुसंताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । तन्तु-तन्तून् वयतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ धान्यमायः ]** 'गा-मा-दाग्रहणेष्वविशेषः' (न्या० सं० वक्ष० (२)/सूत्र(२०)) इति मारुपस्य ग्रहणम्, तेन 'मांङ्क् मान-शब्दयोः' (११३७) मा । 'डुमिंग्ट् प्रक्षेपणे' (१२८९) मि । 'मींग्श् हिंसायाम्' (१५१२) मी इत्येतेषां ग्रहणम्, मेङ् इत्यस्य तु अपपूर्वस्य प्रयोगात् डस्य प्राप्तिरेव नास्ति, माति स्वकर्मकत्वात् न गृह्यते । 'मिग्-मीगोऽखलचलि' (४।२।८) मा । धान्यं मिमीते-मिनोति-मीनाति वा = धान्यमायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'सो रुः (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ मित्रह्वः ]** मित्रं ह्वयतीति । 'क्वचित्' (५।१।१७१) डप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ गोसंदायः ]** गो सम् 'डुदांग्क् दाने' (११३८) दा । गां संददातीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ वडवासंदायः ]** वडवा सम् 'डुदांग्क् दाने' (११३८) दा । वडवां संददातीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

एतत् कुतो लभ्यते ? 'गायोऽनुपसर्गाट्टक्' (५।१।७४) इति सूत्रे उ(अनु)पसर्गग्रहणमिदमेव ज्ञापकम्, **उपसर्गैरव्यवधानं भवति इत्यण्** ॥छा॥

**समः ख्यः ॥ ५।१।७७ ॥**

**[ समः ]** सम् पञ्चमी ङसि ।

**[ ख्यः ]** ख्या पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ गोसंख्यः ]** गो सम् 卐 'ख्यांक् प्रकथने' (१०७१) ख्या । गां संख्याति-संचष्टे वा = गोसंख्यः । 'अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ पशुसंख्यः ]** पशु सम् 'ख्यांक् प्रकथने' (१०७१) ख्या । पशुं संख्याति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**उपसर्गार्थं वचनम्** ॥छा॥

**दश्चाऽऽङः ॥ ५।१।७८ ॥**

**[ दः ]** दा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ आङः ]** आङ् पञ्चमी ङसि ।

**[ दायादः ]** दाय 'डुदांग्क् दाने' (११३८) दा, आङ्पूर्व० । दायमादत्ते । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ स्त्र्याख्यः ]** स्त्री आङ् 'ख्यांक् प्रकथने' (१०७१) ख्या । स्त्रियमाचष्टे = स्त्र्याख्यः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ प्रियाख्यः ]** प्रिय आङ् 'ख्यांक् प्रकथने' (१०७१) ख्या । प्रियमाचष्टे = प्रियाख्यः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ॥छा॥

**प्राज्ज्ञश्च ॥ ५।१।७९ ॥**

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ ज्ञः ]** ज्ञा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ च ]** च प्रथमा सि ।

---

卐 धातुपारायणे - ख्यांक् प्रथने, प्रकथने इत्यन्ये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पथिप्रज्ञः ]** पथिन् 'ज्ञांश् अवबोधने' (१५४०) ज्ञा, प्रपूर्व० । पन्थानं प्रजानाति = पथिप्रज्ञः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ प्रपाप्रदः ]** प्रपा 'डुदांग्क् दाने' (११३८) दा, प्रपूर्व० । प्रपां प्रददाति, प्रपां प्रदत्ते । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ स्तनप्रधायः ]** स्तन प्र 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । स्तनौ प्रधयतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## आशिषि हनः ॥ ५।१।८० ॥

**[ आशिषि ]** आशिष् सप्तमी ङि ।

**[ हनः ]** हन् पञ्चमी ङसि ।

**[ शत्रुहः ]** शत्रु 'हनंक् हिंसा-गत्योः' (११००) हन् । शत्रुं हन्यात्(वध्यात्) इत्याशास्यमानः = शत्रुहः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ पापहः ]** पाप - हन् । पापं हन्यात्(वध्यात्) इत्याशास्यमानः = पापहः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ दुःखहः ]** दुःख-हन् । दुःखं हन्यात्(वध्यात्) इत्याशास्यमानः = दुःखहः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ क्रोशहः ]** क्रोशं हन्ति । मतान्तरे डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

## क्लेशाऽऽदिभ्योऽपात् ॥ ५।१।८१ ॥

**[ क्लेशाऽऽदिभ्यः ]** क्लेश आदिर्येषां ते = क्लेशादयः, तेभ्यः ।

**[ अपात् ]** अप पञ्चमी ङसि ।

**[ क्लेशापहः ]** क्लेश अप 'हनंक् हिंसा-गत्योः' (११००) हन् । क्लेशमपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ तमोऽपहः ]** तमस् अप-हन् । तमोऽपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ दुःखापहः ]** दुःख अप-हन् । दुःखमपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

卐卐**[ जरापहः ]** जरा अप-हन् । जरामपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

---

卐卐 बृहद्वृत्तौ - ज्वरापहः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ दर्पापहः ]** दर्प अप-हन् । दर्पमपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ दोषापहः ]** दोष अप-हन् । + दोषानपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ रोगापहः ]** रोग अप-हन् । रोगानपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ वातपित्तकफापहः ]** वातश्च पित्तश्च कफश्च = वातपित्तकफास्तान् अपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ विषाग्निदर्पापहः ]** विषश्च अग्निश्च दर्पश्च = विषाग्निदर्पास्तान् अपहन्ति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ दार्वाघाटः ]** दारु 'आ-घटिष् चेष्टायाम्' (१०००) घट् । दारुमाघटते । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ चार्वाघाटः ]** चारु 'आ-घटिष् चेष्टायाम्' (१०००) घट् । 卐चारु आघटते । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । घटतेरणि संज्ञायां भविष्यति ।

कथं दार्वाघाट इत्यादि - दारावाङो हन्तेरण् नस्य च टः संज्ञायां चारौ तु वा कर्मणि समि च वा इति परेषां सूत्रद्वयमत्र तत् स्वमते कथमित्याह - **घटतेरणीति** ।

**[ चार्वाघातः ]** चारु आहन्ति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ दार्वाघातः ]** दारु आ-हन् । दारुं-काष्ठमाहन्ति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ वर्णसंघाटः, वर्णसंघातः, पदसंघाटः, पदसंघातः ]** संघटते = संघाटः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । संहन्ति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० । 'पृषोदरादयः' (३।२।१५५) इति वर्णसंघाटः - वर्णसंघातः - पदसंघाटः - पदसंघातः निपातः ॥छ॥

## कुमार-शीर्षाण्णिन् ॥ ५।१।८२ ॥

**[ कुमारशीर्षात् ]** कुमारश्च शीर्षश्च(शीर्षं च) = कुमारशीर्षम्, तस्मात् ।

**[ णिन् ]** णिन् प्रथमा सि ।

**[ कुमारघाती ]** कुमार 'हनंक् हिंसा-गत्योः' (११००) हन् । कुमारं हन्तीति । अनेन णिन्प्र० → इन् । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

---

\+ श० म० न्या० - दोषं-दोषा वा अपहन्तीति ।

卐 श० म० न्या० - चारुं आघटते । श० महो० - चारु आहन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[शीर्षघाती]** शीर्षं हन्ति । अनेन णिन्प्र० → इन् । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० । अत एव निपातनाच्छिरसः शीर्षभावः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छा॥

## अचित्ते टक् ॥ ५।१।८३ ॥

**[अचित्ते]** न चित्तं = अचित्तम्, तस्मिन् ।

**[टक्]** टक् प्रथमा सि ।

**[वातघ्नं तैलम्]** वात 'हनंक् हिंसा-गत्योः' (११००) हन् । वातं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । सि-अम् ।

**[पित्तघ्नं घृतम्]** पित्तं हन्तीति पित्तघ्नम् । अनेन टक्प्र० → अ । गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । सि-अम् ।

**[श्लेष्मघ्नं मधु]** श्लेष्माणं हन्तीति श्लेष्मघ्नं मधु । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । सि-अम् ।

**[रोगघ्नमौषधम्]** रोगान् हन्तीति रोगघ्नम् । अनेन टक्प्र० → अ । गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । सि-अम् ।

**[जायाघ्नाः तिलकालकाः]** जायां हन्ति । अनेन टक्प्र० → अ । गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । प्र० जस् । तिलवत् कालका लक्षणविशेषाः । यद्वा तिलानां तुल्यास्तिलकाः, अलका इव अलकाः, तिलकाश्चैते अलकाश्च । येषां लोके मित्रा इति प्रसिद्धिः ।

**[पतिघ्नी पाणिरेखा]** पतिं हन्ति । अनेन टक्प्र० → अ । शेषं पूर्ववत् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक्, पाणिरेखा ।

**[सर्वकर्मघ्नी शैलेशी]** सर्वकर्माणि हन्तीति । अनेन टक्प्र० → अ । शेषं पूर्ववत् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । शिलानामीशः = शिलेशस्तस्येयम् । निष्प्रकम्पत्वात् केवलिनां सर्वलो(यो)गनिरोधान्तरं क्रियाविशेषः अ-इ-उ-ऋ-लृ पञ्च ह्रस्वाक्षरोद्गिरणमात्रा = शैलेशी ।

**[शतघ्नी आयुधविशेषः]** शतं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक्, आयुधविशेषः ।

**[हस्तघ्नो ज्याघातत्रो वर्ध्रपट्टः]** हस्तं हन्ति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न०, ज्याघातत्रो वर्ध्रपट्टः ।

**[पापघातो यतिः]** पापं हन्तीति पापघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्०, यतिः ।

**[चौरघातो राजा]** चौरं हन्तीति चौरघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्०, राजा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आखुघातो बिडाल: ]** आखुं हन्तीति आखुघात: । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्०, बिडाल: ।

**[ मत्स्यघातो बक: ]** मत्स्यं हन्तीति मत्स्यघात: । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्०, बक: ।

**[ सस्यघातो वृषभ: ]** सस्यं हन्तीति सस्यघात: । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्०, वृषभ: ।।छ।।

## जाया-पतेश्चिह्नवति ॥ ५।१।८४ ॥

**[ जायापते: ]** जाया च पतिश्च = जायापति, तस्मात् ।

**[ चिह्नवति ]**卐卐 चिह्नमत्राऽस्तीति चिह्नवान्, तस्मिन् । 'तदस्याऽस्त्यस्मिन्निति मतु:' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो व:' (२।१।९४) म० → व० । सप्तमी ङि । चिह्नं-शरीरस्थं शुभाशुभसूचकं तिलकालकादि ।

**[ जायाघ्नो ब्राह्मण: ]** जायां हन्तीति जायाघ्नो ब्राह्मण: । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस:०' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० ।

**[ पतिघ्नी कन्या ]** पतिं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस:०' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक्, अपलक्षणयुगित्यर्थ: ।।छ।।

## ब्रह्माऽऽदिभ्य: ॥ ५।१।८५ ॥

**[ ब्रह्माऽऽदिभ्य: ]** ब्रह्म आदिर्येषां ते = ब्रह्मादय:, तेभ्य: = ब्रह्माऽऽदिभ्य:, पञ्चमी भ्यस् ।

**[ ब्रह्मघ्न: ]** ब्रह्मन् 'हनंक् हिंसा-गत्यो:' (११००) हन् । 卐ब्रह्म हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस: स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० ।

**[ कृतघ्न: ]** कृतं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस:०' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० ।

**[ शत्रुघ्न: ]** शत्रुं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस:०' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० ।

**[ वृत्रघ्न: ]** वृत्रं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस:०' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० ।

**[ भ्रूणघ्न: ]** भ्रूणं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घस:०' (४।२।४४) अलुक् । 'हनो ह्नो घ्न:' (२।१।११२) घ्न० ।

**[ बालघ्न: ]** बालं हन्तीति । अनेन टक्प्र० → अ० । शेषं पूर्ववत् ।

---

P.卐卐 चिह्नं विद्यते यस्याऽसौ । P.卐 ब्रह्माणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ शशघ्नी पक्षिजातिः ]** शशं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक्, पक्षिजातिः ।

**[ गोघ्नः पातकी ]** गां हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न०, पातकी ।

**बहुलाधिकारात् संप्रदानेऽपि-**

**[ गोघ्नोऽतिथिः ]** गां हन्ति यस्मै आगताय दातुं सः = गोघ्नोऽतिथिः । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० ।

**अत्र पूर्वत्र च चित्तवदर्थ आरम्भः** ॥छा॥

## हस्ति-बाहु-कपाटाच्छक्तौ ॥ ५।१।८६ ॥

**[ हस्तिबाहुकपाटात् ]** हस्ती च + बाहुश्च卐कपाटश्च = हस्तिबाहुकपाटम्, तस्मात् ।

**[ शक्तौ ]** शक्ति सप्तमी ङि ।

**चित्तवदर्थ आरम्भः ।**

**[ हस्तिघ्नो मनुष्यः ]** हस्तिन् 'हनंक् हिंसा-गत्योः' (११००) हन् । हस्तिनं हन्तुं शक्तः = हस्तिघ्नो मनुष्यः । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० ।

**[ बाहुघ्नो मल्लः ]** बाहुं हन्तुं शक्तः । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० ।

**[ कपाटघ्नश्चौरः ]** कपाटं हन्तुं शक्तः = कपाटघ्नश्चौरः । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० ।

**[ हस्तिघातो रसदः ]** हस्तिनं विषेण हन्ति = हस्तिघातो रसदः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० । सविषेणेत्यनेन अशक्तिं दर्शयति । यो हि स्वयं हन्तुं हस्तिनमशक्तः स विषादिनोपायेन हन्ति ॥छा॥

## नगरादगजे ॥ ५।१।८७ ॥

**[ नगरात् ]** नगर पञ्चमी ङसि ।

**[ अगजे ]** न गजः = अगजस्तस्मिन् ।

**चित्तवदर्थ आरम्भः ।**

**[ नगरघ्नो व्याघ्रः ]** नगर 'हनंक् हिंसा-गत्योः' (११००) हन् । नगरं हन्तीति । अनेन टक्प्र० → अ । 'गम-हन-जन-खन-घसः०' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । व्याघ्र प्रथमा सि ।

**[ नगरघातो हस्ती ]** नगरं हन्तीति नगरघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० । हस्तिन् प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छा॥

---

P.卐 कपाटं च ।  P.+ बाहू च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## राजघः ॥ ५।१।८८ ॥

**[ राजघः ]** राजघ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'र: पदान्ते०' (१।३।५३) विसर्गः ।

**[ राजघः ]** राजन् 'हनंक् हिंसा-गत्योः' (११००) हन् । राजानं हन्ति । अनेन निपातनात् सर्वादेशः । प्रथमा सि ॥छा।

## पाणिघ-ताडघौ शिल्पिनि ॥ ५।१।८९ ॥

**[ पाणिघताडघौ ]** पाणिघश्च ताडघश्च = पाणिघताडघौ ।

**[ शिल्पिनि ]** शिल्पमस्याऽस्तीति शिल्पी, तस्मिन् । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलोपः(?) ('अवर्णे०' (७।४।६८) अलोपः) ।

**[ पाणिघः शिल्पी ]** पाणिं हन्तीति पाणिघः । अनेन टक्प्र० → अ - घादेशश्च निपात्यते, शिल्पी ।

**[ ताडघः शिल्पी ]** ताडं हन्तीति ताडघः । अनेन टक्प्र० → अ - घादेशश्च निपात्यते, शिल्पी ।

**[ पाणिघातः ]** पाणिं हन्ति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० ।

**[ ताडघातः ]** ताडं हन्ति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० ॥छा।

## कुक्ष्यात्मोदरात् भृगः खिः ॥ ५।१।९० ॥

**[ कुक्ष्यात्मोदरात् ]** कुक्षिश्च आत्मा च उदरं च = कुक्ष्यात्मोदरम्, तस्मात् ।

**[ भृगः ]** भृग् पञ्चमी ङसि ।

**[ खिः ]** खि प्रथमा सि ।

**[ कुक्षिम्भरिः ]** कुक्षि 'टुडुभृंग्क् पोषणे च' (११४०) भृ । कुक्षिमेव बिभर्त्ति = कुक्षिम्भरिः । अनेन खिप्र० → इ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः ।

**[ आत्मम्भरिः ]** आत्मन् - भृ । आत्मानमेव बिभर्त्ति । अनेन खिप्र० → इ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उदरम्भरिः ]** उदर - भृ । उदरमेव बिभर्त्ति । अनेन खिप्र० → इ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ॥छा।

## अर्होऽच् ॥ ५।१।९१ ॥

**[ अर्हः ]** अर्ह् पञ्चमी ङसि ।

**[ अच् ]** अच् प्रथमा सि ।

अणोऽपवादः । लिहादित्वादच् भविष्यतीति तस्यैवायं प्रपञ्चः ।

**[ पूजार्हः साधुः ]** पूजा 'अर्ह पूजायाम्' (५६४) अर्ह् । पूजामर्हति । अनेन अच्प्र० → अ ।

**[ पूजार्हा प्रतिमा ]** पूजामर्हति । अनेन अच्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

बहुलाधिकारात्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

卐卐[ **कुलार्हः** ] कुलेऽर्हतीति कुलार्हः ॥छ॥

**धनु-र्दण्ड-त्सरु-लाङ्गला-ऽङ्कुशर्ष्टि-यष्टि-शक्ति-तोमर-घटाद् ग्रहः** ॥ ५।१।९२ ॥

[ **धनुर्दण्डत्सरुलाङ्गलाऽङ्कुशर्ष्टियष्टिशक्तितोमरघटात्** ] धनुश्च दण्डश्च त्सरुश्च लाङ्गलं च अङ्कुशश्च ऋष्टिश्च यष्टिश्च शक्तिश्च 卐 तोमरश्च घटश्च = धनुर्दण्डत्सरुलाङ्गलाऽङ्कुशर्ष्टियष्टिशक्तितोमरघटम्, तस्मात् ।

[ **ग्रहः** ] ग्रह् पञ्चमी ङसि ।

[ **धनुर्ग्रहः** ] धनुस् 'ग्रहीश् उपादाने' (१५१७) ग्रह् । धनुर्गृह्णातीति ।

[ **दण्डग्रहः** ] दण्डं गृह्णातीति ।

[ **त्सरुग्रहः** ] त्सरुं-खड्गं-मुष्टिं गृह्णातीति ।

[ **लाङ्गलग्रहः** ] लाङ्गलं गृह्णाति ।

[ **अङ्कुशग्रहः** ] अङ्कुशं गृह्णाति ।

[ **ऋष्टिग्रहः** ] ऋष्टिं-खड्गं गृह्णाति ।

[ **यष्टिग्रहः** ] यष्टिं गृह्णाति ।

[ **शक्तिग्रहः** ] शक्तिं गृह्णाति ।

[ **तोमरग्रहः** ] तोमरं गृह्णाति ।

[ **घटग्रहः** ] घटं गृह्णाति ।

सर्वत्र अनेन अच्प्र० → अ ।

[ **धनुर्ग्राहः** ] धनुर्गृह्णाति । मतान्तरे 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

[ **दण्डग्राहः** ] दण्डं गृह्णाति । मतान्तरे 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

**सूत्राद् धारणे** ॥ ५।१।९३ ॥

[ **सूत्रात्** ] सूत्र पञ्चमी ङसि ।

[ **धारणे** ] धारण सप्तमी ङि ।

सूत्रं कर्पासादिमयं लक्षणसूत्रं वाऽविशेषेण गृह्यते ।

[ **सूत्रग्रहः प्राज्ञः सूत्रधारो वा** ] सूत्रं गृह्णाति । अनेन अच्प्र० → अ । प्रज्ञा अस्याऽस्तीति । प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः (७।२।३३) णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सूत्रधारो वा, सूत्रमुपादाय ग्राह्य(धारय)तीत्यर्थः ।

---

卐卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।     P.卐 तोमरं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सूत्रग्राहः ]** सूत्रं गृह्णातीति । 'कर्मणोऽण्' (५।१।७२) अणप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । यो हि सूत्रं गृह्णाति न तु धारयति स एवमुच्यते ॥छ॥

**आयुधाऽऽदिभ्यो धृगोऽदण्डादेः ॥ ५।१।९४ ॥**

**[ आयुधाऽऽदिभ्यः ]** आयुधमादि येषां ते = आयुधाऽऽदयः, तेभ्यः = आयुधाऽऽदिभ्यः, पञ्चमी भ्यस् ।

**[ धृगः ]** धृग् पञ्चमी ङसि ।

**[ अदण्डादेः ]** दण्ड आदिर्यस्य सः = दण्डादिः, न दण्डादिः = अदण्डादिः, तस्मात् ।

**[ धनुर्धरः ]** धनुस् 'धृंग् धारणे' (८८७) धृ । धनुर्धरति ।

**[ शक्तिधरः ]** शक्तिं धरति ।

**[ चक्रधरः ]** चक्रं धरति ।

**[ वज्रधरः ]** वज्रं धरति ।

**[ शूलधरः ]** शूलं धरति ।

**[ हलधरः ]** हलं धरति, बलभद्रः ।

आदिग्रहणात्-

**[ भूधरः ]** भुवं-पृथ्वीं धरति ।

**[ जलधरः ]** जलं धरति = जलधरो मेघः ।

**[ विषधरः ]** विषं धरति = विषधरः सर्पः ।

**[ शशधरः ]** शशं धरति = शशधरश्चन्द्रः ।

**[ विद्याधरः ]** विद्यां धरतीति ।

**[ श्रीधरः ]** श्रियं-लक्ष्मीं धरति = श्रीधरो नारायणः ।

**[ जटाधरः ]** जटां धरति ।

**[ पयोधरः ]** पयः - पानीयं धरति = पयोधरो मेघः ।

अनेन सर्वत्र अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ दण्डधारः ]** दण्डं धरति ।

**[ कुण्डधारः ]** कुण्डं धरति ।

**[ काण्डधारः ]** काण्डं धरति ।

**[ कर्णधारः ]** कर्णं धरति ।

**[ सूत्रधारः ]** सूत्रं धरति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ छत्रधारः ]** छत्रं धरति ।

सर्वत्र 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।।छा।

**हृगो वयो-ऽनुद्यमे** ॥ ५।१।९५ ॥

**[ हृगः ]** हृग् पञ्चमी ङसि ।

**[ वयोऽनुद्यमे ]** 'यमूं उपरमे' (३८६) यम्, उत्पूर्व० । उद्यमनं = उद्यमः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'उद्यमोपरमौ' (४।३।५७) इति निर्देशात् न दीर्घः । न उद्यमोऽनुद्यमः । वयश्च अनुद्यमश्च = वयोऽनुद्यमम् तस्मिन् ।

**प्राणिनां कालकृतावस्था वयः, उद्यम उत्क्षेपणं - आकाशस्थस्य वा धारणम्, तदभावोऽनुद्यमः ।**

**[ अस्थिहरः श्वशिशुः ]** अस्थि 'हृंग् हरणे' (८८५) हृ । अस्थि हरतीति अस्थिहरः श्वशिशुः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ कवचहरः क्षत्रियकुमारः ]** कवचं-सन्नाहं हरतीति कवचहरः क्षत्रियकुमारः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ अंशहरो दायादः ]** अंशं-भागं हरतीति अंशहरो दायादः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ मनोहरः प्रासादः ]** मनो हरतीति मनोहरः प्रासादः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ मनोहरी मणिः ]** मनो हरति । मतान्तरे टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी, मणिः ।

**[ विषहरी मणिः ]** विषं हरति । मतान्तरे टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्०' (२।४।२०) ङी, मणिः ।

**[ भारहारः ]** भारं हरतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

वयसि क्रियमाणः संभाव्यमानो वोद्यम उच्यमानो वयो गमयतीति उद्यमार्थं वयोग्रहणम् । नन्वत्र वयोग्रहणं किमर्थम् ? इत्याह- उद्यमार्थमिति, अयमर्थो यत्र वयस्तत्रोद्यमेऽसत्यपि भवतीत्यर्थः, यथा कवचहर इत्यादौ ।।छा।

**आङः शीले** ॥ ५।१।९६ ॥

**[ आङः ]** आङ् पञ्चमी ङसि ।

**[ शीले ] शीलं = स्वाभाविकी प्रवृत्तिः** । स्वभावे भवा । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पुष्पाहरः ]** पुष्प 'हृंग् हरणे' (८८५) हृ, आङ्पूर्व० । पुष्पाण्याहरतीत्येवंशीलः = पुष्पाहरः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ फलाहरः ]** फलान्याहरतीत्येवंशीलः = फलाहरः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सुखाहरः ]** सुखान्याहरतीत्येवंशीलः = सुखाहरः । अनेन अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

पुष्पाद्याहरणे स्वाभाविकी फलनिरपेक्षा वृत्तिरस्येत्यर्थः ।

**[ पुष्पाणि हर्ता ]** पुष्पाणि हरतीत्येवंशीलम् । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ पुष्पाहारः ]** पुष्पाण्याहरतीति पुष्पाहारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ सुखाहरः ]** सुखान्याहरतीति सुखाहरः । 'हृगो वयोऽनुद्यमे' (५।१।९५) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ॥छ॥

## दृति-नाथात् पशाविः ॥ ५।१।९७ ॥

**[ दृतिनाथात् ]** दृति-जलाधारभूतं चर्मभाजनम्, दीयडउ इति प्रसिद्धिः । दृतिश्च नाथश्च = दृतिनाथम्, तस्मात् ।

**[ पशौ ]** पशु सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि० → डौ० । 'डित्यन्त्य०' (२।१।११४) उलुक् ।

**[ इः ]** इ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ दृतिहरिः श्वा ]** दृतिं हरतीति दृतिहरिः श्वा । अनेन इप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ नाथहरिः सिंहः ]** नाथं हरतीति नाथहरिः सिंहः । अनेन इप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ दृतिहारो व्याधः ]** दृतिं हरतीति दृतिहारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ नाथहारी गन्त्री ]** नाथं हरतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## रजः-फले-मलाद् ग्रहः ॥ ५।१।९८ ॥

**[ रजःफलेमलात् ]** रजश्च फलेश्च मलश्च = रजःफलेमलम्, तस्मात् ।

**[ ग्रहः ]** ग्रह् पञ्चमी ङसि ।

**[ रजोग्रहिः कञ्चुकः ]** रजस् 'ग्रहीश् उपादाने' (१५१७) ग्रह् । रजो गृह्णाति = रजोग्रहिः कञ्चुकः । अनेन इप्र० ।

**[ फलेग्रहिर्वृक्षः ]** फलं गृह्णाति । अनेन इप्र० । अत एव निर्देशादेत्त्वम् । वृक्ष प्रथमा सि ।

**[ मलग्रहिः कम्बलः ]** मलं गृह्णातीति । अनेन इप्र० ॥छ॥

## देव-वातादापः ॥ ५।१।९९ ॥

**[ देववातात् ]** देवश्च वातश्च = देववातम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आपः ]** आप् पञ्चमी ङसि ।

**[ देवापिः ]** देव 'आप्लृंट् व्याप्तौ' (१३०७) आप् । देवानाप्नोति । अनेन इप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५२) विसर्गः ।

**[ वातापिः ]** वात 'आप्लृंट् व्याप्तौ' (१३०७) आप् । वातमाप्नोति । अनेन इप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## शकृत्-स्तम्बाद् वत्स-व्रीहौ कृगः ॥ ५।१।१०० ॥

**[ शकृत्स्तम्बात् ]** शकृच्च स्तम्बश्च = शकृत्स्तम्बम्, तस्मात् ।

**[ वत्सव्रीहौ ]** वत्सश्च व्रीहिश्च = वत्सव्रीहि, तस्मिन् ।

**[ कृगः ]** कृग् पञ्चमी ङसि ।

**[ शकृत्करिर्वत्सः ]** शकृत् 'डुकृंग् करणे' (८८८) कृ । शकृत् करोति = शकृत्करिर्वत्सः । अनेन इप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ स्तम्बकरिर्व्रीहिः ]** स्तम्बं करोतीति स्तम्बकरिर्व्रीहिः । अनेन इप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ शकृत्कारः ]** शकृत् करोतीति शकृत्कारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ स्तम्बकारः ]** स्तम्बं करोतीति स्तम्बकारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि ॥छ॥

## किम्-यत्-तद्-बहोरः ॥ ५।१।१०१ ॥

**[ किम्यत्तद्बहोः ]** किम् च यच्च तद् च (तच्च) बहुश्च = किम्यत्तद्बहु, तस्मात् ।

**[ अः ]** अ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ किंकरः, किंकरा ]** किम् 'डुकृंग् करणे' (८८८) कृ । किं करोतीति । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ यत्करः, यत्करा ]** यत्-कृ । यत् करोतीति । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ तत्करः तत्करा ]** तद्-कृ । तत् करोतीति । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

चौर्ये- **[ तस्करः ]** तत् करोतीति । तत्करस्य त् इत्येवंस्य 'वर्चस्कादिष्ववस्कारादयः' (३।२।४८) इति सकारः ।

**[ बहुकरः, बहुकरा ]** बहु-कृ । बहु करोतीति । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ बहुकरी ]** बहु करोति = बहुकरी । 'संख्या-ऽह-दिवा-विभा-निशा-प्रभा०' (५।१।१०२) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ किंकरी ]** किं करोति = किंकरी । 'हेतु-तच्छीला-ऽनुकूलेऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्' (५।१।१०३) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्०' (२।४।२०) ङी । जातिवाच्याऽत्र ॥छ॥

**संख्या-ऽह-दिवा-विभा-निशा-प्रभा-भाश्चित्र-कर्त्राद्यन्ता-ऽनन्त-कार-बाह्वरु-र्धनु-र्नान्दी-लिपि-लिबि-बलि-भक्ति-क्षेत्र-जङ्घा-क्षपा-क्षणदा-रजनि-दोषा-दिन-दिवसाट्टः ॥ ५।१।१०२ ॥**

**[ संख्याऽहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्ताऽनन्तकारबाह्वरुर्धनुर्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसात् ]** संख्या च अहन् च (अहश्च) दिवा च विभा च निशा च प्रभा च भाश्च चित्रश्च कर्तृ च आदिश्च अन्तश्च अनन्तश्च कारश्च बाहुश्च अरुस्(श्)च धनुश्च नान्दी च लिपिश्च लिबिश्च बलिश्च भक्तिश्च क्षेत्रं च जङ्घा च क्षपा च क्षणदा च रजनिश्च दोषा च दिनश्च दिवसश्च = संख्याऽहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्ताऽनन्तकार-बाह्वरुर्धनुर्नान्दीलिपिलिबिबलिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसम्, तस्मात् ।

**[ टः ]** ट प्रथमा सि ।

**[ संख्याकरः ]** संख्यां करोति = संख्याकरः ।

**[ एककरः ]** एकं करोति = एककरः ।

**[ द्विकरः ]** द्वौ करोति = द्विकरः ।

**[ त्रिकरः ]** त्रीन् करोति = त्रिकरः ।

**[ अहस्करः ]** अहन् 'डुकृंग् करणे' (८८८) कृ । अहः करोति = अहस्करः । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अनतो लुप्' (१।४।५९) अम्लुप् । 'रो लुप्यरि' (२।१।७५) नस्य रत्वम् । अतः कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य (२।३।५) र० → स० ।

**[ दिवाकरः ]** दिवा करोति = दिवाकरः ।

**[ विभाकरः ]** विभां करोति = विभाकरः ।

**[ निशाकरः ]** निशां करोति = निशाकरः ।

**[ प्रभाकरः ]** प्रभां करोति = प्रभाकरः ।

**[ भास्करः ]** भासं करोति = भास्करः । 'सो रुः' (२।१।७२) स० → र० । 'भ्रातुष्पुत्र-कस्कादयः' (२।३।१४) र० → स० ।

**[ चित्रकरः ]** चित्रं करोति = चित्रकरः ।

**[ कर्तृकरः ]** कर्तारं करोति = कर्तृकरः ।

**[ आदिकरः ]** आदिं करोति = आदिकरः ।

**[ अन्तकरः ]** अन्तं करोति = अन्तकरः ।

**[ अनन्तकरः ]** अनन्तं करोति = अनन्तकरः ।

**[ कारकरः ]** कारं करोति = कारकरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[बाहुकरः]** बाहुं करोतीति । बाहुशब्दो बाहुकर्मणि वर्त्तते । यो बाहुकर्म करोति स एवमुच्यते । अथवा उच्छादने करोति वर्त्तते । यो बाहुमुच्छादयति - विमलीकरोति स एवमुच्यते । एवम् - जङ्घायामपि ।

**[अरुष्करः]** अरुस् - कृ । अरुः करोति = अरुष्करः । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'समासेऽसमस्तस्य' (२।३।१३) षत्वम् ।

**[धनुष्करः]** धनुस् - कृ । धनुः करोति = धनुष्करः । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'समासेऽसमस्तस्य' (२।३।१३) षत्वम् ।

**[नान्दीकरः]** नान्दी(दि) 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । नान्दीं करोति = नान्दीकरः ।

**[लिपिकरः]** लिपिं करोति = लिपिकरः ।

**[लिबिकरः]** लिबिं करोति = लिबिकरः ।

**[बलिकरः]** बलिं करोति = बलिकरः ।

**[भक्तिकरः]** भक्तिं करोति = भक्तिकरः ।

**[क्षेत्रकरः]** क्षेत्रं करोति = क्षेत्रकरः ।

**[जङ्घाकरः]** जङ्घां करोति = जङ्घाकरः ।

**[क्षपाकरः]** क्षपां करोति = क्षपाकरः ।

**[क्षणदाकरः]** क्षणदां करोति = क्षणदाकरः ।

**[रजनिकरः]** रजनिं करोति = रजनिकरः ।

**[दोषाकरः]** दोषा करोति = दोषाकरः ।

**[दिनकरः]** दिनं करोति = दिनकरः ।

**[दिवसकरः]** दिवसं करोति = दिवसकरः ।

अनेन सर्वत्र टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

दिवा-दोषाशब्दौ अव्ययौ । टकारो ङ्यर्थः ।

**[संख्याकरी]** संख्यां करोति । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

### हेतु-तच्छीला-ऽनुकूलेशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात् ॥ ५।१।१०३ ॥

**[हेतुतच्छीलाऽनुकूले]** हेतुश्च तच्छीलश्च अनुकूलश्च = हेतुतच्छीलाऽनुकूलम्, तस्मिन् ।

**[अशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात्]** शब्दश्च श्लोकश्च कलहश्च गाथा च वैरश्च चाटुश्च सूत्रश्च मन्त्रश्च पदश्च = शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदम्, पश्चान्नञा समासः, तस्मात् ।

हेतुः प्रतीता प्रसिद्धा शक्तिः - सामर्थ्यं यस्य तत् तथा प्रतीतशक्तिकं कारणम् । तच्छीलं तत्स्वभावः । अनुकूल आराध्यचित्तानुवर्त्ती ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेतौ- **[ यशस्करी विद्या ]** यशः करोति = यशस्करी विद्या । 'अतः कृ-कमि-कंस-कुम्भ-कुशा-कर्णी-पात्रेऽनव्ययस्य' (२।३।५) सत्वम् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ शोककरी कन्या ]** शोकं करोति = शोककरी कन्या ।

विद्या-कन्यादेर्यशः शोकादिकरणे सामर्थ्यं प्रतीतं, क्वचित् तु यशः-शोकाद्यकरणेऽपि टो भवति ।

**[ कुलकरं धनम् ]** कुलं करोति = कुलकरं धनम् । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

तच्छीलेऽर्थे- **[ क्रीडाकरः ]** क्रीडां करोतीति = क्रीडाकरः ।

**[ श्राद्धकरः ]** श्राद्धं करोतीति = श्राद्धकरः । श्राद्धम् - पितृकर्म, तत् कर्तव्यमित्येव फलानपेक्षतया यः करोति स एवमुच्यते ।

अनुकूले-कूलमनुगतोऽनुकूलस्तस्मिन्-

卐 **[ प्रेषणकरः ]** प्रेषणं करोति । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ वचनकरः ]** वचनं करोति । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ कुम्भकारः ]** कुम्भं करोति ।

**[ शब्दकारः ]** शब्दं करोति ।

**[ कलहकारः ]** कलहं करोति ।

**[ गाथाकारः ]** गाथां करोति ।

**[ वैरकारः ]** वैरं करोति ।

**[ चाटुकारः ]** चाटूनि करोति ।

**[ सूत्रकारः ]** सूत्राणि करोति ।

**[ मन्त्रकारः ]** मन्त्राणि करोति ।

**[ पदकारः ]** पदं करोतीति ।

सर्वत्र 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ॥छा॥

## भृतौ कर्मणः ॥ ५।१।१०४ ॥

**[ भृतौ ]** भृति सप्तमी ङि ।

**[ कर्मणः ]** कर्मन् पञ्चमी ङसि ।

**भृतिर्वेतनं-कर्ममूल्यमिति यावत् ।**

---

卐 श० म० न्या० - **[ प्रेषणाकरः ]** प्रेषणां करोतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कर्मकरो भृतकः]** कर्म करोतीति कर्मकरो भृतकः ।

**[कर्मकरी दासी]** कर्म करोतीति कर्मकरी दासी । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[कर्मकारः]** कर्म करोति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**पुनः कर्मग्रहणं शब्दरूपकर्मप्रतिपत्त्यर्थम्** ।।छा।

## क्षेम-प्रिय-मद्र-भद्रात् खाऽण् ॥ ५।१।१०५ ॥

**[क्षेमप्रियमद्रभद्रात्]** क्षेमश्च प्रियश्च मद्रश्च भद्रश्च = क्षेमप्रियमद्रभद्रम्, तस्मात् ।

**[खाऽण्]** खश्च अण् च = खाऽण् । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

**[क्षेमङ्करः, क्षेमकारः]** क्षेमं करोतीति क्षेमङ्करः-क्षेमकारः । अनेन ख-अण्प्र० । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[प्रियङ्करः, प्रियकारः]** प्रियं करोतीति प्रियङ्करः - प्रियकारः । अनेन ख-अण्प्र० । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[मद्रङ्करः, मद्रकारः]** मद्रं करोतीति मद्रङ्करः - मद्रकारः । अनेन ख-अण्प्र० । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[भद्रङ्करः, भद्रकारः]** भद्रं करोतीति भद्रङ्करः - भद्रकारः । अनेन ख-अण्प्र० । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[तीर्थकरः]** तीर्थं करोतीति तीर्थकरः । 'हेतु-तच्छीला-ऽनुकूलेऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्' (५।१।१०३) टप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[तीर्थङ्करः, तीर्थकारः]** तीर्थं करोतीति तीर्थङ्करः - तीर्थकारः । मतान्तरे ख-अण्प्र० अनेनैव । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**खो वेति सिद्धे अण्ग्रहणं हेत्वादिष्वपि टबाधनार्थम् ।**

**[योगक्षेमकरी लोकस्य]** योगश्च क्षेमश्च = योगक्षेमौ, योगक्षेमौ करोति = योगक्षेमकरी । 'हेतु-तच्छीला-ऽनुकूलेऽशब्द-श्लोक-कलह०' (५।१।१०३) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्०' (२।४।२०) ङी । लोक षष्ठी ङस् ।।छा।

## मेघर्ति-भया-ऽभयात् खः ॥ ५।१।१०६ ॥

**[मेघर्तिभयाऽभयात्]** मेघश्च ऋतिश्च 卐 भयं च अभयं च = मेघर्तिभयाऽभयम्, तस्मात् ।

**[खः]** ख प्रथमा सि ।

---

P.卐 भयश्च अभयश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ मेघङ्करः ]** मेघान् करोतीति मेघङ्करः । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ ऋतिङ्करः ]** ऋतिर्गतिः-सत्यता वा । ऋतिं करोतीति ऋतिङ्करः । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ भयङ्करः ]** भयं करोतीति भयङ्करः । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ अभयङ्करः ]** अभयं करोतीति अभयङ्करः । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

हेत्वादिविक्षायां टमपि बाधते परत्वात्, यथा - '**भयङ्करं श्मशानम्**' ।।छा।

**प्रिय-वशाद् वदः** ।। ५।१।१०७ ।।

**[ प्रियवशात् ]** प्रियश्च वशश्च = प्रियवशम्, तस्मात् ।

**[ वदः ]** वद् पञ्चमी ङसि ।

**[ प्रियम्वदः ]** प्रिय 'वद व्यक्तायां वाचि' (९९८) वद् । प्रियं वदतीति प्रियम्वदः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः ।

**[ वशम्वदः ]** वश 'वद व्यक्तायां वाचि' (९९८) वद् । वशं वदतीति वशम्वदः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।।छा।

**द्विषन्तप-परन्तपौ** ।। ५।१।१०८ ।।

**[ द्विषन्तपपरन्तपौ ]** द्विषन्तपश्च परन्तपश्च = द्विषन्तपपरन्तपौ ।

**[ द्विषन्तपः ]** द्विषींक् अप्रीतौ (११२६) द्विष् । द्वेष्टीति द्विषत् । 'सुग्-द्विषार्हः सत्रि-शत्रु-स्तुत्ये' (५।२।२६) अतृश्प्र० → अत् = द्विषत् । 'तपं संतापे' (३३३) तप् । तपतः(तपन्तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । द्विषतस्तापयतीति द्विषन्तपः । अनेन खप्र० - ह्रस्वत्वं - द्विषत्तकारस्य मकारश्च निपात्यन्ते ।

**[ परन्तपः ]** परान् तापयतीति परन्तपः । अनेन खप्र० । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ द्विषतीतापः ]** द्विषतीं तापयति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ द्विषत्तापः ]** द्विषतः तपति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ परतापः ]** परान् तपति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

अत्र अण्यन्तस्य तपेः खो न भवति ।।छा।

**परिमाणार्थ-मित-नखात् पचः** ।। ५।१।१०९ ।।

**[ परिमाणार्थमितनखात् ]** परिमाणरूपोऽर्थो येषां ते = परिमाणार्थाः । परिमाणार्थश्च मितश्च नखश्च = परिमाणार्थमितनखम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पचः ]** पच् पञ्चमी ङसि ।

**[ प्रस्थम्पचा स्थाली ]** प्रस्थ 'डुपचींष् पाके' (८९२) पच् । प्रस्थं पचतीति प्रस्थम्पचा स्थाली । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ द्रोणम्पचा दासी ]** द्रोण 'डुपचींष् पाके' (८९२) पच् । द्रोणं पचतीति द्रोणम्पचा दासी । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अल्पम्पचा मुनयः ]** अल्पं पचन्तीति अल्पम्पचा मुनयः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । प्रथमा जस् ।

**[ मितम्पचा ब्राह्मणी ]** मितं पचतीति । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) । आप्प्र० → आ, ब्राह्मणी ।

**[ नखम्पचा यवागूः ]** नखं पचतीति । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ, यवागूः ॥छा॥

### कूला-ऽभ्र-करीषात् कषः ॥ ५।१।११० ॥

**[ कूलाऽभ्रकरीषात् ]** कूलश्च अभ्रश्च करीषश्च = कूलाऽभ्रकरीषम्, तस्मात्

**[ कषः ]** कष् पञ्चमी ङसि ।

**[ कूलङ्कषा नदी ]** 'कष हिंसायाम्' (५०७) कष् । कूलं कषतीति । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अभ्रङ्कषो गिरिः ]** अभ्रं कषतीति । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ करीषङ्कषा वात्या ]** करीषं कषतीति । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ । वात । वातानां समूहः = वात्या । 'पाशाऽऽदेश्च ल्यः' (६।२।२५) ल्यप्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा॥

### सर्वात् सहश्च ॥ ५।१।१११ ॥

**[ सर्वात् ]** सर्व पञ्चमी ङसि ।

**[ सहः ]** सह् पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ सर्वंसहो मुनिः ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।४।९८) सह् । 'सर्वं सहते = सर्वंसहो मुनिः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ सर्वङ्कषः खलः ]** सर्वं कषतीति सर्वङ्कषः खलः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ॥छा॥

### भृ-वृ-जि-तॄ-तप-दमेश्च नाम्नि ॥ ५।१।११२ ॥

**[ भृवृजितॄतपदमेः ]** भृश्च वृश्च जिश्च तॄश्च तपश्च दमिश्च = भृवृजितॄतपदमि, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ च ]** च प्रथमा सि ।

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ईङौ वा' (२।१।१०९) अकारस्य लुक् ।

**[ विश्वम्भरा वसुधा ]** विश्व 'टुडुभृंगक् पोषणे च' (११४०) भृ । विश्वं बिभर्तीति विश्वम्भरा वसुधा । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पतिम्वरा कन्या ]** पति 'वृग्ट् वरणे' (१२९४) वृ । पतिं वृणीते = पतिम्वरा कन्या । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ शत्रुञ्जयः पर्वतः ]** शत्रु 'जिं अभिभवे' (८) जि । शत्रून्-अष्टकर्मरूपान् जयतीति शत्रुञ्जयः पर्वतः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ धनञ्जयः पार्थः ]** धनं जयतीति धनञ्जयः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । पृथा । पृथाया अपत्यम् = पार्थः । 'अदोर्नदी-मानुषीनाम्नः' (६।१।६७) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आर् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ रथन्तरं साम ]** रथ 'तॄ प्लवन-तरणयोः' (२७) तॄ । रथं तरतीति रथन्तरं साम । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ शत्रुन्तपो राजा ]** शत्रु 'तपं संतापे' (३३३) तप् । शत्रून् तपतीति शत्रुन्तपो राजा । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ बलिन्दमो कृष्णः ]** शमू (१२३०) - 'दमूच् उपशमे' (१२३१) दम् । दाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । बलिं नाम दानवं-बलिनो राज्ञो वा । बलिं दाम्यति-दमयतीति वा बलिन्दमः कृष्णः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ अरिन्दमः राजा ]** अरि, शमू (१२३०) - 'दमूच् उपशमे' (१२३१) दम् । दाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अमोऽकम्यमि-चमः' (४।२।२६) ह्रस्वः । अरीन् दाम्यति-दमयतीति वा अरिन्दमो राजा । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ शत्रुंसहो राजा ]** शत्रु 'षहि मर्षणे' (९९९) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । शत्रून् सहते = शत्रुंसहो राजा । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ कुटुम्बभारः ]** कुटुम्ब 'टुडुभृंग्क् पोषणे च' (११४०) भृ । कुटुम्बं बिभर्तीति कुटुम्बभारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## धारेर्धर् च ॥ ५।१।११३ ॥

**[ धारेः ]** धारि षष्ठी ङस् ।

**[ धर् ]** धर् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ वसुन्धरा पृथ्वी ]** 'धृण् धारणे' (........)धृ, अपरपठितः चुरादौ द्रष्टव्यः । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । वसूनि-रत्नानि धारयतीति(न्तीति) वसुन्धरा । अनेन खप्र० - "धर्" आदेशश्च ।

**[ युगन्धरः तीर्थङ्करः ]** युगं धारयतीति युगन्धरः । अनेन खप्र० - "धर्" आदेशश्च ।

**[ सीमन्धरः तीर्थङ्करः ]** सीमां-सीमानं धारयतीति सीमन्धरः । अनेन खप्र० - "धर्" आदेशश्च ।

**[ छत्रधारः ]** छत्रं धारयतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः ॥छ॥

## पुरन्दर-भगन्दरौ ॥ ५।१।११४ ॥

**[ पुरन्दरभगन्दरौ ]** पुरन्दरश्च भगन्दरश्च = पुरन्दरभगन्दरौ ।

**[ पुरन्दरः शक्रः ]** 'दृश् विदारणे' (१५३५) दृ । दृणन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । पुरो दारयतीति पुरन्दरः । अनेन खप्र० → अ, पुरशब्दात् निपातनात् अम् आनीयते ।

**[ भगन्दरो व्याधिः ]** भगं दारयतीति भगन्दरः । अनेन खप्र० । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । अनेनैव निपातनात् दारयतेर्ह्रस्वत्वमुभयत्र ।

पुरशब्दपूर्वस्य तु पुरदार इति भवति, यतो निपातनस्येष्टविषयत्वात् ॥छ॥

## वाचंयमो व्रते ॥ ५।१।११५ ॥

**[ वाचंयमः ]** वाचंयम प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ व्रते ]** व्रत सप्तमी ङि ।

व्रतं-**शास्त्रितो नियमः** । शास्त्रं सञ्जातमस्य उपदेशकतया । 'तदस्य सञ्जातं तारकादिभ्य इतः' (७।१।१३८) इतप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शास्ता-उपाध्यायः, तं कर्मतापन्नं इतः प्राप्तः शास्तुः सकाशात्-इत आगतो वा व्रतं शास्त्रविहितो नियम इति ।

**[ वाचंयमो व्रती ]** वाचं यच्छति-नियमयति वा वाचंयमो व्रती । अनेन खप्र०, वाच्शब्दात् अम् निपात्यते ।

**[ वाग्यामोऽन्यः ]** वाचं यच्छतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अन्य प्रथमा सि ॥छ॥

## मन्याण्णिन् ॥ ५।१।११६ ॥

**[ मन्यात् ]** मन्य पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ णिन् ]** णिन् प्रथमा सि ।

**[ पण्डितमानी बन्धोः ]** पण्डित बुधि (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । पण्डितं मन्यते बन्धुं = पण्डितमानी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ दर्शनीयमानी भार्यायाः ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । दृश्यते । 'तव्या-ऽनीयौ' (५।१।२७) अनीयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । दर्शनीयां मन्यते भार्यां = दर्शनीयमानी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

श्यनिर्देश उत्तरार्थः ॥छ॥

## कर्तुः खश् ॥ ५।१।११७ ॥

**[ कर्तुः ]** कर्तृ पञ्चमी ङसि ।

**[ खश् ]** खश् प्रथमा सि ।

यदा प्रत्ययार्थः कर्त्ता आत्मानमेव दर्शनीयत्वादिना धर्मेण विशिष्टं मन्यते तदाऽयं कर्म, तत्राऽयं विधिः ।

**[ पण्डितम्मन्यः ]** पण्डित बुधि (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । पण्डितमात्मानं मन्यते । अनेन खशप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ।

**[ पट्विम्मन्या ]** पटु 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । वत्वम् । बुधि (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । पट्वीमात्मानं मन्यते = पट्विम्मन्या । अनेन खशप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः - ह्रस्वत्वं च । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ विद्वन्मन्यः ]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वान् । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस्, विद्वस् । विद्वांसमात्मानं मन्यते । अनेन खशप्र० → अ । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः'(२।१।६८) स० → द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ।

**[ विदुषिम्मन्या ]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वान् । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस् । 'अधातूदृदितः' (२।४।२) ङी । विदुषीमात्मात्मानं मन्यते । अनेन खशप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वत्वं च । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

असरूपत्वाण्णिन्नपि-

**[ पण्डितमानी ]** पण्डितमात्मानं मन्यते । पूर्वेण णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । शेषं पूर्ववत् ।

अग्रेषु **[ पटुमानिनी, विद्वन्मानी, विद्वन्मानिनी ]** एवं ज्ञेयम् । विद्वन्मानिनीत्यत्र 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

शकारः शित्कार्यार्थः ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## एजेः ॥ ५।१।११८ ॥

**[ एजेः ]** एजि पञ्चमी ङसि ।

**[ अङ्गमेजयः ]** 'एजृ कम्पने' (१४८) एज् । 'एजृङ् दीप्तौ' (६५९) एज् । 'एजन्तं-एजमानं वा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अङ्गान्येजयति-कम्पयति = अङ्गमेजयः । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ जनमेजयः ]** 'एजृ कम्पने' (१४८) एज् । 'एजृङ् दीप्तौ' (६५९) एज् । 'एजन्तं-एजमानं वा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । जनमेजयतीति जनमेजयः । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ अरिमेजयः ]** 'एजृ कम्पने' (१४८) एज् । 'एजृङ् दीप्तौ' (६५९) एज् । 'एजन्तं-एजमानं वा प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । अरिमेजयते । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

## शुनी-स्तन-मुञ्ज-कूला-ऽऽस्य-पुष्पात् ट्धेः ॥ ५।१।११९ ॥

**[ शुनीस्तनमुञ्जकूलाऽऽस्यपुष्पात् ]** शुनीश्च स्तनश्च मुञ्जश्च कूलश्च आस्यश्च पुष्पं च = शुनीस्तनमुञ्जकूला-ऽऽस्यपुष्पम्, तस्मात् ।

**[ ट्धेः ]** ट्धे पञ्चमी ङसि । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङसि० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ शुनिन्धयः ]** शुनी 'ट्धें पाने' (२८) धे । शुनीं धयति । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[ स्तनन्धयः ]** स्तनं धयति ।

**[ मुञ्जन्धयः ]** मुञ्जं धयति ।

**[ कूलन्धयः ]** कूलं धयति ।

**[ आस्यन्धयः ]** आस्यं धयति ।

**[ पुष्पन्धयः ]** पुष्पं धयति । सर्वत्र अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ट्धेष्टकारो ङ्यर्थः-

**[ शुनिन्धयी ]** शुनीं या धयति सा = शुनिन्धयी । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ स्तनन्धयी सर्पजातिः ]** स्तनं या धयति सा = स्तनन्धयी । 'अणञेयेकण्०' (२।४।२०) ङी ॥छा।

**नाडी-घटी-खरी-मुष्टि-नासिका-वाताद् ध्मश्च** ॥ ५।१।१२० ॥

**[ नाडीघटीखरीमुष्टिनासिकावातात् ]** नाडी च घटी च खरी च मुष्टिश्च नासिका च वातश्च = नाटीघटीखरीमुष्टिनासिकावातम्, तस्मात् ।

**[ ध्मः ]** ध्मा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ च ]** च प्रथमा सि ।

**[ नाडिन्धमः, नाडिन्धयः ]** नाडि 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । 'ध्मां शब्दा-ऽग्निसंयोगयोः' (४) ध्मा । 'ट्धें पाने' (२८) धे । नाडीं धमति-धयति वा । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्०' (४।२।१०८) ध्मा → "धम" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[ घटिन्धमः, घटिन्धयः ]** घट 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । घटीं धमति-धयति वा । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा → "धम" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[ खरिन्धमः, खरिन्धयः ]** खर 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । खरीं धमति-धयति वा । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा → "धम" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[ मुष्टिन्धमः, मुष्टिन्धयः ]** मुष्टिं धमति-धयति वा । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा → "धम" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ नासिकन्धमः, नासिकन्धयः ]** नासिकां धमति-धयति वा । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा → "धम" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[ वातन्धमः, वातन्धयः ]** वातं धमति-धयति वा । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा० → "धम" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

ङ्यन्तनिर्देशस्तदभावे खश्प्रत्ययनिवृत्त्यर्थः-

**[ नाडिध्मः, नाडिधः ]** नाडिं धमति-धयति वा । पूर्वं 'आत् सन्ध्यक्षरस्य' (४।२।१) धा, ततो वाक्यम् । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**[घटध्मः, घटधः]** घटं धमति-धयति वा । पूर्वं 'आत् सन्ध्यक्षरस्य' (४।२।१) धा, ततो वाक्यम् । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[खरध्मः, खरधः]** खरं धमति-धयति वा । पूर्वं 'आत् सन्ध्यक्षरस्य' (४।२।१) धा, ततो वाक्यम् । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ॥छा॥

## **पाणि-करात्** ॥ ५।१।१२१ ॥

**[पाणिकरात्]** पाणिश्च करश्च = पाणिकरम्, तस्मात् ।

**[पाणिन्धमः]** पाणि 'ध्मां शब्दा-ऽग्निसंयोगयोः' (४) ध्मा । पाणिं धमति । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा० → धम आदेशः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (४।२।११३) अलोपः ।

**[करन्धमः]** कर 'ध्मां शब्दा-ऽग्निसंयोगयोः' (४) ध्मा । करं धमति । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा०' (४।२।१०८) ध्मा० → धम आदेशः । 'लुगस्यादेत्यपदे' (४।२।११३) अलोपः ।

**[पाणिन्धयः]** पाणिं धयति । मतान्तरेऽनेन खश्प्र० - मोऽन्तः ।

**[करन्धयः]** करं धयति । मतान्तरेऽनेन खश्प्र० - मोऽन्तः ।

**[पाणिन्धमाः पन्थानः]** पाणिं धमन्तीति पन्थान इत्यादिषु योगे इत्याह । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । प्रथमा जस् । पथिन् प्रथमा जस् । 'थो न्थ्' (१।४।७८) थ्० → न्थ्० । 'एः' (१।४।७७) इ० → आ० ।

**[करन्धमाः पन्थानः]** करं धमन्तीति पन्थान इत्यादिषु योगे इत्याह । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । प्रथमा जस् ।

**[नाडिन्धमाः पन्थानः]** नाडीं धमन्तीति पन्थान इत्यादिषु योगे इत्याह । 'नाडी-घटी-खरी-मुष्टि-नासिका-वाताद् ध्मश्च' (५।१।१२०) खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च । प्रथमा जस् । पथिन् प्रथमा जस् । 'थो न्थ्' (१।४।७८) थ्० → न्थ्० । 'एः' (१।४।७७) इ० → आ० इति 'तद्योगाद् यथा मञ्चाः क्रोशन्ति' - पाणिन्धमादिषु पुरुषयोगात् पन्थानोऽपि तथा अभिधीयन्ते यथा मञ्चस्थपुरुषसंबंधात् मञ्चाः क्रोशन्ति ॥छा॥

## **कूलादुद्रुजोद्वहः** ॥ ५।१।१२२ ॥

**[कूलात्]** कूल पञ्चमी ङसि ।

**[उद्रुजोद्वहः]** उद्रुजश्च उद्वह् च = उद्रुजोद्वह्, तस्मात् ।

**[कूलमुद्रुजो गजः]** कूल उत् 'रुजोंत् भङ्गे' (१३५०) रुज् । कूलमुद्रुजतीति **कूलमुद्रुजो गजः** । अनेन खश्प्र० → अ । खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'तुदादेः शः' (३।४।८१) शप्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[कूलमुद्वहा नदी]** कूल उत् 'वहीं प्रापणे' (९९६) वह् । कूलमुद्वहतीति कूलमुद्वहा नदी । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वहा-ऽभ्राल्लिहः ॥ ५।१।१२३ ॥**

**[ वहाऽभ्रात् ]** वहश्च अभ्रश्च = वहाऽभ्रम्, तस्मात् ।

**[ लिहः ]** लिह् पञ्चमी ङसि ।

**[ वहंलिहो गौः ]** वह 'लिहींक् आस्वादने' (११२९) लिह् । वहं लेढीति वहंलिहो गौः । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अभ्रंलिहः प्रासादः ]** अभ्र 'लिहींक् आस्वादने' (११२९) लिह् । अभ्रं लेढीति अभ्रंलिहः प्रासादः । अनेन खश्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ॥छ॥

**बहु-विध्वरुस्तिलात् तुदः ॥ ५।१।१२४ ॥**

**[ बहुविध्वरुस्तिलात् ]** बहुश्च विधुश्च अरुस् च तिलश्च = बहुविध्वरुस्तिलम्, तस्मात् ।

**[ तुदः ]** तुद् पञ्चमी ङसि ।

**[ बहुन्तुदं युगम् ]** बहु 'तुदींत् व्यथने' (१३१५) तुद् । बहु तुदतीति बहुन्तुदं युगम् । अनेन खश्प्र० → अ । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ विधुन्तुदो राहुः ]** विधुं-चन्द्रमसं तुदति-पीडयतीति विधुन्तुदो राहुः । अनेन खश्प्र० → अ । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ अरुन्तुदः पीडाकरः ]** अरुस्तुदति । अनेन खश्प्र० → अ । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'संयोगस्याऽऽदौ स्कोर्लुक्' (२।१।८८) सलुक् ।

**[ तिलन्तुदः काकः ]** तिलान् तुदति । अनेन खश्प्र० → अ । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ॥छ॥

**ललाट-वात-शर्द्धात् तपा-ऽज-हाकः ॥ ५।१।१२५ ॥**

**[ ललाटवातशर्द्धात् ]** ललाटश्च वातश्च शर्द्धश्च = ललाटवातशर्द्धम्, तस्मात् ।

**[ तपाऽजहाकः ]** तपश्च अजश्च हाक् च = तपाऽजहाक्, तस्मात् ।

**[ ललाटन्तपः सूर्यः ]** ललाट 'तपं संतापे' (३३३) तप् । ललाटं तपतीति ललाटन्तपः सूर्यः । अनेन खश्प्र० → अ । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ वातमजा मृगाः ]** वात 'अज क्षेपणे च' (१३९) अज् । वातमजन्तीति वातमजा मृगाः । अनेन खश्प्र० → अ । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

'खशः शित्त्वादजेर्वी आदेशो न भवति' ।

**[ शर्द्धञ्जहा माषाः ]** शर्द्ध卐'ओहांक् त्यागे' (११३१) हा । शर्द्धं जहति । अनेन खश्प्र० → अ । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक्, माषाः ॥छ॥

---

卐 श० म० न्या० - शर्धोऽपानशब्दः, तं जहतीति खशि ह्वादित्वात् द्वित्वे पूर्वहस्य जत्व ह्रस्वे आकारस्य 'इडेत्०' (४।३।९४) इति लुकि ङस्युक्तसमासे पूर्वपदस्य मागमे तस्यानुस्वारे च **शर्धंजहा माषाः** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## असूर्योग्राद् दृशः ॥ ५।१।१२६ ॥

**[ असूर्योग्रात् ]** असूर्यश्च उग्रश्च = असूर्योग्रम्, तस्मात् ।

**[ दृशः ]** दृश् पञ्चमी ङसि ।

**[ असूर्यम्पश्या राजदाराः ]** न सूर्य 'दृशृं प्रेक्षणे' (४९५) दृश् । सूर्यमपि न पश्यन्ति = असूर्यम्पश्या राजदाराः । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सदः शृ-कृ-धि-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-शीय-सीदम्' (४।२।१०८) "पश्य" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

'दृशिना संबद्धस्य नञः सूर्येण सहासामर्थ्येऽपि गमकत्वात् समासः', बाहुलकाद्वा समासः ।

**[ उग्रम्पश्यः ]** उग्रं पश्यति । अनेन खश्प्र० → अ । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सदः०' (४।२।१०८) "पश्य" आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ॥छा॥

## इरम्मदः ॥ ५।१।१२७ ॥

**[ इरम्मदः ]** इरम्मद अखण्डमिदम् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ इरम्मदः ]** इरा 'मदैच् हर्षे' (१२३६) मद् । इरा-सुरा तया माद्यतीति इरम्मदः । अनेन खश्प्र० → अ - श्याभावश्च निपात्यते । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ॥छा॥

## नग्न-पलित-प्रिया-ऽन्ध-स्थूल-सुभगा-ऽऽढ्य-तदन्ताच्व्य्यर्थेऽच्वेर्भुवः खिष्णु-खुकञ् ॥ ५।१।१२८ ॥

**[ नग्नपलितप्रियाऽन्धस्थूलसुभगाऽऽढ्यतदन्तात् ]** नग्नादयोऽन्ते यस्य तत् = तदन्तम् । नग्नश्च पलितश्च प्रियश्च अन्धश्च स्थूलश्च सुभगश्च आढ्यश्च तदन्तश्च = नग्नपलितप्रियाऽन्धस्थूलसुभगाऽऽढ्यतदन्तम्, तस्मात् ।

**[ च्व्यर्थे ]** च्वेरर्थः = च्व्यर्थस्तस्मिन् ।

**[ अच्वेः ]** न च्विः = अच्विः, तस्मात् ।

**[ भुवः ]** भुव् पञ्चमी ङसि ।

**[ खिष्णुखुकञ् ]** खिष्णुश्च खुकञ् च = खिष्णुखुकञ् ।

**[ नग्नम्भविष्णुः, नग्नम्भावुकः ]** नग्न 'भू सत्तायाम्' (१) भू । अनग्नो नग्नो भवतीति नग्नम्भविष्णुः - नग्नम्भावुकः । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ पलितम्भविष्णुः, पलितम्भावुकः ]** पलितानि अस्य सन्ति । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । अपलितः पलितो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रियम्भविष्णुः, प्रियम्भावुकः ]** अप्रियः प्रियो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ अन्धम्भविष्णुः, अन्धम्भावुकः ]** अनन्धोऽन्धो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ स्थूलम्भविष्णुः, स्थूलम्भावुकः ]** अस्थूलः स्थूलो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ सुभगम्भविष्णुः, सुभगम्भावुकः ]** असुभगः सुभगो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ आढ्यम्भविष्णुः, आढ्यम्भावुकः ]** अनाढ्य आढ्यो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

तदन्तेभ्यः- **[ अनग्नम्भविष्णुः, अनग्नम्भावुकः ]** अननग्नोऽनग्नो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ सुनग्नम्भविष्णुः, सुनग्नम्भावुकः ]** असुनग्नः सुनग्नो भवति । अनेन खिष्णुप्र० → इष्णु-खुकञ्प्र० → उक । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ आढ्यीभविता ]** अनाढ्य आढ्यो भवतीति आढ्यीभविता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्याऽनव्ययस्य' (४।३।१११) अस्य ई० ।

'उपपदविधिषु तदन्तविधिरनाश्रित इति तदन्तग्रहणम्' ॥छ॥

## कृगः खनट् करणे ॥ ५।१।१२९ ॥

**[ कृगः ]** कृग् पञ्चमी ङसि ।

**[ खनट् ]** खनट् प्रथमा सि ।

करण इति 'कर्त्तरि' (५।१।३) इत्यस्याऽपवादः ।

**[ नग्नङ्करणं द्यूतम् ]** अनग्नो नग्नः क्रियतेऽनेन = नग्नङ्करणं द्यूतम् । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पलितङ्करणं तैलम्]** अपलितः पलितः क्रियतेऽनेन = पलितङ्करणं तैलम् । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[प्रियङ्करणं शीलम्]** अप्रियः प्रियः क्रियतेऽनेन = प्रियङ्करणं शीलम् । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[अन्धङ्करणः शोकः]** अनन्धोऽन्धः क्रियतेऽनेन = अन्धङ्करणः शोकः । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[स्थूलङ्करणं दधि]** अस्थूलः स्थूलः क्रियतेऽनेन = स्थूलङ्करणं दधि । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[सुभगङ्करणं रूपम्]** असुभगः सुभगः क्रियतेऽनेन = सुभगङ्करणं रूपम् । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[आढ्यङ्करणं वित्तम्]** अनाढ्य आढ्यः क्रियतेऽनेन = आढ्यङ्करणं वित्तम् । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । सि-अम् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[अनग्नङ्करणः पटः]** अननग्नोऽनग्नः क्रियतेऽनेन = अनग्नङ्करणः पटः । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[सुनग्नङ्करणः पटः]** असुनग्नः सुनग्नः क्रियतेऽनेन = सुनग्नङ्करणः पटः । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[अपलितङ्करणो रसः]** अनपलितोऽपलितः क्रियतेऽनेन = अपलितङ्करणो रसः । अनेन खनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[नग्नीकुर्वन्त्यनेन]** अनग्ना नग्नाः कुर्वन्ति अनेन । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्याऽनव्ययस्य' (४।३।१११) ई । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । अत्र खनट्प्रतिषेधसामर्थ्यादनडपि न भवति ।

न हि नग्नीकरणमित्यत्र अनट् - खनटो रूपे समासे स्त्रियां वा विशेषोऽस्ति ॥छा॥

## भावे चा-ऽऽशिताद् भुवः खः ॥ ५।१।१३० ॥

**[भावे]** भाव सप्तमी ङि ।

**[च]** च प्रथमा सि ।

**[आशितात्]** आशित पञ्चमी ङसि ।

**[भुवः]** भू पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) उव् ।

**[खः]** ख प्रथमा सि ।

**[आशितम्भवो वर्तते भवतः]** आङ्पूर्व०, 'अशश् भोजने' (१५५८) अश् । अश्नाति स्म । अविवक्षितकर्मकत्वात् 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । यदा आङ्विना तदा अत एव निर्देशाद्दीर्घत्वम् । आशितस्य आशितेन तृप्तेन भूयते भवता = आशितम्भवः । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आशितम्भव ओदनः ]** आशित 'भू सत्तायाम्' (१) भू । आशितो भवत्यनेन = आशितम्भव ओदनः । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ आशितम्भवा पञ्चपूली ]** आशितो भवत्यनया = आशितम्भवा । अनेन खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ । पञ्चन्-पूल मांडणीयइ । पञ्चानां पूलानां समाहारः = पञ्चपूली । 'द्विगोः समाहारात्' (२।४।२२) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

असरूपत्वादनडपि-

**[ आशितस्य भवनम् ]** आशितस्य - तृप्तस्य भवनम् । 'भावे' (५।३।१२२) अनट्प्र० । करणेऽपि आशितस्य भवनं आशितभवन इत्युदाहार्यम्, न घञ्, [अ]सरूपत्वात् ।

आशित इति निर्देशादश्नातेः कर्त्तरि क्तो दीर्घत्वं च ॥छ॥

**नाम्नो गमः खड्-डौ च विहायसस्तु विहः** ॥ ५।१।१३१ ॥

**[ नाम्नः ]** नामन् पञ्चमी ङसि ।

**[ गमः ]** गम् पञ्चमी ङसि ।

**[ खड्डौ ]** खड् च डश्च = खड्डौ ।

**[ च ]** च प्रथमा सि ।

**[ विहायसः ]** विहायस् षष्ठी ङस् ।

**[ तु ]** तु प्रथमा सि ।

**[ विहः ]** विह प्रथमा सि ।

**[ तुरङ्गः ]** 'तुरक् त्वरणे' इति जुहोत्यादौ अपरपठितः । तुतोर्तीति । 'नाम्युपा०' (५।१।५४) कप्र० । तुरो गच्छति - क्रियाविशेषणं वा तुरं-त्वरितं गच्छतीति । अनेन खड्प्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ भुजङ्गः ]** 'भुजोंत् कौटिल्ये' (१३५१) भुज् । भोजनं = भुजः । 'स्थाऽऽदिभ्यः कः' (५।३।८२) कप्र० । भुजेन - कौटिल्येन भुज इव वा गच्छति = भुजङ्गः । अनेन खड्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

**[ प्रवङ्गः ]** प्रव अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - गम्लृं गतौ (३९६) गम् । प्रवेण गच्छति । अनेन खड्प्र० → अ । शेषं पूर्ववत् ।

**[ प्लवङ्गः ]** प्लवेन गच्छति । अनेन खड्प्र० → अ । शेषं पूर्ववत् ।

**[ विहङ्गः ]** विहायस् - गम् । विहायसा गच्छति = विहङ्गः । अनेन खड्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अनेनैव विहायस् → 'विह' आदेशः, ततो मोऽन्तः ।

**[ तुरगः ]** तुरं गच्छतीति तुरगः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अग्रेऽप्येवं पूर्ववत् वाक्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[**अत्यन्तगः**] अत्यन्तं गच्छति ।

[**सर्वगः**] सर्वं गच्छति ।

[**सर्वत्रगः**] सर्वत्र गच्छतीति ।

[**अनन्तगः**] अनन्तं गच्छति ।

[**परदारगः**] परदारं(रान्) गच्छति ।

[**ग्रामगः**] ग्रामं गच्छति ।

[**गुरुतल्पगः**] गुरुतुल्यं(तल्पं) गच्छतीति गुरुतल्पगः ।

[**प्रतीपगः**] प्रतीपं गच्छति ।

[**पीठगः**] पीठं गच्छति ।

[**तीरगः**] तीरं गच्छतीति तीरगः ।

सर्वत्र अनेन डप्र० → अ । डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अग्रादिभ्यः कर्मभ्यः तदन्तेभ्योऽपि-

[**अग्रगः**] अग्रं गच्छतीति अग्रगः ।

[**सेनाग्रगः**] सेनाग्रं गच्छतीति सेनाग्रगः ।

[**आदिगः**] आदिं गच्छतीति आदिगः ।

[**पङ्क्त्यादिगः**] पङ्क्त्यादिं गच्छतीति पङ्क्त्यादिगः ।

[**गृहमध्यगः**] गृहमध्यं गच्छतीति गृहमध्यगः ।

[**अन्तगः**] अन्तं गच्छतीति अन्तगः ।

[**शाखान्तगः**] शाखान्तं गच्छतीति शाखान्तगः ।

[**अध्वगः**] अध्व(ध्वानं) गच्छतीति अध्वगः ।

[**नगराध्वगः**] नगराध्व(ध्वानं) गच्छतीति नगराध्वगः ।

[**दूरगः**] दूरं गच्छतीति दूरगः ।

[**अदूरगः**] अदूरं गच्छतीति अदूरगः ।

[**पारगः**] पारं गच्छतीति पारगः ।

[**वेदपारगः**] वेदपारं गच्छतीति वेदपारगः ।

[**अगारगः**] अगारं गच्छतीति अगारगः ।

[**स्त्र्यगारगः**] स्त्रीणामगारं = स्त्र्यगारम्, स्त्र्यगारं गच्छतीति स्त्र्यगारगः ।

सर्वत्र अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ संज्ञायाम्-

**[ खगः पक्षी ]** खे-आकाशे गच्छतीति खगः पक्षी ।

**[ अगो वृक्षः पर्वतश्च ]** न गच्छतीति अगो वृक्षः पर्वतश्च ।

**[ उरगः ]** उरसा गच्छतीति उरगः । सर्वत्र अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'पृषोदरादयः' (३।२।१५५) सलोपः ।

**[ पतगः पक्षी ]** पतो गच्छतीति पतगः पक्षी ।

**[ पन्नगः सर्पः ]** पद् चरणवाचको व्यञ्जनान्तः । पद्भ्यां न गच्छति, पन्नं गच्छति वा = पन्नगः सर्पः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ आपगा नदी ]** आपमब्धिं गच्छत्यापगा नदी । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आशुगः शरः ]** आशु-शीघ्रं गच्छत्याशुगः शरः ।

**[ निम्नगा ]** निम्नं गच्छति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ समुद्रगा ]** समुद्रं गच्छति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ सततगा ]** सततं गच्छति । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अगो वृषलः शीतेन ]** न गच्छतीति अगो वृषलः शीतेन । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

अथ खः- **[ सौतङ्गमिः卐मुनिः ]** सुतं-सुतेन वा गच्छति=सुतङ्गमः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । सुतङ्गमो मुनिर्यस्याऽसौ सौतङ्गमिः मुनिः । 'सुतङ्गमादेरिञ्' (६।२।८५) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मितङ्गमोऽश्वः ]** मितं गच्छति ।

+**[ अमितङ्गमो हस्ती ]** अमितं गच्छतीति । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः ।

**[ जनङ्गमश्चण्डालः ]** जनं गच्छतीति जनङ्गमश्चण्डालः ।

**[ पूर्वङ्गमाः पन्थानः ]** पूर्वां गच्छन्तीति पूर्वङ्गमाः पन्थानः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः-ह्रस्वश्च ।

**[ हृदयङ्गमा वाचः ]** हृदयं गच्छन्तीति हृदयङ्गमा वाचः ।

**[ तुरङ्गमोऽश्वः ]*** त्वरां(तुरं) गच्छति । अनेन खप्र० → अ । 'खित्यनव्यया०' (३।२।१११) मोऽन्तः ।

अग्रे-**[ भुजङ्गमः सर्पः, प्रवङ्गमः कपिः, प्लवङ्गमो भेकः, विहङ्गमो नभसङ्गमश्च पक्षी ]** पूर्ववत् वाक्यं ज्ञेयम् ।

卐 बृहद्वृत्तौ-पुत्रः । + बृहद्वृत्तौ - अमितंगमा हस्तिनी । * श० म० न्या० - तुरो गच्छतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ उरङ्गमः ]** उरसा गच्छति = उरङ्गमः । अनेन खप्र० → अ । 'खित्यनव्ययाऽरुषो०' (३।२।१११) मोऽन्तः । 'पृषोदरादयः' (३।२।१५५) स्लोपः ।

यदाह- 'उरो विहायसोरुरविहौ च' ॥छ॥

## सुग-दुर्गमाधारे ॥ ५।१।१३२ ॥

**[ सुगदुर्गम् ]** सुगश्च दुर्गश्च = सुगदुर्गम् ।

**[ आधारे ]** आधार सप्तमी ङि ।

**[ सुगः पन्थाः ]** सुख अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । सुखेन गम्यतेऽस्मिन्निति सुगः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः, पन्थाः ।

**[ दुर्गः पन्थाः ]** दुःख अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । दुःखेन गम्यतेऽस्मिन्निति दुर्गः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः, पन्थाः ।

**[ सुगन्ता ]** सुष्ठु गच्छतीति सुगन्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[ दुर्गन्ता ]** दुःखेन गच्छतीति दुर्गन्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[ सुगमः ]** सुखेन गम्यते = सुगमः । 'दुः-स्वीषतः०' (५।३।१३९) खल्प्र० → अ ।

**[ दुर्गमः ]** दुःखेन गम्यते = दुर्गमः । 'दुः-स्वीषतः०' (५।३।१३९) खल्प्र० → अ ॥छ॥

## निर्गो देशे ॥ ५।१।१३३ ॥

**[ निर्गः ]** निर्ग प्रथमा सि ।

**[ देशे ]** देश सप्तमी ङि ।

**[ निर्गो देशः ]** निर्-गम् । निर्गम्यतेऽस्मिन् देशे इति निर्गो देशः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ निर्गमनः ]** निर्गम्यते । अनप्र० । प्रथमा सि ॥छ॥

## शमो नाम्न्यः ॥ ५।१।१३४ ॥

**[ शमः ]** शम् पञ्चमी ङसि ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ अः ]** अ प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शमित्यव्ययं सुखे वर्तते ।

**[शम्भवोऽर्हन्]** शम् 'भू सत्तायाम्' (१) भू । शं-सुखं तत्र भवतीति शम्भवोऽर्हन् । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[शङ्करः]** शं-सुखं करोतीति शङ्करः ।

**[शङ्गरः]** शम् 'गृत् निगरणे' (१३३५) गृ । 卐 शं-सुखं गिरतीति शङ्गरः ।

**[शंवरः]** शम् 'वृगट् वरणे' (१२९४) वृ । 'वृगश् वरणे' (१५२३) वृ । शं-सुखं वृणोति-वृणाति वा । अनेन अप्र० ।

**[शंवदः]** शम् 'वद व्यक्तायां वाचि' (९९८) वद् । शं-सुखं वदतीति शंवदः । अनेन अप्र० ।

**[स्वः पश्य]** स्वर् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । पश्येति क्रिया अत्र च केचिदव्ययानां कर्मत्वं न मन्यन्ते, तन्मतमाक्षिप्याह-'स्वः पश्येत्यादिष्वव्ययानां कर्मत्वदर्शनात् शमि कर्मणि हेत्वादिष्वपि परत्वात् कृगष्टो अनेन अकारेण बाध्यते' ।

**[शङ्करा नाम परिव्राजिका]** शं-सुखं करोतीति शङ्करा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[शङ्करा नाम शकुनिका तच्छीला च]** शं-सुखं करोतीति शङ्करा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । अथवा शं-सुखं करोतीत्येवंशीला सा = शङ्करा ।

**[शङ्करी जिनदीक्षा]** शं करोतीति शङ्करी । 'हेतु-तच्छीला-ऽनुकूलेऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्' (५।१।१०३) टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक्, जिनदीक्षा ॥छा॥

## पार्श्वाऽऽदिभ्यः शीङः ॥ ५।१।१३५ ॥

**[पार्श्वाऽऽदिभ्यः]** पार्श्व आदिर्येषां ते = पार्श्वाऽऽदयः, तेभ्यः = पार्श्वाऽऽदिभ्यः । पञ्चमी भ्यस् ।

**[पार्श्वशयः]** पार्श्व 'शीङ्क् स्वप्ने' (११०५) शी । पार्श्वाभ्यां शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[पृष्ठशयः]** पृष्ठ-शी । पृष्ठेन शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[उदरशयः]** उदर-शी । उदरेण शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[दिग्धसहशयः]** दिग्धेन सह शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**विषसंसक्तकाण्डः दिग्ध उच्यते ।**

अनाधारार्थ आरम्भः ॥छा॥

---

卐 श० म० न्या० - शं गृणातीति ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

## ऊर्ध्वादिभ्यः कर्तुः ॥ ५।१।१३६ ॥

**[ऊर्ध्वादिभ्यः]** ऊर्ध्व आदिर्येषां ते = ऊर्ध्वादयः, तेभ्यः = ऊर्ध्वादिभ्यः । पञ्चमी भ्यस् ।

**[कर्तुः]** कर्तृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

ननु कर्तृशब्दात् बहुवचनं प्राप्नोति ऊर्ध्वादिविशेषणत्वात्, सत्यम् - सामान्यमिदमित्येकवचनं यथा पञ्चादौ घुट्, अथवा प्रत्येकमूर्ध्वादीनां विशेषणं, न समुदायस्य ।

**[ऊर्ध्वशयः]** ऊर्ध्व 'शीङ्क् स्वप्ने' (११०५) शी । ऊर्ध्वः शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[उत्तानशयः]** उत्तानः शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[अवमूर्धशयः]** अवमूर्धः(र्धा) शेते । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

बहुवचनं प्रयोगानुसरणार्थम् ॥छ॥

## आधारात् ॥ ५।१।१३७ ॥

**[आधारात्]** आधार पञ्चमी ङसि ।

**[खशयः]** खे शेते = खशयः ।

卐**[गर्त्ताशयः]** गर्त्तायां शेते = गर्त्ताशयः ।

**[गुहाशयः]** गुहायां शेते = गुहाशयः ।

**[हृच्छयः]** हृदि शेते = हृच्छयः । 'शय-वासि-वासेष्वकालात्' (३।२।२५) इति सप्तम्याः लोपे विकल्पेन प्राप्ते बाहुलकान्नित्यं लुप् ।

**[बिलेशयः]** बिले शेते = बिलेशयः ।

**[मनसिशयः]** मनसि शेते = मनसिशयः ।

**[कुशेशयः]** कुशे शेते = कुशेशयः । एतेषु बाहुलकात् सप्तम्या नित्यमलुप् ।

**[गिरिशः]** गिरि मांडणीयइ । गिरिरस्याऽस्ति गिरिशः । 'लोम-पिच्छादेः शेलम्' (७।२।२८) शप्र० । ईश्वर इति संज्ञायाम् ।

क्रियार्थत्वे तु- **[गिरिशयः]** गिरौ शेते = गिरिशयः । अनेन अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

---

卐 बृहद्वृत्तौ - गर्तशयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चरेष्टः** ॥ ५।१।१३८ ॥

[**चरेः**] चरि पञ्चमी ङसि ।

[**टः**] ट प्रथमा सि ।

[**कुरुचरः**] कुरु 'चर भक्षणे च' (४१०) चर् । कुरुषु चरति = कुरुचरः । अनेन टप्र० → अ । बाहुलकात् अलुप् न भवति ।

[**मद्रचरः**] मद्र 'चर भक्षणे च' (४१०) चर् । मद्रेषु चरति = मद्रचरः । अनेन टप्र० → अ । बाहुलकात् अलुप् न भवति ।

[**वनेचरः**] वने चरति = वनेचरः ।

[**निशाचरः**] निशायां चरति = निशाचरः ।

**टकारो ङ्यर्थः**-

[**कुरुचरी**] कुरुषु चरतीति । अनेन टप्र० → अ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

[**मद्रचरी**] मद्रेषु चरतीति । अनेन टप्र० → अ । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**भिक्षा-सेना-ऽऽदायात्** ॥ ५।१।१३९ ॥

[**भिक्षासेनाऽऽदायात्**] भिक्षा च सेना च आदायश्च = भिक्षासेनाऽऽदायम्, तस्मात् ।

**अनाधारार्थ आरम्भः** ।

[**भिक्षाचरः, भिक्षाचरी**] भिक्षां चरतीति भिक्षाचरः । अन्यत्र 'अणञेयेकण्०' (२।४।२०) ङी ।

[**सेनाचरः**] सेनां चरति-परीक्षते = सेनाचरस्तापसव्यञ्जनः, सेनया वा चरति । अनेन टप्र० → अ ।

[**आदायचरः**] आदाय-गृहीत्वा चरति = आदायचरः । अनेन टप्र० → अ । आदायं(नं) कृत्वा चरतीत्यर्थः, किमादायेत्यविवक्षैव ॥छा॥

**पुरो-ऽग्रतो-ऽग्रेः सर्तेः** ॥ ५।१।१४० ॥

[**पुरोऽग्रतोऽग्रेः**] पुरश्च अग्रतश्च अग्रश्च(अग्रे च) = तत्, तस्मात् ।

[**सर्तेः**] सर्ति पञ्चमी ङसि ।

[**पुरःसरः, पुरःसरी**] पुरस् 'सृं गतौ' (२५) सृ । पुरः सरतीति पुरःसरः । अन्यत्र 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

[**अग्रतःसरः**] अग्र । अग्रेऽग्रतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । अग्रतः सरतीति अग्रतःसरः । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अग्रेसरः]** अग्रे सरतीति अग्रेसरः । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अत्र सप्तम्यलुप् । एकारान्तमव्ययं वा । सूत्रनिपातनाद् वैकारः । तत्राग्रं सरति-अग्रेण वा सरति = अग्रेसरः । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छा।

## पूर्वात् कर्तुः ॥ ५।१।१४१ ॥

**[पूर्वात्]** पूर्व पञ्चमी ङसि ।

**[कर्तुः]** कर्तृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[पूर्वसरः]** पूर्व 'सृं गतौ' (२५) सृ । पूर्वः सरति = पूर्वसरः । अनेन टप्र० → अ । 'नामिना गुणोऽक्ङिति' (४।३।१) गु० अर् । पूर्वो भूत्वा सरतीत्यर्थः । कस्मात् पूर्वे(र्व) इति अविवक्षैव ।

**[पूर्वसरी]** पूर्वः सरति । अनेन टप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[पूर्वसारः]** पूर्वं देशं सरति = पूर्वसारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।।छा।

## स्था-पा-स्ना-त्रः कः ॥ ५।१।१४२ ॥

**[स्थापास्नात्रः]** स्थाश्च पाश्च स्नाश्च त्राश्च = तत्, तस्मात् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[कः]** क प्रथमा सि ।

**[समस्थः]** सम 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० सं० वक्ष०(१)/सूत्र(२९)) स्था । समे तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[विषमस्थः]** विषमे तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[कूटस्थः]** कूट-स्था । कूटे तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[कपित्थः]** कपि-स्था । 卐कपौ तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'पृषोदरादयः' (३।२।१५५) सस्य तकारः ।

**[दधित्थः]** दधि-स्था । दधि(ध्नि) तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'पृषोदरादयः' (३।२।१५५) सस्य तकारः ।

**[महित्थः]** +मही-स्था । मह्यां तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'पृषोदरादयः' (३।२।१५५) सस्य तकारः । 'ङ्यापो बहुलं नाम्नि' (२।४।९९) ह्रस्वः ।

**[अश्वत्थः]** अश्वेषु तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'पृषोदरादयः' (३।२।१५५) सस्य तकारः ।

---

卐 श० म० न्या० - कपयोऽस्मिन् तिष्ठन्ति । कपिरिव तिष्ठति । श० महो०-कपिस्तिष्ठत्यत्र ।

\+ श० म० न्या० - इकारान्तो महिशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कुलत्थः ]** *कुले तिष्ठति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । 'पृषोदरादयः' (३।२।१५५) सस्य तकारः ।

**[ द्विपः ]** द्वाभ्यां पिबति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ पादपः ]** पादैः पिबतीति पादपः । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ कच्छपः ]** 'पां पाने' (२) पा । कच्छेन पिबति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ अनेकपः ]** 卐卐अनेकैर्बहुभिर्वारै(:) पिबति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ नदीष्णः ]** 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । नद्यां स्नाति = नदीष्णः । नि-नद्याः स्नातेः कौशले (२।३।२०) इति षत्वम् ।

**[ आतपत्रम् ]** आतप देंङ् (६०४) - त्रैंङ् पालने' (६०५) त्रै । 'आत् सन्ध्यक्षरस्य' (४।२।१) त्रा । आतपात् त्रायते । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ घर्मत्रम् ]** घर्मात् त्रायते = घर्मत्रम् । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

परत्वादयं 'शमो नाम्न्यः' (५।१।१३४) इत्यप्रत्ययं बाधते-

**[ शंस्थो नाम कश्चित् ]** शं तिष्ठतीति शंस्थः । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ शंस्थाः ]** शं तिष्ठतीति शंस्थाः । असरूपत्वात् 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ॥छ॥

**शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजपं प्रिया-ऽलस-हस्ति-सूचके** ॥ ५।१।१४३ ॥

**[ शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपम् ]** शोकापनुदश्च तुन्दपरिमृजश्च स्तम्बेरमश्च कर्णेजपश्च = शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपम् ।

**[ प्रियाऽलसहस्तिसूचके ]** प्रियश्च अलसश्च हस्ती च सूचकश्च = प्रियाऽलसहस्तिसूचकम्, तस्मिन् ।

**[ शोकापनुदः प्रियः ]** शोक 'णुदंत् प्रेरणे' (१३७०) णुद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नुद्, अपपूर्व० । शोकमपनुदति = शोकापनुदः । अनेन कप्र० → अ, प्रियः । पुत्रादिरानन्दकर एव उच्यते । यद्वा अन्नपानवस्त्रादिविषयसंपादनेन आत्माङ्गसङ्गनेन वा यः सुखमुत्पादयति स शोकम(काप)नुद उच्यते ।

**[ तुन्दपरिमृजोऽलसः ]** 'तुदींत् व्यथने' (१३१५) तुद् । 卐 तुदति-आत्मानं पीडयतीति तुन्दम् । 'मृजौक् शुद्धौ' (१०९७) मृज्, परिपूर्व० । तुन्दमुदरं परिमार्ष्टि = तुन्दपरिमृजः । अनेन कप्र० ।

**[ स्तम्बेरमो हस्ती ]** 'स्तम्भू स्तम्भे' इति सौत्रो धातुः । स्तम्भते(?) (स्तभ्नाति) । 'तुम्ब-स्तम्बादयः' (उपा० ३२०) निपातः । सप्तमी ङि । 'रमिं क्रीडायाम्' (९८९) रम् । स्तम्बे रमते । अनेन कप्र० → अ, हस्ती ।

**[ कर्णेजपः सूचकः ]** कर्णे 'जप मानसे च' (३३८) जप् । कर्णे जपति = कर्णेजपः । अनेन कप्र० → अ, सूचकः ।

---

* श० महो०-कुलं भूलग्नं सत् तिष्ठति ।   卐卐 श० म० न्या० - न एकेन पिबति ।

卐 अभिधानचिन्तामणिनाममालायाम् - तूयते-पूर्यते = तुन्दम् । 'वृ-तु-कु-सुभ्यो नोऽन्तश्च' (उणा० २४०) दप्र० - नकारश्चान्तादेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ शोकापनोदो धर्माचार्यः ]** शोकमपनुदति = शोकापनोदः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । धर्मोपदेशक आचार्यः = धर्माचार्यः । शाकपार्थिवादिदर्शनात् मध्यमपदलोपी समासः । धर्माचार्य प्रथमा सि ।

**[ तुन्दपरिमार्ज आतुरः ]** तुन्दं परिमार्ष्टि । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'मृजोऽस्य वृद्धिः' (४।३।४२) वृ० आ, आतुरः ।

**[ स्तम्बेरन्ता पक्षी ]** स्तम्बे रमते । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न०, पक्षी ।

**[ कर्णेजपिता मन्त्री ]** कर्णे जपति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः, मन्त्री ॥छा॥

## मूलविभुजादयः ॥ ५।१।१४४ ॥

**[ मूलविभुजादयः ]** मूलविभुज आदिर्येषां ते = मूलविभुजादयः ।

**[ मूलविभुजो रथः ]** मूल 'भुजोंत् कौटिल्ये' (१३५१) भुज् । मूलानि विभुजति । अनेन कप्र० → अ, रथः ।

**[ उर्वीरुहो वृक्षः ]** 'रुहं जन्मनि' (९८८) रुह् । उर्व्यां रोहति = उर्वीरुहः । अनेन कप्र० → अ । 'ङस्युक्तं कृता' (३।१।४९) इति समासार्थमत्र पाठोऽन्यथा 'नाम्युपा०' (५।१।५४) इति सिध्यति, एवं **धर्मप्रद** इत्यत्रापि । अत्र हि 'उपसर्गादातो डोऽश्यः' (५।१।५६) इति डे समासो न स्यात्, वृक्षः ।

**[ कुमुदं कैरवम् ]** कु 'मुदि हर्षे' (७२६) मुद् । कौ-पृथिव्यां मोदते = कुमुदं कैरवम् । अनेन कप्र० → अ ।

**[ महीध्रः शैलः ]** मही 'धृंग् धारणे' (८८७) धृ । महीं धरति = महीध्रः । अनेन कप्र० → अ, रत्वं च निपातः ।

**[ सरसिरुहं पद्मम् ]** सरस् सप्तमी ङि । 'रुहं जन्मनि' (९८८) रुह् । सरसि रोहतीति सरसिरुहम् । अनेन कप्र० → अ, पद्मम् ।

**[ नखमुचानि धनूंषि ]** नख 'मुच्लृंती मोक्षणे' (१३२०) मुच् । नखानि मुञ्चन्ति = नखमुचानि । अनेन कप्र० → अ । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । धनुस् प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[ काकगुहास्तिलाः ]** काक 'गुहौग् संवरणे' (९३५) गुह् । काकेभ्यो गूहनीयाः = काकगुहाः । अनेन कप्र० → अ । प्रथमा जस् । तिल प्रथमा जस् ।

**[ धर्मप्रदः ]** धर्म 'डुदांग्क् दाने' (११३८) दा, प्रपूर्व० । धर्माय प्रददाति । अनेन कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[ कामप्रदः ]** काम 'डुदांग्क् दाने' (११३८) दा, प्रपूर्व० । कामाय प्रददाति = कामप्रदः । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

卐**[ स्वर्गप्रदः ]** स्वर्गाय प्रददाति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ शास्त्रप्रज्ञः ]** शास्त्र 'ज्ञांश् अवबोधने' (१५४०) ज्ञा, प्रपूर्व० । 卐卐शास्त्रं प्रजानातीति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ।

**[ आगमप्रज्ञः ]** आगम 'ज्ञांश् अवबोधने' (१५४०) ज्ञा, प्रपूर्व० । +आगमं प्रजानातीति । अनेन कप्र० → अ । 'इडेत्-पुसि०' (४।३।९४) आलुक् ॥छ॥

**दुहेर्डुघः** ॥ ५।१।१४५ ॥

**[ दुहेः ]** दुहि पञ्चमी ङसि ।

**[ डुघः ]** डुघ प्रथमा सि ।

**[ कामदुघा ]** काम 'दुहींक् क्षरणे' (११२७) दुह् । कामान् दुग्धे-पूरयति = कामदुघा । अनेन डुघप्र० → उघ । 'डित्यन्त्यस्वरादेः' (२।१।११४) उह्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ घर्मदुघा ]** घमार्य दुग्धे = घर्मदुघा । शेषं पूर्ववत् ।

**[ कामधुक् ]** कामान् दुग्धे-पूरयति । असरूपत्वात् 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये' (२।१।७७) दु० → धु० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

डकारोन्त्यस्वरादिलोपार्थः ॥छ॥

**भजो विण्** ॥ ५।१।१४६ ॥

**[ भजः ]** भज् पञ्चमी ङसि ।

**[ विण् ]** विण् प्रथमा सि ।

**[ अर्धभाक् ]** अर्ध 'भजीं सेवायाम्' (८९५) भज् । अर्धं भजते ।

**[ पादभाक् ]** पादं भजते ।

**[ दूरभाक् ]** दूरं भजते ।

**[ प्रभाक् ]** प्रकर्षेण भजते ।

**[ विभाक् ]** विशेषेण भजते ।

सर्वत्र अनेन विण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अप्रयोगीत्' (१।१।३७) विण्लोपः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

णकारो वृद्ध्यर्थः, इकार उच्चारणार्थः, वकारो विण्-क्विपोः सारूप्यार्थस्तेनात्र विषये क्विप् न भवति ॥छ॥

---

卐 बृहद्वृत्तौ - शब्दप्रदः । 卐卐 श० म० न्या० - शास्त्रेण । + श० म० न्या० - आगमेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## मन्-वन्-क्वनिप्-विच् क्वचित् ॥ ५।१।१४७ ॥

**[मन्वन्क्वनिप्विच्]** मन् च वन् च क्वनिप् च विच्च = मन्वन्क्वनिप्विच् ।

**[क्वचित्]** क्वचित् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[इन्द्रशर्मा]** इन्द्र कृ (१५२९) - मृ (१५३०) - 'शृश् हिंसायाम्' (१५३१) शृ । इन्द्रं शृणाति । अनेन मन्प्र० । नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[सुशर्मा]** सुष्ठु शृणाति = सुशर्मा । अनेन मन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । नि दीर्घः' (१।४।८५) दीर्घः । दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

卐**[सुतर्मा]** 'तॄ प्लवन-तरणयोः' (२७) तॄ, सुपूर्व० । सुष्ठु तरति । अनेन मन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । शेषं पूर्ववत् ।

**[सुदामा]** 'डुदांग्क् दाने' (११३८) दा, सुपूर्व० । सुष्ठु ददाति । अनेन मन्प्र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[अश्वत्थामा]** अश्व 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्ष० (१) सूत्र (२९)) स्था । अश्वे (अश्व इव) तिष्ठतीति । अनेन मन्प्र० । 'पृषोदरादयः' (३।२।१५५) स० → त० ।

क्वचिद्ग्रहणात् केवलादपि-

**[शर्म]** 卐卐शृणातीति । अनेन मन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[वर्म]** 'वृग्श् वरणे' (१५२३) वृ । वृणातीति । अनेन मन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[भूरिदावा]** भूरि-प्रचुरं ददाति । अनेन वन्प्र० ।

**[घृतपावा]** घृत 'पां पाने' (२) पा । घृतं पिबति । अनेन वन्प्र० ।

**[अग्रेगावा]** अग्रे कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । +अग्रे गायति । अनेन वन्प्र० ।

**[विजावा]** वि 'जनैचि प्रादुर्भावे' (१२६५) जन् । विजायते । अनेन वन्प्र० । 'वन्याङ् पञ्चमस्य' (४।२।६५) न० → आत्वम्० ।

**[सुधीवा]** सुष्ठु दधाति । अनेन क्वनिप्प्र० → वन् । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

**[सुपीवा]** सुष्ठु अतिशयेन पिबतीति । अनेन क्वनिप्प्र० → वन् । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

केवलादपि-

**[कृत्वा]** करोतीति । अनेन क्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

---

卐 बृहद्वृत्तौ - सुवर्मा । 卐卐 श० म० न्या० - शृणो(णा)ति दुःखमिति । + श० म० न्या० - अग्रे गच्छतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कृत्वानौ ]** कुरुत इति । अनेन क्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ धीवा ]** दधातीति धीवा । अनेन क्वनिप्प्र० → वन् । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ पीवा ]** पिबतीति पीवा । अनेन क्वनिप्प्र० → वन् । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ कीलालपाः ]** कीलालं-मद्यं पिबति । अनेन विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ शुभंयाः ]** शुभ 'यांक् प्रापणे' (१०६२) या । शुभं याति । अनेन विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ पाप्मरेट् ]** पाप्मन् रुशं (१४१३) - 卐'रिशंत् हिंसायाम्' (१४१४) रिश् । पाप्मानं रिशति । अनेन विच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० । केवलादपि-

**[ रेट् ]** रिशति । अनेन विच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ रोट् ]** 卐卐रोशति (?) । अनेन विच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ वेट् ]** +'विशंत् प्रवेशने' (१४१५) विश् । विशति । अनेन विच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ जागः ]** 'जागृक् निद्राक्षये' (१०९३) जागृ । जागर्त्तीति । अनेन विच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अप्रयोगीत्' (१।१।३७) विच्लोपः ।

ककार-पकारौ कित्-पित्कार्यार्थौ ॥छ॥

## **क्विप्** ॥ ५।१।१४८ ॥

**[ क्विप् ]** क्विप् प्रथमा सि ।

**[ उखास्रत् ]** 'स्रंसूङ् प्रमादे' (८४४) स्रंस्, उखापूर्व० । उखेन उखया वा स्रंसते । अनेन क्विपप्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) इत्यादिना सस्य द० । 'विरामे वा' (१।३।५१) त० । यु(पू)ते वर्त्तमान उखशब्दः पुं-स्त्री, स्थाल्यां नित्यं स्त्री, वैयाकरणानां मते ।

---

卐 श० म० न्या० - 'रिष हिंसायाम्' (५१५) रिष् । पाप्मानं रेषति ।

卐卐 श० म० न्या० - 'रुष हिंसायाम्' (५१४) रुष् । रोषति ।

\+ श० म० न्या० - 'विषू सेचने' (५२३) विष् । वेषति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वहाभ्रट् ]** वह 'भ्रंशूच् उधःपतने' (१२०५) भ्रंश् । वहात् भ्रश्यति = वहाभ्रट् । अनेन क्विप्प्र० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति बहुलग्रहणात् उख-वहयोर्दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्व-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ पर्णध्वत् ]** पर्ण 'ध्वंसूङ् गतौ च' (९५४) ध्वंस् । पर्णानि ध्वंसते । अनेन क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) स० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[ शकहूः ]** शक 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । शकान् ह्वयति = शकहूः । अनेन क्विप्प्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ परिवीः ]** परि 'व्येंग् संवरणे' (९९३) व्ये । 'आत् सन्ध्यक्षरस्य' (४।२।१) व्या । परिव्ययति = परिवीः । अनेन क्विप्प्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् इ० । 'दीर्घमवोऽन्त्यम्' (४।१।१०३) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ यवलूः ]** यव 'लूग्श् छेदने' (१५१९) लू । यवान् लुनातीति यवलूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ खलपूः ]** खल 'पूग्श् पवने' (१५१८) पू । खलं पुनातीति खलपूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ अक्षद्यूः ]** अक्ष 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । 卐अक्षान् दीव्यतीति अक्षद्यूः । 'अनेन क्विप्प्र० । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) वस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ मित्रभूः ]** मित्र 'भू सत्तायाम्' (१) भू । मित्रं भवतीति मित्रभूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ प्रतिभूः ]** प्रति भवतीति प्रतिभूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ कटचिकीः ]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति = चिकीर्षति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) किर्द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । कटं चिकीर्षतीति कटचिकीः । अनेन क्विप्प्र० । 'अतः' (४।३।८२) अलोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) + षलुक् । 'पदान्ते' (२।१।६४) दीर्घः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

केवलादपि-

**[ पाः ]** 'पां पाने' (२) पा । पिबतीति पाः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) इत्यत्र साक्षाद् व्यञ्जनग्रहणात् क्विप्लोपे ईत्त्वं न भवति ।

---

卐 श० म० न्या० - अक्षैर्दीव्यतीति । + श० म० न्या० - षस्यासत्त्वेन सत्वे तस्य रुत्वे विसर्गे च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वाः ]** 'वांक् गति-गन्धनयोः' (१०६३) वा । वातीति वाः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ कीः ]** 'कृत् विक्षेपे' (१३३४) कृ । किरतीति कीः । अनेन क्विप्प्र० । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ गीः ]** 'गृत् निगरणे' (१३३५) गृ । गिरतीति गीः । अनेन क्विप्प्र० । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ ऊः ]** 'अव रक्षण-गति-कान्ति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्या-ऽऽलिङ्गन-हिंसा-दहन-भाव-वृद्धिषु' (४८९) अव् । अवतीति ऊः । अनेन क्विप्प्र० । 'मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन' (४।१।१०९) उपान्त्येन सह वकारस्य ऊट् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ लूः ]** 'लूग्श् छेदने' (१५१९) लू । लुनातीति लूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ क्रुङ् ]** 'क्रुञ्च गतौ' (१०१) क्रुञ्च् । क्रुञ्चतीति क्रुङ् । अनेन क्विप्प्र० । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) चलुक् । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[ पक् ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति पक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ दिविषत् ]** दिवि 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । दिवि सीदतीति दिविषत् । अत्र सप्तम्या अलुप् वाक्यम् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'भीरुष्ठानादयः' (२।३।३३) षत्वम् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ द्युसत् ]** 卐द्यौः सीदति = द्युसत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ अन्तरिक्षसत् ]** +अन्तरिक्षं सीदति = अन्तरिक्षसत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ सभासत् ]** 卐卐सभां सीदति = सभासत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ प्रसत् ]** प्रसीदति = प्रसत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । शेषं पूर्ववत् ।

**[ उपसत् ]** उपसीदति = उपसत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । शेषं पूर्ववत् ।

---

卐 श० महोदधौ, श० म० न्या० - दिवि सीदतीति ।

\+ श० म० न्या० - अन्तरिक्षे सीदतीति ।

卐卐 श० महोदधौ, श० म० न्या० - सभायां सीदतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अण्डसूः]** अण्ड 'षूङौक् प्राणिगर्भविमोचने' (११०७) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू । अण्डं सूते = अण्डसूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[शतसूः]** शतं सूते = शतसूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[प्रसूः]** प्रकर्षेण सूते = प्रसूः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[मित्रद्विट्]** मित्र 'द्विषींक् अप्रीतौ' (११२६) द्विष् । मित्रं द्वेष्टि = मित्रद्विट् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[प्रद्विट् द्विषो जेघ्नीयिषीष्ट वः]** प्रकर्षेण द्वेष्टीति प्रद्विट् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

'हनंक् हिंसा-गत्योः' (११००) हन् । अत्यर्थं वध्यात् । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'हनो घ्नीर्वधे' (४।३।९९) "घ्नी" आदेशः । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । आशीः सीष्ट । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलुक् ।

**[मित्रध्रुक्]** मित्र 'द्रुहौच् जिघांसायाम्' (१२३९) द्रुह् । मित्राय द्रुह्यति = मित्रध्रुक् ।

**[प्रध्रुक्]** प्रकर्षेण द्रुह्यति = प्रध्रुक् ।

**[विध्रुक्]** विशेषेण द्रुह्यति = विध्रुक् ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'मुह-द्रुह-स्नुह-स्निहो वा' (२।१।८४) ह० → घ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैकस्वरस्याऽऽदेश्चतुर्थः स्ध्वोश्च प्रत्यये' (२।१।७७) द्रु० → ध्रु० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[गोधुक्]** गो 'दुहींक् क्षरणे' (११२७) दुह् । गां दोग्धि = गोधुक् ।

**[कामधुक्]** कामं दोग्धि = कामधुक् ।

**[प्रधुक्]** प्रकर्षेण दोग्धि = प्रधुक् ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'ग-ड-द-बादेश्चतुर्थान्तस्यैक०' (२।१।७७) द्रु० → ध्रु० । 'धुटस्तृतीयः' (२।१।७६) घ० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[अश्वयुक्]** अश्व 'युजृंपी योगे' (१४७६) युज् । 'युजिच् समाधौ' (१२५४) युज् । अश्वं युनक्ति-युज्यते वा = अश्वयुक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रयुक्]** प्रकर्षेण युनक्ति-युज्यते वा = प्रयुक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[युङ्]** युनक्तीति युङ् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'युजोऽसमासे' (१।४।७१) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) जलुक् । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

**[युञ्जौ]** युङ्क्त इति युञ्जौ । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । 'युञ्जोऽसमासे' (१।४।७१) नोऽन्तः ।

**[युञ्जः]** युञ्जन्तीति युञ्जः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'युञ्जोऽसमासे' (१।४।७१) नोऽन्तः ।

**[तत्त्ववित्]** तत्त्वं विन्ते = तत्त्ववित् ।

**[वेदवित्]** वेदान् वेत्तीति वेदवित् ।

**[प्रवित्]** प्रकर्षेण विन्ते = प्रवित् ।

**[काष्ठभित्]** काष्ठ 'भिदृंपी विदारणे' (१४७७) भिद् । काष्ठं भिनत्तीति काष्ठभित् ।

**[बलभित्]** बलं भिनत्तीति बलभित् ।

**[गोत्रभित्]** गोत्रं भिनत्तीति गोत्रभित् ।

卐**[प्रभित्]** प्रकर्षेण भिनत्तीति प्रभित् ।

**[भित्]** भिनत्तीति भित् ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[रज्जुच्छित्]** रज्जु 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । रज्जुं छिनत्तीति ।

**[तमश्छित्]** तमः छिनत्तीति ।

**[भवच्छित्]** भवं छिनत्तीति ।

**[प्रच्छित्]** प्रकर्षेण छिनत्तीति ।

**[छित्]** छिनत्तीति छित् ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[शत्रुजित्]** शत्रु 'जिं अभिभवे' (८) जि । शत्रुं जयतीति शत्रुजित् ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रसेनजित् ]** प्रसेनं जयतीति प्रसेनजित् ।

**[ कर्मजित् ]** कर्माणि जयतीति कर्मजित् ।

**[ प्रजित् ]** प्रकर्षेण जयतीति प्रजित् ।

**[ अभिजित् ]** अभिजयतीति अभिजित् ।

सर्वत्र अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ सेनानीः ]** सेना 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी । सेनां नयतीति सेनानीः ।

**[ अग्रणीः ]** अग्रं नयतीति अग्रणीः । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० ।

**[ ग्रामणीः ]** ग्रामं नयतीति ग्रामणीः । 'ग्रामाऽग्रान्नियः' (२।३।७१) न० → ण० ।

**[ प्रणीः ]** प्रकर्षेण नयतीति प्रणीः । 'अदुरुपसर्गान्तरो०' (२।३।७७) न० → ण० ।

**[ नीः ]** नयतीति नीः ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ नियौ ]** नयत इति नियौ । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ । 'धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२।१।५०) इय् ।

**[ नियः ]** नयन्तीति नियः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) इय् ।

**[ विश्वाराट् ]** विश्व 'राजृग् दीप्तौ' (८९३) राज् । विश्वस्मिन् राजते = विश्वाराट् । 'अनेन क्विप्प्र० । 'वसु-राटोः' (३।२।८१) विश्वस्य दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ राजराट् ]** राजसु राजते । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ सम्राट् ]** सम्राजते = सम्राट् । अनेन क्विप्प्र० । 'सम्राट्' (१।३।१६) इत्यनेन अनुस्वाराभावो निपात्यते । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'यज-सृज-मृज-राज०' (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ विराट् ]** विशेषेण राजते = विराट् । अनेन क्विप्प्र० । शेषं पूर्ववत् ।

**[ राट् ]** राजते = राट् । अनेन क्विप्प्र० । शेषं पूर्ववत् ।

**[ दध्यङ् ]** दधि 'अञ्चू गतौ च' (१०५) अञ्च् । दध्यञ्चतीति दध्यङ् । अनेन क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) चलोपः । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[देवद्र्यङ्]** देवमञ्चतीति देवद्र्यङ् । अनेन क्विप्प्र० । सर्वादि-विष्वग्-देवाड्डद्रिः क्व्यञ्चौ (३।२।१२२) "डद्रि"आगमु → अद्रि० । 'डित्यन्त्य०' (२।१।११४) अलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'अचः' (१।४।६९) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) चलुक् । 'युजञ्च-क्रुञ्चो नो ङः' (२।१।७१) न० → ङ० ।

卐**[अदद्र्यङ्]** अदस् । अमुमञ्चतीति अदद्र्यङ् । अनेन क्विप्प्र० । सर्वादि-विष्वग्-देवाड्डद्रिः क्व्यञ्चौ (३।२।१२२) "डद्रि"आगमु → अद्रि० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अस्लुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । शेषं पूर्ववत् ।

**[तिर्यङ्]** तिरस् 'अञ्चू गतौ च' (१०५) अञ्च् । तिरोऽञ्चतीति तिर्यङ् । अनेन क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'तिरसस्तिर्यति' (३।२।१२४) तिरस्० → "तिरि" आदेशः । शेषं पूर्ववत् ।

**[सध्र्यङ्]** सहाऽञ्चतीति सध्र्यङ् । अनेन क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'सह-समः सध्रि०' (३।२।१२३) "सध्रि" आदेशः । शेषं पूर्ववत् ।

**[सम्यङ्]** समञ्चतीति सम्यङ् । अनेन क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'सह-समः सध्रि०' (३।२।१२३) "समि" आदेशः । शेषं पूर्ववत् ।

**[प्राङ्]** प्राञ्चतीति प्राङ् । अनेन क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । शेषं पूर्ववत् ।

**[प्रत्यङ्]** प्रत्यञ्चतीति प्रत्यङ् । अनेन क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । शेषं पूर्ववत् ।

**[ऋत्विग् याजकः]** ऋतु 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । ऋतुं-ऋतवे-ऋतुप्रयोजनो वा यजते = ऋत्विग् याजकः । अनेन क्विप्प्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् यस्य इ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः' (२।१।६९) ज० → ग० ।

**[दधृक् प्रगल्भः]** 'ञिधृषाट् प्रागल्भ्ये' (१३१२), धृष् । धृष्णोतीति । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ऋत्विज्-दिश्०' (२।१।६९) इत्यादिना द्विर्वचनं-षस्य कत्वं च । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० ।

**[उष्णिक् छन्दः]** उत् 'ष्णिहौच् प्रीतौ' (१२४१) ष्णिह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्निह् । 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह्, उत्पूर्व० । उत्स्निह्यति-उन्नह्यति वा = उष्णिक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'ऋत्विज्-दिश्-दृश्०' (२।१।६९) इत्यादिना निपात्यते । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक्, छन्दः ।

**[दिक्]** 'दिशींत् अतिसर्जने' (१३१८) दिश् । दिश्यते = दिक् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'ऋत्विज्-दिश्०' (२।१।६९) इत्यादिना श० → ग० ।

**[स्रक्]** 'सृजीं(जं)त् विसर्गे (१३४९) सृज् । सृज्यते = स्रक् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारागमः । 'इवर्णादेरस्वे०'

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१।२।२१) रत्वम् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्०' (२।१।६९) ज० → ग० । ककारः कित्कार्यार्थः । पकारः पित्कार्यार्थः । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्त आगच्छति, क्विप् विद्यमाने सति एकमेतत्कार्यम्, द्वितीयं तु 'नामिनो०' (४।३।१) गुणो न, 'अः सृजि-दृशोऽकिति' (४।४।१११) इत्यादिना अकारागमो न भवति, तृतीयं तु 'अञ्चोऽनर्चायाम्' (४।२।४६) इत्यादिना नलुक् भवति । अन्यान्यपि कार्याणि भविष्यन्ति ॥छ॥

## स्पृशोऽनुदकात् ॥ ५।१।१४९ ॥

**[ स्पृशः ]** स्पृश् पञ्चमी ङसि ।

**[ अनुदकात् ]** न उदकं = अनुदकम्, तस्मात् ।

**[ घृतस्पृक् ]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । घृतं स्पृशतीति घृतस्पृक् ।

**[ मर्मस्पृक् ]** मर्माणि स्पृशतीति मर्मस्पृक् ।

**[ व्योमस्पृक् ]** व्योम स्पृशतीति व्योमस्पृक् ।

**[ मन्त्रस्पृक् ]** मन्त्रेण स्पृशतीति मन्त्रस्पृक् ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'ऋत्विज्-दिश्-दृश्-स्पृश्०' (२।१।६९) श० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[ उदकस्पर्शः ]** उदकं स्पृशति = उदकस्पर्शः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ उदकेन स्पर्ष्टा ]** स्पृश् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । यज-सृज-मृज-राज-भ्राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

अनुदक इति प्रर्युदासाश्रयणादुदकसदृशमनुपसर्गं नाम गृह्यते, तेनेह न याति **उपस्पृशति** वाक्यमेतत्स्थितं, न तु प्रत्यय इति भावार्थः ॥छ॥

## अदोऽनन्नात् ॥ ५।१।१५० ॥

**[ अदः ]** अद् पञ्चमी ङसि ।

**[ अनन्नात् ]** न अन्नम् = अनन्नम्, तस्मात् ।

**[ आमात् ]** आम 'अदं भक्षणे' (१०५९) अद् । आममत्ति = आमात् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ सस्यात् ]** सस्यमत्ति - भक्षयति = सस्यात् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ अन्नादः ]** अन्नमत्ति = अन्नादः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

अन्नशब्दो अन्नार्थो गृह्यते, बहुलाधिकारात्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कणादः ]** कणान्यत्तीति कणादः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ पिप्पलादः ]** पिप्पलान्यतीति पिप्पलादः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।।छा।

## क्रव्यात्-क्रव्यादाम-पक्वादौ ।। ५।१।१५१ ।।

**[ क्रव्यात्क्रव्यादौ ]** क्रव्याच्च क्रव्यादश्च = क्रव्यात्क्रव्यादौ ।

**[ आमपक्वादौ ]** आमं च पक्वं च = आमपक्वे, आमपक्वे अत्तः - भक्षयतः = आमपक्वादौ । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः, ततः प्रथमाद्विवचनं औ ।

**[ क्रव्यात् आममांसभक्षः ]** क्रव्यमत्ति = क्रव्यात् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । आममांसं भक्षयतीति आममांसभक्षः । 'शीलि-कामि-भक्ष्याचरीक्षि-क्षमो णः' (५।१।७३) णप्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[ क्रव्यादः पक्वमांसभक्षः ]** क्रव्यमत्तीति क्रव्यादः । अनेन निपातनात् अण्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पक्वमांसभक्ष इत्यर्थः । आममांसवाच्यपि क्रव्यशब्दः क्रव्याद इति निपातनसामर्थ्यात् वृत्तौ पक्वमांसे वर्त्तते ।।छा।

## त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशः टक्-सकौ च ।। ५।१।१५२ ।।

**[ त्यदाद्यन्यसमानात् ]** त्यदादिश्च अन्यश्च समानश्च = त्यदाद्यन्यसमानम्, तस्मात् ।

**[ उपमानात् ]** उपमीयते = उपमानम्, तस्मात् ।

**[ व्याप्ये ]** व्याप्य सप्तमी ङि ।

**[ दृशः ]** दृश् पञ्चमी ङसि ।

**[ टक्सकौ ]** टक् च सक् च = टक्सकौ ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ त्यादृशः, त्यादृशी, त्यादृक्षः, त्यादृक्षा, त्यादृक् ]** त्यद् 'दृशूं प्रेषणे' (४९५) दृश् । स्य इव दृश्यते । त्यादृशः, त्यादृशी, त्यादृक्षः, त्यादृक्षा, त्यादृक् । अनेन टक्प्र० → अ - सक्प्र० → स, अग्रेतने क्विप्प्र० । 'अन्य-त्यदादेराः' (३।२।१५२) आ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी । तृतीये-चतुर्थे 'यज-सृज-मृज-भ्राज-भ्रस्ज-व्रस्व-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) स० → ष० । 'क-षयोगे क्ष०' । 'आ द्वेरः' (२।१।४१) दस्य उभयत्र अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ तादृशः, तादृशी, तादृक्षः, तादृक्षा, तादृक् ]** स इव दृश्यते = तादृशः, तादृशी, तादृक्षः, तादृक्षा, तादृक् । अनेन टक्-सक्-क्विप्प्र० । शेषं पूर्ववत् ।

**[ अन्यादृशः, अन्यादृशी, अन्यादृक्षः, अन्यादृक्षा, अन्यादृक् ]** अन्य इव दृश्यते = अन्यादृशः, अन्यादृशी, अन्यादृक्षः, अन्यादृक्षा, अन्यादृक् । अनेन टक्-सक्-क्विप्प्र० । शेषं पूर्ववत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सदृशः, सदृशी, सदृक्षः, सदृक्षा, सदृक् ]** समान इव दृश्यते = सदृशः, सदृक्षी, सदृक्षः, सदृक्षा, सदृक् । अनेन टक्-सक्-क्विप्प्र० । 'दृक्-दृश-दृक्षे' (३।२।१५१) समानस्य सभावः । शेषं पूर्ववत् ॥छ॥

## कर्तुर्णिन् ॥ ५।१।१५३ ॥

**[ कर्तुः ]** कर्तृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर् → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋकारस्य लुक् ।

**[ णिन् ]** णिन् प्रथमा सि ।

**[ उष्ट्रक्रोशी ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । उष्ट्र इव क्रोशति = उष्ट्रक्रोशी । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्-याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ ध्वाङ्क्षरावी ]** ध्वाङ्क्ष टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । ध्वाङ्क्ष इव रौति = ध्वाङ्क्षरावी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ खरनादी ]** 'णद अव्यक्ते शब्दे' (२९९) णद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नद् । खर इव नदतीति खरनादी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सिंहनर्दी ]** 'नर्द शब्दे' (३०२) नर्द् । सिंह इव नर्दति । अनेन णिन्प्र० → इन् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

अशीलार्थो जात्यर्थश्चारम्भः ॥छ॥

## अजातेः शीले ॥ ५।१।१५४ ॥

**[ अजातेः ]** न जातिः = अजातिस्तस्याः ।

**[ शीले ]** शील सप्तमी ङि ।

**[ उष्णभोजी ]** उष्ण 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । उष्णं भुङ्क्त इत्येवंशीलः = उष्णभोजी । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ शीतभोजी ]** शीतं भुङ्क्त इत्येवंशीलः = शीतभोजी । अनेन णिन्प्र० → इन् । शेषं 'उष्णभोजी' वत् ।

**[ उदासारी ]** उत्-आङ्पूर्व० 'सृं गतौ' (२५) सृ । उदासरतीत्येवंशीलः = उदासारी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ प्रत्यासारी ]** प्रत्यासरतीत्येवंशीलः = प्रत्यासारी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रस्थायी ]** प्र 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्ष०(१)/सूत्र(२९)) स्था । 卐प्रकर्षेण तिष्ठतीत्येवंशीलः = प्रस्थायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ प्रतिबोधी ]** प्रति 'बुधिं ज्ञाने' (१२६२) बुध् । प्रतिबुध्यत इत्येवंशीलः = प्रतिबोधी । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ प्रयायी ]** प्र 'यांक् प्रापणे' (१०६२) या । प्रकर्षेण यातीत्येवंशीलः = प्रयायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ प्रतियायी ]** प्रतियातीत्येवंशीलः = प्रतियायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ ब्राह्मणानामन्त्रयिता ]** ब्राह्मण द्वितीया शस् । 'मन्त्रिण् गुप्तभाषणे' (१८४०) मन्त्र्, आङ्पूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । आमन्त्रयत इत्येवंशीलः = आमन्त्रयिता । णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ शालीन् भोक्ता ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुनक्तीत्येवंशीलः = भोक्ता ।

**[ प्रभोक्ता ]** प्रभुनक्तीत्येवंशीलः = प्रभोक्ता ।

**[ उपभोक्ता ]** उपभुनक्तीत्येवंशीलः = उपभोक्ता ।

**[ संभोक्ता ]** संभुनक्तीत्येवंशीलः = संभोक्ता ।

सर्वत्र 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[ उष्णभोज आतुरः ]** उष्णं भुङ्क्ते = उष्णभोज आतुरः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।।छा।

### **साधौ** ॥ ५।१।१५५ ॥

**[ साधौ ]** साधु सप्तमी ङि । 'ङिडौँ' (१।४।२५) डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) उकारस्य लोपः।

अशीलार्थोऽयमारम्भः ।

**[ साधुकारी ]** साधु करोति = साधुकारी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ साधुदायी ]** साधु ददातीति साधुदायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ चारुनर्ती ]** चारु नृत्यतीत्येवंसाधुः = चारुनर्ती । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर्।

---

卐 श० म० न्या० - प्रतिष्ठते इत्येवंशीलः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सुष्ठुगामी ]** सुष्ठु गच्छतीत्येवंसाधुः = सुष्ठुगामी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

सर्वत्र प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ साधु वादयति वादको वीणाम् ]** साधु 'वद(दि)ण् [परि] भाषणे' (१९६३) वद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । वादको वीणां इत्यादौ न भवति ॥छ॥

### ब्रह्मणो वदः ॥ ५।१।१५६ ॥

**[ ब्रह्मणः ]** ब्रह्मन् पञ्चमी ङसि ।

**[ वदः ]** वद् पञ्चमी ङसि ।

**[ ब्रह्मवादी ]** ब्रह्म-ब्रह्माणं वा वदति = ब्रह्मवादी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

अयमप्यशीलार्थ आरम्भः ॥छ॥

### व्रता-ऽऽभीक्ष्ण्ये ॥ ५।१।१५७ ॥

**[ व्रताऽऽभीक्ष्ण्ये ]** व्रतं च आभीक्ष्ण्यं च = व्रताऽऽभीक्ष्ण्यम्, तस्मिन् । व्रतं = **शास्त्रितो नियमः**, आभीक्ष्ण्यं = **पौनःपुन्यम्** ।

**[ अश्राद्धभोजी ]** अश्राद्ध 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । अश्राद्धं भुङ्क्ते = अश्राद्धभोजी । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अलवणभोजी ]** अलवणं भुङ्क्ते । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ स्थण्डिलस्थायी ]** स्थण्डिल 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्ष०(१)सूत्र(२९)) स्था । स्थण्डिले तिष्ठतीति स्थण्डिलस्थायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ स्थण्डिलवर्ती ]** स्थण्डिल 'वृतूङ् वर्त्तने' (९५५) वृत् । स्थण्डिले वर्त्तते = स्थण्डिलवर्ती । अनेन णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वृक्षमूलवासी ]** वृक्षमूल 'वसं निवासे' (९९९) वस् । वृक्षमूले वसतीति वृक्षमूलवासी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पार्श्वशायी]** पार्श्व 'शीङ्क् स्वप्ने' (११०५) शी । पार्श्वाभ्यां शेते = पार्श्वशायी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय्' । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

तदन्यवर्जमिह व्रतं गम्यते ।

आभीक्ष्ण्ये- **[क्षीरपायिण उशीनराः]** क्षीर 'पां पाने' (२) पा । पुनः पुनः क्षीरं पिबन्ति = क्षीरपायिण उशीनराः ।

**[तक्रपायिणः सौराष्ट्राः]** पुनः पुनः तक्रं पिबन्ति = तक्रपायिणः सौराष्ट्राः ।

**[कषायपायिणो गान्धाराः]** पुनः पुनः कषायं पिबन्ति = कषायपायिणो गान्धाराः ।

**[सौवीरपायिणो बाह्लीकाः]** पुनः पुनः सौवीरं पिबन्ति = सौवीरपायिणो बाह्लीकाः । सर्वत्र अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा जस् । णत्वम् ।

**[स्थण्डिलशयः]** स्थण्डिले शेते = स्थण्डिलशयः । 'आधारात्' (५।१।१३७) अप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[कुल्माषखादाश्चौराः]** कुल्माष 'खादृ भक्षणे' (२९४) खाद् । कुल्माषान् पुनः पुनः खादन्तीति कुल्माषखादाश्चौराः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । प्रथमा जस् ।

अशीलार्थं जात्यर्थं च वचनम् ॥छ॥

## करणाद् यजो भूते ॥ ५।१।१५८ ॥

**[करणात्]** करण पञ्चमी ङसि ।

**[यजः]** यज् पञ्चमी ङसि ।

**[भूते]** भूत सप्तमी ङि ।

**[अग्निष्टोमयाजी]** अग्निष्टोम 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । अग्निष्टोमेनेष्टवान् = अग्निष्टोमयाजी । अनेन णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[गुरूनिष्टवान्]** गुरु द्वितीया शस् । 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजति स्म = इष्टवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् य० → इ० । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ॥छ॥

## निन्द्ये व्याप्यादिन् विक्रियः ॥ ५।१।१५९ ॥

**[निन्द्ये]** निन्द्य सप्तमी ङि ।

**[व्याप्यात्]** व्याप्य पञ्चमी ङसि ।

**[इन्]** इन् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ विक्रियः ]** विक्रीतः स्मात् । 'संयोगात्' (२।१।५२) इय् ।

**[ सोमविक्रयी ]** सोम 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री । सोमं विक्रीतवान् = सोमविक्रयी ।

**[ घृतविक्रयी ]** घृतं विक्रीतवान् = घृतविक्रयी ।

**[ तैलविक्रयी ब्राह्मणः ]** तैलं विक्रीतवान् = तैलविक्रयी ।

सर्वत्र अनेन इन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय्, ब्राह्मणः ।

**[ धान्यविक्रायः ]** धान्यं विक्रीतवान् = धान्यविक्रायः ।

**[ घृतविक्रायः ]** घृतं विक्रीतवान् = घृतविक्रायः ।

**[ तैलविक्रायो वणिक् ]** तैलं विक्रीतवान् = तैलविक्रायः । सर्वत्र 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय्, वणिक् ।

भावे अलन्तस्य मत्वर्थीयेनेना सिध्यति कुत्सायामण्बाधनार्थं वचनम् ॥छा॥

**हनो णिन् ॥ ५।१।१६० ॥**

**[ हनः ]** हन् पञ्चमी ङसि ।

**[ णिन् ]** णिन् प्रथमा सि ।

**[ पितृव्यघाती ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । पितृव्यं हतवान् = पितृव्यघाती । अनेन णिन्प्र० → इन् । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ मातुलघाती ]** मातुलं हतवान् = मातुलघाती । अनेन णिन्प्र० → इन् । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ पितृव्यघातः ]** पितृव्यं हतवान् = पितृव्यघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ मातुलघातः ]** मातुलं हतवान् = मातुलघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ शत्रुघातः ]** शत्रुं हतवान् = शत्रुघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ चौरघातः ]** चौरं हतवान् = चौरघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

घञन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्साभ्यामन्यत्र शत्रुघातीत्यादौ मत्वर्थीयनिवृत्त्यर्थं वचनम् ॥छा॥

**ब्रह्म-भ्रूण-वृत्रात् क्विप् ॥ ५।१।१६१ ॥**

**[ ब्रह्मभ्रूणवृत्रात् ]** ब्रह्मा च भ्रूणश्च वृत्रश्च = ब्रह्मभ्रूणवृत्रम्, तस्मात् ।

**[ क्विप् ]** क्विप् प्रथमा सि ।

**[ ब्रह्महा ]** ब्रह्माणं हतवान् = ब्रह्महा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ भ्रूणहा ]** भ्रूणं हतवान् = भ्रूणहा ।

**[ वृत्रहा ]** वृत्रं हतवान् = वृत्रहा । सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

'क्विप्' (५।१।१४८) इत्यनेनैव सिद्धे नियमार्थं वचनम्, चतुर्विधश्चात्र नियमः ।

धातूपपदकालप्रत्ययेन चातुर्विध्यं धातुनियमम्, उपपदविषयं दर्शयति-

(१) ब्रह्मादिभ्य एव हन्तेर्भूते क्विप्, नान्यस्मात्-

**[ पुरुषघातः ]** पुरुषं हतवान् = पुरुषघातः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) हन्० → घात्० ।

**[ मधुहा ]** मधुदैत्यस्य हतकोऽर्थे-卐मधुहननं योग्यकालं इति वाक्ये क्विपि मधुहा ।

**[ अहिहा ]** अहेर्हतवान् ।

**[ हिमहा ]** हिमस्य हन्ता ।

**[ तमोपहा ]** तमसोऽपहन्ता ।

**[ असुरहा ]** असुरस्य हन्ता ।

**[ आखुहा ]** आखोर्मूषकस्य हन्ता = आखुहा इत्यादिषु वर्त्तमान-भविष्यतोः कालमात्रे वा 'क्विप्' (५।१।१४८) इत्यनेनैव क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

तथा उपपदनियमं धातुविषयं दर्शयति ।

(२) ब्रह्मादिभ्यो हन्तेरेव भूते नान्यस्माद् धातोः क्विप्-

**[ ब्रह्माध्यायः ]** ब्रह्म = शास्त्रं अधीतवान् = ब्रह्माध्यायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

ब्रह्मविदादयस्तु भूताविवक्षायाम् ।

(३) तथा ब्रह्मादिभ्यो हन्तेर्भूते क्विबेव नान्यः प्रत्ययः -

**[ ब्रह्महा ]** ब्रह्माणं हतवान् = ब्रह्महा इति क्विबेव भवति, न अण्-णिनौ ।

**[ ब्रह्मघ्नः ]** वृत्रस्य(ब्रह्म) हननं = वृत्रघ्नः(ब्रह्मघ्नः) । 'ब्रह्मादिभ्यः' (५।१।८५) टक्प्र० → अ । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) "घ्न" आदेशः ।

यदि ब्रह्मादिभ्यो हन्तेः क्विबेव तर्हि कथं तृजिति पृच्छति-

卐 श० म० न्या० - वर्तमाने मधुं हन्तीति, भविष्यति मधुं हनिष्यतीति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वृत्रस्य हन्तुः कुलिशम् ]** वृत्रस्य हतवान् = हन्ता, तस्य । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । षष्ठी ङस् । 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋकारस्य लुक्, कुलिशम् । केवलादेव हन्तेस्तृच् पश्चाद् वृत्रेण सह सम्बन्धः । यदि ब्रह्मादिभ्यः क्विबेव नान्यः प्रत्ययः तर्हि ब्रह्म हतवान् इति क्तवतुरपि न प्राप्नोति, इत्याह–'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (न्या० सं० वक्ष० (१) सूत्र(३७)) इति क्विपाऽणादिरेव बाध्यते, न क्त-क्तवतू ।

(४) तथा ब्रह्मादिभ्यो हन्तेर्भूत एव काले क्विप्, नान्यस्मिन्–

**[ ब्रह्मघातः ]** ब्रह्माणं हन्ति–हनिष्यति वा = ब्रह्मघातः । 'ब्रह्मादिभ्यः' (५।१।८५) इति टक्प्रसङ्गेऽपि बहुलमणप्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० । तदेतत् सर्वं बहुलाधिकाराल्लभ्यते ॥छा॥

**कृगः सु-पुण्य-पाप-कर्म-मन्त्र-पदात्** ॥ ५।१।१६२ ॥

**[ कृगः ]** कृग् पञ्चमी ङसि ।

**[ सुपुण्यपापकर्ममन्त्रपदात् ]** सु च पुण्यश्च पापश्च कर्म च मन्त्रश्च पदश्च = सुपुण्यपापकर्ममन्त्रपदम्, तस्मात् ।

**[ सुकृत् ]** सुष्ठु कृतवान् = सुकृत् ।

**[ पुण्यकृत् ]** पुण्यं कृतवान् = पुण्यकृत् ।

**[ पापकृत् ]** पापं कृतवान् = पापकृत् ।

**[ कर्मकृत् ]** कर्माणि कृतवान् = कर्मकृत् ।

**[ मन्त्रकृत् ]** मन्त्रं कृतवान् = मन्त्रकृत् ।

**[ पदकृत् ]** पदं कृतवान् = पदकृत् ।

सर्वत्र अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

इदमपि नियमार्थं वचनम् । त्रिविधश्चात्र नियमः ।

उपपदप्रत्ययकालभेदात् त्रै(त्रि)विधा उपपदविषयं धातुविषयमाह–

(१) एभ्यः कृग एव भूते क्विप्, नान्यस्माद् धातोः–

**[ मन्त्राध्यायः ]** मन्त्र अधि 'इंङ्क् अध्ययने' (११०४) इ । मन्त्रमधीतवान् = मन्त्राध्यायः । 'कर्मणोऽण्' (५।१।७२) अणप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । अत्र न क्विप् ।

**[ मन्त्रवित् ]** मन्त्र 'विदक् ज्ञाने' (१०९९) विद् । मन्त्रं वेत्तीति मन्त्रवित् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द्० → त्० ।

**[ पापनुत् ]** पाप 'णुदंत् प्रेरणे' (१३७०) णुद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नुद् । पापं नुदति = पापनुत् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द्० → त्० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्ययनियमं कालविषयमाह-

(२) तथा एभ्यः कृगो भूत एव क्विप् । इह न भवति-

**[कर्मकारः]** कर्म करोति-करिष्यति वा = कर्मकारः ।

**[मन्त्रकारः]** मन्त्रं करोति - करिष्यति वा = मन्त्रकारः ।

**[पदकारः]** पदं करोति - करिष्यति वा = पदकारः ।

सर्वत्र 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

कालनियमं प्रत्ययविषयमाह-

(३) तथा एभ्यः परात् कृगो भूते क्विबेव, नान्यः प्रत्ययः, तेन -

**[कर्मकारः]** कर्म कृतवान् = कर्मकारः । 'कर्मणोऽण्' (५।१।७२) इत्यण् न भवति ।

**[शास्त्रकृत्]** शास्त्रं 卐 करोतीति शास्त्रकृत् ।

**[तीर्थकृत्]** तीर्थं करोतीति तीर्थकृत् ।

**[वृत्तिकृत्]** वृत्तिं करोतीति वृत्तिकृत् ।

**[सूत्रकृत्]** सूत्रं करोतीति सूत्रकृत् ।

**[भाष्यकृत्]** भाष्यं करोतीति भाष्यकृत् ।

सर्वत्र क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ॥छा।

**सोमात् सुगः** ॥ ५।१।१६३ ॥

**[सोमात्]** सोम पञ्चमी ङसि ।

**[सुगः]** सुग् पञ्चमी ङसि ।

**[सोमसुत्]** सोम 'षुंग्ट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः (२।३।९८) सु । सोमं सुतवान् = सोमसुत् । अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

अयमपि नियमार्थो योगः । चतुर्विधश्चात्र नियमः ।

धातुनियमं उपपदविषयमाह-

(१) सोमादेवेति नियमात्-

**[सुरासावः]** सुरां सुतवान् = सुरासावः । कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । एवम्-

**[सुरासुत्]** सुरां सुतवान् = सुरासुत् । क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

---

卐 श० म० न्या० - करोतीत्यस्य स्थाने कृतवान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपपदनियमं धातुविषयमाह-

(२) सुग एवेति नियमात्-

**[ सोमपा ]** सोमं पीतवान् = सोमपा । मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । अप्रयोगीत्' (१।१।३७) विच्लोपः ।

प्रत्ययनियमं कालविषयमाह-

भूत एवेति नियमात्-

**[ सोमसावः ]** सोमं सुनोति-सोष्यति वा = सोमसावः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

कालनियमं प्रत्ययविषयमाह-

क्विबेवेति नियमात्-

**[ सोमसुत् ]** सोमं सुतवान् = सोमसुत्, इत्यण् न भवति ।।छा।

## **अग्नेश्चेः** ॥ ५।१।१६४ ॥

**[ अग्नेः ]** अग्नि पञ्चमी ङसि ।

**[ चेः ]** चि पञ्चमी ङसि ।

**[ अग्निचित् ]** अग्नि 'चिंगृट् चयने' (१२९०) चि । अग्निं चितवान् = अग्निचित् । अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ कुड्यचायः ]** कुड्यं चितवान् = कुड्यचायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ अग्निचायः ]** अग्निं चिनोति-चेष्यति वा = अग्निचायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।।छा।

## **कर्मण्यग्न्यर्थे** ॥ ५।१।१६५ ॥

**[ कर्मणि ]** कर्मन् सप्तमी ङि ।

**[ अग्न्यर्थे ]** अग्नयेऽयं = अग्न्यर्थः, तस्मिन् ।

**[ श्येनचित् ]** श्येन इव चीयते स्म = श्येनचित् । अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[ कङ्कचित् ]** कङ्कं चिनोतीति कङ्कचित् । अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ रथचक्रचित् ]** रथचक्रं चिनोतीति रथचक्रचित् । अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

यत् कञ्चिदग्न्यर्थं तत्र सर्वत्रायं प्रत्ययं(यः) इति शङ्कते, तं प्रत्याह-**बहुलाधिकारात् रूढिविषय एवायं प्रत्ययो द्रष्टव्यः** ।।छा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## दृशः क्वनिप् ॥ ५।१।१६६ ॥

**[ दृशः ]** दृश् पञ्चमी ङसि ।

**[ क्वनिप् ]** क्वनिप् प्रथमा सि ।

**[ मेरुदृश्वा ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । मेरुं दृष्टवान् = मेरुदृश्वा ।

**[ विश्वदृश्वा ]** विश्वं दृष्टवान् = विश्वदृश्वा ।

**[ बहुदृश्वा ]** बहु दृष्टवान् = बहुदृश्वा ।

**[ परलोकदृश्वा ]** परलोकं दृष्टवान् = परलोकदृश्वा ।

सर्वत्र अनेन क्वनिप्प्र० → वन् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

सामान्यसूत्रेण क्वनिपि सिद्धे भूतकाले अणप्रत्ययान्तरबाधनार्थं वचनम् ॥छा।

## सह-राजभ्यां कृग्-युधेः ॥ ५।१।१६७ ॥

**[ सहराजभ्याम् ]** सहश्च राजा च = सहराजानौ, ताभ्याम् = सहराजभ्याम् । पञ्चमी भ्याम् ।

**[ कृग्युधेः ]** कृग् च युधिश्च = कृग्युधि, तस्मात् ।

**[ सहकृत्वा ]** 'डुकृंग् करणे' (८८८) कृ । सह कृतवान् = सहकृत्वा । अनेन क्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सहकृत्वानौ ]** सह कृतवन्तौ = सहकृत्वानौ । अनेन क्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा औ । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ सहयुध्वा ]** 'युधिंच् सम्प्रहारे' (१२६०) युध् । सह युद्धवान् = सहयुध्वा । अनेन क्वनिप्प्र० → वन् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) इत्यादिना धकारस्य द्वित्वम् ।

**[ सहयुध्वानौ ]** सह युद्धवन्तौ = सहयुध्वानौ । अनेन क्वनिप्प्र० → वन् । प्रथमा औ । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ राजयुध्वा ]** राजानं योधितवान् इति विगृहीतं राजयुध्वा । अनेन क्वनिप्प्र० → वन् । प्रथमा सि । शेषं पूर्ववत् ।

युधिरत्नर्भूतण्यर्थः सकर्मकः ॥छा।

## अनोर्जनेर्डः ॥ ५।१।१६८ ॥

**[ अनोः ]** अनु पञ्चमी ङसि ।

**[ जनेः ]** जनि पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ डः ]** ड प्रथमा सि ।

**[ पुमनुजः ]** अनु 'जनैचि प्रादुर्भावे' (१२६५) जन् । पुमांसमनुजातः = पुमनुजः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । 'पदस्य' (२।१।९८) पुम्स्संबंधिनः सकारस्य लुक् ।

**[ स्त्र्यनुजः ]** स्त्रियं-स्त्रीं वा अनुजातः = स्त्र्यनुजः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् ।

**[ आत्मानुजः ]** आत्मानमनुजातः = आत्मानुजः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् ।

अनुपूर्वो जनिर्जननोपसर्जनायां प्राप्तौ वर्त्तमानः सकर्मकः ।।छा।

**सप्तम्याः** ॥ ५।१।१६९ ॥

**[ सप्तम्याः ]** सप्तमी पञ्चमी ङसि ।

**[ उपसरजः ]** उपसरे जातः = उपसरजः ।

**[ मन्दुरजः ]** मन्दुरायां - मन्दुरे वा जातः = मन्दुरजः । स्त्रीपक्षे 'ङ्यापो बहुलं नाम्नि' (२।४।९९) ह्रस्वः ।

**[ अप्सुजम्, अब्जम् ]** अप्सु जातं = अप्सुजम्, अब्जम् । सर्वत्र अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । 'वर्ष-क्षर-वरा-ऽप्-सरः-शरोरोमनसो जे' (३।२।२६) इत्यादिना विकल्पेन सप्तम्या अलुप् । सि-अम् ।

**अजातेः पञ्चम्याः** ॥ ५।१।१७० ॥

**[ अजातेः ]** न जातिः = अजातिः, तस्मात् (?) (तस्याः) ।

**[ पञ्चम्याः ]** पञ्चमी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) दास्० → आस्० ।

**[ बुद्धिजः संस्कारः ]** बुद्धेर्जातः = बुद्धिजः संस्कारः ।

**[ संस्कारजा स्मृतिः ]** संस्काराज्जाता = संस्कारजा स्मृतिः ।

**[ संतोषजं सुखम् ]** संतोषाज्जातं = संतोषजं सुखम् ।

**[ कौशल्याजः ]** कोशलस्याऽपत्यं स्त्री = कौशल्या । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । कौशल्याया जातः = कौशल्याजः । अनेन सर्वत्र डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् ।

ननु गोत्रं च चरणैः सहेति जातित्वे डो न प्राप्नोति अतोऽत्र कथम् ? इत्याह- **संज्ञाशब्दोऽत्रोपपदम्** ।।छा।

**क्वचित्** ॥ ५।१।१७१ ॥

**[ क्वचित् ]** क्वचित् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

पञ्चम्यन्तात् सप्तम्यन्ताच्चान्यतोऽपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ किंजः ]** किम् 'जनैचि प्रादुर्भावे' (१२६५) जन् । किं जातेन = किंजः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । ये(के)न जातेन किञ्चित् भवति सः किंज उच्यते । केन जातः = किंजोऽनिर्ज्ञातपितृकः ।

**[ अलंजः ]** अलम्-जन् । अलं जातेन = अलंजः ।

**[ द्विजः ]** द्विर्जातः = द्विजः ।

**[ अजः ]** न जातः = अजातः । अनेन सर्वत्र डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अधिजः ]** अधिजातः = अधिजः ।

**[ उपजः ]** उपजातः = उपजः व्रीहिः ।

**[ परिजः ]** परिजातः = परिजः ।

**[ प्रजाः ]** प्रजाताः = प्रजाः । सर्वत्र अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । प्रथमा जस् ।

**[ अभिजः ]** अभिजातः = अभिजः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् ।

अकर्मणोऽपि- **[ अनुजः ]** अनुजातः = अनुजः । अनेन डप्र० → अ ।

जातेरपि- **[ ब्राह्मणजः पशुवधः ]** ब्राह्मणाज्जातः = ब्राह्मणजः पशुवधः ।

**[ क्षत्रियजं युद्धम् ]** क्षत्रियाज्जातं = क्षत्रियजं युद्धम् ।

**[ स्त्रीजमनृतम् ]** स्त्रिया जातं = स्त्रीजमनृतम् । अनेन डप्र० → अ । उक्ताद्धातोरन्यतोऽपि-

**[ ब्रह्मज्यः ]** 'ज्यांश् हानौ' (१५२४) ज्या । ब्रह्मणि जीनवान् = ब्रह्मज्यः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । उक्तान्नाम्नो धातोश्चान्यतोऽपि-

**[ वराहः ]** 'हनंक् हिंसा-गत्योः' (११००) हन्, आङ्पूर्व० । वरमाहतवान् = वराहः । अनेन डप्र० → अ ।

उक्तान्नाम्नो धातोः कारकाच्चान्यतोऽपि-

**[ परिखा ]** परिखाता = परिखा । अनेन डप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आखा ]** आखाता = आखा । अनेन डप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उपखा ]** उपखाता = उपखा । अनेन डप्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

नाम-धातु-कालान्यत्वेऽपि-

**[ मित्रह्वः ]** मित्र 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । मित्रं ह्वयति = मित्रह्वः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

धातुकालान्यत्वे-

**[ वार्चो हंसः ]** वारि 'चर भक्षणे च' (४१०) चर् । 卐वारि चरति = वार्चो हंसः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अर्लुक् । पृषोदरादित्वात् इलुप् निपात्यते ।

---

卐 श० म० न्या० - वार् चरति । श० महो० - वार्सु चरति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामकारकान्यत्वे-

**[ पुंसानुजः ]** पुंसानुजातः = पुंसानुजः । अनेन डप्र० → अ ।

नामाभावे उक्तधातु-कालान्यत्वे-

**[ अः ]** 'अट गतौ' (१९४) अट् । 'अत सातत्यगमने' (२७९) अत् । अटति-अतति वा = अः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अट्-अत्लुक् ।

**[ कः ]** 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) का । 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । कायति-कामयते वा = कः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आ-आम्लुक् ।

**[ भं नक्षत्रम् ]** 'भांक् दीप्तौ' (१०६१) भा । भातीति भं-नक्षत्रम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

नामाभावे उक्तधातु-काल-कारकान्यत्वे च-

**[ खम् ]** खन्यत इति खम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक । सि-अम् ॥छा॥

## सु-यजो ङ्वनिप् ॥ ५।१।१७२ ॥

**[ सुयजः ]** सुश्च यज् च = सुयज्, तस्मात् ।

**[ ङ्वनिप् ]** ङ्वनिप् प्रथमा सि ।

**[ सुत्वा ]** षुंग्ट् अभिषवे (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । सुतवान् = सुत्वा । अनेन ङ्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सुत्वानौ ]** सुतवन्तौ = सुत्वानौ । अनेन ङ्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा औ । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ सुत्वानः ]** सुतवन्तः = सुत्वानः । अनेन ङ्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा जस् । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ यज्वा ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । इष्टवान् = यज्वा । अनेन ङ्वनिप्प्र० → वन् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ यज्वानौ ]** इष्टवन्तौ = यज्वानौ । अनेन ङ्वनिप्प्र० → वन् । प्रथमा औ । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ यज्वानः ]** इष्टवन्तः = यज्वानः । अनेन ङ्वनिप्प्र० → वन् । प्रथमा जस् । 'नि दीर्घः' (१।४।८५) दीर्घः ।

क्वनिप् - वन्भ्यां सिद्धे भूते नियमार्थं वचनम् । ङकारो गुणनिषेधार्थः । पकारः पित्कार्यार्थः ॥छा॥

## जॄषोऽतृः ॥ ५।१।१७३ ॥

**[ जॄषः ]** जॄष् पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अतृः ]** अतृ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ जरन् ]** 'जृष् जरसि' (११४५) जृ । 'जीर्यति स्म = जरन् । अनेन अतृप्र० → अत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ जरती ]** जृ । जीर्यति स्म । अनेन अतृप्र० → अत् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अधातूदृदितः' (२।४।२) ङी ।

**[ जीर्णः ]** जृ । जीर्यति स्म = जीर्णः । 'श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः' (५।१।९) क्तप्र० → त । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ।

**[ जीर्णवान् ]** जृ । जीर्यति स्म = जीर्णवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**ऋकारो दीर्घत्वप्रतिषेधार्थः** ।।छा।

**क्त-क्तवतू** ॥ ५।१।१७४ ॥

**[ क्तक्तवतू ]** क्तश्च क्तवतुश्च = क्तक्तवतू ।

**[ कृतः ]** 'डुकृंग् करणे' (८८८) कृ । क्रियते स्म = कृतः । अनेन क्तप्र० → त ।

**[ कृतवान् ]** करोति स्म = कृतवान् । अनेन क्तवतुप्र० → तवत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ।

**[ प्रकृतः कटं देवदत्तः ]** प्रक्रियते स्म = प्रकृतः । अनेन क्तप्र० → त ।।छा।

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ कृतस्य ( कृतः )**
**प्रथमः पादः ॥**

**अगणितपञ्चेषुबलः, पुरुषोत्तमचित्तविस्मयं जनयन् ।**
**रामोल्लासनमूर्त्तिः, श्रीकर्णः कर्ण इव जयति ॥१॥** ।।छा।

• • •

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## ॥ अथ पञ्चमाध्यायस्य द्वितीयः पादः ॥

### श्रु-सद-वस्भ्यः परोक्षा वा ॥ ५।२।१ ॥

**[ श्रुसदवस्भ्यः ]** श्रुश्च सदश्च वस् च = श्रुसदवस्, तेभ्यः = श्रुसदवस्भ्यः । पञ्चमी भ्यस् ।

**[ परोक्षा ]** परोक्षा प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

भूत इत्यनुवर्तते ।

**[ उपशुश्राव ]** उप 'श्रुंट् श्रवणे' (१२९६) श्रु । परोक्ष णव् → अ । 'द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ उपससाद ]** उप 'षद्लृं विशरण - गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे ०', (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अनूवास ]** अनु 'वसं निवासे' (९९९) वस् । परोक्षा णव् → अ । 'द्विर्धातुः०' (४।१।१) द्विः । 'व्यञ्जन०' (४।१।४४) अनादिव्यञ्जनलोपः । 'यजादि - वश्०' (४।१।७२) य्वृत् व० → उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

वावचनात् यथास्वकालमद्यतनी ह्यस्तनी च -

**[ उपाश्रौषीत् ]** उप 'श्रुंट् श्रवणे' (१२९६) श्रु । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै समानस्याऽङिति (४।३।४४) वृद्धिः औ । 'अड् धातोरादि०' (४।४।२९) अट् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् ।

**[ उपाशृणोत् ]** उप 'श्रुंट् श्रवणे' (१२९६) श्रु । ह्यस्तनी दिव् → त् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ । 'श्रौति - कृवु - धिवु - पा - घ्रा - ध्मा - स्था - म्ना - दाम्०' (४।२।१०८) "शृ"आदेशः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ उपासदत् ]** उप 'षद्लृं विशरण - गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै'० (२।३।९८) सद् । अद्यतनी दि → त् । 'लृदिद् - द्युतादि - पुष्यादेः परस्मै' (३।४।६४) अङ् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ उपासीदत् ]** उप 'षद्लृं विशरण - गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै'० (२।३।९८) सद् । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । श्रौति - कृवु - धिवु - पा - घ्रा - ध्मा - स्था'० (४।२।१०८) "सीद" आदेशः । 'अड् धातोरादि'० (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अन्ववात्सीत् ]** अनु 'वसं निवासे' (९९९) वस् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । 'सस्तः सि' (४।३।९२) सस्य त० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ अन्ववसत् ]** अनु-वस् । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ शुश्रुवे ]** श्रु । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'संयोगात्' (२।१।५२) उव् ।

**[ अश्रावि ]** श्रु । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ-तलोपश्च ।' 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ अश्रूयत ]** श्रु । ह्यस्तनी त । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'दीर्घश्चि - यङ् - यक् - क्येषु च' (४।३।१०८) दीर्घः । अड् धातोरादि'० (४।४।२९) अट् ।

विभक्तिष्विति - तेन विभक्तीनामेवाऽन्योऽन्यमसरूपविधिर्नास्ति, प्रत्ययेन तु विभक्तीनामस्त्येव तेन **उपश्रुतः उपश्रुतवान्** इति सिद्धम् ॥ छ ॥

## तत्र क्वसु-कानौ तद्वत् ॥ ५।२।२ ॥

**[ तत्र ]** तद् तस्याम्=तत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । 'आ द्वेरः' (३।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ क्वसुकानौ ]** क्वसुश्च कानश्च = क्वसुकानौ ।

**[ तद्वत् ]** सेव = तद्वत् । 'स्यादेरिवे' (७।१।५२) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

तौ च परोक्षावत् व्यपदिश्यते न तु परोक्षासंज्ञौ, तथा तदन्तस्य नाम संज्ञा न स्यात्, तत्र क्वसुः परस्मैपदत्वात् कर्तरि, कानस्त्वात्मनेपदत्वाद् भाव-कर्मणोरपि ।

**[ शुश्रुवान् ]** श्रु । शुश्राव = शुश्रुवान् । अनेन क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विर्वचनम् ।

**[ उपशुश्रुवान् ]** उप-श्रु । उपशुश्राव = उपशुश्रुवान् । अनेन क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) सलुक् ।

**[ सेदिवान् ]** सद् । ससाद = सेदिवान् ।

**[ उपसेदिवान् ]** उप-सद् । उपससाद = उपसेदिवान् । अनेन क्वसुप्र० → वस् । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् → इ । 'अनादेशाऽऽदेरेकव्यञ्जनमध्येऽतः' (४।१।२४) एत्वम् ।

**[ प्रसेदिवान् ]** प्र-सद् । प्रससाद = प्रसेदिवान् ।

**[ आसेदिवान् ]** आ-सद् । आससाद = आसेदिवान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ निषेदिवान् ]** नि-सद् । निषसाद = निषेदिवान् । अनेन क्वसुप्र० → वस् । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् → इ । 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) षत्वम् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः ।

भूतानद्यतनपरोक्षाविषये उदाहरति -

**[ पेचिवान् ]** पच् । पपाच = पेचिवान् । अनेन क्वसुप्र० → वस् । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् । 'अनादेशाऽऽदेरेकव्यञ्जनमध्येऽतः' (४।१।२४) एत्वम् ।

**[ पाचयांचकृवान् ]** पच् । पचन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पाचयांचकार = पाचयांचकृवान् । अनेन क्वसुप्र० → वस् । 'धातोरनेकस्वरादाम्०' (३।४।४६) क्वसु० आम्० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । चकार = चकृवान् । अनेन क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क - ङश्च - ञ्' (४।१।४६) क० → च० ।

**[ पपिवान् ]** 'पां पाने' (२) पा । पपौ = पपिवान् । अनेन क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे ०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'घसेकस्वराऽऽतः क्वसोः (४।४।८२) इट् । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । शेषं स्पष्टम् ।

**[ जग्मिवान् ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । जगाम = जग्मिवान् । अनेन क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे ०' (४।१।१) गम्द्विः । 'व्यञ्जनस्याऽनादेर्लुक्,' (४।१।४४) अनादिव्यञ्जनलोपः । 卐'गम - हन - विद्लृ - विश - दृशो वा' (४।४।८३) इट् । 'गम - हन - जन - खन - घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलुक् ।

**[ पेचानः ]** 'डुपचींष् पाके' (८९२) पच् । पेचे = पेचानः । अनेन कानप्र० → आन । 'अनादेशाऽऽदेरेक०' (४।१।२४) ए ।

**[ चक्राणः ]** चक्रे = चक्राणः । अनेन कानप्र० → आन । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) रत्वम् ।

परोक्षावद्भावात् द्विर्वचनादि ।

परोक्षावद्भावादेव कित्त्वे सिद्धे कित्करणं संयोगान्तधात्वर्थम्, तेन

**[ आजिवान् ]** 'अञ्जू(ञ्जौ)प् व्यक्ति - म्रक्षण - गतिषु' (१४८८) अञ्ज् । आनञ्ज = आजिवान् । अनेन क्वसुप्र० → वस् । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) आ । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् । 'नो व्यञ्जन०' (४।२।४५) नलुक् ।

**[ बभज्वान् ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । बभञ्ज = बभज्वान् । अनेन क्वसुप्र० → वस् । 'द्विर्धातुः परोक्षा-ङे,०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् ।

---

卐 श.म.न्या. - 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सस्वजानः]** 'ष्वञ्जित् सङ्गे' (१४७१) ष्वञ्ज् । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वञ्ज् । सस्वञ्ज (षस्वजे) = सस्वजानः । अनेन कानप्र० → आन । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः ।

ॠदन्तानां गुणप्रतिषेधार्थं च –

**[शिशीर्वान्]** कॄ (१५२९) – मॄ (१५३०) – 'शॄश् हिंसायाम्' (१५३१) शॄ । शशार = शिशीर्वान् । अनेन क्वसुप्र० → वस् । 'ॠतां क्ङितीर्' (४।४।११६) इर् । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ।

**[तितीर्वान्]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । ततार = तितीर्वान् । अनेन क्वसुप्र० → वस् । 'ॠतां क्ङितीर्' (४।४।११६) इर् । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

कर्मणि – **[शशिराणः]** शॄ । शशरे = शशिराणः । अनेन कानप्र० → आन । 'द्विर्धातुः परोक्षा-ङे ०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ॠतां क्ङितीर्' (४।४।११३) इर् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ततिराणः]** तॄ । तेरे = ततिराणः । अनेन कानप्र० → आन । 'द्विर्धातुः परोक्षा-ङे ०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ॠतां क्ङितीर्' (४।४।११३) ॠकारस्य इर् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[पपुराणः]** पॄ । पपरे = पपुराणः । अनेन कानप्र० → आन । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'ओष्ठ्यादुर्' (४।४।११७) ॠकारस्य उर् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छा॥

## वेयिवदनाश्वदनूचानम् ॥ ५।२।३ ॥

**[वा]** वा प्रथमा सि ।

**[ईयिवदनाश्वदनुचानम्]** ईयिवांश्च अनाश्वांश्च अनूचानश्च = ईयिवदानाश्वदनूचानम् । 'स्रंस् – ध्वंस् – क्वस्सनडुहो दः' (२।१।६८) सकारस्य दः ।

**[ईयिवान्]** 'इंण्क् गतौ' (१०७५) इ । इयाय = ईयिवान् ।

**[समीयिवान्]** समियाय = समीयिवान् ।

**[उपेयिवान्]** उपेयाय = उपेयिवान् ।

सर्वत्र अनेन क्वसुप्र० → वस् । 'घसेकस्वराऽऽतः क्वसोः' (४।४।८२) इट् → इ । द्विर्वचनम् । 'इणः' (२।१।५१) इय् । 'समानानां'० (१।२।१) दीर्घः ।

**[अनाश्वान्]** नञ्पूर्वकः 'अशश् भोजने' (१५५८) अश् । नाश । अनेन क्वसुप्र० → वस् । द्विः । 'अस्याऽऽदेराः परोक्षायाम्' (४।१।६८) अकारस्य आ । 'अन् स्वरे' (३।२।२९) अन् । अनेन इडभावश्च निपात्यते ।

**[अनूचानः]** 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-बुवोर्भू-वचावशिति' (४।४।१) "वच्"आदेशः । 'वचंक् भाषणे' (१०९६) वच्, अनुपूर्व० । अनूवाच = अनूचानः । अनेन कानप्र० → आन । निपातनात् 'यजादि-वचेः किति' (४।१।७९) य्वृत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वावचनात् पक्षेऽद्यतन्यादयोऽपि -

**[ अगात् ]** 'इंण्क् गतौ' (१०७५) इ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'इणिकोर्गा' (४।४।२३) "गा"आदेशः । पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिच्लोपः । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ उपागात् ]** 'इंण्क् गतौ' (१०७५) इ, उपपूर्व० । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'इणिकोर्गा' (४।४।२३) "गा"आदेशः । पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिच्लोपः । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ उपैत् ]** उप 'इंण्क् गतौ' (१०७५) इ । ह्यस्तनी दिव् → त् । 'एत्यस्तेर्वृद्धिः' (४।४।३०) वृ० ऐ । 'ऐदौत् सन्ध्यक्षरैः (१।२।१२) ऐ ।

**[ उपेयाय ]** उप 'इंण्क् गतौ' (१०७५) इ । परोक्षा णव् → अ । द्विः । 'पूर्वस्याऽस्वे स्वरे योरियुव्' (४।१।३७) इय् । 'नामिनोऽकलि-हलेः (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अवर्णस्ये०' (१।२।६) ए ।

**[ नाऽऽशीत् ]** नञ्पूर्वकः 'अशश् भोजने' (१५५८) अश् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लोपः । समानानां० (१।२।१) दीर्घः ।

**[ नाऽऽश्नात् ]** नञ्पूर्वकः 'अशश् भोजने' (१५५८) अश् । ह्यस्तनी दिव् → त् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः आ । 'समानानां० (१।२।१) दीर्घः ।

**[ नाऽऽश ]** नञ्पूर्वकः 'अशश् भोजने' (१५५८) अश् । परोक्षा णव् । द्विः । 'अस्याऽऽदेराः०' (४।१।६८) आ । 'समानानां०' (१।२।१) दीर्घः ।

**[ अन्ववोचत् ]** अनु 'वचंक् भाषणे' (१०९६) वच् । अद्यतनी दि → त् । 'शास्त्यसू - वक्ति - ख्यातेरङ्' (३।४।६०) अङ्प्र० → अ । 'श्वयत्यसू-वच-पतः श्वाऽऽस्थ-वोच-पप्तम्' (४।३।१०३) वोचादेशः । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ अन्वब्रवीत् ]** अनु 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । ह्यस्तनी दिव् → त् । 'ब्रूतः परादिः' (४।३।६३) ईत् → ई । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ अन्ववक् ]** अनु 'वचंक् भाषणे' (१०९६) वच् । ह्यस्तनी दिव् → त् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) द्लुक् । 'अड् धातोरादि'० (४।४।२९) अट् । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ अनूवाच ]** अनु-वच् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे'० । (४।४।१) द्विः । 'यजादि-वचेः किति (४।१।७९) य्वृत् वस्य उ० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'समानानां० (१।२।१) दीर्घः ॥छा।

## अद्यतनी ॥ ५।२।४ ॥

**[ अद्यतनी ]** अद्यतनी प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ अकार्षीत् ]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । 'सिचि परस्मै'० (४।३।४४) वृद्धिः आर् । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिङ्-नान्तरेऽपि (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अहार्षीत् ]** 'हृंग् हरणे' (८८५) हृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः (४।३।६५) ईत् → ई । 'सिचि परस्मै०' (४।३।४४) वृद्धिः आर् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि०' (४।४।२९) अट् ॥छा।

## विशेषाऽविवक्षा-व्यामिश्रे ॥ ५।२।५ ॥

**[ विशेषाऽविवक्षाव्यामिश्रे ]** वि 'शिष्लृंप् विशेषणे' (१४९२) शिष् । विशिनष्टीति । 'लिहादिभ्यः (५।१।५०) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । विवक्षणं = विवक्षा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'आत्' (२।४।१८) आप्प्र० → आ । न विवक्षा = अविवक्षा । 'नञत्' (३।२।१२५) न० → अ० । वि-आङ् 'मिश्रण् संपर्चने' (१९०७) मिश्र् । व्यामिश्रणं = व्यामिश्रः । 'युवर्ण - वृ -दृ - वश - रण - गमृद् - ग्रहः' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । विशेषस्य अविवक्षा = विशेषाऽविवक्षा । विशेषाऽविवक्षा च व्यामिश्रश्च = विशेषाऽविवक्षाव्यामिश्रम्, तस्मिन् ।

**[ अगमाम घोषान् ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्। अद्यतनी म । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'म-व्यस्याः' (४।२।११३) म० → मा० । 'अड् धातोरादि०' (४।४।२९) अट् ।

व्यामिश्रे - **[ अद्य ह्यो वाऽभुक्ष्महि ]** अद्य प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । ह्यस् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । वा । भुजंप् पालना-ऽभ्यवहारयोः (१४८७) भुज् । 'भुनजोऽत्राणे' (३।३।३७) आत्मने-पदम् । अद्यतनी महि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'च-जः - क-गम्' (२।१।८६) ज० → ग० । अघोषे प्रथमोऽशिटः (१।३।५०) ग० → क० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ अगच्छाम घोषान् ]** अम (३९२) द्रम - (३९३) - हम्म (३९८) - मीमृ (३९५), - 'गम्लृं गतौ' (३९६) गम् । ह्यस्तनी म । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे०' (१।३।५०) छ० → च० । 'म-व्यस्याः' (४।२।११३) च्छ० → च्छा० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ अपिबाम पयः ]** 'पां पाने' (२) पा । 'अनद्यतने ह्यस्तनी' (५।२।७) ह्यस्तनी । ह्यस्तनी म । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति - कृवु - धिवु - पा'० (४।२।१०८) "पिब" आदेशः । 'म-व्यस्याः' (४।२।११३) ब० → बा० । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[ अजयद् गर्तो हूणान् ]** 'जिं अभिभवे' (८) जि । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अड् धातोरादि०' (४।४।२९) अट् । 'अविवक्षिते' (५।२।१४) ह्यस्तनी ।

**[ रामो वनं जगाम ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः (४।१।४०) ग० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ग० → गा० ॥छा।

## रात्रौ वसोऽन्त्ययामाऽस्वप्तर्यद्य ॥ ५।२।६ ॥

**[ रात्रौ ]** रात्रि सप्तमी ङि ।

**[ वसः ]** वस् पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अन्त्ययामाऽस्वप्तरि ]** अन्ते भवोऽन्त्यः, अन्त्यश्चासौ यामश्च = अन्त्ययामः । स्वपितीति स्वप्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । न स्वप्ता = अस्वप्ता । अन्त्ययामश्च अस्वप्ता च = अन्त्ययामाऽस्वप्ता, तस्मिन् ।

**[ अद्य ]** अद्य प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित् कश्चिदाह-क्व भवानुषितः ? स आह - अमुत्रावात्समिति ]** न्यायपूर्वकः (निपूर्वकः) 'इंण्क् गतौ' (१०७५) इ । शास्त्रलोकप्रसिद्ध्यादिना नियतमयनम् = न्यायः । 'इणोऽभ्रेषे' (५।३।७५) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । यद्वा नयनं = न्यायः । 'न्याया-ऽवाया-ऽध्यायोद्याव - संहारा-ऽवहारा-ऽऽधार-दार-जारम्', (५।३।१३४) इति निपातनं वा । न्यायादनपेतम् । 'न्यायाऽर्थादनपेते' (७।१।१३) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

अतीतरात्रेश्चतुर्थे यामे इत्यर्थः ।

प्रत्युत्तिष्ठन्ति लोका अत्रेति प्रत्युत्थानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'उदः स्था-स्तम्भः सः' (१।३।४४) स्लुक्, तस्मिन् । प्रत्युत्थीयते = प्रत्युत्थानम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । उदः स्था-स्तम्भः सः' (१।३।४४) स्लुक्, तस्मिन्नेव यामे दिवसे वा स आह -

'वसं निवासे' (९९९) वस् । अद्यतनी अम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः आ । 'सस्तः सि' (४।३।९२) सस्य त० । 'अड् धातोरादि०' (४।४।२९) अट् ।

रात्र्यन्त्ययामे तु मुहूर्त्तमपि स्वापे ह्यस्तन्येव -

**[ अमुत्रावसम् ]** 'वसं निवासे' (९९९) वस् । ह्यस्तनी अम्व् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'अड् धातोरादि'० (४।४।२९) अट् ॥छ॥

## अनद्यतने ह्यस्तनी ॥ ५।२।७ ॥

**[ अनद्यतने ]** न अद्यतनं = अनद्यतनम्, तस्मिन् ।

**[ ह्यस्तनी ]** ह्यस् मण्ड्यते । ह्योऽर्थः = ह्यस्तनस्तत्र विहिता विभक्तिरपि ह्यस्तनी । 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) तनट्प्र० → तन । 'अणञेयेकण्'० (२।४।२०) ङी ।

अद्यतन्यपवादा ह्यस्तनीविभक्तिर्ज्ञेया ।

**[ अकरोत् ]** 'डुकृंग् करणे' (८८८) कृ । ह्यस्तनी दिव् → त् । 'कृग् - तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ अहरत् ]** 'हृंग् हरणे' (८८५) हृ । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ अकार्षीत् ]** कृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । 'सिचि परस्मै'० (४।३।४४) वृद्धिः आर् । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् ॥छ॥

## ख्याते दृश्ये ॥ ५।२।८ ॥

**[ ख्याते ]** ख्यायते स्म = ख्यातः, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ दृश्ये ]** दृशूं प्रेक्षणे (४९५) दृश् । द्रष्टुं शक्यः = दृश्यम् । 'शक्तार्हे कृत्याश्च' (५।४।३५) क्यप्प्र० → य, तस्मिन् ।

**[ अरुणत् सिद्धराजोऽवन्तीम् ]** 'रुधृंपी आवरणे' (१४७३) रुध् । ह्यस्तनी दिव् → त् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दलुक् । 'विरामे वा' (१।३।५१) ध० → त० ।

सिद्धश्चासौ राजा च = सिद्धराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अजयत् सिद्धः सौराष्ट्रान् ]** 'जिं अभिभवे' (८) जि । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ चकार कटं चैत्रः ]** 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।६६) क० → च० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ जधान कंसं किल वासुदेवः ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । परोक्षा णव् । 'ञि-णवि घन्' (४।३।१०१) "घन्" आदेशः । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । किल । वसुदेवस्याऽपत्यम् = वासुदेवः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उदगादद्यादित्यः ]** उत् 'इंण्क् गतौ' (१०७५) इ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । इणिकोर्गा' (४।४।२३) गा । 'पिबैति-दा-भू-स्थः सिचो लुप्'० (४।३।६६) सिच्लोपः । 'अड् धातोरादि'० (४।४।२९) अट् । अद्य प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । आदित्य प्रथमा सि ॥छ॥

## अयदि स्मृत्यर्थे भविष्यन्ती ॥ ५।२।९ ॥

**[ अयदि ]** न यद् = अयद्, तस्मिन् ।

**[ स्मृत्यर्थे ]** स्मृतिरर्थो यस्य सः=स्मृत्यर्थः, तस्मिन् ।

**[ भविष्यन्ती ]** भविष्यन्ती प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

**[ अभिजानासि देवदत्त ! कश्मीरेषु वत्स्यामः ]** अभि 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० सिव् । 'क्र्यादेः (३।४।७९) श्नाप्र० → ना । 'जा ज्ञा-जनोऽत्यादो' (४।२।१०४) ज्ञा० → जा० । 'वसं निवासे' (९९९) वस् । भविष्यन्ती स्यामस् । 'सस्तः सि' (४।३।९२) सस्य त० ।

**[ स्मरसि साधो ! स्वर्गे स्थास्यामः ]** 'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । साधु आम० सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ओ । स्वर्ग सप्तमी ङि । 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१). सूत्र० (२९) स्था । भविष्यन्ती स्यामस् ।

**[ बुध्यसे चेतयसे अध्येष्यवगच्छसि चैत्र ! कलिङ्गेषु गमिष्यामः ]** 'बुधिं ज्ञाने' (१२६२) बुध् । वर्त्त० से । 'दिवादेः श्यः (३।४।७२) श्यप्र० → य । 'चितिण् संवेदने' (१८२६) चित् । वर्त्त० से । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अय् । 卐 अधि 'इंङ्क् अध्ययने' (११०४) इ । भवि० स्ये । 'नामिनो गुणो०' (४।३।१) गु० ए । अव अम (३९२) – द्रम (३९३) हम्म (३९४) – मीमृ (३९५) – 'गम्लृं गतौ' (३९६) गम् । वर्त्त० सिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'गमिषद्यमश्छः (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) द्वित्वम् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । गम् । भविष्यन्ती स्यामस् । 'स्ताद्यशितो०' (४।४।३२) इट् । ('गमोऽनात्मने (४।४।५१) इट्) ।

**[ अभिजानासि मित्र ! यत् कलिङ्गेष्ववसाम ]** 'वसं निवासे' (९९९) वस् । ह्यस्तनी म । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) दीर्घः स० → सा० । अभिजानासि मित्र ! यत् इति क्रियाविशेषणमेतत् यद्वसनं न स्मरसीत्यर्थः, यदा तु यस्माद्धेतोः कलिङ्गेषु उषितवन्त इति विवक्ष्यते तत्र भविष्यन्त्येव ।।छा।

## वाऽऽकाङ्क्षायाम् ॥ ५।२।१० ॥

**[ वा ]** वा प्रथमा सि ।

**[ आकाङ्क्षायाम् ]** आकाङ्क्षणं = आकाङ्क्षा, तस्याम् ।

अयदीति नानुवर्त्तते ।

**[ स्मरसि मित्र ! कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे पास्यामः पयांसि च ]** 'वसं निवासे' (९९९) वस् । भविष्यन्ती स्यामस् । 'सस्तः सि' (४।३।९२) स० → त० । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भविष्यन्ती स्यामहे । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'पां पाने' (२) पा । भविष्यन्ती स्यामस् ।

**[ स्मरसि मित्र ! कश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महि ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । ह्यस्तनी महि । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्योर्लुक्' (४।२।९०) अलुक् । 'अड् धातोरादि'० (४।४।२९) अट् ।

अत्र वासो लक्षणं भोजनं पानं च लक्ष्यमिति लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा भवति ।।छा।

## कृताऽस्मरणा-ऽतिनिह्नवे परोक्षा ॥ ५।२।११ ॥

**[ कृताऽस्मरणाऽतिनिह्नवे ]** कृतस्य अस्मरणं = कृताऽस्मरणम्, अतिशयेन निह्नवः = अतिनिह्नवः, कृताऽस्मरणं च अतिनिह्नवश्च = कृताऽस्मरणाऽतिनिह्नवस्तस्मिन् ।

**[ परोक्षा ]** परोक्षा प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

अपरोक्षकालार्थ आरम्भः ।

**[ सुप्तोऽहं किल विललाप ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्टयै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपिति स्म=सुप्तः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'स्वपेर्यङ्-ङे च' (४।१।८०) य्वृत् वस्य उ० । वि रप (३३५) - 'लप व्यक्ते वचने' (३३६) लप् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ मत्तोऽहं किल विचचार ]** 'मदैच् हर्षे' (१२३६) मद् । माद्यति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । वि 'चर भक्षणे च' (४१०) चर् । परोक्षा णव् → अ ।

卐 अत्र या प्रक्रिया प्रदर्शिता सा 'अध्येष्ये' इत्येतद् रूपमधिकृत्य ज्ञेया । बृहद्वृत्तौ तु 'अध्येषि' इत्येतद् रूपमस्मिन् स्थाने पठ्यते । बुध्यसे चेतयसे इत्यादीनां साहचर्यानुरोधतः अत्र तदेव स्वीकर्तव्यं भाति । 'अधि इंक् स्मरणे' (१०७४) इ । वर्त्तमाना सिव् । इतीह प्रकृति-प्रत्ययव्यवस्था स्वीकर्तव्या भवेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ चिन्तयन् किलाहं शिरः कम्पयांबभूव, अङ्गुलिं स्फोटयामास ]** 'चितुण् स्मृत्याम्' (१६४५) चित् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । चिन्तयतीति । 'शत्रानशावेष्यति'० (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कम्प् । चकम्पे शिरः कश्चित्, तं कम्पमानं अहं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । परोक्षा णव् । 'धातोरनेकस्वरादाम्'० (३।४।४६) आम् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'भू सत्तायाम्' (१) भू । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'भू-स्वपोरदुतौ' (४।१।७०) भु० → भ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) ऊ ।

'स्फुटत् विकसने' (१४४०) स्फुट् । स्फुटन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । परोक्षा णव् । 'धातोरनेकस्वरादाम् परोक्षायाः'० (३।४।४६) आम् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

अतिनिह्नवे - कश्चित् केनचिदुक्तः [कलिङ्गेषु त्वया ब्राह्मणो हतः, स तदपह्नुवान आह-कः कलिङ्गान् जगाम, को ब्राह्मणं ददर्श, नाहं कलिङ्गान् जगाम] 'ह्नुंङ्क् अपनयने' (११०६) ह्नु । अपह्नुते = अपह्नुवानः । 'शत्रानशावेष्यति'० (५।२।२०) आनश्प्र० → आन । 'संयोगात्' (२।१।५२) उव् । 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० ते (तिव्) । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च (४।२।११८) ते(तिव्)- ब्रू० → आह० ।

अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः (४।१।४०) ग० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'दृशृं प्रेक्षणे' (४९५) दृश् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।४) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

अतिग्रहणादेकदेशापह्नवे ह्यस्तन्येव-

**[ न कलिङ्गेषु ब्राह्मणमहमहनम् ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । ह्यस्तनी अम्व् । 'अड् धातोरादि'० (४।४।२९) अट् ।।छा।

## परोक्षे ॥ ५।२।१२ ॥

**[ परोक्षे ]** अक्षाणां परः = परोक्षस्तस्मिन् ।

यद्यपि साध्यत्वेनानिष्पन्नत्वात् सर्वोऽपि धात्वर्थः परोक्षस्तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षत्वाभिमानोऽस्ति, यत्र स नास्ति स परोक्षः । अत्र प्रत्यक्षाणि साधनानि उपकाराणि यस्य स तस्य भावः ।

**[ जघान कंसं वासुदेवः ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । परोक्षा णव् → अ । 'ञि-णवि घन्' (४।३।१०१) घन् । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ भरतं विजिग्ये बाहुबली ]** 'जिं अभिभवे' (८) जि । परोक्षा ए । 'जेर्गिः सन्-परोक्षयोः (४।१।३५) "गि" आदेशः । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'योऽनेकस्वरस्य' (२।१।५६) य० ।

**[ धर्मं दिदेश तीर्थकरः ]** 'दिशींत् अतिसर्जने' (१३१८) दिश् । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । तीर्थ 'डुकृंग् करणे' (८८८) कृ । तीर्थं करोतीति तीर्थकरः । हेतु-तच्छीला-ऽनुकूलेऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्' (५।१।१०३) टप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।।छ।।

## ह-शश्वद्-युगान्तःप्रच्छ्ये ह्यस्तनी च ॥ ५।२।१३ ॥

**[ हशश्वद्युगान्तःप्रच्छ्ये ]** पञ्चवर्षं = युगम्, तस्यान्तर्मध्यं = युगान्तः, युगान्तः पृच्छयते = युगान्तःप्रच्छयः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । हश्च शश्वच्च युगान्तःप्रच्छयश्च = हशश्वद्युगान्तःप्रच्छयम्,, तस्मिन् ।

**[ ह्यस्तनी ]** ह्यस्तनी प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ इति हाऽकरोत् ]** इति प्रथमा सि । ह प्रथमा सि । 'डुकृंग् करणे' (८८८) । कृ । ह्यस्तनी दिव् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ इति ह चकार ]** इति प्रथमा सि । ह प्रथमा सि । 'डुकृंग् करणे' (८८८) कृ । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नामिनोऽकलि-हलेः (४।३।५१) वृद्धिः आर् ।

**[ शश्वदकरोत् ]** शश्वत्शब्दोऽव्ययम् । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अकरोत्' पूर्ववत् ।

**[ शश्वच्चकार ]** शश्वत्शब्दोऽव्ययम् ।' क्रियाविशेषणात्' (२।२।४१) अम् । 'चकार' पूर्ववत् ।

**[ किमगच्छस्त्वं मथुराम् ? ]** किम्शब्दोऽव्ययं प्रश्ने प्रथमान्तः । अम (३९२)- द्रम (३९२) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । ह्यस्तनी सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्वित्वम् । 'अघोषे'० (१।३।५०) छ० → च० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ किं जगन्थ त्वं मथुराम् ? ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । परोक्षा थव् → थ । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म्० → न्० ।

**[ जघान कंसं किल वासुदेवः ]** 'जघान' पूर्ववत् (५।२।१२) । किल । वसुदेवस्याऽपत्यम् = वासुदेवः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ स्मरसि मित्र ! कश्मीरेष्वितिहाऽध्यैमहि ]** 'स्मृं चिन्तायाम्' (१८) स्मृ । वर्त्त० सिव् । 'कर्त्तर्यनद्भ्यः'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० अर् । अधि 'इङ्क् अध्ययने' (११०४) इ । ह्यस्तनी महि । 'एत्यस्तेर्वृद्धिः' (४।४।३०) वृ० ऐ । इवर्णादेरस्वे'० (१।२।२१) यत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अभिजानासि चैत्र ! शश्वदध्यैमहि]** अभि 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० सिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'जा-ज्ञा-जनोऽत्यादौ' (४।२।१०४) ज्ञा० → जा० । 'अध्यैमहि' पूर्ववत् ॥छ॥

## अविवक्षिते ॥ ५।२।१४ ॥

**[अविवक्षिते]** विवक्षणं = विवक्षितम्, न विवक्षितं = अविवक्षितम्, तस्मिन् ।

**[अभवत् सगरो राजा]** 'भू सत्तायाम्' (१) भू । ह्यस्तनी दिव् → त् । 'कर्त्तर्यनद्भ्यः'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[अहन् कंसं वासुदेवः]** 'हनंक् हिंसा-गत्योः' (११००) हन् । ह्यस्तनी दिव् → त् । 'अड् धातोरादि'० (४।४।२९) अट् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) दिलोपः ।

**["अन्वनैषीत् ततो वाली न्यक्षिपच्चाङ्गदं सुग्रीवं प्रोचे सद्भावमागतः"]** अनु 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।६७) नी । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । 'सिचि परस्मै'० (४।३।४४) वृद्धिः ऐ । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् । 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । ह्यस्तनी दिव् → त् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । सुग्रीवं । प्र 'वचंक् भाषणे' (१०९६) वच् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'यजादि-वश्-वचः सस्वरान्तस्था य्वृत्' (४।१।७२) वस्य उ० । 'यजादि-वचेः किति' (४।१।७९) मूलप्रकृतेर्वकारस्य उ० । 'समानानां तेन दीर्घः (१।२।१) दीर्घः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

**["राक्षसेन्द्रस्ततोऽभैषीत् सैन्यं समस्तं सोऽयुयुत्सयत् स्वयं युयुत्सयांचक्रे"]** 'ञिभींक् भये' (११३२) भी । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । 'सिचि परस्मै'० (४।३।४४) वृद्धिः ऐ । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् ।

'युधिंच् सम्प्रहारे (१२६०)युध् । योधितु(द्धु)मिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ध० → त० । युयुत्सन्तं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'अतः' (४।३।८२) अलुक् । ह्यस्तनी दिव् → त् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**अभूवं**स्तापसाः केचित्, पाण्डुपत्रफलाशिनः ।

पारिव्राज्यं तदाऽऽदत्त, मरीचिश्च तृषार्दितः ॥

**[अभूवन्]** 'भू सत्तायाम्' (१) भू । अद्यतनी अन् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा-भू-स्थः सिचो लुप्०' (४।३।६६) सिच्लुप् । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) ऊ० । 'अड् धातोरादि'० (४।४।२९) अट् ॥छ॥

## वाऽद्यतनी पुराऽऽदौ ॥ ५।२।१५ ॥

**[वा]** वा प्रथमा सि ।

**[अद्यतनी]** अद्यतनी प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

**[पुराऽऽदौ]** पुरा आदिर्यस्य सः=पुरादिः, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अवात्सुरिह पुरा छात्राः]** 'वसं निवासे' (९९९) वस् । अद्यतनी अन् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'व्यञ्जनानामनिटि' (४।३।४५) वृ० आ । 'सस्तः सि' (४।३।९२) सस्य त० । 'सिज्-विदोऽभुवः' (४।२।९२) अन्० → पुस्० → उस्० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[अवसन्निह पुरा छात्राः]** वस् । ह्यस्तनी अन् । 'कर्त्तर्यनद्भ्यः'० (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ऊषुरिह पुरा छात्राः]** वस् । परोक्षा उस् । 'यजादि-वचेः किति' (४।१।७९) व० → उ० । द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'समानानां'० (१।२।१) दीर्घः । 'घस्-वसः' (२।३।३६) षत्वम् ।

**[तदाऽभाषिष्ट राघवः]** तद् । तस्मिन् काले तदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'लोकात्' (१।१।३) अकारेण संहिता । 'भाषि व्यक्तायां वाचि' (८३२) भाष् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितो'० (४।४।२९) इट् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां'० (१।३।६०) त० → ट० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[तदाऽभाषत राघवः]** भाष् । ह्यस्तनी त । 'कर्त्तर्य०' (३।४।७१) शव् । 'अड् धातोरादि०' (४।४।२९) अट् ।

**[बभाषे राघवस्तदा]** भाष् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । रघु । रघोरपत्यम् = राघवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## स्मे च वर्त्तमाना ॥ ५।२।१६ ॥

**[स्मे]** स्म सप्तमी ङि ।

**[च]** च प्रथमा सि ।

**[वर्त्तमाना]** वर्त्तमाना प्रथमा सि ।

**[इति स्मोपाध्यायः कथयति]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[पृच्छति स्म पुरोधसम्]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् प्र० → पृ० । स्म प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[वसन्तीह पुरा छात्राः]** 'वसं निवासे' (९९९) वस् । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[भाषते राघवस्तदा]** 'भाषि व्यक्तायां वाचि' (८३२) भाष् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । रघु । रघोरपत्यम् = राघवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । तद् । तस्मिन् काले । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'आ द्वेरः' (२।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[“अथाह वर्णी विदितो महेश्वरः, यावद् गिरः खे मरुतां चरन्ति” कुमारसम्भवे]** ‘ब्रूंगक् व्यक्तायां वाचि’ (११२५) ब्रू । वर्त्त० तिव् । ‘ब्रूगः पञ्चानां पञ्चाऽऽहश्च’ (४।२।११८) आह० । वर्णो ब्रह्मचारि(री) लिङ्गमस्याऽस्तीति । ‘वर्णाद् ब्रह्मचारिणि’ (७।२।६९) इन्प्र० । ‘त्रन्त्यस्वरादेः’ (७।४।४३) अलुक् । (‘अवर्णेवर्णस्य’ (७।४।६८) अलुक्) ।) प्रथमा सि । ‘इन् - हन् - पूषा’० (१।४।८७) दीर्घः । ‘दीर्घङ्याब्’० (१।४।४५) सिलुक् । ‘नाम्नो नोऽनह्नः’ (२।१।९१) नलुक् । ‘विदक् ज्ञाने’ (१०९९) विद् । विद्यते स्म । ‘क्त-क्तवतू’ (५।१।१७४) क्तप्र० → त । ‘स्ताद्यशितोऽत्रोणादेरिट्’ (४।४।३२) इट् । प्रथमा सि ।

आदिग्रहणमिह पूर्वत्र च प्रयोगानुसरणार्थम् । एवं च पुरादियोगेऽद्यतनी-ह्यस्तनी-परोक्षा-वर्त्तमानाश्चतस्रो विभक्तयः सिद्धाः ।

स्म-पुरायोगे तु परत्वाद् वर्त्तमानैव-

**[नटेन स्म पुराऽधीयते]** नट तृतीया टा । स्म प्रथमा सि । पुरा प्रथमा सि । अधि ‘इंङ्क् अध्ययने’ (११०४) इ । वर्त्त० ते । ‘क्यः शिति’ (३।४।७०) क्यप्र० → य । ‘समानानां’० (१।२।१) दीर्घः ।

त्रययोगेऽप्येवं ज्ञेयम् ॥छ॥

## ननौ पृष्टोक्तौ सद्वत् ॥ ५।२।१७ ॥

**[ननौ]** ननु सप्तमी ङि ।

**[पृष्टोक्तौ]** पृष्टस्य उक्तिः = पृष्टोक्तिः, तस्याम् ।

**[सद्वत्]** सतीव = सद्वत् । ‘तत्र’ (७।१।५३) वत्प्र० । प्रथमा सि । ‘अव्ययस्य (३।२।७) सिलुप् ।

अनद्यतन इति निवृत्तम्, पृष्टस्य-धात्वर्थस्योक्तिः-प्रतिवचनं = पृष्टोक्तिः, सद्वत् इति वचनात् । अत्रेति कोऽर्थः ? वर्त्तमानाविषये शत्रानशावपि भवतः ।

**[किमकार्षीः कटं चैत्र !? ननु करोमि भोः ! ननु कुर्वन्तं कुर्वाणं मां पश्य]** ‘डुकृंग करणे’ (८८८) कृ । करोतीति कुर्वन् । ‘शत्रानशावेष्यति’० (५।२।२०) शतृप्र० → अत् । ‘कृग्-तनादेरुः’ (३।४।८३) उप्र० । ‘नामिनो गुणोऽक्ङिति’ (४।३।१) गु० अर् । ‘अतः शित्युत्’ (४।२।८९) अकारस्य उ० । प्रथमा सि । ‘ऋदुदितः’ (१।४।७०) नोऽन्तः । ‘दीर्घङ्याब्’० (१।४।४५) सिलुक् । पदस्य (२।१।८९) तलोपः । तम् = कुर्वन्तम् ।

कुरुते = कुर्वाणः । ‘शत्रानशावेष्यति’० (५।२।२०) आनशप्र० → आन । ‘कृग्-तनादेरुः (३।४।८३) उप्र० । ‘नामिनो गुणोऽक्ङिति’ (४।३।१) गु० अर् । ‘अतः शित्युत्’ (४।२।८९) अकारस्य उ० । ‘इवर्णादेरस्वे’० (१।२।२१) व्० , तम् = कुर्वाणम् ।

अस्मद् द्वितीया अम् । ‘लोकात्’ (१।१।३) “अद्”विश्लेषियइ । ‘त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्’ (२।१।११) “म”आदेशः । ‘लुगस्यादेत्यपदे’ (२।१।११३) अलोपः । ‘अमौ मः (२।१।१६) अम्० → म० । ‘युष्मदस्मदोः’ (२।१।६) द० → आ० । ‘समानानां’० (१।२।१) दीर्घः, पश्य ।

**[किमवोचः किञ्चिच्चैत्र !? ननु ब्रवीमि भोः ! ननु ब्रुवन्तं ब्रुवाणं मां पश्य]** ब्रूंग्क् व्यक्तायां वाचि (११२५) ब्रू । ब्रवीति = ब्रुवन् । ‘शत्रानशावेष्यति’० (५।२।२०) शतृप्र० → अत् । ‘संयोगात्’ (२।१।५२) उव् । प्रथमा सि । ‘ऋदुदितः’ (१।४।७०) नोऽन्तः । ‘दीर्घङ्याब्’० (१।४।४५) सिलुक् । ‘पदस्य’ (२।१।८९) तलोपः । तम् = ब्रुवन्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्रूते = ब्रुवाणः । 'शत्रानशावेष्यति'० (५।२।२०) आनश्प्र० → आन । 'संयोगात्' (२।१।५२) उव् । तम् = ब्रुवाणम् । ''मां'' पूर्ववत्, पश्य ॥छ॥

## न-न्वोर्वा ॥ ५।२।१८ ॥

**[ नन्वोः ]** नश्च नुश्च = ननू, तयोः = नन्वोः । सप्तमी ओस् ।

**[ वा ]** वा प्रथमा सि ।

**[ किमकार्षीः कटं चैत्र !? न करोमि भोः ! न कुर्वन्तं, न कुर्वाणं पश्य माम्, नाकार्षम् ]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी अम् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृ० आर् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ कस्तत्रावोचत् ? अहं नु ब्रवीमि, ब्रुवन्तं, ब्रुवाणं नु मां पश्य; अहं न्ववोचम् ]** 'बूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-ब्रूवोर्भू-वचावशिति' (४।४।१) ''वच्'' आदेशः । अद्यतनी दि → त् । 'शास्त्यसू-वक्ति-ख्यातेरङ्' (३।४।६०) अङ्प्र० → अ । 'श्वयत्यसू-वच-पतः श्वाऽऽस्थ-वोच-पप्तम्' (४।३।१०३) वोचादेशः । 'अड् धातोरादि'० (४।४।२९) अट् । अहं नु । ब्रू । वर्त्त० मिव् । 'ब्रूतः परादिः' (४।३।६३) ईत् → ई । 'नामिनो गुणोऽक्ङिति (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

## सति ॥ ५।२।१९ ॥

**[ सति ]** सत् सप्तमी ङि ।

सन् - विद्यमानो वर्त्तमान इत्यर्थः, स च प्रारब्धापरिसमाप्तः क्रियाप्रबन्धः ।

**[ जीवं न मारयति ]** जीव द्वितीया अम् । न प्रथमा सि । 'मृंत् प्राणत्यागे' (१३३३) मृ । मरन्तं(म्रियन्तं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ मांसं न भक्षयति ]** मांसं न 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । इत्यादौ नियमः प्रारब्धोऽसमाप्तश्च प्रतीयते ।

**[ तस्थुः स्थास्यन्ति गिरयः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै:-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र(२९) स्था । परोक्षा उस् । 'द्विर्धातुः परोक्षा-ङे०' (४।१।१) द्विः । 'अघोषे शिटः (४।१।४५) सलुक् । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) थ० → त० । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९८) आलुक् ।

**[ कूप आसीत् ]** 'असक् भुवि' (११०२) अस् । ह्यस्तनी दिव् → त् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । इट् । 'समानानां'० (१।२।१) दीर्घः । 'स्वरादेस्तासु' (४।४।३१) वृद्धिः । (एत्यस्तेर्वृद्धिः' (४।४।३०) वृद्धिः) ।

**[ कूपो बभूव ]** 'असक् भुवि' (११०२) अस् । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) अस्० → भू० । परोक्षा णव् । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'भू-स्वपोरदुतौ' (४।१।७०) उ० → अ० । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् । 'भुवो वः परोक्षा-ऽद्यतन्योः' (४।२।४३) ऊ० । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शत्रानशावेष्यति तु सस्यौ ॥ ५।२।२० ॥

**[ शत्रानशौ ]** शतृश्च आनश् च = शत्रानशौ ।

**[ एष्यति ]** 'इंण्क् गतौ' (१०७५) इ । इष्यतीति एष्यत्, तस्मिन् । अनेन शतृप्र० स्यपूर्वः । गु० ए ।

**[ तु ]** तु प्रथमा सि ।

**[ सस्यौ ]** सह स्येन वर्त्तेते इति सस्यौ । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सहस्य सभावः ।

**[ यान्, यान्तौ, यान्तः ]** 'यांक् प्रापणे' (१०६२) या । याति-यातः-यान्तीति यान्-यान्तौ-यान्तः । अनेन शतृप्र० → अत् । प्रथमा सि-औ-जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ शयानः, शयानौ, शयानाः ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेते-शयाते-शेरते इति शयानः-शयानौ-शयानाः । अनेन आनश्प्र० → आन । 'शीङ एः शिति' (४।३।१०४) शी० → शे० । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि-औ-जस् ।

**[ निरस्यन्, निरस्यमानः ]** निर् 'असूच् क्षेपणे' (१२२१) अस् । निरस्यति - निरस्यते वा इति निरस्यन् - निरस्यमानः । 'उपसर्गादस्योहो वा' (३।३।२५) इत्यनेनात्मनेपदम् । अनेन शतृप्र० → अत्-आनश्प्र० → आन । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[ पचन् ]** पचतीति पचन् । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ पचमानः ]** पचते = पचमानः । अनेन आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

एकविषयत्वाद् वर्त्तमानाऽपि यातीत्यादि, एवं सर्वत्र ।

**[ सन् ]** 'असक् भुवि' (११०२) अस् । अस्तीति सन् । अनेन शतृप्र० → अत् । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ अधीयानः ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । अधीते = अधीयानः । अनेन आनश्प्र० → आन । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् । 'समानानां'० (१।२।१) दीर्घः ।

**[ विद्यमानः ]** 'विदिंच् सत्तायाम्' (१२५८) विद् । विद्यते = विद्यमानः । अनेन आनश्प्र० → आन । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[ जुह्वत् ]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । जुहोतीति जुह्वत् । अनेन शतृप्र० → अत् । 'हवः शिति' (४।१।१२) द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'ह्विणोरप्विति व्-यौ' (४।३।१५) व्० । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ जानन् ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । जानातीति जानन् । अनेन शतृप्र० → अत् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०८) "जा" आदेशः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरादौ प्रत्यये –

**[पचत्तरः]** द्वयोर्मध्ये प्रकृष्टः पचन् = पचत्तरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[पचत्तमः]** बहूनां मध्ये प्रकृष्टः पचन् = पचत्तमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम० ।

**[पचतितराम्]** द्वयोर्मध्येऽतिशयेन पचति = पचतितराम् । 'द्वयोर्विभज्ये०' (७।३।६) तरप्प्र० → तर० । 'किं - त्याद्ये०' (७।३।८) तर० → तराम् ।

**[पचतितमाम्]** बहूनां मध्ये प्रकृष्टः पचति = पचतितमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० । 'किं-त्याद्येऽव्ययादसत्त्वे'० (७।३।८) तम० → तमाम्० ।

**[पचद्रूपः, पचतिरूपम्]** प्रशस्तं पचति = पचद्रूपः - पचतिरूपम् । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**[जल्पत्कल्पः, जल्पतिकल्पम्]** रप (३३५) - लप (३३६) - 'जल्प व्यक्ते वचने' (३३७) जल्प् । जल्पतीति । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । ईषदपरिसमाप्तः जल्पन् = जल्पत्कल्पः । ईषदपरिसमाप्तं जल्पति = जल्पतिकल्पम् । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० → कल्प । सि-अम् ।

**[पश्यद्देश्यः, पश्यतिदेश्यम्]** 'दृशूं प्रेक्षणे' (४९५) दृश् । पश्यतीति पश्यत् । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्'० (४।२।१०८) "पश्य"आदेशः । ईषदपरिसमाप्तः पश्यत् = पश्यद्देश्यः । ईषदपरिसमाप्तं पश्यति = पश्यतिदेश्यम् । 'अतमबादेरीषदसमाप्ते'० (७।३।११) देश्यप्प्र० → देश्य । सि - अम् ।

**[पठद्देशीयः, पठतिदेशीयम्]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठतीति । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । ईषदपरिसमाप्तः पठत् = पठद्देशीयः । ईषदपरिसमाप्तं पठति = पठतिदेशीयम् । 'अतमबादेरीषदसमाप्ते'० (७।३।११) देशीयर्प्र० → देशीय । सि-अम् ।

**[पचमानतरः]** अयमेषां मध्येऽतिशयेन पचमानः = पचमानतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[पचमानतमः]** बहूनां मध्ये प्रकृष्टः पचमानः = पचमानतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[पचतेतराम्]** द्वयोर्मध्ये प्रकृष्टः पचते = पचतेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'किं-त्याद्येऽव्ययादसत्त्वे'० (७।३।८) तर० → तराम्० ।

**[पचतेतमाम्]** बहूनां मध्ये प्रकृष्टः पचते = पचतेतमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'किं-त्याद्येऽव्ययादसत्त्वे'० (७।३।८) तम० → तमाम्० ।

**[कौर्वतः]** करोतीति कुर्वत् । अनेन शतृप्र० → अत् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अ० → उ० । 'इवर्णादेरस्वे'० (१।२।२१) व० । कुर्वतोऽपत्यम् = कौर्वतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः औ ।

**[पाचतः]** पचतीति पचत् । पचतोऽपत्यम् = पाचतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः आ ।

**[वैक्षमाणिः]** वि । वीक्षमाणस्याऽपत्यम् = वैक्षमाणिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कुर्वत्पाशः ]** निन्द्यं कुर्वत् = कुर्वत्पाशः । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० → पाश ।

**[ पचत्पाशः ]** 卐卐 निन्द्यं पचत् = पचत्पाशः । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० → पाश ।

**[ कुर्वच्चरः ]** 卐 भूतपूर्वः कुर्वत् = कुर्वच्चरः । 'भूतपूर्वे प्चरट्' (७।२।७८) प्चरट्प्र० → चर ।

**[ पचच्चरः ]** + भूतपूर्वः पचत् = पचच्चरः । 'भूतपूर्वे प्चरट्' (७।२।७८) प्चरट्प्र० → चर ।

उत्तरपदे- **[ कुर्वद्भक्तिः ]** भज्यत इति भक्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः (१।३।५०) ग० → क० । कुर्वन् भक्तिरस्य = कुर्वद्भक्तिः ।

**[ कुर्वाणभक्तिः ]** कुर्वाणो भक्तिरस्य = कुर्वाणभक्तिः ।

**[ कुर्वत्प्रियः ]** कुर्वन् प्रियोऽस्य = कुर्वत्प्रियः ।

**[ ब्रुवन्माठरः ]** मठरस्याऽपत्यं वृद्धम् = माठरः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । 'वृद्धिः स्वरे'० (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । ब्रुवन् चासौ माठरश्च = ब्रुवन्माठरः ।

**[ ब्रुवाणमाठरः ]** ब्रुवाणश्चासौ माठरश्च = ब्रुवाणमाठरः ।

**क्रियाया लक्षणं ज्ञापकं चिह्नम्,** तत्र -

**[ तिष्ठन्तोऽनुशासति गणकाः ]** तिष्ठन्तीति । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति - कृवु - धिवु - पा- घ्रा - ध्मा - स्था - म्ना - दाम्'० (४।२।१०८) "तिष्ठ"आदेशः । 'लुगस्यादेत्यापदे' (२।१।११३) अलोपः । प्रथमा जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । अनु 'शासूक् अनुशिष्टौ (१०९५) शास् । वर्त्त० अन्ति । 'अन्तो नो लुक् (४।२।९४) न्लुक् । गणक प्रथमा जस् ।

**[ शयाना भुञ्जते यवनाः ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेरते = शयानाः । अनेन आनश्प्र० → आन । 'शीङ एः शिति' (४।३।१०४) शी० → शे० । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा जस् । यवनानामपत्यानि । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) अञ्लुप् । प्रथमा जस् ।

**फलन्ती** वर्द्धते द्राक्षा, **पुष्प्यन्ती** वर्द्धतेऽब्जिनी ।

शयाना वर्धते दूर्वा, **आसीनं वर्धते बिसम्** ॥

**[ फलन्ती ]** पल (९८२) - 'फल गतौ' (९८३) फल् । फलतीति । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'अधातूदृदितः' (२।४।२) ङी ।

**[ पुष्प्यन्ती ]** 'पुष्पच् विकसने' (११५९) पुष्प् । पुष्प्यतीति । अनेन शतृप्र० → अत् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'श्य-शवः' (२।१।११६) अत्० → अन्त० । 'अधातूदृदितः' (२।४।२) ङी ।

**[ आसीनम् ]** 'आसिक् उपवेशने' (१११९) आस् । आस्ते = आसीनम् । अनेन आनश्प्र० → आन । 'आसीनः' (४।४।११५) आकारस्य ई । सि-अम् ।

---

卐卐 श० म० न्या० - निन्द्यः पचन् । एवमन्यत्रापि ।

卐 श० म० न्या० - कुर्वतो भूतपूर्वः । 'षष्ठ्या रूप्य- प्चरट्' (७।२।८०) प्चरट्प्र० → चर० ।

+ श० म० न्या० - पचतो भूतपूर्वः । 'षष्ठ्या रूप्य - प्चरट्' (७।२।८०) प्चरट्प्र० → चर० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वर्धते ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर ।

**[ बिसम् ]** बिस सि-अम् ।

क्रियाया हेतुर्जनकस्तत्र –

**[ अर्जयन् वसति ]** 'अर्ज अर्जने' (१४२) अर्ज् । अर्जन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । अर्जयतीति अर्जयन् । अनेन शतृप्र० → अत् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'वसं निवासे' (९९९) वस् । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् ।

एष्यति तु सस्यौ –

**[ यास्यन् ]** 'यांक् प्रापणे' (१०६२) या । यास्यति = यास्यन् । अनेन शतृप्र० → अत् – "स्य" आदौ च ।

**[ शयिष्यमाणः ]** 'शीङ्क् स्वप्ने' (११०५) शी । शयिष्यते = शयिष्यमाणः । अनेन आनश्प्र० → आन – "स्य" आदौ च । 'अतो म आने' (४।४।११४) मोऽन्तः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'शीङ एः शिति' (४।३।१०४) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् ।

**[ पक्ष्यन् ]** 'डुपचींष् पाके' (८९२) पच् । पक्ष्यति = पक्ष्यन् । अनेन शतृप्र० → अत् – आदौ स्यश्च ।

**[ पक्ष्यमाणः ]** पक्ष्यते = पक्ष्यमाणः । अनेन आनश्प्र० → आन-आदौ स्यश्च ।

**[ पक्ष्यत्तरः ]** प्रकृष्टः पक्ष्यन् = पक्ष्यत्तरः । 'द्वयोर्विभज्ये'० (७।३।६) तरप्प्र० → तर ।

**[ पक्ष्यमाणतमः ]** बहूनां मध्ये प्रकृष्टः पक्ष्यमाणः = पक्ष्यमाणतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[ पक्ष्यतितराम् ]** अयमनयोर्मध्येऽतिशयेन पक्ष्यति = पक्ष्यतितराम् । 'द्वयोर्विभज्ये'० (७।३।६) तरप्प्र० → तर । 'किं – त्याद्येऽव्ययादसत्त्वे'० (७।३।८) तर० → तराम् ।

**[ पक्ष्यतितमाम् ]** अयमेषां मध्ये प्रकृष्टः पक्ष्यति → पक्ष्यतितमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'किं – त्याद्येऽव्ययादसत्त्वे'० (७।३।८) तम० → तमाम् ।

सर्वेष्वेकविषयत्वाद् भविष्यन्त्यपि –

**[ पक्ष्यन् व्रजति ]** पक्ष्यन् पूर्ववत्, व्रजति ।

卐 **[ भोक्ष्यमाणो व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोक्ष्यते = भोक्ष्यमाणः । अनेन आनश्प्र० → आन – आदौ स्यश्च । 'अतो म आने' (४।४।११४) मोऽन्तः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (४।३।५०) ग० → क० । 'नाम्यन्तस्था – कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'र-षृवर्णान्नो ण'० (२।३।६२) णत्वम् । क्रियायां क्रियार्थायाम् ।

एकविषयत्वाच्च भविष्यन्त्यादयोऽपि-

**[ पाचको व्रजति ]** 'डुपचींष् पाके' (८९२) पच् । पक्ष्यतीति पाचकः । 'क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती' (५।३।१३) णकच्प्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः प० → पा० ।

---

卐 बृहद्वृत्तौ – पक्ष्यमाणो व्रजति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पक्तुं व्रजति ]** पचनाय = पक्तुम् । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ पाक्ष्यतः ]** पक्ष्यत् मण्ड्यते । पक्ष्यतोऽपत्यम् = पाक्ष्यतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ ।

**[ पाक्ष्यमाणिः ]** पक्ष्यमाणस्याऽपत्यम् = पाक्ष्यमाणिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः ।

**[ पक्ष्यमाणपाशः ]** निन्द्यं पक्ष्यमाणः = पक्ष्यमाणपाशः । 'निन्द्ये पाशप्' (७।३।४) पाशप्प्र० → पाश ।

**[ पक्ष्यद्भक्तिः ]** पक्ष्यत् भक्तिरस्य = पक्ष्यद्भक्तिः ।

**[ पक्ष्यमाणप्रियः ]** पक्ष्यमाणः प्रियोऽस्य = पक्ष्यमाणप्रियः ।

**[ जल्पिष्यन्तो ज्ञास्यन्ते पण्डिताः ]** रप (३३५) - लप (३३६) - 'जल्प व्यक्ते वचने' (३३७) जल्प् । जल्पिष्यन्तीति जल्पिष्यतः । अनेन शतृप्र० - "स्य" आदौ च । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । भविष्यन्ती स्यन्ते । 'ज्ञः' (३।३।८२) आत्मनेपदम् ।

सदेष्यतोरभावे तु वर्त्तमान-भविष्यत्कालयोः अभावे विशेषविहितत्वात् श्वस्तन्येव -

**[ श्वः पक्ता ]** श्वस् 'डुपचींष् पाके' (८९२) पच् । श्वस्तनी ता । 'च-जः क-गम्' (२।१।८६) च० → क० ।

बहुलाधिकाराद् द्रव्य-गुणयोर्लक्षणे हेतुहेतुमद्भावद्योतके त्यादियोगे च एतत्सूत्रनिर्दिष्टकार्यं न भवति -

**यः कम्पते सोऽश्वत्थः इत्यादि ।**

क्रियाया अपि लक्षणे चादियोगे न भवति-

**यः पचति च पठति च स चैत्रः ।**

शकारः शित्कार्यार्थः । ऋकारो ङ्याद्यर्थः ॥छ॥

## तौ माङ्याक्रोशेषु ॥ ५।२।२१ ॥

**[ तौ ]** तद् प्रथमा औ ।

**[ माङि ]** माङ् सप्तमी ङि ।

**[ आक्रोशेषु ]** आक्रोशतीति आक्रोशस्तेषु ।

**[ मा पचन् वृषलो ज्ञास्यति ]** माङ् → मा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । मा पाक्षीत्, मा पच, पचतीति पचन् । अनेन शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ मा पचमानोऽसौ मर्तुकामः ]** मा पचते = मा पचमानः । अनेन आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'मृंत् प्राणत्यागे' (१३३३) मृ । मरणाय = मर्तुम् । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'कमूङ् कान्तौ (७८९) कम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ। 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ। कामनं = कामः। 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ। 'णेरनिटि' (४।३।८३) णिङ्लोपः। मर्तुं कामोऽस्य = मर्तुकामः। 'तुमश्च मनः-कामे' (३।२।१४०) म्लोपः।

मा पाक्षीत्, मा पक्त, मा जीवीदित्यादि वाक्यमर्थकथनम्, यावता आक्रोशविवक्षायामनेन शत्रानशावेव, असरूपविधिनाप्यत्राद्यतनी नेष्टा। केचिदसरूपविधिमिच्छन्ति तन्मते वा वाक्यम्, यद्वा मा क्लेदयन्, मा क्लेदयमानः, मा प्राणान् धारयन्नित्यर्थान्तरेण वा वाक्यम्।

"मा जीवन् यः **परावज्ञादुःखदग्धोऽपि** जीवति।

तस्याजननिरेवास्तु, जननीक्लेशकारिणः' ॥ १ ॥

[ **शिशुपालवधे सर्गः-२** ]

[ **परावज्ञादुःखदग्धोऽपि** ] परेषामवज्ञा = परावज्ञा, सैव दुःखं, तेन दग्धोऽपि। शत्रानशोरनुवृत्तावपि तौ ग्रहणमवधारणार्थम्, तेनात्र विषये असरूपविधिनाऽप्यद्यतनी न भवति ॥छ॥

## वा वेत्तेः क्वसुः ॥ ५।२।२२ ॥

[ **वा** ] वा प्रथमा सि।

[ **वेत्तेः** ] वेत्ति पञ्चमी ङसि।

[ **क्वसुः** ] क्वसु प्रथमा सि। 'सो रुः' (२।१।७२) स० → र०। 'रः पदान्ते'० (१।३।५३) विसर्गः।

[ **साधुस्तत्त्वं विद्वान्, विदन्, वेत्ति** ] तत्त्व द्वितीया अम्। 'विदक् ज्ञाने' (१०९९) विद्। वेत्तीति विद्वान्। अनेन क्वसुप्र० → वस्। एवम्-विदन्। 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत्। प्रथमा सि। 'ऋदुदितः' (१।४।७०) नोऽन्तः। 'न्स्महतोः' (१।४।८६) दीर्घः। 'दीर्घङ्याब्'० (१।४।४५) सिलुक्। 'पदस्य' (२।१।८९) सलुक्।

[ **विदुषा कृतम्, विदता कृतम्** ] वेत्ति = विद्वान्, तेन = विदुषा - विदता। अनेन क्वसुप्र० → वस्, शतृप्र० → अत्। तृतीया टा। 'क्वसुष्मतौ च' (२।१।१०५) उष्।

[ **वैदुषः** ] अनेन निष्पन्नः विद्वस् मण्ड्यते। विदुषोऽयम् = वैदुषः। 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ। 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ। 'क्वसुष्मतौ च' (२।१।१०५) "उष्" आदेशः।

[ **वैदतः** ] विदतोऽयम् = वैदतः। 'प्राग् जितादण्' (६।१।१३) अण्प्र० → अ। 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० ऐ।

[ **विद्वद्भक्तिः** ] विद्वान् भक्तिरस्य = विद्वद्भक्तिः।

[ **विदद्भक्तिः** ] विदन् भक्तिरस्य = विदद्भक्तिः।

[ **विद्वाल्लँभते, विदल्लँभते** ] वेत्तीति विद्वान्। अनेन क्वसुप्र० → वस्, शतृप्र० → अत्। प्रथमा सि। 'ऋदुदितः' (१।४।७०) नोऽन्तः। 'न्स्महतोः' (१।४।८६) दीर्घः। 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक्। 'पदस्य' (२।१।८९) सलोपः। अग्रे लभते। 'लि लौ' (१।३।६५) लकारः।

ककारः कित्कार्यार्थः। उकारो ङ्याद्यर्थः ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पूङ् - यजः शानः ॥ ५।२।२३ ॥

**[ पूङ्यजः ]** पूङ् च यज् च = पूङ्यज्, तस्मात् ।

**[ शानः ]** शान प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ मलयं पवमानः ]** 'पूङ् पवने' (६००) पू । पवते = पवमानः । अनेन शानप्र० → आन० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 卐 तृन्नुदन्त'० (२।२।९०) इत्यादिना आनद्वारा कर्मषष्ठीनिषेधे मलयस्य संबन्धी पवमानः = मलयपवमान इति संबंधषष्ठीसमासः ।

**[ यजमानः ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजति-यजते वा = यजमानः । अनेन शानप्र० → आन० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । आनशा योगे न षष्ठीसमासो, न य यजेरफलवति कर्तरि सोऽस्तीति वचनम्, एवमुत्तरत्रापि ॥छ॥

## वयः-शक्ति-शीले ॥ ५।२।२४ ॥

**[ वयःशक्तिशीले ]** वयश्च शक्तिश्च शीलं च = वयःशक्तिशीलम्, तस्मिन् ।

**वयः प्राणिनां कालकृता बाल्याद्यवस्था ।**

**[ कतीह शिखण्डं वहमानाः ]** कति प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लुप् । इह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । शिखण्डम् = चूडाम् । 'वहीं प्रापणे' (९९६) वह् । वहतीत्येवंवयसः = वहमानाः । अनेन शानप्र० → आन० । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[ स्त्रियं गच्छमानाः ]** स्त्री द्वितीया अम् । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीत्येवंवयसः = गच्छमानाः । अनेन शानप्र० → आन० । 'कर्त्तर्यन'० (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छस्य च० । प्रथमा जस् ।

**शक्तिः = सामर्थ्यम् ।**

**[ कतीह हस्तिनं निघ्नानाः ]** कति प्रथमा जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लुप् । इह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । हस्तिन् द्वितीया अम् । नि 'हनंक् हिंसा-गत्योः' (११००) हन् । निहन्तुं शक्ताः = निघ्नानाः । अनेन शानप्र० → आन । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्न० । प्रथमा जस् ।

**[ समश्नानाः ]** सम् 'अशश् भोजने' (१५५८) अश् । अनेन शानप्र० → आन० । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । प्रथमा जस् ।

**शीलं = स्वभावः ।**

---

卐 श० म० न्या० - अत्र 'कर्मणि कृतः' (२।२।८३) इति षष्ठ्याः 'तृन्नुदन्ता०' (२।२।९०) इति निषेधात् 'कर्मणि' (२।२।४०) इति द्वितीया भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कतीहात्मानं वर्णयमानाः ]** कति प्रथमा जस् । 'डति-ष्णः'० (१।४।५४) जस्लुप् । इह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । आत्मन् द्वितीया अम् । 'वर्णण् वर्णक्रिया-विस्तार-गुणवचनेषु' (१८७०) वर्ण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलोपः । वर्णयतीत्येवंशीलाः = वर्णयमानाः । अनेन शानप्र० → आन० । 'कर्त्तर्यन'० (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा जस् ।

**[ परान् निन्दमानाः ]** पर द्वितीया शस् । 'णिदु कुत्सायाम्' (३११) णिद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) निद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) निन्द् । निन्दतीत्येवंशीलाः = निन्दमानाः । अनेन शानप्र० → आन० । कर्त्तर्यन'० (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । प्रथमा जस् ।

अनभिधानान्न वाऽसरूपः शतृः ॥छा॥

## धारीङोऽकृच्छ्रेऽतृश् ॥ ५।२।२५ ॥

**[ धारीङः ]** धारिश्च इङ् च = धारीङ्, तस्मात् ।

**[ अकृच्छ्रे ]** न कृच्छ्रः = अकृच्छ्रः, तस्मिन् ।

**[ अतृश् ]** अतृश् प्रथमा सि ।

**अकृच्छ्रः = सुखसाध्यः ।**

**[ धारयन् आचाराङ्गम् ]** 'धृंग् धारणे' (८८७) धृ । धरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अकृच्छ्रेण धारयति=धारयन् । अनेन अतृश्प्र० → अत् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः । आचाराङ्ग द्वितीया अम् ।

**[ अधीयन् द्रुमपुष्पीयम् ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । अकृच्छ्रेण अधीते = अधीयन् । अनेन अतृश्प्र० → अत् । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् । 'समानानां०' (१।२।१) दीर्घः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः । द्रुमस्य पुष्पम् = द्रुमपुष्पम्, द्रुमपुष्पमधिकृत्य कृतो ग्रन्थः = द्रुमपुष्पीयः । 'शिशुक्रन्दादिभ्य ईयः (६।३।२००) ईयप्र० । अथवा द्रुमपुष्पस्येयम् = द्रुमपुष्पीयः । 'काकतालीयादयः' (७।१।११७) ईयप्र० । अथवा द्रुमपुष्पमत्राऽस्ति । 'सूक्त-साम्नोरीयः' (७।२।७१) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलोपः । द्रुमपुष्पीय द्वितीया अम् । दशवैकालिकस्य प्रथममध्ययनम् ।

इङ् पञ्चमी ङसि - आनशि प्राप्ते, धारेरुभयप्राप्तौ वचनम् । वाऽसरूपोऽपि नेष्यते ॥छा॥

## सुग्-द्विषा-ऽर्हः सत्रि-शत्रु-स्तुत्ये ॥ ५।२।२६ ॥

**[ सुग्द्विषाऽर्हः ]** सुग् च द्विषश्च अर्हश्च(अर्ह् च) = सुग्द्विषाऽर्ह्, तस्मात् ।

**[ सत्रिशत्रुस्तुत्ये ]** सत्री च शत्रुश्च स्तुत्यश्च = सत्रिशत्रुस्तुत्यम्, तस्मिन् ।

**सत्री - यजमानः ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सर्वे सुन्वन्तः ]** सर्व प्रथमा जस् । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । 'षुंगृट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । सुन्वन्तीति सुन्वन्तः । अनेन अतृश्प्र० → अत् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'इवर्णादेरस्वे स्वरे'० (१।२।२१) व० । प्रथमा जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । यज्ञस्वामिन इत्यर्थः ।

**[ चौरं द्विषन्, चौरस्य द्विषन् ]** 'द्विषींक् अप्रीतौ' (११२६) द्विष् । द्वेष्टीति द्विषन् । अनेन अतृश्प्र० → अत् । प्रथमा सि । 'द्विषो वाऽतृशः' (२।२।८४) वा षष्ठी । शत्रुरित्यर्थः ।

**[ पूजामर्हन् ]** पूजा द्वितीया अम् । 'अर्ह पूजायाम्' (५६४) अर्ह् । अर्हतीति अर्हन् । अनेन अतृश्प्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः । प्रशस्य इत्यर्थः ।

**[ सुरां सुनोति ]** सुरा द्वितीया अम् । 'षुंगृट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । वर्त्त० तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[ भार्यां द्वेष्टि परं पश्यन्तीम् ]** द्वेष्टि पर द्वितीया अम् । पश्यतीति पश्यन्ती । 'शत्रानशावेष्यति'० (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्'० (४।२।१०८) ''पश्य''आदेशः । 'अधातूदृदितः' (२।४।२) ङी । 'श्य-शवः' (२।१।११६) अत्० → ''अन्त''आदेशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । द्वितीया अम् । भार्याम् ॥छा॥

## तृन् शील-धर्म-साधुषु ॥ ५।२।२७ ॥

**[ तृन् ]** तृन् प्रथमा सि ।

**[ शीलधर्मसाधुषु ]** शीलं च धर्मश्च साधुश्च = शीलधर्मसाधवः, तेषु ।

शीले-**[ कर्त्ता कटम् ]** 'डुकृंग् करणे' (८८८) कृ । करोतीत्येवंशीलः = कर्त्ता । अनेन णकाद्यपवादं तृन्प्र० → तृ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ वदिता जनापवादान् ]** 'वद व्यक्तायां वाचि' (९९८) वद् । वदतीत्येवंशीलः = वदिता । अनेन तृन्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । जनानामपवादाः = जनापवादास्तान्, करणं वदनं चास्य शीलमित्यर्थः ।

**धर्मः - कुलाद्याचारः -**

**[ वधूमूढां मुण्डयितारः श्राविष्ठायनाः ]** सूत्रादेशादिह यः मुण्डं कुर्वन्ति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) । णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । मुण्डयतीत्येवंधर्माणः = मुण्डयितारः । अनेन तृनप्र० → तृ० 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा जस् । 'तृ-स्वसृ-नप्तृ'० (१।४।३८) आर् ।

'श्रुंट् श्रवणे' (१२९६) श्रु । श्रूयतेऽनेन = श्रवः । 'पुं-नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । श्रवोऽस्ति आसाम् = श्रववत्यः । 'तदस्याऽस्त्यस्मिन्निति मतुः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपान्ता'० (२।१।९४) मस्य व० । अतिशयेन श्रववत्यः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवत्-ङीगतेत्यर्थः । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । श्रविष्ठाभिश्चन्द्रयुक्ताभिर्युक्तः कालः । 'चन्द्रयुक्तात् काले'० (६।२।६) अण्प्र०-''लुप् त्वप्रयुक्ते'' लुप् । ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) आयनिवृत्तिः । श्रविष्ठासु जाता । 'श्रविष्ठा-ऽषाढादीयण् च' (६।३।१०५) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । पुनरेव 'आत्' (२।४।१८) आप्प्र० → आ । श्रविष्ठाया अपत्यानि वृद्धानि । 'अश्वादेः' (६।१।४९) आयनञ्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । प्रथमा जस् ।

**[ श्राद्धे सिद्धमन्नमपहर्तार आह्वरकाः ]** श्राद्ध सप्तमी ङि । सिद्ध द्वितीया अम् । अन्न द्वितीया अम् । अपहरतीत्येवंधर्माणः = अपहर्तारः । अनेन तृन्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा जस् । 'तृ-स्वसृ-नप्तृ'० (१।४।३८) आर् । मुण्डनादि तेषां कुलधर्म इत्यर्थः ।

साधौ - **[ गन्ता खेलः ]** गच्छतीत्येवंसाधुः = गन्ता खेलः । अनेन तृन्प्र० → तृ । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) मस्य न्० । साधु गच्छतीत्यर्थः ।

**[ कर्त्ता विकटः ]** करोतीत्येवंसाधुः = कर्त्ता विकटः । अनेन तृन्प्र० → तृ० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । साधु करोतीत्यर्थः ।

**[ कर्त्ता कटस्य ]** करोतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ०, कटस्य ।

बहुवचनं 'सन्-भिक्षा-ऽऽशंसेरुः' (५।२।३३) इत्यादौ यथासंख्यपरिहारार्थम् । नकारः सामान्यग्रहणविघातार्थः ॥छ॥

**भ्राज्यलङ्कृग् - निराकृग् - भू - सहि - रुचि - वृति - वृधि - चरि - प्रजना-ऽपत्रप इष्णुः ॥ ५।२।२८ ॥**

**[ भ्राज्यलङ्कृग्निराकृग्भूसहिरुचिवृत्तिवृधिचरिप्रजनाऽपत्रपः ]** भ्राजिश्च अलङ्कृग् च निराकृग् च भूश्च सहिश्च रुचिश्च वृतिश्च वृधिश्च चरिश्च प्रजनश्च अपत्रप् च = भ्राज्यलङ्कृग्निराकृग्भूसहिरुचिवृतिवृधिचरिप्रजनाऽपत्रप्, तस्मात् ।

**[ इष्णुः ]** इष्णु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ भ्राजिष्णुः ]** राजृग् (८९३) 'टुभ्राजि दीप्तौ' (८९४) भ्राज् । भ्राजनधर्मा - साधु भ्राजते वा = भ्राजिष्णुः । अनेन इष्णुप्र० । अग्रेतने ''भ्राजिष्णुना लोहितचन्दनेन'' ।

**[ अलङ्करिष्णुः ]** अलम् 'डुकृंग् करणे' (८८८) कृ । अलङ्करोतीत्येवंशीलः = अलङ्करिष्णुः । अनेन इष्णुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ निराकरिष्णुः ]** निराकरणधर्मा - साधु निराकरोति वा = निराकरिष्णुः । अनेन इष्णुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ भविष्णुः ]** 'भू सत्तायाम्' (१) भू । भवनशीलो भवनधर्मा-साधु भवतीति वा = भविष्णुः । अनेन इष्णुप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सहिष्णुः ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । सहनशीलः - सहनधर्मा - साधु सहते वा = सहिष्णुः । अनेन इष्णुप्र० ।

**[ रोचिष्णुः ]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचनशीलो रोचनधर्मा - साधु रोचते वा = रोचिष्णुः । अनेन इष्णुप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ वर्त्तिष्णुः ]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तनशीलो वर्त्तनधर्मा - साधु वर्त्तते वा = वर्त्तिष्णुः । अनेन इष्णुप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु, अर् ।

**[ वर्धिष्णुः ]** 'वृधूङ् वृद्धौ' (६५७) वृध् । वर्धनशीलो वर्धनधर्मा-साधु वर्धते वा = वर्धिष्णुः । अनेन इष्णुप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ चरिष्णुः ]** 'चर भक्षणे च' (४१०) चर् । चरणशीलश्चरणधर्मा-साधु चरति वा = चरिष्णुः । अनेन इष्णुप्र० ।

**[ प्रजनिष्णुः ]** प्र 'जनैचि प्रादुर्भावे' (१२६५) जन् । प्रजननशीलः - प्रजननधर्मा - साधु प्रजानाति(प्रजायते) वा = प्रजनिष्णुः । अनेन इष्णुप्र० ।

**[ अपत्रपिष्णुः ]** अप 'त्रपौषि लज्जायाम्' (७६२) त्रप् । अपत्रपनशीलोऽपत्रपनधर्मा - साधु अपत्रपते वा = अपत्रपिष्णुः । अनेन इष्णुप्र० ।

सर्वत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ॥छ॥

## उदः पचि-पति-पदि-मदेः ॥ ५।२।२९ ॥

**[ उदः ]** उद्(त्) पञ्चमी ङसि ।

**[ पचिपतिपदिमदेः ]** पचिश्च पतिश्च पदिश्च मदिश्च = पचिपतिपदिमदि, तस्मात् ।

**[ उत्पचिष्णुः ]** उत् 'डुपचींष् पाके' (८९२) पच् । उत्पचनशीलः - उत्पचनधर्मा - साधु उत्पचति वा = उत्पचिष्णुः । अनेन इष्णुप्र० ।

**[ उत्पतिष्णुः ]** उत् 'पत्लृ गतौ' (९६२) पत् । उत्पतनशीलः - उत्पतनधर्मा - साधु उत्पतति वा = उत्पतिष्णुः । अनेन इष्णुप्र० ।

**[ उत्पदिष्णुः ]** उत् 'पदिंच् गतौ' (१२५७) पद् । उत्पदनशीलः- उत्पदनधर्मा - साधु उत्पद्यते वा = उत्पदिष्णुः । अनेन इष्णुप्र० ।

**[ उन्मदिष्णुः ]** उत् 'मदैच् हर्षे' (१२३६) मद् । उन्मदनशीलः - उन्मदनधर्मा - साधु उन्माद्यति वा = उन्मदिष्णुः । अनेन इष्णुप्र० । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ॥छ॥

## भू-जेः ष्णुक् ॥ ५।२।३० ॥

**[ भूजेः ]** भूश्च जिश्च = भूजि, तस्मात् ।

**[ ष्णुक् ]** ष्णुक् प्रथमा सि ।

**[ भूष्णुः ]** 'भू सत्तायाम्' (१) भू । भवनशीलो भवनधर्मा-साधु भवति वा = भूष्णुः । अनेन ष्णुक्प्र० → ष्णु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ जिष्णुः ]** 'जिं अभिभवे' (८) जि । जयनशीलो जयनधर्मा - साधु जयति वा = जिष्णुः । अनेन ष्णुक्प्र० → ष्णु ।

ककारः कित्कार्यार्थः, यथा गुणो न स्यात् ॥छ॥

## स्था-ग्ला-म्ला-पचि-परिमृजि-क्षेः स्नुः ॥ ५।२।३१ ॥

**[ स्थाग्लाम्लापचिपरिमृजिक्षेः ]** स्थाश्च ग्लाश्च म्लाश्च पचिश्च परिमृजिश्च क्षिश्च = स्थाग्लाम्लापचिपरिमृजिक्षि, तस्मात् ।

**[ स्नुः ]** स्नु प्रथमा सि ।

**[ स्थास्नुः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष० (१)।सूत्र(२९) स्था । स्थानशीलः-स्थानधर्मा-साधु तिष्ठति वा = स्थास्नुः । अनेन स्नुप्र० ।

**[ ग्लास्नुः ]** 'ग्लैं हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ग्ला । ग्लानशीलो ग्लानधर्मा - साधु ग्लायति वा = ग्लास्नुः । अनेन स्नुप्र० ।

**[ मलास्नुः ]** 'म्लैं गात्रविनामे' (      ) म्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) म्ला । म्लानशीलो म्लानधर्मा - साधु म्लायति वा = म्लास्नुः । अनेन स्नुप्र० ।

**[ पक्ष्णुः ]** 'डुपचींष् पाके' (८९२) पच् । पचनशीलः - पचनधर्मा - साधु पचति वा = पक्ष्णुः । अनेन स्नुप्र० । 'च-जःक-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ परिमाक्ष्र्णुः ]** परि 'मृजौक् शुद्धौ' (१०९७) मृज् । परिमार्जनशीलः-परिमार्जनधर्मा - साधु परिमार्ष्टि वा = परिमाक्ष्र्णुः । अनेन स्नुप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'मृजोऽस्य वृद्धिः' (४।३।४२) वृ० आ । 'यज-सृज-मृज'० (२।१।८७) ज० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ क्षेष्णुः ]** 'क्षि क्षये' (१०) क्षि । क्षयनशीलः - क्षयनधर्मा - साधु क्षयति वा = क्षेष्णुः । अनेन स्नुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । '२-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ॥छ॥

## त्रसि-गृधि-धृषि-क्षिपः क्नुः ॥ ५।२।३२ ॥

**[ त्रसिगृधिधृषिक्षिपः ]** त्रसिश्च गृधिश्च धृषिश्च क्षिप् च = त्रसिगृधिधृषिक्षिप्, तस्मात् ।

**[ क्नुः ]** क्नु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ त्रस्नुः ]** 'त्रसैच् भये' (११७१) त्रस् । त्रशनशीलः - त्रसनधर्मा - साधु त्रस्यति वा = त्रस्नुः । अनेन क्नुप्र० → नु ।

**[ गृध्नुः ]** 'गृधूच् अभिकाङ्क्षायाम्' (११८७) गृध् । गर्द्धनशीलो गर्द्धनधर्मा - साधु गृध्यति वा = गृध्नुः । अनेन क्नुप्र० → नु ।

**[ धृष्णुः ]** 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । धर्षणशीलो धर्षणधर्मा - साधु धृष्णोति वा = धृष्णुः । अनेन क्नुप्र० → नु । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्षिप्नुः ]** 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । 'क्षिपंच् प्रेरणे' (११५८) क्षिप् । क्षेपणशीलः - क्षेपणधर्मा - साधु क्षिपति - क्षिप्यति वा = क्षिप्नुः । अनेन क्नुप्र० → नु ॥छ॥

## सन्-भिक्षा-ऽऽशंसेरुः ॥ ५।२।३३ ॥

**[ सन्भिक्षाऽऽशंसेः ]** सन् च भिक्ष् च आशंसिश्च = सन्भिक्षाऽऽशंसि, तस्मात् ।

**[ उः ]** उ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ चिकीर्षुः ]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो'० (२।३।६३) दीर्घः । चिकीर्षणशीलः - चिकीर्षणधर्मा - साधु चिकीर्षति वा = चिकीर्षुः । अनेन उप्र० । 'अतः' (४।३।८२) अलोपः ।

**[ जिहीर्षुः ]** 'हृंग् हरणे' (८८५) हृ । हर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः'० (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः । जिहीर्षणशीलो जिहीर्षणधर्मा - साधु जिहीर्षति वा = जिहीर्षुः । अनेन उप्र० । 'अतः' (४।३।८२) अलोपः ।

**[ भिक्षुः ]** 'भिक्षि याच्ञायाम्' (८८०) भिक्ष् । भिक्षत इत्येवंशीलो धर्मा-साधुर्वा = भिक्षुः । अनेन उप्र० ।

**[ आशंसु ]** "आशंस्" इति आङः 'शसुङ् इच्छायाम्' (८५३) इत्यस्य ग्रहणम्, न तु 'शंसू स्तुतौ च' (५५०) इत्यस्य, तत्राङ्योगस्यानियतत्वात् । आशंसनशीलः - आशंसनधर्मा - साधु आशंसते वा = आशंसुः । अनेन उप्र० ॥छ॥

## विन्द्विच्छू ॥ ५।२।३४ ॥

**[ विन्द्विच्छू ]** विन्दुश्च इच्छुश्च = विन्द्विच्छू । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) औता सह ऊ ।

**[ विन्दुः ]** 'विदक् ज्ञाने' (१०९९) विद् । वेदनशीलो वेदनधर्मा-साधु वेत्ति वा = विन्दुः । अनेन उप्र० - न् उपान्त्ये निपात्यते ।

**[ इच्छुः ]** 'इषत् इच्छायाम्' (१४१९) इष् । एषणशीलः - एषणधर्मा - साधु इच्छति वा = इच्छुः । अनेन उप्र० - षस्य छत्वं निपात्यते ।

**[ अपां विन्दुः ]** अप् षष्ठी आम् । 'विदु अवयवे' (३१०) विद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) विन्द् । विन्दते हलं = विन्दुः (?) (विन्दति = अवयवं प्राप्नोतीति विन्दुः) । 'भृ - मृ - तृ - त्सरि - तनि - धन्यनि - मनि - मस्जि - शी - वटि - कटि - पटि - गडि - चञ्च्यसि - वसि - त्रपि - शृ - स्वृ - स्निहि - क्लिदि - कन्दीन्दि - विन्द्यन्धि - बन्ध्यणि - लोष्टि - कुन्थिभ्य उः' (उणा० ७१६) उप्र० ॥छ॥

## शॄ - वन्देरारुः ॥ ५।२।३५ ॥

**[ शॄवन्देः ]** शॄश्च वन्दिश्च = शॄवन्दि, तस्मात् ।

**[ आरुः ]** आरु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ शरारुः ]** कृ (१५२९) - मृ (१५३०) - 'शृश् हिंसायाम्' (१५३१) शृ । शृणातीत्येवंशीलः = शरारुः । अनेन आरुप्र० ।

**[ विशरारुः ]** विशर्यत इत्येवंशीलः कर्मकर्तरि विशरारुः । अनेन आरुप्र० ।

**[ वन्दारुः ]** 'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) वन्द् । वन्दत इत्येवंशीलः = वन्दारुः । अनेन आरुप्र० ॥छ॥

## दा - ट्धे - सि - शद - सदो रुः ॥ ५।२।३६ ॥

**[ दाट्धेसिशदसदः ]** दाश्च ट्धेश्च सिश्च शदश्च सद् च = दाट्धेसिशदसद्, तस्मात् ।

**[ रुः ]** रु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ दारुः ]** 'डुदांगक् दाने' (११३८) दा । 'देंङ्, पालने' (६०४) दे । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । 'दां दाने' (७) दा । 'दों छेदने' (११४८) दो । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । 'दांव्क् लवने' (१०७०) दा । 'दैंव् शोधने' (२९) दै । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । ददाति - दयते - यच्छति - द्यति - दाति - दायति वा इत्येवंशीलो दारुः । अनेन रुप्र० ।

कथं कर्मणि रुप्रत्यय इत्याशंकार्थः-

**[ दारु काष्ठम् ]** द्यति - छिद्यति तदिति दारु काष्ठम् । 'शिग्रु - गेरु - नमेर्वादयः' (उणा० ८११) रुप्र० । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । अत्र औणादिकः कर्मणि रुः ।

**[ धारुर्वत्सो मातरम् ]** 'ट्धें पाने' (२८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । धयतीत्येवंशीलो धर्मा - साधुर्वा = धारुः । अनेन रुप्र० । प्रथमा सि । वत्स प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । मातृ द्वितीया अम् । 'अर्डौ च' (१।४।३९) अर् ।

**[ सेरुः ]** 'षिंग्ट् बन्धने' (१२८७) षि । 'षः सोऽष्ट्यै'० (२।३।९८) सि । सिनोतीत्येवंशीलः = सेरुः । अनेन रुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ शद्रुः ]** 'शद्लृं शातने' (९६७) शद् । शीयत इत्येवंशीलो धर्मा-साधुर्वा = शद्रुः । अनेन रुप्र० ।

**[ सद्रुः ]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै ष्ठिव-ष्वष्कः' (२।३।९८) सद् । सीदतीत्येवंशीलो धर्मा-साधुर्वा = सद्रुः । अनेन रुप्र० ।

**[ दधिर्गाः ]** 'डुधांग्क धारणे च' (११३९) धा । दधातीत्येवंशीलो दधिः । 'सस्रि - चक्रि - दधि - जज्ञि - नेमिः' (५।२।३९) दधि निपात्यते । ट्धेग्रहणाद् दारूपमिह गृह्यते न संज्ञा ॥छ॥

## शीङ्- श्रद्धा - निद्रा - तन्द्रा - दयि - पति - गृहि - स्पृहेरालुः ॥ ५।२।३७ ॥

**[ शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेः ]** शीङ् च श्रद्धा च निद्रा च तन्द्रा च दयिश्च पतिश्च गृहिश्च स्पृहिश्च = शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहि, तस्मात् ।

**[ आलुः ]** आलु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ शयालुः ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेते इत्येवंशीलः = शयालुः । अनेन आलुप्र० । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ श्रद्धालुः ]** श्रत्पूर्व० 'डुधांग्क् धारणे च' (११३९) धा । श्रद्धत्ते इत्येवंशीलः = श्रद्धालुः । अनेन आलुप्र० ।

**[ निद्रालुः ]** नि 'द्रांक् कुत्सितगतौ' (१०६६) द्रा । 'द्रैं स्वप्ने' (३४) द्रै । 'आत् सन्ध्य०' (४।२।१) द्रा । निद्राति-निद्रायति वा इत्येवंशीलः = निद्रालुः । अनेन आलुप्र० ।

**[ तन्द्रालुः ]** तत् द्राति - द्रायति वा इत्येवंशीलः = तन्द्रालुः । अनेन आलुप्र० । तदो षष्ठी ङस् - दस्य नकारो निपात्यते च । तन्द्रेति सौत्रो वा धातुः - तन्द्र(न्द्रा) । तन्द्र(न्द्रा)तीत्येवंशीलः = तन्द्रालुः । अनेन आलुप्र० ।

**[ दयालुः ]** 'देंङ् पालने' (६०४) दे । दयत इत्येवंशीलः = दयालुः । अनेन आलुप्र० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पतयालुः ]** 'पतण् गतौ' (१८७८) पत । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः'(४।३।८२) अलोपः । पतयतीत्येवंशीलः = पतयालुः । अनेन आलुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ गृहयालुः ]** 'गृहणि ग्रहणे' (१९३९) गृह । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । गृहयते इत्येवंशीलः = गृहयालुः । अनेन आलुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

पति - गृहीति वा सौत्रो धातुः ।

**[ स्पृहयालुः ]** 'स्पृहण् ईप्सायाम्' (१९२८) स्पृह । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । स्पृहयतीत्येवंशीलः = स्पृहयालुः । अनेन आलुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ मृगयालुः ]** 'मृगणि अन्वेषणे' (१९३०) मृग । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । मृगयति(ते) इत्येवंशीलः = मृगयालुः । मतान्तरेऽनेनैव आलुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ लज्जालुः ]** ओलजैङ् (१५६९) - 'ओलस्जैति व्रीडे' (१४७०) लस्ज् । लज्जति(ते) इत्येवंशीलः = लज्जालुः । 'लस्जीर्ष्यि-शलेरालुः' (उणा० ८२२) आलुप्र० । 'धुटस्तृतीयः' (२।१।७६) स० → द० । 'तवर्गस्य श्चवर्ग ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) द० → ज० ।

**[ ईर्ष्यालुः ]** 'ईर्ष्य ईर्ष्यार्थाः' (४०२) ईर्ष्य । ईर्ष्यतीत्येवंशीलः = ईर्ष्यालुः । 'लस्जीर्ष्यि-शलेरालुः' (उणा० ८२२) आलुप्र० ।

**[ शलालुः ]** पल (९८२) - फल (९८३) - 'शल गतौ' (९८४) शल् । शलतीत्येवंशीलः = शलालुः । 'लस्जीर्ष्यि-शलेरालुः' (उणा० ८२२) आलुप्र० ।

**[ कृपालुः ]** कृपा अस्याऽस्ति = कृपालुः । 'कृपा - हृदयादालुः' (७।२।४२) आलुप्र० ।

**[ हृदयालुः ]** हृदयमस्याऽस्ति = हृदयालुः । 'कृपा - हृदयादालुः' (७।२।४२) आलुप्र० ॥छ॥

### डौ सासहि - वावहि - चाचलि - पापति ॥ ५।२।३८ ॥

**[ डौ ]** ङि सप्तमी ङि ।

**[ सासहिवावहिचाचलिपापति ]** सासहिश्च वावहिश्च चाचलिश्च पापतिश्च = सासहिवावहिचाचलिपापति ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

अत एव वचनात् ङिरपि अनुवादात् कथनात् विधिर्ज्ञायते ।

**[ सासहिः ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै - ष्ठिव - ष्वष्कः' (२।३।९८) सह् । भृशं पुनः पुनर्वा सहते । 'व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा' (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । सासह्यते इत्येवंशीलः = सासहिः । अनेन ङि निपातनात् 'अतः' (४।३।८२) अलोपः । 'योऽशिति' (४।३।८०) यलुक् ।

**[ वावहिः ]** 'वहीं प्रापणे' (९९६) वह् । भृशं पुनः पुनर्वा वहते । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वावह्यत इत्येवंशीलः = वावहिः । अनेन ङि निपातनात् 'अतः' (४।३।८२) अलोपः । 'योऽशिति' (४।३।८०) यलुक् ।

**[ चाचलिः ]** 'चल कम्पने' (९७२) चल् । कुटिलं चलति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । चाचल्यत इत्येवंशीलः = चाचलिः । अनेन ङि निपातनात् 'अतः' (४।३।८२) अलोपः । 'योऽशिति' (४।३।८०) यलुक् ।

**[ पापतिः ]** 'पत्लृ गतौ' (९६२) पत् । कुटिलं पतति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० । 'सन्-यङश्च' (४।३।३) द्विः । 'वञ्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दोऽन्तो नीः' (४।१।५०) "नी" आगमः । पनीपत्यते इत्येवंशीलः = पापतिः । अनेन ङि निपातनात् न्यागमाभावः ।

ङाविति ङकारः 'तृन्नुदन्ता-ऽव्यय-क्वस्वाना'० (२।२।९०) इत्यत्र विशेषणार्थः ॥छा।

## सस्रि-चक्रि-दधि-जज्ञि-नेमि ॥ ५।२।३९ ॥

**[ सस्रिचक्रिदधिजज्ञिनेमि ]** सस्रिश्च चक्रिश्च दधिश्च जज्ञिश्च नेमिश्च = सस्रिचक्रिदधिजज्ञिनेमि ।

**[ सस्रिः ]** 'सृं गतौ' (२५) सृ । सरतीत्येवंशीलः = सस्रिः । अनेन ङि → इ - द्वित्वं निपात्यते । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० ।

**[ चक्रिः ]** 'डुकृंग् करणे' (८८८) कृ । करोतीत्येवंशीलः = चक्रिः । अनेन ङि - द्वित्वं च निपात्यते । 'ऋतोऽत्' (४।१।३८) ऋ० → अ० । कस्य चत्वं च ।

**[ दधिः ]** 'डुधांग्क् धारणे च' (११३९) धा । दधातीत्येवंशीलः = दधिः । अनेन ङि - यथासंभवं द्विर्वचनम् ।

**[ जज्ञिः ]** जायते - जानाति वा इत्येवंशीलः = जज्ञिः । अनेन ङि - यथासंभवं द्विर्वचनम् ।

**[ नेमिः ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमतीत्येवंशीलः = नेमिः । अनेन ङि - द्विर्वचनाभावः - एत्वं च निपातनात् ॥छा।

## शॄ-कम-गम-हन-वृष-भू-स्थ उकण् ॥ ५।२।४० ॥

**[ शॄकमगमहनवृषभूस्थः ]** शॄश्च कमश्च गमश्च हनश्च वृषश्च भूश्च स्थाश्च = तत्, तस्मात् । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ उकण् ]** उकण् प्रथमा सि ।

**[ शारुकः ]** कॄ (१५२९) - मॄ (१५३०) - 'शॄश हिंसायाम्' (१५३१) शॄ । शृणातीत्येवंशीलः = शारुकः । अनेन उकणप्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रशारुकः शरः ]** प्रशृणातीत्येवंशीलः = प्रशारुकः । अनेन उकण्प्र० → उक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ कामुकः ]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । कामयते इत्येवंशीलः = कामुकः । अनेन उकण्प्र० → उक । 'णेरनिटि' (४।३।८३) णिङ्लुक् ।

**[ कामुकी रिरंसुः ]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । कामयते इत्येवंशीलः = कामुकः । अनेन उकण्प्र० → उक । 'णेरनिटि' (४।३।८३) णिङ्लुक् । 'भाज-गोण-नाग-स्थल-कुण्ड०' (२।४।३०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'रमिं क्रीडायाम्' (७८९) रम् । रन्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'सन्यस्य' (४।१।५९) इ । रिरंसणं = रिरंसुः । 'सन्-भिक्षा-ऽऽशंसेरुः' (५।२।३३) उप्र० । 'अतः' (४।३।८२) अलुक् ।

**[ कामुका अन्यस्य स्त्रियो भवन्ति ]** कामि मण्ड्यते । कामुका येच्छां विना कामयते = कामुकाः । अनेन उकण्प्र० → उक । 'णेरनिटि' (४।३।८३) णिङ्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा जस् । अन्यस्य स्त्रियो भवन्ति, अन्यस्येत्यत्र 'अकमेरुकस्य' (२।२।९३) इत्यत्र कमिवर्जनात् न कर्मषष्ठी निषेधः ।

**[ गामुकः ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीत्येवंशीलः = गामुकः । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ आगामुकः स्वगृहम् ]** आगच्छतीत्येवंशीलः = आगामुकः । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । स्वगृहमित्यत्र 'अकमेरुकस्य' (२।२।९३) इत्यनेन षष्ठीनिषेधः ।

**[ घातुकः ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हन्तीत्येवंशीलः = घातुकः । अनेन उकण्प्र० → उक । 'ञ्णिति घात्' (४।३।१००) "घात्" आदेशः ।

**[ आघातुको व्याधः ]** आहन्तीत्येवंशीलः = आघातुकः । अनेन उकण्प्र० → उक । 'ञ्णिति घात्' (४।३।१००) "घात्"आदेशः, व्याधिः ।

**[ वर्षुकः ]** जिषू (५२२) - विषू (५२३) मिषू (५२४) निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । वर्षतीत्येवंशीलः = वर्षुकः । अनेन उकण्प्र० → उक । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ प्रवर्षुकः पर्जन्यः ]** प्रवर्षतीत्येवंशीलः = प्रवर्षुकः । अनेन उकण्प्र० → उक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर्, पर्जन्यः ।

**[ भावुकः ]** 'भू सत्तायाम्' (१) भू । भवतीत्येवंशीलः = भावुकः । अनेन उकण्प्र० → उक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ प्रभावुकः क्षत्रियः ]** प्रभवतीत्येवंशीलः = प्रभावुकः । अनेन उकण्प्र० → उक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव्, क्षत्रियः ।

**[ स्थायुकः प्रमत्तः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या० सं० वक्ष०(१)/सूत्र (२९) स्था । तिष्ठतीत्येवंशीलः = स्थायुकः । अनेन उकण्प्र० → उक । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय्, प्रमत्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ उपस्थायुको गुरुम् ]** 'उपतिष्ठतीत्येवंशीलः = उपस्थायुकः । अनेन उकण्प्र० → उक । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय्, गुरुम् ।

**[ गुणानधिष्ठायुकः ]** गुण द्वितीया शस् । अधितिष्ठतीत्येवंशीलः = अधिष्ठायुकः । अनेन उकण्प्र० → उक । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अधेः शीङ्-स्था-ऽऽस आधारः' (२।२।२०) इत्यनेन आधारस्य कर्मसंज्ञा । 'कर्मणि कृतः' (२।२।८३) इत्यनेन षष्ठीप्राप्ता 'अकमेरुकस्य' (२।२।९३) इत्यनेन निषिध्यते ।।छा।

## लष-पत-पदः ॥ ५।२।४१ ॥

**[ लषपतपदः ]** लषश्च पतश्च पद् च = लषपतपद्, तस्मात् ।

**[ अपलाषुकं नीचसांगत्यम् ]** 'लषी कान्तौ' (९२७) लष्, अपपूर्व० । अपलषतीत्येवंशीलमपलाषुकं नीचसांगत्यम् । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अभिलाषुकः ]** अभिलषतीत्येवंशीलः = अभिलाषुकः । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ उत्पातुकं ज्योतिः ]** 'पत्लृ गतौ' (९६२) पत्, उत्पूर्व० । उत्पततीत्येवंशीलमुत्पातुकम् । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ, ज्योतिः ।

**[ प्रपातुका गर्भाः ]** प्रपतती(न्ती)त्येवंशीलाः = प्रपातुका गर्भाः । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा जस् ।

**[ उपपादुका देवाः ]** उप 'पदिंच् गतौ' (१२५७) पद् । उपपद्यन्त इत्येवंशीलाः = उपपादुका देवाः । अनेन उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा जस् ।।छा।

## भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चाऽनः ॥ ५।२।४२ ॥

**[ भूषाक्रोधार्थजुसृगृधिज्वलशुचः ]** भूषा च क्रोधश्च = भूषाक्रोधौ, भूषाक्रोधावर्थौ येषां ते = भूषाक्रोधार्थाः । भूषाक्रोधार्थाश्च जुश्च सृश्च गृधिश्च ज्वलश्च शुच् च = भूषाक्रोधार्थजुसृगृधिज्वलशुच्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ अनः ]** अन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते'० (१।३।५३) विसर्गः ।

**[ भूषणः कुलस्य ]** 'भूष अलङ्कारे' (१७५६) भूष् । 'चुरादि'० (३।४।१७) णिच्प्र० । भूषयतीत्येवंशीलः = भूषणः कुलस्य । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ मण्डना गगनस्य भाः ]** 'मडुण् भूषायाम्' (१६३३) मड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) मण्ड् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । मण्डयतीत्येवंशीला = मण्डना । गगनस्य भाः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ प्रसाधनः ]** राधं (१३०४) - 'साधंट् संसिद्धौ' (१३०५) साध् । साध्नुवन्तं प्रयुङ्क्ते' । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । प्रसाधयतीत्येवंशीलः = प्रसाधनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्रोधनः ]** 'क्रुधंच् कोपे' (११८४) क्रुध् । क्रुध्यतीत्येवंशीलः = क्रोधनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ कोपनः ]** 'कुपच् क्रोधे' (११९१) कुप् । कुप्यतीत्येवंशीलः = कोपनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ रोषणः ]** 'रुषच् रोषे' (१२१५) रुष् । रुष्यतीत्येवंशीलः = रोषणः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

जवतिः सौत्रो वेगाख्ये संस्कारे वर्तते, तेन चल्यर्थद्वारेण न सिध्यतीहोपादानम् ।

**[ जवनः ]** 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः । जवतीत्येवंशीलः = जवनः । अनेन अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ सरणः ]** 'सृं गतौ' (२५) सृ । सरतीत्येवंशीलः = सरणः । अनेन अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ गर्धनः ]** 'गृधूच् अभिकाङ्क्षायाम्' (११८७) गृध् । गृध्यतीत्येवंशीलो धर्मा - साधुर्वा = गर्धनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ ज्वलनः ]** 'ज्वल दीप्तौ' (९६०) ज्वल् । ज्वलतीत्येवंशीलो धर्मा-साधुर्वा = ज्वलनः । अनेन अनप्र० ।

**[ शोचनः ]** 'शुचि(च) शोके' (९९) शुच् । शोचते(ति) इत्येवंशीलो धर्मा-साधुर्वा = शोचनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ अभिलषणः ]** अभिलषतीत्येवंशीलो धर्मा-साधुर्वा = अभिलषणः । अनेन अनप्र० ।

**[ पतनः ]** पततीत्येवंशीलो धर्मा-साधुर्वा = पतनः । अनेन अनप्र० ।

पदेरिदित्त्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम् -

**[ अर्थस्य पदनः ]** 'पदिंच् गतौ' (१२५७) पद् । पद्यत इत्येवंशीलः = पदनः । अनेन अनप्र०, अर्थस्य ।

**[ ग्रन्थस्य पदनः ]** पद्यत इत्येवंशीलः = पदनः । अनेन अनप्र०, ग्रन्थस्य ।

**[ पदनः क्षेत्राणाम् ]** पद्यत इत्येवंशीलः = पदनः । अनेन अनप्र०, क्षेत्राणाम् ।

**[ चिकीर्षिता कटम् ]** चिकीर्षतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ अलङ्कर्ता कन्याम् ]** अलङ्करोतीति अलङ्कर्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर्, कन्याम् ।

**[ गन्ता खेलः ]** गच्छतीत्येवंशीलः = गन्ता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[ आगामुकः ]** आगच्छतीत्येवंशीलः = आगामुकः । 'शृ-कम-गम-हन-वृष-भू-स्थ उकण्' (५।२।४०) उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ भविता ]** भवतीत्येवंशीलः = भविता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ भावुकः ]** भवतीत्येवंशीलः = भावुकः । 'शृ-कम-गम-हन-वृष-भू-स्थ उकण्' (५।२।४०) उकण्प्र० → उक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ जागरिता ]** 'जागृक् निद्राक्षये' (१०९३) जागृ । जागर्त्तीत्येवंशीलः = जागरिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० अर् ।

**[ जागरूकः ]** जागर्त्तीत्येवंशीलः = जागरूकः । 'जागुः' (५।२।४८) ऊकप्र० । 'नामिनो'० (४।३।१) गु० अर् ।

**[ विकत्थनः ]** वि 'कत्थि श्लाघायाम्' (७१९) कत्थ् । विकत्थत इत्येवंशीलः = विकत्थनः । 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) अनप्र० ।

**[ विकत्थी ]** विकत्थत इत्येवंशीलः = विकत्थी । 'वेविर्च - कत्थ - स्रम्भ - कष - कस - लस - हनः' (५।२।५९) घिनण्प्र० → इन् । प्रथमा सि । 'इन् - हन् - पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः (२।१।९१) नलुक् ।

**[ भासनम् ]** 'भासि दीप्तौ' (८४६) भास् । भासत इत्येवंशीलः = भासनम् । 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) अनप्र० ।

**[ भासुरम् ]** भासत इत्येवंशीलः = भासुरम् । 'भञ्जि-भासि-मिदो घुरः' (५।२।७४) घुरप्र० → उर ।

**[ वर्धनः ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धत इत्येवंशीलः = वर्धनः । 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) अनप्र० । 'लघोरुपा'० (४।३।४) गु० अर् ।

**[ वर्धिष्णुः ]** वर्धत इत्येवंशीलः = वर्धिष्णुः । 'भ्राज्यलङ्कृग् - निराकृग् - भू - सहि - रुचि - वृति - वृधि'० (५।२।२८) इष्णुप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ अपलाषुकः ]** 'लषी कान्तौ' (९२७) लष्, अपपूर्व० । अपलषतीत्येवंशीलः = अपलाषुकः । 'लष - पत - पदः' (५।२।४१) उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अपलाषी ]** अपलषतीत्येवंशीलः = अपलाषी । 'व्यपा-ऽभेर्लषः' (५।२।६०) घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि । 'इन् - हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ कम्पना शाखा ]** 'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कम्प् । कम्पत इत्येवंशीलः-(ला) । 'चाल-शब्दार्थादकर्मकात्' (५।२।४३) अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कम्प्रा शाखा ]** कम्पत इत्येवंशीलः(ला) = कम्प्रा । 'स्म्यजस - हिंस - दीप - कम्प - कम - नमो रः' (५।२।७९) रप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कमनायुवतिः ]** 'कमूङ् कान्तौ' (७८९) कम् । 'अशवि ते वा' (३।४।४) इत्यनेन विकल्पेन निषेधः, अतो न 'कमेर्णिङ्' (३।४।२) इत्यनेन णिङ्प्र० । कमते इत्येवंशीलः(ला) = कमना युवतिः । 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कामुका युवतिः ]** कमत इत्येवंशीलः(ला) = कामुका युवतिः । 'शृ-कम-गम'० (५।२।४०) उकण्प्र० → उक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## चाल-शब्दार्थादकर्मकात् ॥ ५।२।४३ ॥

**[ चालशब्दार्थात् ]** चालश्च शब्दश्च = चालशब्दौ, चालशब्दावर्थौ यस्य सः = चालशब्दार्थः, तस्मात् ।

**[ अकर्मकात् ]** न विद्यते कर्म यस्याऽसौ अकर्मकः, तस्मात् ।

**[ चलनः ]** 'चल कम्पने' (९७२) चल् । चलतीत्येवंशीलः = चलनः । अनेन अनप्र० ।

**[ कम्पनः ]** 'कपुङ् चलने' (७८९) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कम्प् । कम्पत इत्येवंशीलः = कम्पनः । अनेन अनप्र० ।

**[ चोपनः ]** 'चुपि(प) मन्दायाम्' (३४२) चुप् । चोपत(ति) इत्येवंशीलः = चोपनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ चेष्टनः ]** 'चेष्टि चेष्टायाम्' (६७०) चेष्ट् । चेष्टत इत्येवंशीलः = चेष्टनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ शब्दनः ]** शब्द मण्ड्यते । शब्दं करोति = शब्दयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । शब्दयतीत्येवंशीलः = शब्दनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ रवणः ]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । रौतीत्येवंशीलः = रवणः । अनेन अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ आक्रोशनः ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । आक्रोशतीत्येवंशीलः = आक्रोशनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ पठिता विद्याम् ]**पठ व्यक्तायां वाचि' (२१३) पठ् । पठतीत्येवंशीलः = पठिता विद्याम् । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्-पुरुदंशो'० (१।४।८४) सि० → डा० । डित्यन्त्यस्वरादेः (२।१।११४) अन्त्यस्वरादिलोपः ॥छा॥

## इङितो व्यञ्जनाद्यन्तात् ॥ ५।२।४४ ॥

**[ इङितः ]** इश्च ङश्च = इङौ, इङौ इतावनुबन्धौ यस्य सः = इङित्, तस्मात् ।

**[ व्यञ्जनाद्यन्तात् ]** आदिश्च अन्तश्च = आद्यन्तम्, व्यञ्जनमाद्यन्तं यस्य सः = व्यञ्जनाद्यन्तः, तस्मात् ।

**[ स्पर्द्धनः ]** 'स्पर्द्धि सङ्घर्षे (७४२) स्पर्द्ध् । स्पर्द्धत इत्येवंशीलः = स्पर्द्धनः । अनेन अनप्र० ।

**ङित् - [ वर्त्तनः ]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तत इत्येवंशीलः = वर्त्तनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ वर्धनः ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धत इत्येवंशीलः = वर्धनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ चेतनः ]** 'चितिण् संवेदने' (१८२६) चित् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः (४।३।८२) अलुक् । चेतयतीत्येवंशीलः = चेतनः । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ जुगुप्सनः ]** 'गुपि गोपन-कुत्सनयोः' (७६३) गुप् । 'गुप्-तिजो गर्हा-क्षान्तौ सन्' (३।४।५) सन्प्र० । 'सन्-यङश्च (४।१।३) द्विः । 'ग-होर्जः' (४।१।४०) गु० → जु० । जुगुप्सत इत्येवंशीलः = जुगुप्सनः । अनेन अनप्र० ।

**[ मीमांसनः ]** 'मानि पूजायाम्' (७४९) मान् । 'शान्-दान्-मान्'० (३।४।७) सन्प्र० । द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सन्यस्य' (४।१।५९) अ० → इ० । मीमांसते इत्येवंशीलः मीमांसनः = । अनेन अनप्र० ।

**[ स्वप्ता ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपितीत्येवंशीलः = स्वप्ता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ ।

**[ एधिता ]** 'एधि वृद्धौ' (७४१) एध् । एधत इत्येवंशीलः = एधिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ शयिता ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेत इत्येवंशीलः = शयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशि'० (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८७) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ वसिता वस्त्रम् ]** वसिक् आच्छादने' (१११७) वस् । वस्ते इत्येवंशीलः = वसिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । वस्त्र द्वितीया अम् ।

**[ सेविता विषयान् ]** 'षेवृङ् सेवने' (८१८) षेव् । 'षः सोऽष्ट्यै'० (२।३।९८) सेव् । सेवत इत्येवंशीलः = सेविता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशि'० (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः (२।१।११४) अन्त्यस्वरादिलोपः । विषय द्वितीया शस् ॥छ॥

### न णिङ्-य-सूद-दीप-दीक्षः ॥ ५।२।४५ ॥

**[ न ]** न प्रथमा सि ।

**[ णिङ्यसूददीपदीक्षः ]** णिङ् च यश्च सूदश्च दीपश्च दीक्ष् च = णिङ्यसूददीपदीक्ष्, तस्मात् ।

**[ भावयिता ]** 'भूङ् प्राप्तौ' (सौत्र०९) भू । 'भूङः प्राप्तौ णिङ्' (३।४।१९) णिङ्प्र० → इ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । भावयत इत्येवंशीलः = भावयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितो'० (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ हस्तयिता ]** 卐 हस्तं करोति = हस्तयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । हस्तयतीत्येवंशीलः = हस्तयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितो'० (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ उत्पुच्छयिता ]** + उत्पुच्छं करोति = उत्पुच्छयति । णिज्बहुलं नाम्नः'० (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । उत्पुच्छयतीत्येवंशीलः = उत्पुच्छयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशि'० (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

---

卐 श० म० न्या० - हस्तौ निरस्यतीति । 'अङ्गान्निरसने णिङ्' (३।४।३८) इति णिङि हस्तयते, हस्तयते इत्येवंशील इति हस्तयिता ।
+ श० म० न्या० - पुच्छमुदस्यतीति । 'पुच्छादुत्परिव्यसने' (३।४।३९) इति णिङि उत्पुच्छयते, उत्पुच्छयते इत्येवंशील इति उत्पुच्छयिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्ष्मायिता ]** 'क्ष्मायैङ् विधूनने' (८०३) क्ष्माय् । क्ष्मायत इत्येवंशीलः = क्ष्मायिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् ।

**[ क्नूयिता ]** 'क्नूयैङ् शब्दोन्दनयोः' (८०२) क्नूय् । क्नूयत इत्येवंशीलः = क्नूयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् ।

**[ दयिता ]** 'दयि दान-गति-हिंसा-दहनेषु च' (७९९) दय् । दयत इत्येवंशीलः = दयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् ।

**[ सूदिता ]** 'षूदि क्षरणे' (७३६)षूद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सूद् । सूदत इत्येवंशीलः = सूदिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् ।

**[ दीपिता ]** 'दीपैचि दीप्तौ' (१२६६) दीप् । दीप्यत इत्येवंशीलः = दीपिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् ।

**[ दीक्षिता ]** 'दीक्षि मौण्ड्येज्योपनयन-नियम-व्रतादेशेषु' (८८१) दीक्ष् । दीक्षत इत्येवंशीलः = दीक्षिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् ।

सर्वत्र प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ मधुसूदनः ]** मधु-दैत्यं सूदत इति मधुसूदनः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० ।

**[ अरिसूदनः ]** अरीन् सूदत इति अरिसूदनः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० ।

**[ बलसूदनः ]** बल-दानवं सूदत इति बलसूदनः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० ॥छ॥

## द्रम-क्रमो-यङः ॥ ५।२।४६ ॥

**[ द्रमक्रमः ]** द्रमश्च क्रम् च = द्रमक्रम्, तस्मात् ।

**[ यङः ]** यङ् पञ्चमी ङसि ।

**[ दंद्रमणः ]** अम (३९२) 'द्रम गतौ' (३९३) द्रम् । कुटिलं द्रमति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन् - यङश्च' (४।१।३) द्विः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 卐 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४)। अनुस्वारः । दंद्रम्यते इत्येवंशीलः = दंद्रमणः । अनेन अनप्र० । 'अतः' (४।३।८२) अलोपः । 'योऽशिति' (४।३।८०) यलुक् ।

**[ चंक्रमणः ]** क्रमू पादविक्षेपे' (३८५) क्रम् । कुटिलं क्रामति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० । सन्-यङश्च' (४।१।३) द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 卐卐 'तौ मुमो'० (१।३।१४) अनुस्वारः । चंक्रम्यत इत्येवंशीलः = चंक्रमणः । अनेन अनप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् ।

सकर्मकार्थं वचनम्, य इति प्रतिषेधनिवृत्त्यर्थं च ॥छ॥

---

卐 श० म० न्या० - 'म्नां धुड्वर्गे०' (१।३।३९) म० → नकारे दन्द्रमणः ।

卐卐 श० म० न्या० - 'म्नां धुड्वर्गे०' (१।३।३९) म० → ङकारे चङ्क्रमणः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यजि-जपि-दंशि-वदादूकः ॥ ५।२।४७ ॥

**[यजिजपिदंशिवदात्]** यजिश्च जपिश्च दंशिश्च वदश्च = यजिजपिदंशिवदम्, तस्मात् ।

**[ऊकः]** ऊक प्रथमा सि ।

**[यायजूकः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । भृशं पुनः पुनर्वा यजति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । यायज्यत इत्येवंशीलः = यायजूकः । अनेन ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[जंजपूकः]** 'जप मानसे च' (३३८) जप् । गर्हितं जपति । 'गृ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये' (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः । 'तौ मुमो'० (१।३।१४) अनुस्वारः । जंजप्यत इत्येवंशीलः = जंजपूकः । अनेन ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । प्रथमा सि । 'सो रुः (२।१।७२) स० → र० ।

**[दंदशूकः]** 'दंशं दशने' (४९६) दंश् । गर्हितं दशति । 'गृ-लुप-सद-चर-जप-जभ-दश'० (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'जप-जभ-दह-दश'० (४।१।५२) मोऽन्तः । 'तौ मुमो'० (१।३।१४) अनुस्वारः । दंदश्यत इत्येवंशीलः = दंदशूकः । अनेन ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[वावदूकः]** 'वद व्यक्तायां वाचि' (९९८) वद् । भृशं पुनः पुनर्वा वदति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वावद्यत इत्येवंशीलः = वावदूकः । अनेन ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[दंदहूकः]** 'दहं भस्मीकरणे' (५५२) दह् । गर्हितं दहति । गृ-लुप-सद-चर'० (३।४।१२) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'जप-जभ-दह'० (४।१।५२) मोऽन्तः । 'तौ मुमो'० (१।३।१४) अनुस्वारः । दंदह्यत इत्येवंशीलः = दंदहूकः । मतान्तरेऽनेनैव ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् ।

**[पापयूकः]** अयि (७९०) वयि (७९१) - 'पयि गतौ' (७९२) पय् । कुटिलं पयते । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । पापय्यत इत्येवंशीलः = पापयूकः । मतान्तरेऽनेनैव ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् ।

**[निजागदूकः]** 'गद व्यक्तायां वाचि' (२९७) गद्, निपूर्व० । भृशं पुनः पुनर्वा निगदति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । 'ग-होर्जः' (४।१।४०) ग० → ज० । निजागद्यत इत्येवंशीलः = निजागदूकः । मतान्तरे अनेनैव ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् ।

**[नानशूकः]** 'नशौच् अदर्शने' (१२०२) नश् । भृशं पुनः पुनर्वा नश्यति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । नानश्यत इत्येवंशीलः = नानशूकः । मतान्तरेऽनेनैव ऊकप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् ।

**[पंपशूकः]** पश इति सौत्रो धातुः । भृशं पुनः पुनर्वा पशति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'जप-जभ-दह-दश-भञ्ज-पशः' (४।१।५२) मोऽन्तः । 'तौ मुमौ'० (१।३।१४) अनुस्वारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंपश्यत इत्येवंशील: = पंपशूक: । मतान्तरेऽनेनैन ऊकप्र० । 'अत:' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् ॥छ॥

**जागु: ॥ ५।२।४८ ॥**

**[ जागु: ]** जागृ, पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० ! 'डित्यन्त्यस्वरादे:' (२।१।११४) ऋलोप:।

यङ इति निवृत्तम्, अनेकस्वरत्वेनासंभवात् ।

**[ जागरूक: ]** 'जागृक् निद्राक्षये' (१०९३) जागृ । जागर्त्तीत्येवंशील: = जागरूक: । अनेन ऊकप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ॥छ॥

**शमष्टकाद् घिनण् ॥ ५।२।४९ ॥**

**[ शमष्टकात् ]** शम् च शम् च शम् च = शम:, शमामष्टकम् = शमष्टकम्, शमादीनामष्टकम् = शमष्टकम्, तस्मात्।

**[ घिनण् ]** घिनण् प्रथमा सि ।

**[ शमी ]** 'शमू उपशमे' (१२३०) शम् । शाम्यतीत्येवंशील: = शमी । अनेन घिनण्प्र० → इन् । 'मोऽकमि-यमि-रमि-नमि-गमि-वमा-ऽऽचम:' (४।३।५५) वृद्धिनिषेध: ।

**[ दमी ]** शमू (१२३०) 'दमूच् उपशमे' (१२३१) दम् । दाम्यतीत्येवंशील: = दमी । अनेन घिनण्प्र० → इन् । 'मोऽकमि-यमि-रमि'० (४।३।५५) वृद्धिनिषेध: ।

**[ तमी ]** 'तमूच् काङ्क्षायाम्' (१२३२) तम् । ताम्यतीत्येवंशील: = तमी । अनेन घिनण्प्र० → इन् । 'मोऽकमि-यमि-रमि-नमि'० (४।३।५५) वृद्धिनिषेध: ।

**[ श्रमी ]** 'श्रमूच् खेद-तपसो:' (१२३३) श्रम् । श्राम्यतीत्येवंशील: = श्रमी । अनेन घिनण्प्र० → इन् । 'मोऽकमि-यमि-रमि-नमि'० (४।३।५५) वृद्धिनिषेध: ।

**[ क्षमी ]** 'क्षमौच् सहने' (१२३५) क्षम् । क्षाम्यतीत्येवंशील: = क्षमी । अनेन घिनण्प्र० → इन् । 'मोऽकमि-यमि-रमि-नमि'० (४।३।५५) वृद्धिनिषेध: ।

**[ प्रमादी ]** प्र 'मदैच् हर्षे' (१२३६) मद् । प्रमाद्यतीत्येवंशील: = प्रमादी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धि: आ ।

**[ उन्मादी ]** उत् 'मदैच् हर्षे' (१२३६) मद् । उन्माद्यतीत्येवंशील: = उन्मादी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धि: आ ।

**[ क्लमी ]** 'क्लमूच् ग्लानौ' (१२३७) क्लम् । क्लाम्यतीत्येवंशील: = क्लमी । अनेन घिनण्प्र० → इन् । 'मोऽकमि-यमि-रमि-नमि'० (४।३।५५) वृद्धिनिषेध: ।

सर्वत्र प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्ण: शिस्यो:' (१।४।८७) दीर्घ: । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्न:' (२।१।९१) नलुक् ।

घञन्तान्मत्वर्थीयेन सिद्ध्यति तृन्बाधनार्थं तु वचनम् -

**[ असिता ]** 卐 'असक् भवे(भुवि))' (११०२) अस् । अस्तीत्येवंशील: । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादे:' (२।१।११४) अन्त्यस्वरादिलोप: ।

---

卐 श० म० न्या० - 'असूच् क्षेपणे' अस्यतीत्येवंशील इति तृनि असिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णकारो वृद्ध्यर्थः । घकार उत्तरत्र कत्व-गत्वार्थः ।

**[अरण्यं भ्रमिता]** अरण्य द्वितीया अम् । भ्राम्यतीत्येवंशीलः = भ्रमिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशि'० (४।४।३२) इट् । प्रथमा सि ।।छ।।

## युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहा-ऽभ्याहनः ॥ ५।२।५० ॥

**[युजभुजभजत्यजरञ्जद्विषद्रुहदुहाऽभ्याहनः]** युजश्च भुजश्च भजश्च त्यजश्च रञ्जश्च द्विषश्च दुषश्च द्रुहश्च दुहश्च अभ्याहन् च = युजभुजभजत्यजरञ्जद्विषदुषद्रुहदुहाऽभ्याहन्, तस्मात् ।

**[योगी]** 'युजूंपी योगे' (१४७६) युज् । 'युजिच् समाधौ' (१२५४) युज् । युनक्ति - युज्यते वा इत्येवंशीलः = योगी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[भोगी]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुङ्क्ते-भुनक्ति-भुजतीति वा शीलः = भोगी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[भागी]** 'भजीं सेवायाम्' (८९५) भज् । भजतीत्येवंशीलो भागी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

सकर्मकादपि अभिधानात् घिनण् यथा -

**[कल्याणभागी]** कल्याणं भजतीत्येवंशीलः = कल्याणभागी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।२।१११) ज० → ग० ।

**[त्यागी]** 'त्यजं हानौ' (१७२) त्यज् । त्यजतीत्येवंशीलः = त्यागी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[प्राणत्यागी]** प्राणान् त्यजतीत्येवंशीलः = प्राणत्यागी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[रागी]** 'रञ्जीं रागे' (८९६) रञ्ज् । रजतीत्येवंशीलः = रागी । अनेन घिनण्प्र० → इन् । 'अकट्-घिनोश्च रञ्जेः' (४।२।५०) नलुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[द्वेषी]** 'द्विषींक् अप्रीतौ' (११२६) द्विष् । द्वेष्टीत्येवंशीलः = द्वेषी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[दोषी]** 'दुषंच् वैकृत्ये' (१२०९) दुष् । दुष्यतीत्येवंशीलः = दोषी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[द्रोही]** 'द्रुहौच् जिघांसायाम्' (१२३९) दुह् । द्रुह्यतीत्येवंशीलः = द्रोही । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[दोही]** 'दुहींक् क्षरणे' (११२७) दुह् । दोग्धीत्येवंशीलः = दोही । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[अभ्याघाती]** अभि-आङ्पूर्व'० 'हनंक् हिंसा-गत्योः' (११००) हन् । अभ्याहन्तीत्येवंशीलः = अभ्याघाती । अनेन घिनण्प्र० → इन् । 'ञ्णिति घात्' (४।३।१००) ''घात्''आदेशः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वत्र प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ गां दोग्धा ]** गो द्वितीया अम् । 'आ अम्-शसोऽता' (१।४।७५) आ । दोग्धीत्येवंशीलः = दोग्धा । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० ।

**[ शत्रूनभ्याहन्ता ]** शत्रु द्वितीया शस् । अभ्याहन्तीत्येवंशीलः = अभ्याहन्ता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

## आङः क्रीड-मुषः ॥ ५।२।५१ ॥

**[ आङः ]** आङ् पञ्चमी ङसि ।

**[ क्रीडमुषः ]** क्रीडश्च मुष् च = क्रीडमुष्, तस्मात् ।

**[ आक्रीडी ]** आङ्पूर्व० 'क्रीडृ विहारे' (२४३) क्रीड् । आक्रीडत इत्येवंशीलः = आक्रीडी । अनेन घिनण्प्र० । 'अन्वाङ् - परेः' (३।३।३४) इत्यात्मनेपदम् ।

**[ आमोषी ]** 'मुषश् स्तेये' (१५६३) मुष्, आङ्पूर्व० । आमुष्णातीत्येवंशीलः = आमोषी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ॥छ॥

## प्राच्च यम-यसः ॥ ५।२।५२ ॥

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ यमयसः ]** यमश्च यस् च = यमयस्, तस्मात् ।

यथासंख्यं यद्यभिप्रेतं स्यात्तदा प्राङ इति क्रियेत ।

**[ प्रयामी ]** प्र 'यमूं उपरमे' (३८६) यम् । प्रयच्छतीत्येवंशीलः = प्रयामी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ आयामी ]** आयच्छत इत्येवंशीलः = आयामी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रयासी ]** प्र 'यसूच प्रयत्ने' (१२२२) यस् । प्रयस्यतीत्येवंशीलः = प्रयासी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ आयासी ]** आयस्यतीत्येवंशीलः = आयासी । अनेन घिनण्प्र० इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## मथ-लपः ॥ ५।२।५३ ॥

**[ मथलपः ]** मथश्च लप् च = मथलप्, तस्मात् ।

**[ प्रमाथी ]** प्र 'मथे विलोडने' (९६५) मथ् । प्रमथतीत्येवंशीलः = प्रमाथी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रलापी ]** रप (३३५) - 'लप व्यक्ते वचने' (३३६) लप्, प्रपूर्व० । प्रलपतीत्येवंशीलः = प्रलापी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## वेश्च द्रोः ॥ ५।२।५४ ॥

**[ वेः ]** वि पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ए । एदोद्भ्यां ङसि-ङसो रः (१।४।३५) ङसि० → र० ।

**[ च ]** च प्रथमा सि ।

**[ द्रोः ]** द्रु पञ्चमी ङसि ।

**[ विद्रावी ]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु, विपूर्व० । विद्रवतीत्येवंशीलः = विद्रावी । अनेन घिनण्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ प्रद्रावी ]** प्रद्रवतीत्येवंशीलः = प्रद्रावी । अनेन घिनण्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ॥छ॥

## वि-परि-प्रात् सर्त्तेः ॥ ५।२।५५ ॥

**[ विपरिप्रात् ]** विश्च परिश्च प्रश्च = तत्, तस्मात् ।

**[ सर्त्तेः ]** सर्त्ति पञ्चमी ङसि ।

**[ विसारी ]** 'सृं गतौ' (२५) सृ, विपूर्व० । विसरतीत्येवंशीलः = विसारी । अनेन घिनण्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ परिसारी ]** परिसरतीत्येवंशीलः = परिसारी । अनेन घिनण्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ प्रसारी ]** प्रसरतीत्येवंशीलः = प्रसारी । अनेन घिनण्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ॥छ॥

## समः पृचैप्-ज्वरेः ॥ ५।२।५६ ॥

**[ समः ]** सम् पञ्चमी ङसि ।

**[ पृचैप्ज्वरेः ]** पृचैप् च ज्वरिश्च = पृचैप्ज्वरि, तस्मात् ।

**[ संपर्की ]** सम् 'पृचैप् संपर्के' (१४८२) पृच् । 'संपृणक्तीत्येवंशीलः = संपर्की । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः'० (४।१।१११) च० → क० ।

पिन्निर्देशाददादिकस्य -

**[ संपर्चिता ]** सम् 'पृचैङ्क् संपर्चने' (११०८) पृच् । संपृक्त इत्येवंशीलः = संपर्चिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ । 'स्ताद्यशितो'० (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[ संज्वारी ]** सम् 'ज्वर रोगे' (१०५४) ज्वर् । संज्वरतीत्येवंशीलः = संज्वारी । अनेन घिनण्प्र० → इन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ संज्वरी ]** संज्वरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घटादेर्हृस्वो दीर्घस्तु वा ञि-णम्परे' (४।२।२४) ह्रस्वः । संज्वरयतीत्येवंशीलः = संज्वरी । मतान्तरेऽनेन घिनण्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिलुक् स्थानित्वात् वृद्धेरभावः ।

**[ संत्वरी ]** संत्वरन्तं(संत्वरमाणं) प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घटादेर्हृस्वो'० (४।२।२४) ह्रस्वः । संत्वरयतीत्येवंशीलः = संत्वरी । मतान्तरे अनेन घिनण्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिलुक्स्थानित्वात् वृद्धेरभावः ।

**[ संपृणक्ति शाकम् ]** सम् 'पृचैप् संपर्के' (१४८२) पृच् । वर्त्त० तिव् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'च-जः क-गम्' (२।१।८६) च० → क० । शाक द्वितीया अम् ।।छा।

## सं-वेः सृजः ।। ५।२।५७ ।।

**[ संवेः ]** सम् च विश्च = संवि, तस्मात् ।

**[ सृजः ]** सृज पञ्चमी ङसि ।

**[ संसर्गी ]** 'सृजीं(जं)त् विसर्गे' (१३४९) सृज्, सम्पूर्व० । संसृजति-संसृज्यते वा इत्येवंशीलः = संसर्गी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[ विसर्गी ]** विसृजतीत्येवंशीलः = विसर्गी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।।छा।

## सं-परि-व्यनु-प्राद् वदः ।। ५।२।५८ ।।

**[ संपरिव्यनुप्रात् ]** सम् च परिश्च विश्च अनुश्च प्रश्च = तत्, तस्मात् ।

**[ वदः ]** वद् पञ्चमी ङसि ।

**[ संवादी ]** 'वद व्यक्तायां वाचि' (९९८) वद् । संवदतीत्येवंशीलः = संवादी ।

**[ परिवादी ]** परिवदतीत्येवंशीलः = परिवादी ।

**[ विवादी ]** विवदतीत्येवंशीलः = विवादी ।

**[ अनुवादी ]** अनुवदतीत्येवंशीलः = अनुवादी ।

**[ प्रवादी ]** प्रवदतीत्येवंशीलः = प्रवादी ।

सर्वत्र अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धि' आ ।।छा।

## वेर्विच-कत्थ-स्रम्भ-कष-कस-लस-हनः ।। ५।२।५९ ।।

**[ वेः ]** वि पञ्चमी ङसि ।

**[ विचकत्थस्रम्भकषकसलसहनः ]** विचश्च कत्थश्च स्रम्भश्च कषश्च कसश्च लसश्च हन् च = विचकत्थस्रम्भकषकसलसहन्, तस्मात् ।

**[ विवेकी ]** 'विचूंपी पृथग्भावे' (१४७५) विच्, विपूर्व० । विविनक्तीत्येवंशीलः = विवेकी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'क्तेऽनिटश्च-जोः'० (४।१।१११) च० → क० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ विकत्थी ]** 'कत्थि श्लाघायाम्' (७१९) कत्थ्, विपूर्व० । विकत्थत इत्येवंशीलः = विकत्थी । अनेन घिनण्प्र० → इन् ।

**[ विस्रम्भी ]** 'स्रम्भूङ् विश्वासे' (९५१) स्रम्भ्, विपूर्व० । विस्रम्भत इत्येवंशीलः = विस्रम्भी । अनेन घिनण्प्र० → इन् ।

**[ विकाषी ]** 'कष हिंसायाम्' (५०७) कष्, विपूर्व० । विकषतीत्येवंशीलः = विकाषी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ विकासी ]** 'कस गतौ' (९८७) कस्, विपूर्व० । विकसतीत्येवंशीलः = विकासी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ विलासी ]** 'लस श्लेषण-क्रीडनयोः' (५४३) लस्, विपूर्व० । विलसतीत्येवंशीलः = विलासी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ विघाती ]** 'हनंक् हिंसा-गत्योः' (११००) हन्, विपूर्व० । विहन्तीत्येवंशीलः = विघाती । अनेन घिनण्प्र० → इन् । 'ञ्णिति घात्' (४।३।१००) घात्० ॥छ॥

## व्यपा-ऽभेर्लषः ॥ ५।२।६० ॥

**[ व्यपाऽभेः ]** विश्च अपश्च अभिश्च = व्यपाऽभि, तस्मात् ।

**[ लषः ]** लष् पञ्चमी ङसि ।

**[ विलाषी ]** 'लषी कान्तौ' (९२७) लष्, विपूर्व० । विलषतीत्येवंशीलः = विलाषी ।

**[ अपलाषी ]** अपलषतीत्येवंशीलः = अपलाषी ।

**[ अभिलाषी ]** अभिलषतीत्येवंशीलः = अभिलाषी ।

अनेन सर्वत्र घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## सम्-प्राद् वसात् ॥ ५।२।६१ ॥

**[ सम्प्रात् ]** सम् च प्रश्च = तत्, तस्मात् ।

**[ वसात् ]** वस पञ्चमी ङसि ।

**[ संवासी ]** वसं निवासे' (९९९) वस्, सम्पूर्व० । संवसतीत्येवंशीलः = संवासी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रवासी ]** प्रवसतीत्येवंशीलः = प्रवासी । अनेन घिनण्प्र० इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

शव्निर्देशाद् वस्तेर्न भवति ॥छ॥

## समत्यपाऽभि-व्यभेश्चरः ॥ ५।२।६२ ॥

**[ समत्यपाऽभिव्यभेः ]** सम् च अतिश्च अपश्च अभिश्च व्यभिश्च = समत्यपाऽभिव्यभि, तस्मात् ।

**[ चरः ]** चर् पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सञ्चारी ]** 'चर भक्षणे च' (४१०) चर्, सम्पूर्व० । सञ्चरतीत्येवंशीलः = सञ्चारी ।

**[ अतिचारी ]** अतिचरतीत्येवंशीलः = अतिचारी ।

**[ अपचारी ]** अपचरतीत्येवंशीलः = अपचारी ।

**[ अभिचारी ]** अभिचरतीत्येवंशीलः = अभिचारी ।

**[ व्यभिचारी ]** व्यभिचरतीत्येवंशीलः = व्यभिचारी ।

सर्वत्र अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## समनु-व्यवाद् रुधः ॥ ५।२।६३ ॥

**[ समनुव्यवात् ]** सम् च अनुश्च विश्च अवश्च = तत्, तस्मात् ।

**[ रुधः ]** रुध् पञ्चमी ङसि ।

**[ संरोधी ]** 'रुधूंपी आवरणे' (१४७३) रुध्, सम्पूर्व० । संरुणद्धीत्येवंशीलः = संरोधी ।

**[ अनुरोधी ]** अनुरुणद्धीत्येवंशीलः = अनुरोधी ।

**[ विरोधी ]** विरुणद्धीत्येवंशीलः = विरोधी ।

**[ अवरोधी ]** अवरुणद्धीत्येवंशीलः = अवरोधी ।

सर्वत्र अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ॥छ॥

## वेर्दहः ॥ ५।२।६४ ॥

**[ वेः ]** वि पञ्चमी ङसि ।

**[ दहः ]** दह् पञ्चमी ङसि ।

**[ विदाही ]** 'दहं भस्मीकरणे' (५५२) दह्, विपूर्व० । विदहतीत्येवंशीलः = विदाही । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## परेर्देवि-मुहश्च ॥ ५।२।६५ ॥

**[ परेः ]** परि पञ्चमी ङसि ।

**[ देविमुहः ]** देविश्च मुह् च = देविमुह्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणम्, लाक्षणिकत्वात् दीव्यतेर्ण्यन्तस्य न ग्रहणम् ।

**[ परिदेवी ]** तेवृङ् (८१६) - 'देवृङ् देवने' (८१७) देव्, परिपूर्व० । परिदेवमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । परिदेवते - परिदेवयति वा इत्येवंशीलः = परिदेवी । अनेन घिनण्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ परिमोही ]** 'मुहौच् वैचित्त्ये' (१२३८) मुह्, परिपूर्व० । परिमुह्यतीत्येवंशीलः = परिमोही । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ परिदाही ]** 'दहं भस्मीकरणे' (५५२) दह्, परिपूर्व० । परिदहतीत्येवंशीलः = परिदाही । अने घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छा॥

## क्षिप-रटः ॥ ५।२।६६ ॥

**[ क्षिपरटः ]** क्षिपश्च रट् च = क्षिपरट्, तस्मात् ।

**[ परिक्षेपी ]** 'क्षिपंच् प्रेरणे' (११५८) क्षिप् । 'क्षिपींत् प्रेरणे' (१३१७) क्षिप्, परिपूर्व० । परिक्षिप्यति – परिक्षिपति, वा इत्येवंशीलः = परिक्षेपी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ परिक्षेप्यम्भसाम् ]** परिक्षिप्यति-परिक्षिपति वा इत्येवंशीलः = परिक्षेपी । अनेन घिनण्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । अम्भस् षष्ठी आम् ।

**[ परिराटी ]** 'रट परिभाषणे' (२११) रट्, परिपूर्व० । परिरटतीत्येवंशीलः = परिराटी । अनेन घिनण्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छा॥

## वादेश्च णकः ॥ ५।२।६७ ॥

**[ वादेः ]** वादि पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ णकः ]** णक प्रथमा सि ।

**[ परिवादकः ]** 'वद व्यक्तायां वाचि' (९९८) वद्, परिपूर्व० । परिवदन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । परिवादयतीत्येवंशीलः = परिवादकः । अनेन णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ परिक्षेपकः ]** परिक्षिप्यति – परिक्षिपति वा इत्येवंशीलः = परिक्षेपकः । अनेन णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ परिराटकः ]** परिरटतीत्येवंशीलः = परिराटकः । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

असरुपत्वात् 'णक-तृचौ' (५।१।४८) इति सिद्धे पुनर्विधानं शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थम्, तेन –

**[ अलङ्कारकः ]** अलङ्करोतीति अलङ्कारकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ परिक्षिपः ]** परिक्षिपतीति परिक्षिपः । 'नाम्युपा'० (५।१।५४) कप्र० → अ । कित्त्वात् गुणो न भवति ।

**[ परिरटः ]** परिरटतीति परिरटः ।

बाहुलकात् क्वचिद् भवत्यपि –

"काम-क्रोधौ मनुष्याणां, **खादितारौ वृकाविव**"

**[ खादितारौ ]** 'खादृ भक्षणे' (२९४) खाद् । खादतीत्येवंशीलौ = खादितारौ । 'निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषा-ऽसूया-ऽनेकस्वरात्' (५।२।६८) इत्यादिना णकविषये तृच्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । औ । 'तृ-स्वसृ-नप्तृ-नेष्टृ'० (१।४।३८) आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वृकौ ]** वृक प्रथमा औ ।

**[ इव ]** इव प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।।छ।।

**निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषा-ऽसूया-ऽनेकस्वरात् ॥ ५।२।६८ ॥**

**[ निन्दहिंसक्लिशखादविनाशिव्याभाषाऽसूयाऽनेकस्वरात् ]** निन्दश्च हिंसश्च क्लिशश्च खादश्च विनाश(शि)श्च व्याभाषश्च असूयश्च अनेकस्वरश्च = निन्दहिंसक्लिशखादविनाशिव्याभाषाऽसूयाऽनेकस्वरम्, तस्मात् ।

**[ निन्दकः ]** 'णिदु कुत्सायाम्' (३११) णिद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) निद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) निन्द् । निन्दतीत्येवंशीलः = निन्दकः । अनेन णकप्र० → अक ।

**[ हिंसकः ]** 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) हिन्स् । हिनस्तीत्येवंशीलः = हिंसकः । अनेन णकप्र० → अक ।

**[ क्लेशकः ]** 'क्लिशौश् विबाधने' (१५५७) क्लिश् । 'क्लिशिच् उपतापे' (१२७६) क्लिश् । क्लिश्नाति-क्लिश्यते वा इत्येवंशीलः = क्लेशकः । अनेन णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ खादकः ]** खादृ भक्षणे (२९४) खाद् । खादतीत्येवंशीलः = खादकः । अनेन णकप्र० → अक ।

**[ विनाशकः ]** वि 'नशौच् अदर्शने' (१२०२) नश् । विनश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । विनाशयतीत्येवंशीलः = विनाशकः । अनेन णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ व्याभाषकः ]** 'भाषि व्यक्तायां वाचि' (८३२) भाष्, वि-आङ्पूर्व० । व्याभाषत इत्येवंशीलः = व्याभाषकः । अनेन णकप्र० → अक ।

**[ असूयकः ]** 'असूग् इति सौत्रो धातुः - असू । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । असूयतीत्येवंशीलः = असूयकः । अनेन णकप्र० → अक ।

**[ दरिद्रायकः ]** 'दरिद्राक् दुर्गतौ' (१०९२) दरिद्रा । दरिद्रातीत्येवंशीलः = दरिद्रायकः । अनेन णकप्र० → अक । 'अशित्यस्सन्-णकज्-णकाऽनटि' (४।३।७७) इत्यस्मिन् सूत्रे सनादिवर्जनात् आलोपनिषेधः । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ चकासकः ]** 'चकासृक् दीप्तौ' (१०९४) चकास् । चकास्तीत्येवंशीलः = चकासकः । अनेन णकप्र० → अक ।

**[ गणकः ]** 'गणण् संख्याने' (१८७४) गण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । गणयतीत्येवंशीलः = गणकः । अनेन णकप्र० → अक । 'णेरनिटि (४।३।८३) णिचूलोपः ।

**[ चुलुम्पकः ]** 'चुलुम्प विनाशे' (२०५०) चुलुम्प् इति सौत्रो धातुः । चुलुम्पतीत्येवंशीलः = चुलुम्पकः । अनेन णकप्र० → अक ।

अनेकस्वरत्वादेव सिद्धेऽसूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम्, तेन-

**[ कण्डूयिता ]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयतीत्येवंशीलः = कण्डूयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ मन्तूयिता ]** 'मन्तु रोष-वैमनस्ययोः' (१९९६) मन्तु । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । मन्तूयतीति मन्तूयिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलुक् ।

विनाशिग्रहणं तु अन्यस्य ण्यन्तस्य निवृत्त्यर्थम्, कथं तर्हि गणकः ? अत्रेदं व्याख्यानं कर्त्तव्यम्, यत् विनाशीति णिगन्तस्योपादानं करोति तत् ज्ञापयति – अन्यस्यापि णिगन्तस्य वर्जनं तेन णिजन्तस्य भवत्येव ।

क्लिशेरविशेषेण ग्रहणात् दैवादिकादिदित्त्वेऽपि 'इ-ङितो व्यञ्जनाद्यन्तात्' (५।२।४४) इत्यनेन अनो न भवति ।।छ।।

## उपसर्गाद् देवृ-देवि-क्रुशः ॥ ५।२।६९ ॥

**[ उपसर्गात् ]** उपसर्ग पञ्चमी ङसि ।

**[ देवृदेविक्रुशः ]** देवृश्च देविश्च क्रुश् च = देवृदेविक्रुश्, तस्मात् ।

**[ आदेवकः ]** तेवृङ् (८१६) – 'देवृङ् देवने' (८१७) देव्, आङ्पूर्व० । आदेवत इत्येवंशीलः = आदेवकः । अनेन णकप्र० → अक ।

**[ परिदेवकः ]** परिदेवत इत्येवंशीलः = परिदेवकः । अनेन णकप्र० → अक ।

देवीति दीव्यतेर्देवतेर्वा ण्यन्तस्य ग्रहणम् ।

**[ आदेवकः ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । तेवृङ् (८१६) 'देवृङ् देवने' (८१७) देव्, आङ्पूर्व० । आदीव्यन्तं – आदेवमानं वा प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । आदेवयतीत्येवंशीलः = आदेवकः ।

**[ परिदेवकः ]** परिदीव्यन्तं – परिदेवमानं वा प्रयुङ्क्ते । 'प्रयोक्तृ' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । परिदेवयतीत्येवंशीलः = परिदेवकः । अनेन णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिग्लुक ।

**[ आक्रोशकः ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । आक्रोशतीत्येवंशीलः = आक्रोशकः । अनेन णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ परिक्रोशकः ]** परिक्रोशतीत्येवंशीलः = परिक्रोशकः । अनेन णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ देवनः ]** देवमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । देवयतीत्येवंशीलः = देवनः । 'इङितो व्यञ्जनाद्यन्तात्' (५।२।४४) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ देवयिता ]** दीव्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । देवयतीत्येवंशीलः = देवयिता । 'तृन् शील-धर्म-साधुषु' (५।२।३७) तृन्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'ऋदुशनस्'० (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।।छ।।

## वृङ्- भिक्षि - लुण्टि - जल्पि - कुट्टाट्टाकः ।।५।२।७० ।।

**[ वृङ्भिक्षिलुण्टिजल्पिकुट्टात् ]** वृङ् च भिक्षिश्च लुण्टिश्च जल्पिश्च कुट्टश्च = वृङ्भिक्षिलुण्टिजल्पिकुट्टम्, तस्मात् ।

**[ टाकः ]** टाक प्रथमा सि । सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वराकः, वराकी ]** 'वृङ्श् संभक्तौ' (१५६७) वृ । वृणीते इत्येवंशीलः = वराकः । अनेन टाकप्र० → आक । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[ भिक्षाकः, भिक्षाकी ]** 'भिक्षि याच्ञायाम्' (८८९) भिक्ष् । भिक्षते इत्येवंशीलः = भिक्षाकः । अनेन टाकप्र० → आक० । स्त्री चेत् - भिक्षाकी । 'अणञेयेकण्'० (२।४।२०) ङी ।

**[ लुण्टाकः, लुण्टाकी ]** रुटु (२०६) - 'लुटु स्तेये' (२०७) लुट् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) लुण्ट् । लुण्टतीत्येवंशीलः = लुण्टाकः । 'अनेन टाकप्र० → आक । स्त्री चेत्-लुण्टाकी । 'अणञेयेकण्'० (२।४।२०) ङी

**[ जल्पाकः, जल्पाकी ]** रप (३३५) - लप (३३६) - 'जल्प व्यक्ते वचने' (३३७) जल्प् । जल्पतीत्येवंशीलः = जल्पाकः । अनेन टाक्प्र० → आक० । स्त्री चेत् - जल्पाकी । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ कुट्टाकः, कुट्टाकी ]** 'कुट्टण् कुत्सने च' (१५९८) कुट्ट । 'चुरादि०' (३।४।१७) णिच्प्र० । कुट्टयतीत्येवंशीलः कुट्टाकः । अनेन टाकप्र० → आक० । स्त्री चेत् - कुट्टाकी । 'अणञेयेकण्' (२।४।२०) ङी ।।छ।।

## प्रात् सू-जोरिन् ।।५।२।७१ ।।

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ सूजोः ]** सूश्च जुश्च = सूजु, तस्मात् ।

**[ इन् ]** इन् प्रथमा सि ।

"सू" इति निरनुबन्धग्रहणात् सुवतेर्ग्रहणम्, न सूति- सूयत्योः । 'षूङौक् प्राणिगर्भविमोचने' (११०७) - 'षूङौच् प्राणिप्रसवे' (१२४२) इमौ अपास्तौ ।

**[ प्रसवी ]** 'षूत् प्रेरणे' (१३३२) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू, प्रपूर्व० । प्रसुवतीत्येवंशीलः = प्रसवी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनहनः' (२।१।९१) नलुक् ।

**[ प्रजवी ]** 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः, प्रपूर्व० । प्रजवतीत्येवंशीलः = प्रजवी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । प्रथमा सि । 'इन्,-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनहनः' (२।१।९१) नलुक् ।।छ।।

## जीण्-दृ-क्षि-विश्रि-परिभू-वमा-ऽभ्यमाऽव्यथः ।।५।२।७२ ।।

**[ जीण्दृक्षिविश्रिपरिभूवमाऽभ्यमाव्यथः ]** जिश्च इण् च दृश्च क्षिश्च विश्रिश्च परिभूश्च वमश्च अभ्यमश्च अव्यथ् च = जीण्दृक्षिविश्रिपरिभूवमाऽभ्यमाऽव्यथ्, तस्मात् ।

**[ जयी ]** 'जिं अभिभवे' (८) जि । जयतीत्येवंशीलः = जयी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।३३) अय् ।

**[ अत्ययी ]** 'इंण्क् गतौ' (१०७५) इ, अतिपूर्व० । अत्येतीत्येवंशीलः = अत्ययी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ उदयी ]** 'इंण्क् गतौ' (१०७५) इ, उत्पूर्व० । उदेतीत्येवंशीलः = उदयी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आदरी ]** 'दृंङ्त् अना(आ)दरे' (१४६६) दृ, आङ्पूर्व० । आद्रियते इत्येवंशीलः = आदरी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० अर् ।

**[ क्षयी ]** 'क्षि क्षये' (१०) क्षि । 'क्षिंत् निवास-गत्योः' (१३३१) क्षि । क्षयति-क्षियतीत्येवंशीलः = क्षयी/अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ विश्रयी ]** 'श्रिग् सेवायाम्' (८८३) श्रि, विपूर्व० । विश्रयतीत्येवंशीलः = विश्रयी । अनेन इन्प्र० । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ परिभवी ]** 'भू सत्तायाम्' (१) भू, परिपूर्व० । परिभवतीत्येवंशीलः = परिभवी । अनेन इन्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[ वमी ]** 'टुवमू उद्गिरणे' (९६९) वम् । वमतीत्येवंशीलः = वमी । अनेन इन्प्र० ।

**[ अभ्यमी ]** 卐 'अम गतौ' (३९२) अम्, अभिपूर्व० । अभ्यमतीत्येवंशीलः = अभ्यमी । अनेन इन्प्र० ।

**[ अव्यथी ]** 'व्यथिष् भय-चलनयोः' (१००२) व्यथ् । न व्यथते इत्येवंशीलः = अव्यथी । अनेन इन्प्र० ॥छा।

## सृ-घस्यदो मरक् ॥५।२।७३ ॥

**[ सृघस्यदः ]** सृश्च घसिश्च अद् च = सृघस्यद्, तस्मात् ।

**[ मरक् ]** मरक् प्रथमा सि ।

**[ सृमरः ]** 'सृं गतौ' (२५) सृ । सरतीत्येवंशीलः = सृमरः । अनेन मरक्प्र० → मर ।

**[ घस्मरः ]** घसि इकारश्रुतिः सुखार्थः । 'घस्लृं अदने' (५४४) घस् । घसतीत्येवंशीलः = घस्मरः । अनेन मरक्प्र० → मर ।

**[ अद्मरः ]** 'अदं भक्षणे' (१०५९) अद् । अत्तीत्येवंशीलः = अद्मरः । अनेन मरक्प्र० → मर ॥छा।

## भञ्जि-भासि-मिदो घुरः ॥५।२।७४ ॥

**[ भञ्जिभासिमिदः ]** भञ्जिश्च भासिश्च मिद् च = भञ्जिभासिमिद्, तस्मात् ।

**[ घुरः ]** घुर प्रथमा सि ।

**[ भङ्गुरं काष्ठम् ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । भनक्ति काष्ठं देवदत्तः, स एवं विवक्षते नाहं भनज्मि किन्तु भज्यते स्वयमेवेत्येवंशीलं = भङ्गुरम् । अनेन घुरप्र० → उर । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । 'म्नां धुड्'० (१।३।३९) न० → ङ० । सि-अम् ।

**[ भासुरं वपुः ]** 'भासि दीप्तौ' (८४६) भास् । भासते इत्येवंशीलं = भासुरम् । अनेन घुरप्र० → उर० ।

**[ मेदुरः ]** ञिमिदाङ् स्नेहने' (९४४) मिद् । 'ञिमिदाच् स्नेहने' (११८०) मिद् । मेदते-मेद्यति वा इत्येवंशीलः = मेदुरः । अनेन घुरप्र० → उर० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

घकारो गत्वार्थः ॥छा।

## वेत्ति-छिद-भिदः कित् ॥५।२।७५ ॥

**[ वेत्तिछिदभिदः ]** वेत्तिश्च छिदश्च भिद् च = वेत्तिछिदभिद्, तस्मात् ।

---

卐 श० म० न्या० - 'अम शब्द-भक्त्योः' (३९१) अम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ कित् ] कित् प्रथमा सि ।

[ विदुरः ] 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीत्येवंशीलः = विदुरः । अनेन किद् घुरप्र० → उर० ।

[ छिदुरः ] 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छिद्यते इत्येवंशीलः = छिदुरः । अनेन किद् घुरप्र० → उर० ।

[ भिदुरः ] 'भिदृंपी विदारणे' (१४७७) भिद् । भिद्यते इत्येवंशीलः = भिदुरः । अनेन किद् घुरप्र० → उर० ।

कित्त्वाद् गुणो न भवति । वेत्तीति तिव्निर्देश इतरविदित्रयव्युदासार्थः ।।छ।।

## भियो रु-रुक-लुकम् ।।५।२।७६ ।।

[ भियः ] भी पञ्चमी ङसि ।

[ रुरुकलुकम् ] रुश्च रुकश्च लुकश्च = रुरुकलुकम् ।

[ भीरुः, भीरुकः, भीलुकः ] 'ञिभीं‌क् भये' (११३२) भी । बिभेतीत्येवंशीलः = भीरुः - भीरुकः - भीलुकः । अनेन रु-रुक-लुकप्र० ।

ऋफिडादित्वात् लत्वं प्रयोगानुसरणाद् गरीय इति लाघवार्थं लुकवचनम् ।।छ।।

## सृ-जीण्-नशष्ट्वरप् ।।५।२।७७ ।।

[ सृजीण्नशः ] सृश्च जिश्च इण् च नश् च = सृजीण्नश्, तस्मात् ।

[ ट्वरप् ] ट्वरप् प्रथमा सि ।

[ सृत्वरः, सृत्वरी ] 'सृं गतौ' (२५) सृ । सरतीत्येवंशीलः = सृत्वरः - सृत्वरी । अनेन ट्वरप्प० → वर । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । द्वितीये 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङीप्र० । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

[ जित्वरः, जित्वरी ] 'जिं अभिभवे' (८) जि । जयतीत्येवंशीलः = जित्वरः - जित्वरी । अनेन ट्वरप्प्र० → वर० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । द्वितीये 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

[ इत्वरः, इत्वरी ] 'इंण्क् गतौ' (१०७५) इ । एतीत्येवंशीलः = इत्वरः - इत्वरी । अनेन ट्वरप्प० → वर० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । द्वितीये 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

[ नश्वरः, नश्वरी ] 'नशौच् अदर्शने' (१२०२) नश् । नश्यतीत्येवंशीलः = नश्वरः-नश्वरी । अनेन ट्वरप्प्र० → वर० । द्वितीये 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

टकारो ङ्यर्थः । पकारस्तागमार्थः ।।छ।।

## गत्वरः ।।५।२।७८ ।।

[ गत्वरः ] गत्वरः अखण्डमिदम् ।

[ गत्वरः, गत्वरी ] अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) 'गम्लृं गतौ' (३९६) गम् । गच्छतीत्येवंशीलः - शीला = गत्वरः, - गत्वरी । अनेन ट्वरप्प्र० → वर० - मस्य तकारो निपात्यते । 'अणञेयेकण्'० (२।४।२०) ङी ।।छ।।

## स्म्यजस-हिंस-दीप-कम्प-कम-नमो रः ।।५।२।७९ ।।

[ स्म्यजसहिंसदीपकम्पकमनमः ] स्मिश्च अजसश्च हिंसश्च दीपश्च कम्पश्च कमश्च नम् च = स्म्यजसहिंसदीपकम्पकमनम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ रः ]** र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ स्मेरं मुखम् ]** ष्मिङ् ईषद्धसने' (५८७) ष्मि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।७८) स्मि । स्मयत इत्येवंशीलं = स्मेरं मुखम् । अनेन रप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ अजस्रं श्रवणम् ]** अजसिति 'जसूच् मोक्षणे' (१२२३) जस्, नञ्पूर्व० । न जस्यतीत्येवंशीलमजस्रं श्रवणम् । अनेन रप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अजस्रा प्रवृत्तिः ]** अजस्र 'आत्' (२।४।१८) आप्प्र० → आ, प्रवृत्तिः ।

अजस्रशब्दोऽयं स्वभावात् सातत्यविशिष्टां क्रियामाह, तेन धात्वर्थ एव कर्त्तरि रः प्रत्ययोऽन्यथा क्रियाभिधानानुपपत्तेः, अजस्रमित्यव्ययमपि नित्यार्थं क्रियाविशेषणमस्ति ।

**[ हिंस्रो व्याधः ]** 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । हिनस्तीत्येवंशीलः = हिंस्रः व्याधः । अनेन रप्र० ।

**[ दीप्रो दीपः ]** 'दीपैचि दीप्तौ' (१२६६) दीप् । दीप्यत इत्येवंशीलः = दीप्रो दीपः । अनेन रप्र० ।

**[ कम्प्रः ]** 'कपुङ् चलने' (७५७) कप् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कम्प् । कम्पत इत्येवंशीलः = कम्प्रः । अनेन रप्र० ।

**[ कम्रा युवतिः ]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । कामयते इत्येवंशीलः । अनेन रप्र० । 'णेरनिटि' (४।३।८३) णिङ्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

बहुलाधिकारात् कर्मण्यपि-

**[ कम्रः ]** कम्यते = कम्रः । अनेन रप्र० ।

**[ कमिता ]** कम्यते = कमिता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० ।

**[ नम्रः ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमतीत्येवंशीलः = नम्रः । अनेन रप्र० ।।छा।

## तृषि-धृषि-स्वपो नजिङ् ॥५।२।८० ॥

**[ तृषिधृषिस्वपः ]** तृषिश्च धृषिश्च स्वप् च = तृषिधृषिस्वप्, तस्मात् ।

**[ नजिङ् ]** नजिङ् प्रथमा सि ।

**[ तृष्णक्, तृष्णजौ ]** 'ञितृषच् पिपासायाम्' (१२१२) तृष् । तृष्यतीत्येवंशीलः - शीलौ । अनेन नजिङ्प्र० → नज् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । प्रथमा सि-औ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[ धृष्णक्, धृष्णजौ ]** 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । धृष्णोतीत्येवंशीलः - शीलौ । अनेन नजिङ्प्र० → नज् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । प्रथमा सि-औ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ स्वप्नक्, स्वप्नजौ ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपितीत्येवंशीलः - शीलौ = स्वप्नक् - स्वप्नजौ । अनेन नजिङ्प्र० → नज् । प्रथमा सि-औ । 'च-जः क-गम्' (२।१।८६) ज → ग० । 'विरामे वा' (१।३।५१) ग० → क ० । ङकारो गुणप्रतिषेधार्थः ॥ छ॥

## स्थेश-भास-पिस-कसो वरः ॥५।२।८१ ॥

**[ स्थेशभासपिसकसः ]** स्थाश्च ईशश्च भासश्च पिसश्च कस् च = स्थेशभासपिसकस्, तस्मात् ।

**[ वरः ]** वर प्रथमा सि ।

**[ स्थावरः, स्थावरा ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र २९) स्था । तिष्ठतीत्येवंशीलः = स्थावरः, स्त्री चेत् - स्थावरा । अनेन वरप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ईश्वरः, ईश्वरा ]** 'ईशिक् ऐश्वर्ये' (१११६) ईश् । ईष्टे इत्येवंशीलः = ईश्वरः, स्त्री चेत् - ईश्वरा । अनेन वरप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ईश्वरी ]** 'अशश् भोजने' (१५५८) अश् । अश्नातीति ईश्वरी । 'अश्नोतेरीच्चादेः' (उणा० ४४२) वरट्प्र० → वर० - अकारस्य ईकारश्च । 'अणञेयेकण्'० (२।४।२०) ङी ।

**[ भास्वरः, भास्वरा ]** भासि दीप्तौ' (८४६) भास् । भासत इत्येवंशीलः = भास्वरः, स्त्री चेत् - भास्वरा । अनेन वरप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पेस्वरः, पेस्वरा ]** 'पिसृ गतौ' (५४६) पिस् । पेसतीत्येवंशीलः = पेस्वरः, स्त्री चेत् - पेस्वरा । अनेन वरप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ विकस्वरः, विकस्वरा ]** 'कस गतौ' (९८७) कस्, विपूर्व० । विकसतीत्येवंशीलः = विकस्वरः, स्त्री चेत् - विकस्वरा । अनेन वरप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ प्रमद्वरः ]** 'मदैच् हर्षे' (१२३६) मद्, प्रपूर्व० । प्रमाद्यतीत्येवंशीलः = प्रमद्वरः । मतान्तरेऽनेनैव वरप्र० ।।छ।।

## यायावरः ॥५।२।८२ ॥

**[ यायावरः ]** यायावरः अखण्डमिदम् ।

**[ यायावरः ]** 'यांक् प्रापणे' (१०६२) या । कुटिलं याति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'आ-गुणावन्यादेः' (४।१।४८) आ । यायायते इत्येवंशीलः = यायावरः । अनेन वरप्रत्ययान्तो निपात्यते ।।छ।।

## दिद्युद्-ददृज्जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः卐क्विपः ॥५।२।८३ ॥

**[ दिद्युद्ददृज्जगज्जुहूवाक्प्राट्धीश्रीद्रूस्रूज्वायतस्तूकटप्रूपरिव्राड्भ्राजादयः ]** दिद्युच्च ददृच्च जगच्च जुहूश्च वाक् च प्राट् च धीश्च श्रीश्च द्रूश्च स्रूश्च जूश्च आयतस्तूश्च कटप्रूश्च परिव्राट् च भ्राजादयश्च = दिद्युद्ददृज्जगज्जुहूवाक्प्राट्-धीश्रीद्रूस्रज्वायतस्तूकटप्रूपरिव्राड्भ्राजादयः ।

---

卐 लघुवृत्तौ - क्विप् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्विपः ]** क्विप् प्रथमा जस् ।

**[ दिद्युत् ]** 'द्युति दीप्तौ' (९३७) द्युत् । द्योतत इत्येवंशीलः = दिद्युत् ।

**[ दिद्युतौ ]** द्योतेत इत्येवंशीलौ = दिद्युतौ ।

**[ ददृत् ]** 'दृश् विदारणे' (१५३५) दृ । दृणातीत्येवंशीलः = ददृत् ।

**[ ददृतौ ]** दृणीत इत्येवंशीलौ = ददृतौ ।

**[ जगत् ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गच्छतीत्येवंशीलम् = जगत् ।

**[ जुहूः ]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । जुहोतीति जुहूः । अनेन क्विपप्र० । एषु द्वित्वम्, दृणाति-जुहोत्योर्ह्रस्वत्व-दीर्घत्वे च ।

**[ वाक् ]** 'वचंक् भाषणे' (१०९६) वच् । उच्यते-वक्तीत्येवंशीलः = वाक् ।

**[ प्राट् ]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । पृच्छतीत्येवंशीलः = प्राट् । अनेन क्विपप्र० । 'अनुनासिके च च्छ-वः शूट्' (४।१।१०८) छस्य श० ।

'निपातनात् दीर्घः आ । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ प्राशौ ]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । पृच्छत इत्येवंशीलौ = प्राशौ । अनेन क्विपप्र० । 'अनुनासिके'० (४।१।१०८) छस्य श० । निपातनात् दीर्घः आ । प्रथमा औ ।

**[ शब्दप्राट् ]** शब्दं पृच्छतीत्येवंशीलः = शब्दप्राट् । अनेन क्विपप्र० ।

**[ तत्त्वप्राट् ]** तत्त्वं पृच्छतीत्येवंशीलः = तत्त्वप्राट् । अनेन क्विपप्र० । 'अनुनासिके'० (४।१।१०८) छस्य श० । निपातनात् दीर्घः आ । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५), सिलुक् । यज-सृज-मृज-राज-भ्राज'० (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० ।. 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ धीः ]** 'डुधांग्क् धारणे च' (११३९) धा । 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या । दधाति-ध्यायति वा इत्येवंशीलः = धीः । अनेन क्विपप्र० - धीनिपातश्च । आयुधविशेषः (?) ।

**[ श्रीः ]** 'श्रिग् सेवायाम्' (८८३) श्रि । श्रयतीत्येवंशीलः = श्रीः । अनेन क्विपप्र० - दीर्घश्च निपातः ।

**[ शतद्रूः ]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु । शतं द्रवतीत्येवंशीलः = शतद्रूः । अनेन क्विपप्र० - दीर्घश्च निपातः ।

**[ स्रूः ]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु । स्रवतीत्येवंशीलः = स्रूः । अनेन क्विपप्र० - दीर्घश्च निपातः । होमभाण्डं उच्यते ।

**[ जूः ]** 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः । जवतीत्येवंशीलः = जूः, पिशाचः । अनेन क्विपप्र० - दीर्घश्च निपातः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आयतस्तूः ]** 'यमूं उपरमे' (३८६) यम्, आङ्पूर्व० । आयमनं = आयतम् । 'क्लीबे क्तः' (५।३।१२३) भावे क्त – प्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक् । 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र(२९) स्तु । आयतं स्तौतीत्येवंशीलः = आयतस्तूः – ऋत्विग् विशेषः । अनेन क्विपप्र० दीर्घश्च निपातः ।

**[ कटप्रूः ]** कट च्युंङ् (५९४) – ज्युंङ् (५९५) – जुंङ् (५९६) – 'प्रुंङ् गतौ' (५९७) प्रु । कटं प्रवत इत्येवंशीलः = कटप्रूः । अनेन क्विपप्र० – दीर्घश्च निपातः । 'अप्रयोगीत्' (१।१।३७) क्विपलुक् सर्वत्र ।

**[ परिव्राट् ]** परि धृज (१३०) – धृजु (१३१) – ध्वज (१३२) – ध्वजु (१३३) – ध्रज (१३४) – ध्रजु (१३५) – वज (१३६) – 'व्रज गतौ' (१३७) व्रज् । परितो व्रजतीत्येवंशीलः । अनेन क्विपप्र० । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'यज-सृज-मृज'० (२।१।८७) ज० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' ९१।३।५१) ड० → ट० । निपातनात् 'दीर्घत्वम् ।

**[ परिव्राजौ ]** परितौ व्रजत इत्येवंशीलौ = परिव्राजौ । अनेन क्विपप्र० – निपातनात् दीर्घत्वम् ।

दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकारः ।

बहुलाधिकारादशीलादावपि –

**[ धीः ]** ध्यायति – दधातीति धीः ।

**[ सुधीः ]** सुष्ठु ध्यायतीति सुधीः ।

**[ प्रधीः ]** प्रध्यायतीति प्रधीः ।

**[ आधीः ]** आध्यायतीति आधीः । अनेन क्विपप्र० – धीनिपातः ।

**[ विभ्राट् ]** 'भ्राजि दीप्तौ' (६६१) भ्राज्, विपूर्व० । विभ्राजत इत्येवंशीलः = विभ्राट् ।

**[ विभ्राजौ ]** विभ्राजेत इत्येवंशीलौ = विभ्राजौ । अनेन क्विपप्र० ।

**[ भाः ]** 'भासि दीप्तौ' (८४६) भास् । भासत इत्येवंशीलः = भाः ।

**[ भासौ ]** भासेत इत्येवंशीलौ = भासौ ।

**[ भासः ]** भासन्त इत्येवंशीलाः = भासः । अनेन क्विपप्र० सर्वे निपात्यन्ते ।

**[ पूः ]** 卐 'पृंक् पालन-पूरणयोः' (११३४) पृ । पिपर्तीत्येवंशीलः = पूः । अनेन क्विपप्र० – निपातनादेव दीर्घत्वम् । 'ओष्ठ्यादुर्' (४।४।११७) उर् ततो दीर्घत्वम् ।

**[ पुरौ ]** पिपृत इत्येवंशीलौ = पुरौ । शेषं पूर्ववत् । औ ।

**[ पुरः ]** पिप्रतीत्येवंशीलाः । शेषं पूर्ववत् । प्रथमा जस् ।

---

卐 श० म० न्या० – 'पृंक् पालन-पूरणयोः' । पिपर्तीतीति तु अर्थप्रदर्शनाय वाक्यम्, रूपं तु, 'पृश् पालन-पूरणयोः' इत्यस्येति पृणातीति क्विपि' ओष्ठ्यादुर्' (४।४।११७) इत्युरादेशे 'पुर्' इति, ततः सौ 'पदान्ते' (२।१।६४) इति दीर्घे च पूः, द्विवचने पुरौ, बहुवचने च पुरः । आदादिकत्वे तु उरादेशो न स्यात् दीर्घस्य ऋकारस्याभावात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ धूः, धुरौ, धुरः ]** उर्वै (४७०) - तुर्वै (४७१) - थुर्वै (४७२) - दुर्वै (४७३) - 'धुर्वै हिंसायाम्' (४७४) धुर्व् । धूर्वति - धूर्वतः - धूर्वन्तीत्येवंशीलः = धूः - धुरौ - धुरः । अनेन क्विप्प्र० । निपातनादेव दीर्घत्वम् । 'राल्लुक्' (४।१।११०) व्लुक् ततो दीर्घत्वम् । सि-औ-जस् ।

**[ विद्युत् ]** 'द्युति दीप्तौ' (९३७) द्युत्, विपूर्व० । विद्योतत इति विद्युत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।३।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

**[ विद्युतौ ]** विद्योतेत इति विद्युतौ । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[ ऊर्क् ]** 'ऊर्जण् बल-प्राणनयोः' (१५८२) ऊर्ज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । ऊर्जयतीत्येवंशीलः = ऊर्क् । अनेन क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिलुक् । 'अप्रयोगीत्' (१।३।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[ ऊर्जौ ]** ऊर्जयत इत्येवंशीलौ = ऊर्जौ । अनेन क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा औ ।

**[ ऊर्जः ]** ऊर्जयन्तीत्येवंशीलाः = ऊर्जः । अनेन क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा जस् ।

**[ ग्रावस्तुत् ]** ग्रावन् 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र (२९) स्तु । ग्रावाणं स्तौतीत्येवंशीलः = ग्रावस्तुत् । अनेन क्विप्प्र० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ ग्रावस्तुतौ ]** ग्रावाणं स्तुत इत्येवंशीलौ = ग्रावस्तुतौ ।

**[ पक् ]** 'डुपचींष् पाके' (८९२) पच् । पचतीत्येवंशीलः = पक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ शक् ]** 'शक्लृंट शक्तौ' (१३००) शक् । शक्नोतीति शक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।३।३७) क्विप्लोपः ।

**[ भित् ]** 'भिदृंपी विदारणे' (१४७७) भिद् । भिनत्तीत्येवंशीलः = भित् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ वित् ]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीत्येवंशीलः = वित् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे' (१।३।५१) द० → त० ।

**[ शोकच्छित् ]** शोकं छिनत्तीत्येवंशीलः = शोकच्छित् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

"भुवः संज्ञायामेव"-

**[ भूः पृथिवी ]** भवतीत्येवंशीला = भूः - पृथिवी । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ शंभूः शिवः ]** शं-सुखं भवतीत्येवंशीलः = शंभूः - शिवः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ आत्मभूः कामः ]** आत्मनि भवतीत्येवंशीलः = आत्मभूः कामः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ मनोभूः कामः ]** मनसि भवतीत्येवंशीलः = मनोभूः कामः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ स्वयंभूर्ब्रह्मा ]** स्वयं-आत्मना भवतीत्येवंशीलः = स्वयंभूर्ब्रह्मा । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ स्वभूर्विष्णुः ]** स्वस्मिन् भवतीत्येवंशीलः = स्वभूर्विष्णुः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ मित्रभूर्नाम कश्चित् ]** मित्रं भवतीति मित्रभूर्नाम कश्चित् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ प्रतिभूः उत्तमर्णाधमर्णयोरन्तरस्थः ]** प्रतिभवतीत्येवंशीलः = प्रतिभूः उत्तमर्णाधमर्णयोरन्तरस्थः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ दृन्भूः व्यसनसहायः ]** दृन्-हिंसन् भवतीत्येवंशीलः = दृन्भूः व्यसनसहायः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ कारभूः पण्यमूल्यादिनिर्णेता ]** 卐 कारं-कारेण वा भवतीत्येवंशीलः = कारभूः पण्यमूल्यादिनिर्णेता । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ वर्षाभूर्दर्दुर-औषधिश्च ]** वर्षासु भवतीत्येवंशीलः = वर्षाभूः दर्दुरऔषधिश्च । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ पुनर्भूः पुनरूढा-औषधिश्च ]** पुनर्भवतीत्येवंशीलः = पुनर्भूः पुनरूढा-औषधिश्च । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

संज्ञायाम् - **[ अन्यत्र भविता ]** अन्यत्र भवतीत्येवंशीलः = भविता । 'तृन् शील-धर्म-साधुषु' (५।२।२७) तृन्प्र० → तृ० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

शीलादिष्वसरूपविधिर्नास्ति, तेन सामान्यलक्षणः क्विप् न प्राप्नोतीति पुनर्विधीयते । शीलादिप्रत्ययानां पूर्णोऽवधिः ।।छ।।

## शं-सं-स्वयं-वि-प्राद् भुवो डुः ।।५।२।८४ ।।

**[ शंसंस्वयंविप्रात् ]** शम् च सम् च स्वयम् च विश्च प्रश्च = शंसंस्वयंविप्रम्, तस्मात् ।

**[ भुवः ]** भू पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् ।

**[ डुः ]** डु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शंभुः शंकरः ]** शं-सुखं तत्र भवतीति शंभुः-शंकरः ।

**[ संभुर्जनिता ]** सं भवतीति संभुर्जनिता ।

**[ स्वयंभुः ]** स्वयं भवतीति स्वयंभुः ।

**[ विभुर्व्यापकः ]** विभवतीति विभुर्व्यापकः ।

---

卐 श० म० न्या० - कारे भवतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रभुः स्वामी ]** प्रभवतीति प्रभुः - स्वामी ।

सर्वत्र अनेन डुप्र० → उ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऊलुक् ॥छ॥

## पुव इत्रो दैवते ॥५।२।८५ ॥

**[ पुवः ]** पू पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् ।

**[ इत्रः ]** इत्र प्रथमा सि ।

**[ दैवते ]** देव एव = देवता । 'भावे त्व-तल्' (७।१।५५) तल्प्र० → त० । 'आत्' (२।४।१८) आप्प्र० → आ । देवतैव = दैवता । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अन्त्यस्वरादिलोपः, तस्मिन् ।

**[ पवित्रोऽर्हन् ]** 'पूङ् पवने' (६००) पू । 'पूग्श् पवने' (१५१८) पू वा । पवते-पुनाति वा = पवित्रः । अनेन इत्रप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव्, अर्हन्, स मां पुनातु ॥छ॥

## ऋषि-नाम्नोः करणे ॥५।२।८६ ॥

**[ ऋषिनाम्नोः ]** ऋषिश्च नाम च = ऋषिनाम्नी, तयोः = ऋषिनाम्नोः । सप्तमी ओस् । वैषयिके अधिकरणे सप्तमी।

**[ करणे ]** करण सप्तमी ङि ।

**[ पवित्रोऽयमृषिः ]** पूयतेऽनेनेति पवित्रोऽयमृषिः । अनेन इत्रप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

नाम्नि - **[ दर्भः पवित्रः ]** पूयतेऽनेनेति पवित्रो दर्भः । अनेन इत्रप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ बर्हिः पवित्रम् ]** पूयतेऽनेनेति पवित्रं बर्हिः । अनेन इत्रप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ ओघोपकरणं पवित्रम् ]** 'वहीं प्रापणे' (९९६) वह् । वहति-प्रापयति निरवद्यां सर्वसावद्यमिति । 'अच्' (५।१।४९) अच्प्र० → अ० । न्यङ्क्वुद्ग - मेघाऽऽदयः (४।१।११२) ओघनिपातः । यद्वा 'उङ् शब्दे' (५८९) उ । ऊयते - शब्द्यते उपादेयतया लोकोत्तरे धर्मे इति ओघः, ओघ एव उपकरणं = ओघोपकरणम् । पवित्रं पूर्ववत् । दर्भादीनां पवित्रमिति संज्ञा ॥छ॥

## लू-धू-सू-खन-चर-सहा-ऽर्तेः ॥५।२।८७ ॥

**[ लूधूसूखनचरसहाऽर्तेः ]** लूश्च धूश्च सूश्च खनश्च चरश्च सहश्च अर्तिश्च = लूधूसूखनचरसहाऽर्ति, तस्मात् ।

**[ लवित्रम् ]** 'लूग्श् छेदने' (१५१९) लू । लुनात्यनेन = लवित्रम् । अनेन इत्रप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (४।३।१) अव् ।

**[ धुवित्रम् ]** धूत् विधूनने' (१४३०) धू । धुवत्यनेन = धुवित्रम् । अनेन इत्रप्र० । कुटादित्वात् ङिद्वत्, तेन न गुणः । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ धवित्रम् ]** 'धूगट् कम्पने' (१२९१) धू । धुनोत्यनेन । मतान्तरेऽनेनैव इत्रप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । सि-अम् ।

**[ सवित्रम् ]** 'षूत् प्रेरणे' (१३३२) षू । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सू । सुवत्यनेन = सवित्रम् । अनेन इत्रप्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

निरनुबन्धनिर्देशात् धूग्-सूङोर्न भवति ।

**[ खनित्रम् ]** 'खनूग् अवदारणे' (९१३) खन् । खनत्यनेन = खनित्रम् । अनेन इत्रप्र० ।

**[ चरित्रम् ]** 'चर भक्षणे च' (४१०) चर् । चरत्यनेन = चरित्रम् । अनेन इत्रप्र० ।

**[ सहित्रम् ]** 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सह् । सहतेऽनेन = सहित्रम् । अनेन इत्रप्र० ।

**[ अरित्रम् ]** 'ऋं प्रापणे च' (२६) ऋ । 'ऋंक् गतौ' (११३५) ऋ । ऋच्छति इयर्त्ति वाऽनेन = अरित्रम् । अनेन इत्रप्र० । 'नामिनो'० (४।३।१) गु० अर् ।

**[ वहित्रम् ]** 'वहीं प्रापणे' (९९६) वह् । वहत्यनेन = वहित्रम् । मतान्तरे अनेन इत्रप्र० । सि-अम् ॥छा।

**नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट् ॥५।२।८८ ॥**

**[ नीदाव्शसूयुयुजस्तुतुदसिसिचमिहपतपानहः ]** नीश्च दाव् च शसूश्च युश्च युजश्च स्तुश्च तुदश्च सिश्च सिचश्च मिहश्च पतश्च पाश्च नह् च = नीदाव्शसूयुयुजस्तुतुदसिसिचमिहपतपानह्, तस्मात् ।

**[ त्रट् ]** त्रट् प्रथमा सि ।

**[ नेत्रम् ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयत्यनेन = नेत्रम् । अनेन त्रट्प्र० → त्र । 'नामिनो'० (४।३।१) गु० ए ।

**[ दात्रम् ]** 'दांव्क् लवने' (१०७०) दा । दात्यनेन = दात्रम् । अनेन त्रट्प्र० → त्र ।

**[ शस्त्रम् ]** 'शसू हिंसायाम्' (५४९) शस् । शसति - हिनस्त्यनेन = शस्त्रम् । अनेन त्रट्प्र० → त्र ।

**[ योत्रम् ]** 'युक् मिश्रणे' (१०८०) यु । यौत्यनेन = योत्रम् । अनेन त्रट्प्र० → त्र । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[ योक्त्रम् ]** 'युजृंपी योगे' (१४७६) युज् । युनक्त्यनेन = योक्त्रम् । अनेन त्रट्प्र० → त्र । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः (१।३।५०) ग० → क० ।

**[ स्तोत्रम् ]** 'ष्टुंग्क् स्तुतौ' (११२४) । ष्टु । 'षः सोऽष्ट्यै'० (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या० सं० वक्ष० (१)/सूत्र (२९) स्तु । स्तौत्यनेन = स्तोत्रम् । अनेन त्रट्प्र० → त्र । 'नामिनो'० (४।३।१) गु० ओ।

**[ तोत्त्रम् ]** 'तुदीं‌त् व्यथने' (१३१५) तुद् । तुदति-व्यथति प्राणिगणमनेन = तोत्त्रम् । अनेन त्रट्प्र० → त्र । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सेत्रम् ]** 'षिंगृट् बन्धने' (१२८७) षि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः (२।३।९८) सि । सिनोत्यनेन = सेत्रम् । अनेन त्रट्प्र० → त्र० । 'नामिनो' (४।३।१) गु० ए ।

**[ सेक्त्रम् ]** 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिच् । सिञ्चत्यनेन = सेक्त्रम् । अनेन त्रट्प्र० → त्र । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ मेढ्रम् ]** 'मिहं सेचने' (५५१) मिह् । मेहत्यनेन = मेढ्रम् । अनेन त्रट्प्र० → त्र । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः । सि-अम् ।

**[ पत्त्रम् ]** 'पत्लृ गतौ' (९६२) पत् । पतत्यनेन = पत्त्रम् । अनेन त्रट्प्र० → त्र ।

**[ पात्री ]** 'पां पाने' (२) पा । पिबति नीरादिकमनेन = पात्री । अनेन त्रट्प्र० → त्र । 'अणञेयेकण्'० (२।४।२०) ङी ।

**[ नद्ध्रः, नद्ध्री ]** 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादे'० (२।३।९७) नह् । नह्यत्यनेन - अनया वा = नद्ध्रः-नद्ध्री । अनेन त्रट्प्र० → त्र । 'नहाहोर्ध-तौ' (२।१।८५) हस्य ध० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे (१।३।४९) धस्य द० । 'अणञेयेकण्'० (२।४।२०) ङी ॥छा॥

## हल-क्रोडाऽऽस्ये पुवः ॥५।२।८९ ॥

**[ हलक्रोडाऽऽस्ये ]** हलश्च क्रोडश्च = हलक्रोडौ, हलक्रोडयोरास्यम् = हलक्रोडाऽऽस्यम्, तस्मिन् ।

**[ पुवः ]** पुव् पञ्चमी ङसि । (पू) पञ्चमी ङसि । 'धातोरिवर्णो'० (२।१।५०) उव् ।

**[ पोत्रम् ]** 'पूग्श् पवने (१५१८) पू । 'पूङ् पवने' (६००) पू । पुनाति-पवते वा अनेन = पोत्रम् । अनेन त्रट्प्र० → त्र । 'नामिनो'० (४।३।१) गु० ओ । हलस्य सूकरस्य च मुखमुच्यते ॥छा॥

## दंशेस्त्रः ॥५।२।९० ॥

**[ दंशेः ]** दंशि पञ्चमी ङसि ।

**[ त्रः ]** त्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दंष्ट्रा ]** 'दंशं दशने' (४९६) दंश् । दशत्यनया = दंष्ट्रा । अनेन त्रप्र० । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग ष्टवर्गाभ्यां'० (१।३।६०) त्र० → ट्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

प्रत्ययान्तकरणमाबर्थम् ॥छा॥

## धात्री ॥५।२।९१ ॥

**[ धात्री ]** धात्री अखण्डमिदम् । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

**[ धात्री स्तनदायिनी ]** 'ट्धें पाने' (८) धे । 'आत् सन्ध्यक्षरस्य' (४।२।१) धा । धयति-पाययति स्तनं बालकमिति धात्री । अनेन निपात्यते । स्तनदायिनी उच्यते ।

**[ धात्री आमलकी ]** 'डुधांग्क् धारणे च' (११३९) धा । दधाति तां भैषज्यार्थमिति धात्री । अनेन निपात्यते । आमलकी उच्यते ॥छा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ज्ञानेच्छाऽर्चाऽर्थ-ञीच्छील्यादिभ्यः क्तः ॥५।२।९२ ॥

**[ज्ञानेच्छाऽर्चाऽर्थञीच्छील्यादिभ्यः]** ज्ञानं च इच्छा च अर्चा च = ज्ञानेच्छाऽर्चाः, ज्ञानेच्छाऽर्चा अर्था येषां ते = ज्ञानेच्छाऽर्चाऽर्थाः, ञि इदबुबन्धो येषां ते = ञीतः । शीलं(लिः) आदिर्येषां ते = शील्यादयः, ज्ञानेच्छाऽर्चाऽर्थाश्च ञीतश्च शील्यादयश्च = ज्ञानेच्छाऽर्चाऽर्थञीच्छील्यादयः, तेभ्यः = ज्ञानेच्छाऽर्चाऽर्थञीच्छील्यादिभ्यः । पञ्चमी भ्यस् ।

**[क्तः]** क्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

पूर्ववच्चास्य कर्तृ-कर्माद्यर्थनिर्देशः ।

ज्ञानार्थः- **[राज्ञां ज्ञातः]** राजन् षष्ठी आम् । 'अनोऽस्य' (२।१।१०८) अलुक् । 'कर्त्तरि' (२।२।८६) षष्ठी । 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । ज्ञायते = ज्ञातः । अनेन कर्मणि क्तप्र० → त ।

**[राज्ञां बुद्धः]** 'बुधिं ज्ञाने' (१२६२) बुध् । बुध्यते = बुद्धः । अनेन क्तप्र० → त । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय: चतुर्थे' (१।३।४९) ध० → द० ।

**[राज्ञां विदितः]** 'विदक् ज्ञाने' (१०९९) विद् । विद्यते = विदितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[राज्ञामवगतः]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, अवपूर्व० । अवगम्यते = अवगतः । अनेन क्तप्र० → त । 'यमि-रमि-नमि-गमि'० (४।२।५५) मलुक् ।

इच्छार्थः - **[राज्ञामिष्टः]** राज्ञां 'इषत् इच्छायाम्' (१४१९) इष् । इष्यते = इष्टः । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट०

**[राज्ञां मतः]** राज्ञां बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । मन्यते = मतः । अनेन क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि'० (४।२।५५) नलुक् ।

अर्चार्थः - **[राज्ञामर्चितः]** राज्ञां 'अर्च पूजायाम्' (१०४) अर्च् । अर्च्यते = अर्चितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[राज्ञां पूजितः]** राज्ञां 'पूजण् पूजायाम्' (१५८६) पूज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । पूज्यते = पूजितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सेट्क्तयोः' (४।३।८४) णिलुक् ।

एतेषु कर्मणि क्तः ।

**[मिन्नः]** 'ञिमिदाच् स्नेहने' (११८०) मिद् । मेद्यति = मिन्नः । अनेन क्तप्र० → त । 'रदादमर्च्छ-मदः क्तयोर्दस्य च' (४।२।६९) दस्य तस्य च न० ।

**[क्ष्विण्णः]** 'ञिक्ष्विदाच् मोचने च' (११८१) क्ष्विद् । क्ष्विद्यति = क्ष्विण्णः । अनेन क्तप्र० → त । 'रदादमूर्च्छ-मदः'० (४।२।६९) दस्य तस्य च न० ।

**[स्विन्नः]** 'ष्विदांच् गात्रप्रक्षरणे' (११७८) ष्विद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्विद् । स्विद्यति = स्विन्नः । अनेन क्तप्र० → त । 'रदादमूर्च्छ-मदः'० (४।२।६९) दस्य तस्य च न० ।

**[धृष्टः]** 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । धृष्णोति = धृष्टः । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त → ट० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ तूर्णः ]** 'ञित्वरिष् सम्भ्रमे' (१०१०) त्वर् । त्वरते = तूर्णः । अनेन क्तप्र० → त । 'मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन' (४।१।१०९) वस्य ऊट् → ऊ । 'रदादमूर्च्छ-मदः'० (४।२।६९) तस्य न० । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ सुप्तः ]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्टयै'० (२।३।९८) स्वप् । स्वपिति = सुप्तः । अनेन क्तप्र० → त । 'स्वपेर्यङ्ङे च' (४।१।८०) य्वृत् व० → उ० ।

**[ भीतः ]** 'ञिभींक् भये' (११३२) भी । बिभेति = भीतः । अनेन क्तप्र० → त ।

**[ इद्धः ]** 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध् । इन्धे = इद्धः । अनेन क्तप्र० → त । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । तृतीयस्तृतीय-चतुर्थे (१।३।४९) ध० → द० ।

**[ तृषितः ]** 'ञितृषच् पिपासायाम्' (१२१२) तृष् । तृष्यते = तृषितः । अनेन क्तप्र० → त । 'स्ताद्यशितोत्रोणादेरिट्' (४।४।३२) इट् ।

**[ फुल्लः ]** 'फल निष्पत्तौ' (४२८) फल् ('ञिफला विशरणे' (४१४) फल्) । फलतीति । अनेन क्तप्र० → त । 'अनुपसर्गाः क्षीबोल्लाघ-कृश-परिकृश-फुल्लोत्फुल्ल-संफुल्लाः' (४।२।८०) "फुल्ल"निपातः ।

शीला(ल्या)दिः - शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट उद्यतः ।
संयतः शयितस्तुष्टो रुष्टो रुषित आशितः ॥ १ ॥

**[ शीलितः ]** 'शीलण् उपधारणे' (१९१३) शील् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । शीलयतीति शीलितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'सेट्क्तयोः' (४।३।८४) णिलुक् ।

**[ रक्षितः ]** 'रक्ष पालने' (५६७) रक्ष् । रक्ष्यते = रक्षितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ क्षान्तः ]** 'क्षमौच् सहने' (१२३५) क्षम् । क्षाम्यति = क्षान्तः । अनेन क्तप्र० → त । 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । 'म्नां धुडवर्गे'० (१।३।३९) म० → न० ।

**[ आक्रुष्टः ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । आक्रुश्यति(ते) = आक्रुष्टः । अनेन क्तप्र० → त । 'यज-सृज-मृज-राज-भ्राज'० (२।१।८७) श० → ष० । 'तवर्गस्य (१।३।६०) त० → ट० ।

**[ जुष्टः ]** 'जुषैति प्रीति-सेवनयोः' (१४७२) जुष् । जुष्यते = जुष्टः । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[ उद्यतः ]** 'यमूं उपरमे' (३८६) यम्, उत्पूर्व० । उद्यच्छति = उद्यतः । अनेन क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि'० (४।२।५५) मलुक् ।

**[ संयतः ]** 'यमूं उपरमे' (३८६) यम्, सम्पूर्व० । संयम्यते = संयतः । अनेन क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि'० (४।२।५५) मलुक् ।

**[ शयितः ]** 'शीङ्क् स्वप्ने (११०५) शी । शेते = शयितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ तुष्टः ]** 'तुषं तुष्टौ' (१२१३) तुष् । तुष्यते = तुष्टः । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां'० (१।३।६०) त० → ट० ।

**[ रुष्टः, रुषितः ]** 'रुषच् रोषे' (१२१५) रुष् । रुष्यते = रुष्टः - रुषितः । अनेन क्तप्र० → त । 'सह-लुभेच्छ-रुष-रिषस्तादेः' (४।४।४६) इट् → इ विकल्पेन ।

**[ आसि( शि )तः ]** 'आसिक् उपवेशने' (११९६) आस् । आस्ते = आसितः । अनेन क्तप्र० → त । 'अशश् भोजने' (१५५८) अश् । 'भावे चाशितात्'० (५।१।१३०) इति निर्देशात् कर्तरि क्ते दीर्घे च, आङ्पूर्वादविवक्षितकर्मणो वा क्ते आशितः - तृप्तः ।

कान्तोऽभिव्याहृतो हृष्टस्तृप्तः सृप्तः स्थितो भृतः ।

अमृतो मुदितः पूर्तः शक्तोऽक्तः श्रान्त-विस्मितौ ॥ २ ॥

**[ कान्तः ]** 'कमूङ् कान्तौ' (७८९) कम् । काम्यते । अनेन क्तप्र० → त । 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० ।

**[ अभिव्याहृतः ]** अभि-वि-आङ् 'हृंग हरणे' (८८५) हृ । अभिव्याह्रियते स्म । अनेन क्तप्र० → त ।

**[ हृष्टः ]** तुषं (१२१३) - 'हृषच् तुष्टौ' (१२१४) हृष् । हृष्यते । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां'० (१।३।६०) त० → ट० ।

**[ तृप्तः ]** 'तृपौच् प्रीतौ' (११८९) तृप् । तृप्यते = तृप्तः । अनेन क्तप्र० → त ।

**[ सृप्तः ]** 'सृप्लृं गतौ' (३४१) सृप् । सर्पति = सृप्तः । अनेन क्तप्र० → त ।

**[ स्थितः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै'० (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१) सूत्र(२९) स्था । तिष्ठति । अनेन क्तप्र० → त । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

**[ भृतः ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । बिभर्ति । अनेन क्तप्र० → त ।

**[ अमृतः ]** 'मृंत् प्राणत्यागे' (१३३३) मृ । न म्रियते = अमृतः । अनेन क्तप्र० → त । 'नञत्' (३।२।१२५) न० → अ० ।

**[ मुदितः ]** 'मुदि हर्षे' (७२६) मुद् । मोदते । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ पूर्तः ]** 'पृश् पालन-पूरणयोः' (१५३२) पृ । पिपर्त्ति(पृणाति) = पूर्तः । अनेन क्तप्र० → त । 'ओष्ठ्यादुर्' (४।४।११७) उर् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ।

**[ शक्तः ]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्नोति = शक्तः । अनेन क्तप्र० → त ।

**[ उक्तः ]** 'वचंक् भाषणे' (१०९६) वच् । उच्यते = उक्तः । अनेन क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ श्रान्त-विस्मितौ ]** 'श्रमूच् खेद-तपसोः' (१२३३) श्रम् । श्राम्यति = श्रान्तः । अनेन क्तप्र० → त । 'अहन्पञ्चमस्य'० (४।१।१०७) दीर्घः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० । 'ष्मिङ् ईषद्धसने' (५८७) ष्मि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्मि, विपूर्व० । विस्मयते = विस्मितः । अनेन क्तप्र० → त । श्रान्तश्च विस्मितश्च = श्रान्तविस्मितौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संरब्धाऽऽरब्ध-दयिता दिग्धः स्निग्धोऽवतीर्णकः ।

आरूढो मूढ आयस्तः क्षुधित-क्लान्त-व्रीडिताः ॥ ३ ॥

**[ संरब्धः ]** 'रभिं राभस्ये' (७८५) रभ्, सम्पूर्व० । संरभते । अनेन क्तप्र० → त । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे (१।३।४९) भ० → ब० ।

**[ आरब्धः ]** 'रभिं राभस्ये' (७८५) रभ्, आङ्पूर्व० । आरभते । अनेन क्तप्र० → त । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० ।

**[ दयितः ]** 'दयि दान-गति-हिंसा-दहनेषु च' (७९९) दय् । दयते = दयितः । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । संरब्धश्च आरब्धश्च दयितश्च = संरब्धाऽऽरब्धदयिताः ।

**[ दिग्धः ]** 'दिहींक् लेपे' (११२८) दिह् । देग्धि । अनेन क्तप्र० → त । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे (१।३।४९) घ० → ग० ।

**[ स्निग्धः ]** 'ष्णिहौच् प्रीतौ' (१२४१) ष्णिह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्निह् । स्निह्यति । अनेन क्तप्र० → त । 'मुह-द्रुह-स्नुह-स्निहो वा' (२।१।८४) ह० → घ० । 'अधश्चचतुर्थात्'० (२।१।७९) त० → ध० । 'तृतीयस्तृतीय-चतुर्थे (१।३।४९) घ० → ग० ।

**[ अवतीर्णकः ]** 'तृ प्लवन-तरणयोः (२७) तृ, अवपूर्व० । अवतरति । अनेन क्तप्र० → त । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । अवतीर्ण एव = अवतीर्णकः । स्वार्थे कप्र० ।

**[ आरूढः ]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । आरोहति = आरूढः । अनेन क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्'० (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) धस्य ढ० । 'ढस्तड्ढे' (१।३।४२) ढलुक्-पूर्वस्वरस्य दीर्घः ।

**[ मूढः ]** 'मुहौच् वैचित्त्ये' (१२३८) मुह् । मुह्यति = मूढः । अनेन क्तप्र० → त । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्'० (२।१।७९) त० → ध० । तवर्गस्य श्चवर्ग'० (१।३।६०) धस्य ढ० । 'ढस्तड्ढे' (१।३।४२) ढलुक्-पूर्वस्वरस्य दीर्घः ।

**[ आयस्तः ]** 'यसूच् प्रयत्ने' (१२२२) यस्, आङ्पूर्व० । आयस्यते । अनेन क्तप्र० → त ।

**[ क्षुधितक्लान्तव्रीडिताः ]** 'क्षुधंच् बुभुक्षायाम्' (११८२) क्षुध् । क्षुध्यति = क्षुधितः । अनेन क्तप्र० → त । 'क्षुध-वसस्तेषाम्' (४।४।४३) इट् । क्लमूच् ग्लानौ' (१२३७) क्लम् । क्लम्यते । अनेन क्तप्र० → त । 'अहन्पञ्चमस्य'० (४।१।१०७) दीर्घः । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० । 'व्रीडच् लज्जायाम्' (११५१) व्रीड् । व्रीड्यति । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । क्षुधितश्च क्लान्तश्च व्रीडितश्च = क्षुधितक्लान्तव्रीडिताः ।

मत्तश्चैव तथा क्रुद्धः श्लिष्टः सुहित इत्यपि ।

लिप्त-दृप्तौ च विज्ञेयौ सति लग्नादयस्तथा ॥ ४ ॥

**[ मत्तः ]** 'मदैच् हर्षे' (१२३६) मद् । माद्यति = मत्तः । अनेन क्तप्र० → त । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्रुद्धः ]** 'क्रुधंच् कोपे' (११८४) क्रुध् । क्रुध्यति । अनेन क्तप्र० → त । 'अधश्चतुर्थात्'० (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द० ।

**[ श्लिष्टः ]** 'श्लिषंच् आलिङ्गने' (१२१०) श्लिष् । श्लिष्यति । अनेन क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) तस्य ट० ।

**[ सुहितः ]** 卐 हिंट् गति-वृद्ध्योः' (१२९५) हि, सुपूर्व० । सुहिनोति । अनेन क्तप्र० → त ।

**[ लिप्तदृप्तौ ]** 'लिपींत् उपदेहे' (१३२४) लिप् । लिम्पति । अनेन क्तप्र० → त । 'दृपौच् हर्ष-मोहनयोः' (११९०) दृप् । दृप्यति । अनेन क्तप्र० → त । लिप्तश्च दृप्तश्च = लिप्तदृप्तौ ।

**[ लग्नादयः ]** ओलजैङ् (१४६९) 'ओलस्जैति व्रीडे' (१४७०) लस्ज् । लज्ज्यते = लग्नः । अनेन क्तप्र० → त । 'सूयत्याद्योदितः' (४।२।७०) तस्य न० । 'संयोगस्यादौ स्कोर्लुक्' (२।१।८८) सलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । लग्न आदिर्येषां ते = लग्नादयः ।

बहुलाधिकारात् यथाभिधानमेभ्यो भूतेऽपि क्तो भवति, तथा च तद्योगे तृतीयासमासोऽपि सिद्धः -

**[ "अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः" ]** अर्हत् चतुर्थी भ्यस् । पूज्यते स्म = पूजितः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । त्रिभुवनस्य राजा = त्रिभुवनराजा, तेन पूजिताः = त्रिभुवनराजपूजिताः, तेभ्यः = त्रिभुवनराजपूजितेभ्यः ।

**[ शीलितो मैत्रेण ]** शील्यते स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ रक्षितो मैत्रेण ]** रक्ष्यते स्म । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ आक्रुष्टश्चैत्रेण ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, आङ्पूर्व० । आक्रुश्यते स्म । अनेन क्तप्र० → त । 'यज-सृज-मृज-राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) तस्य ट० ।

वर्त्तमानक्ते तु षष्ठ्येव-

**[ "कान्तो हरिश्चन्द्र इव प्रजानाम्" ]** कामयते स्म । अनेन क्तप्र० → त । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) म० → न० । हरि प्रथमा सि । चन्द्र इव प्रजानाम् ॥छा॥

## उणादयः ॥५।२।९३ ॥

**[ उणादयः ]** उण् आदिर्येषां ते = उणादयः ।

बहुलमिति वर्त्तते ।

**[ कारुः ]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कारुः । 'कृ-वा-पा-जि-स्वदि-साध्य-ऽशौ-दृ-स्ना-सनि-जा-निरहीण्भ्य उण्' (उणा०१) उण्प्र० → उ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ वायुः ]** 'वांक् गति-गन्धनयोः' (१०६३) वा । वातीति वायुः । 'कृ-वा-पा-जि'० (उणा०१) उण्प्र० → उ० । 'आत ऐः कृञ्चौ' (४।३।५२) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ पायुः ]** 'पां पाने' (२) पा । पिबति = पायुः । 'कृ-वा-पा-जि-स्वदि'० (उणा० १) उण्प्र० → उ० । 'आत ऐः कृञ्चौ' (४।३।५२) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

---

卐 श० म० न्या० - 'डुधांग्क् धारणे च' चकाराद् दाने, सुपूर्वादतः क्ते 'धागः' (४।४।१५) इति 'हि' इत्यादेशे - **सुहितः** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुलवचनात् प्रायः संज्ञाशब्दाः, केचित्त्वसंज्ञाशब्दा इति अनुक्ता अपि प्रत्यया भवन्ति ।

**[ ऋफिडः ]** 'ऋफ हिंसायाम्'(१३७९) ऋफ् । ऋफति । मतान्तरेऽनेनैव इडप्र० ।

तथा सति विहिता उणादयः क्वचिद् भूतेऽपि दृश्यन्ते-

**[ भस्म ]** भसक् भर्त्सन-दीप्त्योः' इति सौत्रो धातुः भस् । भसितं तदिति भस्म । 'मन्' (उणा० ९११) मन्प्र० ।

**[ कषिः ]** 'कष हिंसायाम्' (५०७) कष् । कषितोऽसौ कषिः । 'कृ-शृ-कुटि-ग्रहि-खन्यणि-कष्यलि-पलि-चरि-वसि-गण्डिभ्यो वा' (उणा० ६१९) इप्र० ।

**[ तनिः ]** 'तनूयी विस्तारे' (१४९९) तन् । ततोऽसौ तनिः । अनेन इप्र० ।

**[ वर्त्म ]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वृत्तं तदिति वर्त्मन् । 'मन्' (उणा० ९११) मन्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ चर्म ]** 'चर भक्षणे च' (४१०) चर् । चरितं तदिति चर्म । 'मन्' (उणा० ९११) मन्प्र० । प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अप्सरसः ]** अप् 'सृं गतौ' (२५) सृ । अद्भ्यः सरन्ति = अप्सरसः । 'आपोऽपाप्ताप्सराब्जाश्च' (उणा० ९६४) अस्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । प्रथमा जस् ।

उक्तं च -

संज्ञासु धातुरूपाणि, प्रत्ययाश्च ततः परे ।
कार्यानुबन्धोपपदं, विज्ञातव्यमुणादिषु ॥ १ ॥

नामसंज्ञासु विशिष्टा धातवस्तेभ्यः पराः प्रत्ययाश्च विज्ञातव्यास्तथा कार्यात् कार्यार्थं वा गुणप्रतिषेधादेरनुबन्धनिमित्तात् आ(अ)नुबन्धो विज्ञातव्यः, उपसर्गादिकं बहुलाधिकारात् ज्ञेयम् ॥छ॥

बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्यसशेषविधि(धे)श्च तदूह्यं नि(नै)गम-रूढिभवं हि सुसाधु ॥ २ ॥

नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं, प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥ ३ ॥

• • •

## ॥ मुद्रितविभागसूचिः ॥

| | अध्यायः | अध्यायः |
|---|---|---|
| भाग-१ | १/१ | २/१ |
| भाग-२ | २/२ | ३/१ |
| भाग-३ | ३/२ | ४/१ |
| भाग-४ | ४/२ | ४/४ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

## ॥ अथ पञ्चमाध्यायस्य तृतीयः पादः ॥

### वर्त्स्यति गम्यादिः ॥ ५।३।१ ॥

**[ वर्त्स्यति ]** 'वृतूङ् वर्त्तने (९५५) वृत् । वर्त्स्यतीति वर्त्स्यत् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् - स्यपूर्व० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'वृद्भ्यः स्य-सनोः' (३।३।४५) इत्यनेन परस्मैपदम्, तस्मिन् = वर्त्स्यति ।

**[ गम्यादिः ]** गमी आदिर्यस्य सः = गम्यादिः । प्रथमा सि ।

**[ गमी ग्रामम् ]** गमिष्यतीति गमी । 'गमेरिन्' (उणा० ९१९) इन्प्र० । अनेन सामान्यतः सिद्धानां प्रत्ययानां भविष्यद्धात्वर्थता विधीयते ।

**[ आगामी ]** आगमिष्यतीति आगामी । 'आङश्च णित्' (उणा० ९२०) णिद् इन्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ भावी ]** भविष्यतीति भावी । 'भुवो वा' (उणा० ९२२) णिद् इन्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रस्थायी ]** प्रकर्षेण स्थास्यते इति प्रस्थायी । 'प्रात् स्थः' (उणा० ९२४) णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रयायी ]** प्रयास्यतीत्येवंशीलः = प्रयायी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रतियायी ]** प्रतियास्यतीत्येवंशीलः = प्रतियायी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रबोधी ]** 'बुधिं ज्ञाने' (१२६२) बुध् । प्रकर्षेण भोत्स्यत इत्येवंशीलः = प्रबोधी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रतिबोधी ]** प्रतिभोत्स्यत इत्येवंशीलः = प्रतिबोधी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्'० (१।४।८४) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रतिरोधी ]** 'रुधृंपी आवरणे' (१४७३) रुध् । अवश्यं प्रतिरोत्स्यति । 'णिन् चाऽऽवश्यकाऽधमर्ण्ये' (५।४।३६) णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

## वा हेतुसिद्धौ क्तः ॥५।३।२ ॥

**[ वा ]** वा प्रथमा सि ।

**[ हेतुसिद्धौ ]** हेतोः सिद्धिः = हेतुसिद्धिः, तस्याम् ।

**[ क्तः ]** क्त प्रथमा सि ।

**[ किं ब्रवीषि वृष्टो देवः संपन्नास्तर्हि शालयः संपत्स्यन्त इति वा ]** किम् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० सिव् । 'ब्रूतः परादिः' ४।३।६३) ईत् → ई । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । वर्षति स्म=वृष्टः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) तस्य ट० । 'पदिंच् गतौ' (१२५७) पद्, सम्पूर्व० । सम्यत्स्यन्ते = संपन्नाः । अनेन क्तप्र० → त । 'रदादमूर्छ-मदः क्तयोर्दस्य च' (४।२।६९) द-तस्य न० । प्रथमा जस् । तद् । तस्मिन् काले = तर्हि । 'अनद्यतने र्हिं' (७।२।१०१) र्हिप्र० । आ द्वेरः (२।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । पक्षे-सम्पत्स्यन्ते ।

**[ प्राप्ता नौस्तीर्णा तर्हि नदी तरिष्यत इति वा ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । तरिष्यति-तरीष्यति स्म । अनेन क्तप्र० → त । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् । पक्षे-तरिष्यते ॥छ॥

## कषोऽनिटः ॥५।३।३ ॥

**[ कषः ]** कष् पञ्चमी ङसि ।

**[ अनिटः ]** न विद्यते इट् यस्मात् सः = अनिट्, तस्मात् ।

**[ कष्टम् ]** कष हिंसायाम्' (५०७) कष् । कषिष्यतीति कष्टम् । अनेन क्तप्र० → त । 'तवर्गस्य०' (१।३।६०) त० → ट० । 'कषः कृच्छ्र-गहने' (४।४।६७) इत्यनेन इण्निषेधः ।

**[ कष्टा दिशस्तमसा ]** कष्ट 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा जस् । दिश् प्रथमा जस् । तमस् तृतीया टा ।

**[ कष्टम् ]** कषति = कष्टम् । मतान्तरेऽनेन क्तप्र० → त ।

**[ कषिताः शत्रवः शूरेण ]** कष्यन्ते स्म = कषिताः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽणादेरिट्' (४।४।३२) इट् । प्रथमा जस् । शत्रु प्रथमा जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । शूर तृतीया टा ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## भविष्यन्ती ॥५।३।४ ॥

**[ भविष्यन्ती ]** 'भू सत्तायाम्' (१) भू । भविष्यतीति भविष्यन्ती । 'शत्रानशावेष्यति तु सस्यौ (५।२।२०) शतृप्र० → अत् - स्यपूर्व० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'अधातूदृदितः' (२।४।२) ङी । 'अवर्णादश्नोऽन्तो वाऽतुरीङ्योः' (२।१।११५) "अन्त"आदेशः ।

**[ भोक्ष्यते ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भविष्यन्ती स्यते । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे०' (१।३।५०) ग० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'भुनजोऽत्राणे' (३।३।३७) इत्यनेन आत्मनेपदम् ॥छ॥

## अनद्यतने श्वस्तनी ॥५।३।५ ॥

**[ अनद्यतने ]** न विद्यतेऽद्यतनो यत्र सः = अनद्यतनस्तस्मिन् ।

**[ श्वस्तनी ]** श्वस्तनी प्रथमा सि ।

**[ कर्त्ता श्वः ]** 'डुकृंग करणे' (८८८) कृ । श्वस्तनी ता । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । श्वस् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

व्यामिश्रे मा भूत् -

**[ अद्य श्वो वा गमिष्यति ]** अद्य प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अम (३९२) द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । भविष्यन्ती स्यति । 'गमोऽनात्मने' (४।४।५१) इट् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् ॥छ॥

## परिदेवने ॥५।३।६ ॥

**[ परिदेवने ]** परि 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । परिदीव्यते = परिदेवनम्, तस्मिन् ।

**परिदेवनमनुशोचनम्** । न अद्यतनः = अनद्यतनः, अनद्यतनस्य अर्थः = अनद्यतनार्थ आरम्भः ।

**[ इयं नु कदा गन्ता यैवं पादौ निदधाति ? ]** इदम् प्रथमा सि । 'अयमियं पुं-स्त्रियोः सौ' (२।१।३८) "इयम्"आदेशः । नु प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । किम् । कस्मिन् काले-कदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'किमः कस्तसादौ च' (२।१।४०) "क"आदेशः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) 'गम्लृं गतौ' (३९६) गम् । श्वस्तनी ता । 'म्नां धुड्वर्गेऽन्त्यो'० (१।३।३९) अनुस्वारः (म० → न०) । एवम् । पाद औ । 'डुधांग्क् धारणे च' (११३९) धा, निपूर्व० । वर्त्त० तिव् । 'हवः शिति' (४।१।१२) "धा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० ।

**[ अयं नु कदाऽध्येता य एवमनभियुक्तः ]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । श्वस्तनी ता । 'नामिनो'० (४।३।१) गु० ए ।

विशेषविधानात् कदा-कर्हियोगलक्षणा विभाषा बाध्यन्ते ॥छ॥

## पुरा-यावतोर्वर्त्तमाना ॥५।३।७ ॥

**[ पुरायावतोः ]** पुराश्च यावच्च = पुरायावतौ, तयोः = पुरायावतोः । सप्तमी ओस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[पुरा भुङ्क्ते]** पुरा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) नकारस्य अकारलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग → क० । 'म्नां धुड्वर्गेऽन्त्यो'० (१।३।३९) न० → ङ० ।

**[यावद् भुङ्क्ते]** यावत् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'भुङ्क्ते' पूर्ववत् ।

भविष्यदनद्यतनेऽपि परत्वाद् वर्त्तमानैव "**पुरा श्वो भुङ्क्ते**" "**यावत् श्वो व्रजति**" ।

लाक्षणिकत्वादिह न भवति-

**[महत्या पुरा जेष्यति ग्रामम्]** महत्या पुरा 'जिं अभिभवे' (८) जि । भविष्यन्ती स्यति । 'नामिनो'० (४।३।१) गु० ए । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । ग्राम द्वितीया अम् ॥छ॥

## कदा-कर्ह्योर्नवा ॥५।३।८ ॥

**[कदाकर्ह्योः]** कदा च कर्हिश्च = कदाकर्ही, तयोः = कदाकर्ह्योः । सप्तमी ओस् ।

**[नवा]** नवा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[कदा भुङ्क्ते, कदा भोक्ष्यते, कदा भोक्ता]** 'कदा' पूर्ववत् (५।३।६) । 'भुजंप् पालना'-ऽभ्यवहारयोः' (१४८७) भुज् । 'भुङ्क्ते' पूर्ववत् (५।३।७) । भविष्यन्ती स्यते । श्वस्तनी ता । 'लघोरुपान्त्यस्य (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था० (२।३।१५) षत्वम् । 'क-षयोगे क्ष० ।

**[कर्हि भुङ्क्ते, कर्हि भोक्ष्यते, कर्हि भोक्ता]** किम् । कस्मिन् अनद्यतने काले = कर्हि । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । 'किमः कस्तसादौ च' (२।१।४०) क० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'भुङ्क्ते-भोक्ष्यते-भोक्ता' पूर्ववत् ।

भूते तु नित्यं परोक्षादयः -

**[कदा बुभुजे]** 'कदा' पूर्ववत् (५।३।६) । भुज् । परोक्षा ए । 'द्विर्धातुः परोक्षा-ङे'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० ।

**[कदा भुक्तवान्]** 'कदा' पूर्ववत् (५।३।६) । भुज् । भुङ्क्ते स्म = भुक्तवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'च-जः क-गम्' (३।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'पदस्य' (२।१।८९) तलुक् । कर्हियोगेऽप्येवम् ॥छ॥

## किंवृत्ते लिप्सायाम् ॥५।३।९ ॥

**[किंवृत्ते]** विभक्त्यन्तस्य डतर-डतमान्तस्य च किमो वृत्तं = किंवृत्तम्, तस्मिन् । अयं वैयाकरणानां संज्ञा ।

**[लिप्सायाम्]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लब्धुमिच्छा = लिप्सा । 'तुमर्हादिच्छायां'० (३।४।२१) सन्प्र० । 'रभ-लभ-शक-पत-पदामिः' (४।१।२१) अकारस्य इ । 'अघोषे'० (१।३।५०) भ० → प० । 'आत्' (२।४।१८) आप्प्र० → आ, तस्याम् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङि० → याम्० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ के के भवन्तो भोजयन्ति, भोजयिष्यन्ति, भोजयितारो ? वा ]** किम् । प्रथमा जस् । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० । 'जस इः' (१।४।९) इ० । 'अवर्णस्ये'० (१।२।६) ए । भवत् प्रथमा जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'भुजंप् पालनाऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । एदैतोऽयाय्' (१।२।२३) अय् । भविष्यन्ती स्यन्ति । श्वस्तनी तारस् । 'स्ताद्यशित'० (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ कतरो भवतोर्भिक्षां ददाति, दास्यति, दाता ? वा ]** किम् । द्वयोर्मध्ये कः = कतरः । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । भवत् पञ्चमी ङसि(षष्ठी ओस्) । ददाति, दास्यति, दाता वा ।

**[ कतमो भवतां भिक्षां ददाति, दास्यति, दाता ? वा ]** किम् । बहूनां मध्ये कः = कतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । भवत् षष्ठी आम् । ददाति, दास्यति, दाता वा ॥छ॥

## लिप्स्यसिद्धौ ॥५।३।१० ॥

**[ लिप्स्यसिद्धौ ]** लिप्स्यते इति लिप्स्यम् । 'य एच्चातः' (५।१।२८) यप्र० । 'अतः' (४।३।८२) अलुक् । लिप्स्यात् सिद्धिः = लिप्स्यसिद्धिः, तस्याम् = लिप्स्यसिद्धौ । सप्तमी ङि ।

अकिंवृत्तार्थोऽयमारम्भः ।

**[ यो भिक्षां ददाति, दास्यति, दाता वा स स्वर्गलोकं याति, यास्यति, याता वा ]** यद् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । भिक्षा द्वितीया अम् । ददाति, दास्यति, दाता वा । तद् । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'तः सौ सः' (२।१।४२) तस्य स० । स्वर्गलोक द्वितीया अम् । याति, यास्यति, याता वा । लिप्स्याद् भक्तात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ॥छ॥

## पञ्चम्यर्थहेतौ ॥५।३।११ ॥

**[ पञ्चम्यर्थहेतौ ]** पञ्चम्या अर्थः = पञ्चम्यर्थः, पञ्चम्यर्थस्य हेतुः = पञ्चम्यर्थहेतुः, तस्मिन् ।

पञ्चम्यर्थः पैषादिस्तस्य हेतुर्निमित्तमुपाध्यायागमनादि, तस्मिन् अर्थे वर्त्स्यति-भविष्यति काले इत्यर्थः ।

**[ उपाध्यायश्चेदागच्छति, आगमिष्यति, आगन्ता वा अथ त्वं सूत्रमधीष्व, अथ त्वमनुयोगमादत्स्व ]** चेत् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अम (३९२) - द्रम (३९३) - हम्म (३९४) मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः (१।३।३०) छस्य द्विः । 'अघोषे'० (१।३।५०) छस्य च० । आगमिष्यति । 'गमोऽनात्मने' (४।४।५१) इट् । अथ प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । युष्मद् प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) सिसउं युष्मद्'० ''त्वम्''आदेशः । सूत्र द्वितीया अम् । अधि 'इंङ्क् अध्ययने' (११०५) इ । पञ्चमी स्व । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । 'समानानां'० (१।२।१) दीर्घः । 'डुदांग्क् दाने' (११३८) दा, आङ्पूर्व० । पञ्चमी स्व । 'हवः शिति' (४।१।१२) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक् । 'अघोषे'० (१।३।५०) द० → त० । अत्र भविष्यदुपाध्यायागमनमध्ययनादिविषयस्य प्रैषस्यातिसर्गस्य प्राप्तकालतायाश्च हेतुर्भवति ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## सप्तमी चोर्ध्वमौहूर्त्तिके ॥५।३।१२ ॥

**[ सप्तमी ]** सप्तमी प्रथमा सि ।

**[ ऊर्ध्वमौहूर्त्तिके ]** ऊर्ध्वं मुहूर्त्ताद् भवः = ऊर्ध्वमौहूर्त्तिकः । एतद्वाक्यं समासतद्धितयोर्विभागे न योज्यम्, तत्र प्रथमा-पञ्चमीभ्यां समासस्य सप्तम्यन्तं तद्धितस्य ऊर्ध्वमुहूर्त्तभवः । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अत एव निर्देशाद् उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

**[ ऊर्ध्वं मुहूर्त्तादुपरि मुहूर्त्तस्य परं मुहूर्त्तादुपाध्यायश्चेदागच्छेत्, आगच्छति, आगमिष्यति, आगन्ता वा, अथ त्वं तर्कमधीष्व, अथ त्वं सिद्धान्तमधीष्व ]** ऊर्ध्व 'क्रियाविशेषणात्' (२।२।४१) अम् । 'समानादमोऽतः' (१।४।४६) अलुक् । परम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अम (३९२) - द्रम - (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, आङ्पूर्व० । सप्तमी यात् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६), म० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे प्रथमोऽशिटः (१।३।५०) छस्य च० । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । अवर्णस्येवर्णादिनैदोदरल् (१।२।६) ए । आगच्छति । आगमिष्यति 'गमोऽनात्मने' (४।४।५१) इट् । 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । पञ्चमी स्व । 'समानानां'० (१।२।१) दीर्घः । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् ॥छ॥

## क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती ॥५।३।१३ ॥

**[ क्रियायाम् ]** 'डुकृंग् करणे' (८८८) कृ । क्रियतेऽस्याः = क्रिया । 'कृगः श च वा' (५।३।१००) शप्र० → अ । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋकारस्य रि० । 'संयोगात्' (२।१।५२) इय् । शकारस्य अपादाने विहितत्वात् क्यौ(क्यो) न भवति । 'आत्' (२।४।१८) आप्प्र० → आ, तस्याम् ।

**[ क्रियार्थायाम् ]** क्रिया अर्थो यस्याः = क्रियार्था, तस्याम् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ तुम्णकच्भविष्यन्ती ]** तुम् च णकच् च भविष्यन्ती च = तुम्णकच्भविष्यन्ती ।

वेति निवृत्तम् ।

**[ कर्तुं व्रजति ]** 'डुकृंग करणे' (८८८) कृ । करणाय = कर्तुम् । अनेन तुम्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ कारको व्रजति ]** 'डुकृंग करणे' (८८८) कृ । करणाय = कारकः । अनेन णकच्प्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ करिष्यामीति व्रजति ]** 'डुकृंग करणे' (८८८) कृ । भविष्यन्ती स्यामि । 'हनृतः स्यस्य' (४।४।४९) इट् ।

**[ भोक्तुं व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनाय = भोक्तुम् । अनेन तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० ।

**[ भोजको व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोक्ष्यते = भोजकः । अनेन णकच्प्र० → अक । 'लघोरुपान्त्यस्य'० (४।३।४) गु० ओ ।

**[ भोक्ष्ये इति व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भविष्यन्ती स्ये । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ भिक्षिष्ये इत्यस्य जटाः ]** 'भिक्षि याच्ञायाम्' (८८०) भिक्ष् । भविष्यन्ती स्ये । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । इति प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । इदम् षष्ठी ङस् → अस्० । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) इत्यनेन इदस्थाने अ० । टा-ङसोरिन-स्यौ' (१।४।५) ङस् → स्य०, जटाः ।

**[ धावतस्ते पतिष्यति वासः ]** 'धावूग् गति-शुद्ध्योः' (९२०) धाव् । धावतीति धावत् । 'शत्रानशावेष्यति'० (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक्, तस्य । युष्मद् षष्ठी ङस् । 'ङे-ङसा ते-मे' (२।१।२३) युष्मदः ''ते''आदेशः । पतिष्यति । वासस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । अत्रास्ति धावनक्रियोपपदं न त्वसौ पतनार्थमुपात्तेति न भवति ।

**'णक-तृचौ' (५।१।४८) इति सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधा मा भूदिति णकज्विधानम् ।**

**[ ओदनस्य पाचको व्रजति ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति पाचकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ पक्ता व्रजति ]** पचतीति । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ० ।

**[ पचो व्रजति ]** पचतीति पचः । 'अच्' (५।१।४९) अच्प्र० → अ ।

**[ विक्षिपो व्रजति ]** 'क्षिपींत् प्रेरणे' (१३१७) क्षिप्, विपूर्व० । विक्षिपतीति विक्षिपः । 'नाम्युपा'० (५।१।५४) कप्र० → अ ॥छा॥

## कर्मणोऽण् ॥५।३।१४ ॥

**[ कर्मणः ]** कर्मन् पञ्चमी ङसि । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ कुम्भकारो व्रजति ]** कुम्भ 'डुकृंग् करणे' (८८८) कृ । कुम्भं करिष्यन्ति(करिष्यामि) । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ काण्डलावो व्रजति ]** काण्ड 'लूग्श् छेदने' (१५१९) लू । काण्डं लविष्यामि = काण्डलावः । अनेन अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

'कर्मणोऽण्' (५।१।७२) इति सामान्येन विहितोऽण् णकचाऽनेन बाध्येत, असरूपविधिश्च नास्तीति पुनर्विधीयते, सोऽपवादत्वाण्णकचं बाधते, परत्वात् सामान्यस्याऽणो बाधकान् टगादीनपि, तेन -

**[ वक्रगायो व्रजति ]** वक्र कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । वक्रं गास्यति (गास्यामि) = वक्रगायः । अनेन अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय्, व्रजति ।

**[ सुरापायो व्रजति ]** सुरां पास्यामि = सुरापायः । अनेन अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय्, व्रजति ।

**[ गोदायो व्रजति ]** गां दास्यामीति गोदायः । अनेन अण्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय्, व्रजति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुलाधिकाराण्णकच् - भविष्यन्त्यावपि भवतः -

**[कटं कारको व्रजति]** कट द्वितीया अम् । करिष्यति = कारकः । 'क्रियायां क्रियार्थायां तुम् णकच् - भविष्यन्ती' (५।३।१३) णकच्प्र० ।

**[ओदनं भोजको व्रजति]** भुज् । भोक्ष्यते = भोजकः । 'क्रियायां क्रियार्थायां'० (५।३।१३) णकच्प्र० ।

**[काण्डानि लविष्यामीति व्रजति]** काण्डानि 'लूग्श् छेदने' (१५१९) लू । भविष्यन्ती स्यामि । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

## भाववचनाः ॥५।३।१५ ॥

**[भाववचनाः]** भाव 'वचंक् भाषणे' (१०९६) वच् । भावं वचन्ति = भाववचनाः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । प्रथमा जस् । भाववचना घञ्-क्त्यादयः ।

**[पाकाय व्रजति]** 'डुपचींष् पाके' (८९२) पच् । पक्ष्यते = पाकः, तस्मै । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः०' (४।१।१११) च० → क० । व्रजति ।

**[पक्तये व्रजति]** पक्ष्यते = पक्तिः, तस्यै । 'गा-पा-पचो भावे' (५।३।९५) क्तिप्र० → ति । व्रजति ।

**[पचनाय व्रजति]** पक्ष्यते = पचनं, तस्मै । अनेन अनट्प्र० → अन । व्रजति ।

**[पाचनायै व्रजति]** पचन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पाचयिष्यति = पाचनाय, तस्मै । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । व्रजति ।

## पद-रुज-विश-स्पृशो घञ् ॥५।३।१६ ॥

**[पदरुजविशस्पृशः]** पदश्च रुजश्च विशश्च स्पृश् च = पदरुजविशस्पृश्, तस्मात् ।

**[घञ्]** घञ् प्रथमा सि ।

वर्त्स्यतीत्यादि निवृत्तम् ।

पद-रुजेत्यादि प्रकृतिनियन्त्रितप्रत्ययोपादानात् आदिशब्दात् क्रियार्थायां क्रियायामुपपदे इति च ज्ञेयम् ।

**[पादः]** 'पदिच् गतौ' (१२५७) पद् । पद्यते-पत्स्यते-अपादि-पेदे वा = पादः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[रोगः]** 'रुजोंत् भङ्गे' (१३५०) रुज् । रुजति - रोक्ष्यति - अरौक्षीत्-रुरोज वा = रागः । अनेन घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिट०' (४।१।१११) ज० → ग० ।

**[वेशः]** 'विशंत् प्रवेशने' (१४१५) विश् । विशति-वेक्ष्यति-अविक्षत्-विवेश वा = वेशः । अनेन घञ्प्र० → अ० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[स्पर्शो व्याधिविशेषः]** 'स्पृशंत् संस्पर्शे' (१४१२) स्पृश् । स्पृशति-स्पृक्ष्यति-अस्प्राक्षीत्-पस्पर्श वा = स्पर्शः । अनेन घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

घकारः कत्व-गत्वार्थः । ञकारो वृद्ध्यर्थः ॥छ॥

## सर्तेः स्थिर-व्याधि-बल-मत्स्ये ॥५।३।१७ ॥

**[सर्तेः]** सर्त्ति पञ्चमी ङसि ।

**[स्थिरव्याधिबलमत्स्ये]** स्थिरश्च व्याधिश्च बलं च मत्स्यश्च = स्थिरव्याधिबलमत्स्यम्, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सारः स्थिरः पदार्थः]** 'सृं गतौ' (२५) सृ । सरति कालान्तरमिति सारः स्थिरः पदार्थः ।

**[सालसारः]** सालस्य सारः = सालसारः ।

**[खदिरसारः]** खदिरस्य सारः = खदिरसारः ।

**[कार्ष्यसारः]** कार्ष्यस्य सारः = कार्ष्यसारः ।

**[अतीसारो व्याधिः]** अतिक्रमेण सरति वृद्धिमचिकित्स्यमान इति अतीसारो व्याधिः । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

**[सारो बलम्]** सरति यौवने वृद्धिमिति सारो बलम् ।

**[विसारो मत्स्यः]** विशेषेण सरति जले इति विसारो मत्स्यः ।

अनेन सर्वत्र घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ॥छ॥

## भावा-ऽकर्त्रोः ॥५।३।१८ ॥

**[भावाऽकर्त्रोः]** भावश्च अकर्त्ता च = भावाकर्त्तारौ, तयोः = भावाऽकर्त्रोः । सप्तमी ओस् ।

**[पाकः]** 'डुपचींष् पाके' (८९२) पच् । पचनम् = पाकः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) च० → क० ।

**[रागः]** 'रञ्जीं रागे' (८९६) रञ्ज् । रञ्जनम् = रागः । अनेन घञ्प्र० → अ । 'घञि भाव-करणे' (४।२।५२) नलुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[त्यागः]** 'त्यजं हानौ' (१७२) त्यज् । त्यजनम् = त्यागः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० ।

**[प्राकारः]** प्रकुर्वन्ति तमिति प्राकारः । अनेन घञ्प्र० → अ । 'नामिनोऽलि-हलेः' (४।३।५१) वृद्धिः आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

**[प्रासः]** 'असूच् प्रयत्ने' (१२२१) अस्, प्रपूर्व० । प्रास्यति अन्नमिति प्रासः । अनेन घञ्प्र० → अ ।

**[प्रसेवः]** 'षिवूच् उतौ' (११६४) षिव् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव्, प्रपूर्व० । प्रसीव्यति तमिति प्रसेवः । अनेन घञ्प्र० → अ० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[समाहारः]** समाहरति-पिण्डीकरोति शब्दसङ्घातमिति समाहारः । अनेन घञ्प्र० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[कारः]** करणं = कारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[दाशः]** 'दाशृग् दाने' (९२२) दाश् । दाशन्तेऽस्मा इति दाशः । अनेन घञ्प्र० → अ ।

**[आहारः]** 'हृंग् हरणे' (८८५) हृ, आङ्पूर्व० । 卐 आहरन्ति तस्मादित्याहारः । अनेन घञ्प्र० → अ० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । असंज्ञायामपि-

卐 श० म० न्या० - आहरन्त्यस्मादित्याहारः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ दायो दत्तः ]** 'डुदांग्क् दाने' (११३८) दा । दीयते = दायः । अनेन घञ्प्र० → अ । 'आत ऐः कृञ्जौ' (४।३।५३) आ० → ऐ० । एदैतोऽयाय्' (१।२।२३) आय् ।

**[ लाभो लब्धः ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लभ्यते = लाभो लब्धः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

भावो भवत्यर्थः साध्यरूपः क्रियासामान्यं धात्वर्थः, स धातुनैवोच्यते, तत्रैव च त्यादयः क्त्वातुममस्तव्यानीयादयश्च भवन्ति । यस्तु भावो धात्वर्थधर्मः सिद्धता नाम लिङ्गसंख्यायोगी स द्रव्यवद् धात्वर्थादन्यः, तत्रायं घञादिविधिः, तेन तद्योगे लिङ्गवचनभेदः सिद्धो भवत्यर्थः ।

**[ पाकः, पाकौ, पाकाः ]** पचनम् = पाकः - पाकौ - पाकाः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'क्तेऽनिटश्च-जोः'० (४।१।१११) च० → क० । सि-औ-जस् ।

**[ पचनं, पचने, पचनानि ]** पच्यते-पच्येते-पच्यन्ते = पचनं-पचने-पचनानि । 'अनट्' (५।३।१२४) अनट्प्र० → अन । प्र० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । प्र० औ । 'औरीः' १।४।५६ ई । प्र० जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ पक्तिः, पक्ती, पक्तयः ]** पचनम् = पक्तिः-पक्ती-पक्तयः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । सि-औ-जस् ।।छ।।

## इङोऽपादाने तु टिद् वा ।।५।३।१९ ।।

**[ इङः ]** इङ् पञ्चमी ङसि ।

**[ अपादाने ]** अपादान सप्तमी ङि ।

**[ तु ]** तु प्रथमा सि ।

**[ टित् ]** ट् इदनुबन्धो यस्य सः = टित् ।

**[ वा ]** वा प्रथमा सि ।

**[ अध्यायः ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । अध्ययनमध्यायः ।

**[ अध्यायः ]** अधीयते इत्यध्यायः ।

**[ उपाध्यायः ]** उपेत्य - समीपे आगत्याधीयतेऽस्मात् इति उपाध्यायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

टित्करणसामर्थ्यात् स्त्रियां क्तिर्बाध्यते । ननु 'पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' (न्या० सं०वक्ष०(१) सूत्र(३६) न्यायात् अयं घञ् अलमेव बाधते न क्तिमिति वचनं बाधित्वा क्तिप्राप्नोतीत्याह - **टित्त्वस्य हि स्त्रियां ङीप्रत्ययफलं ततो यदि स्त्रियां क्तिर्भविष्यति तदा किं टिद्विधानेन ।**

**[ उपाध्यायी, उपाध्याया ]** उपाध्याय पूर्ववन्निष्पन्नं मण्ड्यते । 'आत्' (२।४।१८) आप्प्र० → आ । 卐 टित्फलं 'अणञेयेकण्'० (२।४।२०) ङी ।।छ।।

卐 श० म० न्या० - यदा तूपाध्यायस्य स्त्रीति धवयोगो विवक्ष्यते तदा 'मातुलाचार्योपाध्यायाद् वा' (२।४।६३) इति नित्यं ङ्यां तद्योगे च वा 'आन्' इत्यन्तागमे - **उपाध्यायानी उपाध्यायीति** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## श्रो वायु-वर्ण-निवृते ॥५।३।२० ॥

**[ श्रः ]** शृ पञ्चमी ङसि । 'इवर्णादेरस्वे'० (१।२।२१) रत्वम् ।

**[ वायुवर्णनिवृते ]** वायुश्च वर्णश्च निवृतश्च = वायुवर्णनिवृतम्, तस्मिन् ।

**[ शारो वायुः ]** कृ (१५२९) - मृ (१५३०) - 'शृश् हिंसायाम्' (१५३१) शृ । शीर्यते औषधादिभिरिति शारो वायुः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ शारो वर्णः ]** मालिन्येन शीर्यते इति शारो वर्णः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

निवृतं - निवरणं प्रावरणमित्यर्थः ।

**[ नीशारो निवृतम् ]** निशीर्यते शीताद्युपद्रवो येन तत् = नीशारो निवृतम् । अनेन घञ्प्र० → अ । 'नामिनोऽलि-हलेः' (४।३।५१) वृ० आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः

**[ "गौरिवाकृतनीसारः प्रायेण शिशिरे कृशः" ]** न कृतो नीसारो येन सोऽकृतनीसारः, अकृतप्रावरण इत्यर्थः । प्राव्रियतेऽनेन = प्रावरणम् ।

**[ शरः ]** 卐 शृणातीति शरः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ॥छा॥

## निरभेः पू-ल्वः ॥५।३।२१ ॥

**[ निरभेः ]** निर् च अभिश्च = निरभि, तस्मात् ।

**[ पूल्वः ]** पूश्च लूश्च = तत्, तस्मात् । पू इति पूग्-पूङोः सामान्येन ग्रहणम् ।

**[ निष्पावः ]** 'पूग्श् पवने' (१५१८) पू । 'पूङ् पवने' (६००) पू । निष्पूयते = निष्पावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) षत्वम् ।

**[ अभिलावः ]** अभि 'लूग्श् छेदने' (१५१९) लू । अभिलूयते = अभिलावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ॥छा॥

## रोरुपसर्गात् ॥५।३।२२ ॥

**[ रोः ]** रु पञ्चमी ङसि ।

**[ उपसर्गात् ]** उपसर्ग पञ्चमी ङसि ।

**[ संरावः ]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु, सम्पूर्व० । संरवणं = संरावः ।

**[ उपरावः ]** रु, उपपूर्व० । उपरवणं = उपरावः ।

**[ विरावः ]** रु, विपूर्व० । विवरणं = विरावः ।

---

卐 श० म० न्या० - शृणन्ति तेनेति शरः । 'पुं-नाम्नि घः' (५।३।१३०) घप्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वत्र अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ रवः ]** रु । रवणं = रवः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ सांराविणम् ]** समन्तात् रावः । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । ततः स्वार्थे 'नित्यं ञ - ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । सि-अम् । 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादेर्लुक् न 'अनपत्ये' (७।४।५५) इति निषेधात् ।

**[ रावः ]** रु । रवणं = रावः । बहुलाधिकारात् अनेनैव घञ्प्र० ॥छ॥

## भू-श्र्यदोऽल् ॥५।३।२३ ॥

**[ भूश्र्यदः ]** भूश्च श्रिश्च अद् च = भूश्र्यद्, तस्मात् ।

**[ अल् ]** अल् प्रथमा सि ।

**[ प्रभवः ]** 'भू सत्तायाम्' (१) भू, प्रपूर्व० । प्रभवणं = प्रभवः ।

**[ विभवः ]** भू, विपूर्व० । विभवनं = विभवः ।

**[ संभवः ]** भू, सम्पूर्व० । संभवनं = संभवः ।

सर्वत्र अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ प्रश्रयः ]** 'श्रिग् सेवायाम्' (८८३) श्रि, प्रपूर्व० । प्रश्रयणं = प्रश्रयः ।

**[ प्रतिश्रयः ]** श्रि, प्रतिपूर्व० । प्रतिश्रयणं = प्रतिश्रयः ।

**[ संश्रयः ]** श्रि, सम्पूर्व० । संश्रयणं = संश्रयः ।

सर्वत्र अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ प्रघसः ]** 'अदंक् भक्षणे' (१०५९) अद्, प्रपूर्व० । प्रादनं = प्रघसः ।

**[ विघसः ]** अद्, विपूर्व० । व्यदनं = विघसः ।

**[ संघसः ]** अद्, सम्पूर्व० । समदनं = संघसः ।

सर्वत्र अनेन अल्प्र० → अ । 'घस्लृ सनद्यतनी-घञचलि' (४।४।१७) अद्० → घस्लृ० → घस् ।

**[ भावः ]** भवनं = भावः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ श्रायः ]** श्रयणं = श्रायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ घासः ]** अदनं = घासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'घस्लृ सनद्यतनी-घञचलि' (४।४।१७) अद्० → घस्लृ० → घस्० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भू-श्र्योरुपसर्गादेवेति नियमार्थं वचनम् ।

**[ प्रभावः ]** प्रभवणं = प्रभावः । बहुलाधिकारात् अनेनैव घञ्प्र० → अ । यद्वा प्रकृष्टो भाव इत्यादि प्रादिसमासो वा ।

**[ विभावः ]** विभवनं = विभावः । बहुलाधिकारात् अनेनैव घञ्प्र० → अ ।

**[ अनुभावः ]** अनुभवनं = अनुभावः । बहुलाधिकारात् अनेनैव घञ्प्र० → अ ।

लकारो 'मिग्-मीगोऽखल-चलि' (४।२।८) इत्यत्र विशेषणार्थः ॥छा।

## न्यादो नवा ॥५।३।२४ ॥

**[ न्यादः ]** न्याद प्रथमा सि ।

**[ नवा ]** नवा प्रथमा सि ।

**[ न्यादः ]** 'अदंक् भक्षणे' (१०५९) अद्, निपूर्व० । न्यदनं = न्यादः । निपातनात् 'भू-श्र्यदोऽल्' (५।३।२३) अल्प्र० → अ-दीर्घत्वं च ।

**[ निघसः ]** नि(न्य)दनं = निघसः । 'भू-श्र्यदोऽल्' (५।३।२३) अल्प्र० → अ । 'घस्लृ सनद्यतनी-घञचलि' (४।४।१७) अद्० → घस्लृ० → घस्० ॥छा।

## सं-नि-व्युपाद् यमः ॥५।३।२५ ॥

**[ संनिव्युपात् ]** सम् च निश्च विश्च उपश्च = संनिव्युपम्, तस्मात् ।

**[ यमः ]** यम् पञ्चमी ङसि ।

**[ संयमः, संयामः ]** 'यमूं उपरमे' (३८६) यम्, सम्पूर्व० । संयमनं = 'संयमः । अनेन अल्प्र० → अ । पक्षे-'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ नियमः, नियामः ]** यम्, निपूर्व० । नियमनं = नियमः । अनेन अल्प्र० → अ । पक्षे-'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ वियमः, वियामः ]** यम्, विपूर्व० । वियमनं = वियमः । अनेन अल्प्र० → अ । पक्षे - 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ उपयमः, उपयामः ]** यम्, उपपूर्व० । उपयमनं = उपयमः । अनेन अल्प्र० → अ । पक्षे - 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

## नेर्नद-गद-पठ-स्वन-क्वणः ॥५।३।२६ ॥

**[ नेः ]** नि पञ्चमी ङसि ।

**[ नदगदपठस्वनक्वणः ]** नदश्च गदश्च पठश्च स्वनश्च क्वण् च = नदगदपठस्वनक्वण्, तस्मात् ।

**[ निनदः, निनादः ]** 'णद अव्यक्ते शब्दे' (२९९) णद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नद्, निपूर्व० । निनदनं = निनदः । अल्प्र० । एवम् - निनादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । एवमग्रेऽपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[निगदः, निगादः]** 'गद व्यक्तायां वाचि' (२९७) गद्, निपूर्व० । निगदनं = निगदः - निगादः ।

**[निपठः, निपाठः]** 'पठ व्यक्तायां वाचि' (२१३) पठ्, निपूर्व० । निपठनं = निपठः - निपाठः ।

**[निस्वनः, निस्वानः]** स्तन (३२३) - धन (३२४) - ध्वन (३२५) - चन (३२६) - 'स्वन शब्दे' (३२७) स्वन्, निपूर्व० । निस्वननं = निस्वनः - निस्वानः ।

**[निक्वणः, निक्वाणः]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - ध्रण (२६९) - कण (२७०) - 'क्वण शब्दे' (२७१) क्वण्, निपूर्व० । निक्वणनं = निक्वणः - निक्वाणः ॥छ॥

## वैणे क्वणः ॥५।३।२७ ॥

**[वैणे]** वीणायां भवः = वैणः - ध्वनिविशेषः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक्, तस्मिन् ।

**[क्वणः]** क्वण् पञ्चमी ङसि ।

**[प्रक्वणो वीणायाः, प्रक्वाणो वीणायाः]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - ध्रण (२६९) कण (२७०) - 'क्वण शब्दे' (२७१) क्वण्, प्रपूर्व० । प्रक्वणनं = प्रक्वणः । अनेन अल्प्र० । एवम् - प्रक्वाणः । 'भावाऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ, वीणायाः ।

**[निक्वणो वीणायाः, निक्वाणो वीणायाः]** निक्वणनं = निक्वणः - निक्वाणः । शेषं पूर्ववत् ।

**[क्वणः, क्वाणो वीणायाः]** क्वणनं = क्वणः - क्वाणो वीणायाः । 'नवा क्वण-यम-हस-स्वनः' (५।३।४८) अल्प्र० → अ । पक्षे-'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः ॥५।३।२८ ॥

**[युवर्णवृदृवशरणगमृद्ग्रहः]** इश्च उश्च = यु, युतो वर्णः = युवर्णः, युवर्णश्च वृश्च दृश्च वशश्च रणश्च गम् च ऋच्च ग्रह् च = युवर्णवृदृवशरणगमृद्ग्रह्, तस्मात् ।

उपसर्गाद् वा इति च निवृत्तम् - 'आङो रु-प्लो' (५।३।४९) इति सूत्रकरणात् । घञोऽपवादः ।

**[चयः]** 'चिंग्ट् चयने' (१२९०) चि । चयनं = चयः । अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[निश्चयः]** चि, निर्पूर्व० । निश्चयनं = निश्चयः । शेषं पूर्ववत् ।

**[जयः]** 'जिं अभिभवे' (८) जि । जयनं = जयः । अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[क्षयः]** 'क्षिं क्षये' (१०) क्षि । क्षयणं = क्षयः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[क्रयः]** 'डुक्रींग्श् द्रव्यविनिमये' (१५०८) क्री । क्रयणं = क्रयः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ यवः ]** 'युक् मिश्रणे' (१०८०) यु । यवनं = यवः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२३) अव् ।

**[ रवः ]** दुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । रवणं = रवः । अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतो०' (१।२।२३) अव् ।

**[ नवः ]** 'णूत् स्तवने' (१४२९) णू । 'पाठे धात्वादेर्णो नः' (२।३।९७) नू । नवनं = नवः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२३) अव् ।

**[ स्तवः ]** 'ष्टुंगक् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या० सं० वक्ष०(१)/सूत्र(२९)) स्तु । स्तवनं = स्तवः । अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२३) अव् ।

**[ लवः ]** 'लूग्श् छेदने' (१५१९) लू । लवनं = लवः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२३) अव् ।

**[ पवः ]** 'पूग्श् पवने' (१५१८) पू । पवनं = पवः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२३) अव् ।

**[ वरः ]** 'वृग्ट् वरणे' (१२९४) वृ । वरणं = वरः ।

**[ प्रवरः ]** 'वृग्ट् वरणे' (१२९४) वृ, प्रपूर्व० । प्रवरणं = प्रवरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ दरः ]** 'दृंङ्त् अना(आ)दरे (१४६६) दृ । दरणं = दरः ।

**[ आदरः ]** दृंङ्त् अना(आ)दरे (१४६६) दृ, आङ्पूर्व० । आदरणं = आदरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ वशः ]** 'वशक् कान्तौ' (११०१) वश् । वशनं = वशः । अनेन अल्प्र० → अ ।

**[ रणः ]** अण (२५९) - 'रण शब्दे' (२६०) रण् । रणनं = रणः । अनेन अल्प्र० → अ ।

**[ गमः ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गमनं = गमः । अनेन अल्प्र० → अ ।

**[ अवगमः ]** गम्, अवपूर्व० । अवगमनं = अवगमः । अनेन अल्प्र० → अ ।

**[ करः ]** 'कॄ हिंसायाम्' (१५२९) कॄ । करणं = करः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर्।

**[ गरः ]** 'गॄत् निगरणे' (१३३५) गॄ । गरणं = गरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर्।

**[ तरः ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । तरणं = तरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर्।

**[ दरः ]** 'दॄश् विदारणे' (१५३५) दॄ । दरणं = दरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर्।

**[ शरः ]** कॄ (१५२९) - मॄ (१५३०) - 'शॄश् हिंसायाम्' (१५३१) शॄ । शरणं = शरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ग्रहः]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । ग्रहणं = ग्रहः । अनेन अल्प्र० → अ ।

**[वारः समूहः]** 'वृग्ट् वरणे' (१२९४) वृ । वरणं = वारः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, समूहः ।

**[वारोऽवसरः]** 'वृग्ट् वरणे' (१२९४) वृ । वरणं = वारः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, अवसरः ।

**[वारः क्रियाभ्यावृत्तिः]** 'वृग्ट् वरणे' (१२९४) वृ । वरणं = वारः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, क्रियाभ्यावृत्तिः ।

**[परिवारः]** परि-वृ । परिवृण्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । परिवारणं = परिवारः । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लुक् ॥छ॥

**वर्षादयः क्लीबे ॥५।३।२९ ॥**

**[वर्षादयः]** वर्ष आदिर्येषां ते = वर्षादयः ।

**[क्लीबे]** क्लीब सप्तमी ङि ।

नपुंसके क्ताऽनड्निवृत्त्यर्थं वचनम् ।

किं वर्षणमिति न भवति ? भवत्येव - **वृषभो वर्षणादिति भाष्यकारवचनात् ।**

**[वर्षम्]** जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । वृष्टिर्वर्षम् ।

**[भयम्]** ञिभींक् भये' (११३२) भी । भीतिर्भयम् ।

**[धनम्]** स्तन (३२३) - 'धन शब्दे' (३२४) धन् । धननं = धनम् ।

**[वनम्]** 'वन संभक्तौ' (३२९) वन् । वननं = वनम् ।

**[खलम्]** 'खल संचये च' (४४९) खल् । खलतिः = खलम् ।

**[पदम्]** 'पदिंच् गतौ' (१२५७) पद् । पन्नः = पदम् । अनेन अल्प्र० → अ निपात्यते ।

**[युगम्]** 'युजंपी योगे' (१४७६) युज् । योजनं = युगम् । अत्र रथाङ्ग-कालविशेष-युग्मेष्वल्-गत्वगुणाभावौ च निपातनात् ।

**[वृष्टं मेघेन]** वृष्यते स्म = वृष्टं मेघेन । अत्र भावे 'तत् साप्याऽनाप्यात् कर्म-भावे, कृत्य-क्त-खलर्थाश्च' (३।३।२१) क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[भीतं बटुना]** भीयते स्म = भीतं बटुना । अत्र भावे 'तत् साप्याऽनाप्यात्'० (३।३।२१) क्तप्र० → त ॥छ॥

**समुदोऽजः पशौ ॥५।३।३० ॥**

**[समुदः]** सम् च उद् च = समुद्, तस्मात् ।

**[अजः]** अज् पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पशौ ]** पशु सप्तमी ङि ।

**[ समजः पशूनाम् ]** 'अज क्षेपणे च' (१३९) अज्, संपूर्व० । समजनं = समजः, पशूनां समूह इत्यर्थः । अनेन अल्प्र० → अ ।

**[ उदजः पशूनाम् ]** अज्, उत्पूर्व० । उदजनं = उदजः, पशूनां प्रेरणमित्यर्थः । अनेन अल्प्र० → अ ।

**[ व्याजः पशूनाम् ]** व्यजनं = व्याजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ समाजः साधूनाम् ]** समजनं = समाजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ उदाजः खगानाम् ]** उदजनं = उदाजः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## सृ-ग्लहः प्रजना-ऽक्षे ॥५।३।३१ ॥

**[ सृग्लहः ]** सृश्च ग्लह् च = सृग्लह्, तस्मात् ।

**[ प्रजनाऽक्षे ]** प्रजनं च(प्रजनश्च) अक्षश्च = प्रजनाऽक्षम्, तस्मिन् ।

**[ गवामुपसरः ]** 'सृं गतौ' (२५) सृ । उपसरणं = उपसरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ पशूनामुपसरः ]** उपसरणं = उपसरः । अनेन अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

प्रजनो गर्भग्रहणम्, तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसर उच्यते ।

**[ अक्षाणां ग्लहः ]** 'ग्लहौङ् ग्रहणे' (८७२) ग्लह् । ग्लहणं अथवा ग्रहणं = ग्लहः । अनेन अल्प्र० → अ । ग्रहेरेतन्निदर्शनाल्लत्वम्, ग्लहिः प्रकृत्यन्तरं वा ।

**[ उपसारो भृत्यै राज्ञाम् ]** उपसरणं = उपसारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ ॥छ॥

## पणेर्माने ॥५।३।३२ ॥

**[ पणेः ]** पणि पञ्चमी ङसि ।

**[ माने ]** मान सप्तमी ङि ।

**[ मूलकपणः ]** 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । पण्यते-पणाय्यत इति वा = पणः । अनेन अल्प्र० → अ । मूलकस्य पणः = मूलकपणः ।

**[ शाकपणः ]** पण् । पण्यते-पणाय्यत इति वा = पणः । अनेन अल्प्र० → अ । शाकस्य पणः = शाकपणः ।

**[ पणः ]** पण्यत इति पणः । अनेन अल्प्र० → अ । मूलकादीनां संव्यवहारार्थं परिमितो मुष्टिरित्यर्थः ।

**[ पाणः ]** पणनं = पाणः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## संमद-प्रमदौ हर्षे ॥५।३।३३ ॥

**[ संमदप्रमदौ ]** संमदश्च प्रमदश्च = संमदप्रमदौ ।

**[ हर्षे ]** हर्ष सप्तमी ङि ।

**[ संमदः कोकिलानाम् ]** 'मदैच् हर्षे' (१२३६) मद्, सम्पूर्व० । संमदनं = संमदः कोकिलानाम् । अनेन अल्प्र० निपात्यते च ।

**[ प्रमदः कन्यानाम् ]** 'मदैच् हर्षे' (१२३६) मद्, प्रपूर्व० । प्रमदनं = प्रमदः कन्यानाम् । अनेन अल्प्र० निपात्यते च ।

**[ संमादः ]** संमदनं = संमादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रमादः ]** प्रमदनं = प्रमादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रसंमादः ]** प्रकृष्टः संमदनं = प्रसंमादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ संप्रमादः ]** संप्रमदनं = संप्रमादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अभिसंमादः ]** अभिसंमदनं = अभिसंमादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## हनोऽन्तर्घनाऽन्तर्घणौ देशे ॥५।३।३४ ॥

**[ हनः ]** हन् पञ्चमी ङसि ।

**[ अन्तर्घनाऽन्तर्घणौ ]** अन्तर्घनश्च अन्तर्घणश्च = अन्तर्घनाऽन्तर्घणौ ।

**[ देशे ]** देश सप्तमी ङि ।

**[ अन्तर्घनः, अन्तर्घणो वा वाहीकेषु देशविशेषः ]** अन्तर् 'हनंक् हिंसा-गत्योः' (११००) हन् । अन्तर्हन्य(ण्य)तेऽस्मिन्निति अन्तर्घनः । अनेन अल्प्र० - घनादेशश्च । एवम् - अन्तर्घणो वा वाहीकेषु देशविशेषः । अनेन अल्प्र० - घणादेशश्च ॥छ॥

## प्रघण-प्रघाणौ गृहांशे ॥५।३।३५ ॥

**[ प्रघणप्रघाणौ ]** प्रघणश्च प्रघाणश्च = प्रघणप्रघाणौ ।

**[ गृहांशे ]** गृहस्यांशः = गृहांशस्तस्मिन् ।

**[ प्रघणः प्रघाणो वा द्वारालिन्दकः ]** 'हनंक् हिंसा-गत्योः' (११००) हन्, प्रपूर्व० । प्रहण्यतेऽसाविति प्रघणः । अनेन अल्प्र०-घणादेशश्च । एवम्-प्रघाणः । अल्प्र०-घाणादेशश्च, द्वारालिन्दकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रघातोऽन्यः ]** प्रहणनं = प्रघातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात् आदेशः ॥छा॥

**निघोद्घ-संघोद्घनाऽपघनोपघ्नं निमित-प्रशस्त-गणा-ऽत्याधाना-ऽङ्ग-ऽऽसन्नम् ॥५।३।३६ ॥**

**[ निघोद्घसंघोद्घनाऽपघनोपघ्नम् ]** निघश्च उद्घश्च संघश्च उद्घनश्च अपघनश्च उपघ्नं च = निघोद्घसंघोद्घनाऽपघनोपघ्नम् ।

**[ निमितप्रशस्तगणाऽत्याधानाऽङ्गाऽऽसन्नम् ]** निमितश्च प्रशस्तश्च गणश्च अत्याधानश्च अङ्गश्च आसन्नं च = निमित-प्रशस्तगणाऽत्याधानाऽङ्गाऽऽसन्नम् ।

समन्ततो मितं - तुल्यमविशेषेण वा मितं - परिच्छिन्नं = निमितम्, तुल्यारोहपरिणाहमित्यर्थः ।

**[ निघा वृक्षाः, निघाः शालयः, निघा बृहतिका ]** निर्विशेषं - निश्चयेन वा हन्यन्ते - ज्ञायन्ते = निघा वृक्षाः । अनेन अल्प्र० - निघश्च निपात्यते । एवम् - निघाः शालयः - बृहतिका वा ।

**[ निघातोऽन्यः ]** नितरां हन्यते = निघातोऽन्यः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' घात्' (४।३।१००) घात्० ।

**[ उद्घः प्रशस्तः ]** उत्कर्षेण हन्यते-ज्ञायत इति उद्घः प्रशस्तः ।

**[ उद्घातोऽन्यः ]** उत्हन्यते = उद्घातोऽन्यः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' घात्' (४।३।१००) घात्० ।

गणः प्राणिसमूहः-**[ संघः ]** संहननं-संहतिर्वा = संघः । अनेन अल्प्र० - संघ आदेशो निपातः ।

**[ अन्यत्र संघातः ]** अन्यत्र संहननं = संघातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति घात्' (४।३।१००) घात्० । अत्याधीयन्ते छेदनार्थं कुट्टनार्थं च काष्ठादीनि यत्र तदत्याधानम् ।

**[ उद्घनः ]** उत्-प्राबल्येन हन्यतेऽनेन(अस्मिन्) इति उद्घनः । अनेन अल्प्र० - उद्घन आदेशश्च ।

**[ काष्ठोद्घनः ]** काष्ठस्य उद्घनः = काष्ठोद्घनः ।

**[ ताम्रोद्घनः ]** ताम्रस्य उद्घनः = ताम्रोद्घनः ।

**[ लोहोद्घनः ]** लोहस्य उद्घनः = लोहोद्घनः ।

**[ उद्घातोऽन्यः ]** उत्-ऊर्ध्वं हन्यते = उद्घातोऽन्यः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' घात्' (४।३।१००) घात्० ।

अङ्गं शरीरावयवः - **[ अपघनोऽङ्गम् ]** अपहन्यतेऽनेनेति अपघनोऽङ्गम् । अनेन अल्प्र० - अपघन आदेशश्च ।

**[ अपघातोऽन्यः ]** अपहन्यतेऽपघातोऽन्यः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात्० ।

**[ उपघ्न आसन्नः ]** उपहन्यते - समीप इति ज्ञायते = उपघ्न आसन्नः । अनेन अल्प्र० - उपघ्न आदेशश्च ।

**[ गुरूपघ्नः ]** गुरूणामुपघ्नः = गुरूपघ्नः ।

**[ ग्रामोपघ्नः ]** ग्रामस्य उपघ्नः = ग्रामोपघ्नः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ उपघातोऽन्यः ]** उपहन्यते = उपघातोऽन्यः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' घात्' (४।३।१००) घात्० ।

निपातनादेवोपात्तार्थविशेषे वृत्तिरसरूपप्रत्ययबाधनं च विज्ञायते ॥छा।

## मूर्त्ति-निचिता-ऽभ्रे घनः ॥५।३।३७ ॥

**[ मूर्त्तिनिचिताऽभ्रे ]** मूर्त्तिश्च निचितश्च अभ्रं च = मूर्त्तिनिचिताऽभ्रम्, तस्मिन् ।

**[ घनः ]** घन प्रथमा सि ।

मूर्त्तिः - काठिन्यम् - **[ अभ्रस्य घनः ]** अभ्र षष्ठी ङस् । हन्यते-ज्ञायते कठिनतयेति घनः । अनेन अल्प्र० - घनादेशश्च, काठिन्यमित्यर्थः ।

**[ दधिघनः ]** दध्नो घनः = दधिघनः ।

**[ लोहघनः ]** लोहस्य घनः = लोहघनः ।

निचितं-निरन्तरम् - **[ घनाः केशाः, घना व्रीहयः ]** हन्यन्ते निषि(चि)तयेति घनाः केशाः - व्रीहयो वा । अनेन अल्प्र० घनादेशश्च ।

अभ्रं - मेघः **[ घनः ]** हन्यते वायुनेति घनः । अनेन अल्प्र० - घनादेशश्च ।

कथं घनं दधि ? गुणशब्दोऽयं, तद्योगाद् गुणिन्यपि वर्त्तते ॥छा।

## व्ययो-द्रोः करणे ॥५।३।३८ ॥

**[ व्ययोद्रोः ]** विश्च अयस् च दुश्च = व्ययोद्रु, तस्मात् ।

**[ करणे ]** करण सप्तमी ङि ।

भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति करणग्रहणम् ।

**[ विघनः ]** विहन्यतेऽनेन तिमिरं = विघनः । अनेन अल्प्र० - घनादेशश्च ।

**[ विघनेन्दुसमद्युतिः ]** विघनो योऽसौ इन्दुः तद्वत् समा(म)द्युतिर्यस्य सः ।

**[ विघनः ]** वयः - पक्षिणो हन्यन्तेऽनेनेति विघनः ।

**[ अयोघनः ]** अयस् 'हनंक् हिंसा-गत्योः' (११००) हन् । अयो हन्यतेऽनेनेति अयोघनः । अनेन अल्प्र० - घनादेशश्च ।

**[ द्रुघनः कुठारः ]** द्रुर्हन्यतेऽनेनेति द्रुघनः कुठारः । अनेन अल्प्र० - घनादेशश्च ।

स्त्रियां तु परत्वादनडेव-

**[ विहननी ]** विहन्यतेऽनेनेति विहननी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'अणञेयेकण्'० (२।४।२०) ङी ।

**[ अयोहननी ]** अयो हन्यतेऽनेनेति अयोहननी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'अणञेयेकण्'० (२।४।२०) ङी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ द्रुहननी ]** द्रुर्हन्यतेऽनेनेति द्रुहननी' । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'अणञेयेकण्'० (२।४।२०) ङी ॥छ॥

## स्तम्बाद् घनश्च ॥५।३।३९ ॥

**[ स्तम्बात् ]** स्तम्ब पञ्चमी ङसि ।

**[ घ्नः ]** घ्न प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ स्तम्बघ्नो दण्डः, स्तम्बघनो यष्टिः ]** स्तम्बो हन्यतेऽनेन = स्तम्बघ्नो दण्डः । एवम् - स्तम्बघनो यष्टिः । अनेन अल्प्र० घ्न-घनादेशश्च ।

स्त्रियां तु परत्वादनडेव-

**[ स्तम्बहननी यष्टिः ]** स्तम्बो हन्यतेऽनया = स्तम्बहननी यष्टिः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ स्तम्बघ्ना ]** स्तम्बो हन्यते । मतान्तरे 'नाम्युपा'० (५।१।५४) कप्र० → अ - घ्नादेशश्च निपातः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्तम्बहेतिः ]** स्तम्बो हन्यतेऽनेनेति(अनयेति) स्तम्बहेतिः । मतान्तरे 'साति-हेति-यूति०' (५।३।९४) "हेति"-निपात्यते ।

**[ स्तम्बघातः ]** स्तम्बहननं = स्तम्बघातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) घात् ।

**[ स्तम्बघ्नीषीका ]** स्तम्बो हन्यतेऽनया सा = स्तम्बघ्नीषीका । 'अचित्ते टक्' (५।१।८३) टक्प्र० → अ । 'गम-हन-जन-खन'० (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) घ्नादेशः । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । करणस्यापि कर्तृत्वविवक्षया सिद्धम् ॥छ॥

## परेर्घः ॥५।३।४० ॥

**[ परेः ]** परि पञ्चमी ङसि ।

**[ घः ]** घ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ परिघोऽर्गला, पलिघः ]** परिहन्यतेऽनेनेति परिघोऽर्गला । अनेन अल्प्र० - परिघनिपातश्च । एवम् - पलिघः । 'परेर्घा-ऽङ्क-योगे' (२।३।१०३) लत्वम् ॥छ॥

## ह्वः समाह्वया-ऽऽह्वयौ द्यूत-नाम्नोः ॥५।३।४१ ॥

**[ ह्वः ]** ह्वा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ समाह्वयाऽऽह्वयौ ]** समाह्वयश्च आह्वयश्च - समाह्वयाऽऽह्वयौ ।

**[ द्यूतनाम्नोः ]** द्यूतं च नाम च = द्यूतनाम्नी, तयोः = द्यूतनाम्नोः । सप्तमी ओस् ।

करण इति निवृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ समाह्वयः प्राणिद्यूतम् ]** सम्-आङ्पूर्व० 'ह्वेंग् स्पर्द्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । समाहूयन्ते द्यूतकारा अत्रेति समाह्वयः प्राणिद्यूतम् । अनेन अल्प्र० - ह्वयादेशश्च ।

**[ आह्वयो नाम ]** आहूयन्तेऽनेनेति आह्वयः । अनेन अल्प्र० - ह्वयादेशश्च नाम ।

## न्यभ्युप-वेर्वाश्चोत् ॥५।३।४२ ॥

**[ न्यभ्युपवेः ]** निश्च अभिश्च उपश्च विश्च = न्यभ्युपवि, तस्मात् ।

**[ वार् ]** वा प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ च ]** च प्रथमा सि ।

**[ उत् ]** उत् प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

अभेदनिर्देशः सर्वादेशार्थः । च इति वकारश्रुतेस्तस्यैवादेशः स्यात् न त्वाकारसहितस्येत्यर्थः ।

**[ निहवः ]** निह्वानं = निहवः ।

**[ अभिहवः ]** अभिह्वानं = अभिहवः ।

**[ उपहवः ]** उपह्वानं = उपहवः ।

**[ विहवः ]** विह्वानं = विहवः ।

सर्वत्र अनेन अल्प्र० - वाशब्दस्य उकारश्च । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ प्रह्वायः ]** प्रह्वानं = प्रह्वायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्० → अ । 'आत ऐः कृञ्औ' (४।३।५५) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ निवायः ]** 'वांक् गति-गन्धनयोः' (१०६३) वा । निवानं = निवायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत ऐः कृञ्औ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

ह्वो हव इत्यनिपातनं किम् ? यङ्लुपि निपातनं मा भूत् तेन- **[ विजोहवः ]** विपूर्व० 'ह्वेंग स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । भृशं पुनः पुनर्वा विह्वयति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'द्वित्वे ह्वः' (४।१।८७) वाशब्दस्य उकारः । द्विः । 'ग-होर्जः' (४।१।४०) ह० → ज० । 'आ-गुणावन्यादेः' (४।१।४८) गु० ओ । विजोहवः(विजोहु) । अनेन अल्प्र० । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । अन्यथा **विहव** इति स्यात् । 'प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम्' (न्या० सं० वक्ष०(१)/सूत्र(१७)) इति न्यायेन यङ्लुबन्तस्यापि अनेन अलि ह्वो हव इति कृते द्वित्वस्यापि निपाते **विहव** इति स्यादित्यर्थः ॥छ॥

## आङो युद्धे ॥५।३।४३ ॥

**[ आङः ]** आङ् पञ्चमी ङसि ।

**[ युद्धे ]** युद्ध सप्तमी ङि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आहवो युद्धम् ]** आङ्पूर्व० 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा । आहूयन्ते योद्धारोऽस्मिन्निति आहवो युद्धम् । अनेन अल्प्र० → अ - वाशब्दश्चोकारः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ आह्वायः ]** आह्वानं = आह्वायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ आह्वानम् ]** आहूयतेऽस्मिन्निति आह्वानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन ॥छा।

## आहावो निपानम् ॥५।३।४४ ॥

**[ आहावः ]** आहाव प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ निपानम् ]** निपूर्व० 'पां पाने' (२) पा । निपिबन्त्यस्मिन्निति निपानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । सि-अम् । पशु-शकुनीनां पानार्थ कृतो जलाधारो निपानम् ।

**[ आहावः पशूनाम् ]** आहूयन्ते पशवः पानायास्मिन्नित्याहावः पशूनाम् । अनेन अल्प्र० - आहावादेशश्च निपात्यते ।

**[ आहावः शकुनीनाम् ]** आहूयन्ते शकुनयः पानायास्मिन्नित्याहावः । अनेन अल्प्र० - आहावादेशश्च निपात्यते, शकुनीनाम् । निपानमित्यर्थः ।

**[ आह्वायः ]** आह्वानं = आह्वायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ आह्वानम् ]** आहूयतेऽस्मिन्निति आह्वानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन ॥छा।

## भावे-ऽनुपसर्गात् ॥५।३।४५ ॥

**[ भावे ]** भाव सप्तमी ङि ।

**[ अनुपसर्गात् ]** न विद्यते उपसर्गो यस्य सः = अनुपसर्गः, तस्मात् ।

अकर्त्तरीत्यस्यानुप्रवेशो मा भूदिति भावग्रहणम् ।

**[ हवः ]** ह्वानं = हवः । अनेन अल्प्र० - वाशब्दस्य च उकारः । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

कर्मणि - **[ ह्वायः ]** हूयते = ह्वायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ आह्वायः ]** आह्वानं = आह्वायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ॥छा।

## हनो वा वध् च ॥५।३।४६ ॥

**[ हनः ]** हन् पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ वध् ]** वध् प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ च ]** च प्रथमा सि ।

**[ वधः ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । हननं = वधः । अनेन अल्प्र०-वधादेशश्च निपात्यते ।

**[ घातः ]** हननं = घातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) "घात्" आदेशः ।

'प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम्' (न्या० सं० वक्ष० (१) सूत्र (१७)) इति न्यायात् यङ्लुबन्तस्य हन्तेर्वध - घात आदेशः ।

**[ वधः ]** हन्/भृशं पुनः पुनर्वा हन्ति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । द्विः । 'ग-होर्जः' (४।१।४०) हस्य ज० । जहननं = वधः । अनेन अल्प्र० - वधादेशश्च ।

**[ घातः ]** हन्/भृशं पुनः पुनर्वा हन्ति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । द्विः । 'ग-होर्जः' (४।१।४०) हस्य ज० । जहननं = घातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति घात्' (४।३।१००) घात्० ।

**[ संघातः ]** हन्/संहननं = संघातः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० । 'ञ्णिति घात्' (४।३।१००) घात्० ॥छ॥

## व्यध-जप-मद्भ्यः ॥५।३।४७ ॥

**[ व्यधजपमद्भ्यः ]** व्यधश्च जपश्च मद् च = व्यधजपमद्, तेभ्यः = व्यधजपमद्भ्यः । पञ्चमी भ्यस् ।

बहुवचनाद् भाव इति निवृत्तम् ।

**[ व्यधः ]** 'व्यधंच् ताडने' (११५७) व्यध् । व्यधनं = व्यधः । अनेन अल्प्र० → अ ।

**[ जपः ]** 'जप मानसे च' (३३८) जप् । जपनं = जपः । अनेन अल्प्र० → अ ।

**[ मदः ]** 'मदैच् हर्षे' (१२३६) मद् । मदनं = मदः । अनेन अल्प्र० → अ ।

**[ आव्याधः ]** आव्यधनं = आव्याधः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ उपजापः ]** उपजपनं = उपजापः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ उन्मादः ]** उन्मदनं = उन्मादः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## नवा क्वण-यम-हस-स्वनः ॥५।३।४८ ॥

**[ नवा ]** नवा प्रथमा सि ।

**[ क्वणयमहसस्वनः ]** क्वणश्च यमश्च हसश्च स्वन् च = क्वणयमहसस्वन्, तस्मात् ।

**[ क्वणः, क्वाणः ]** अण (२५९) - रण (२६०) - वण (२६१) - व्रण (२६२) - बण (२६३) - भण (२६४) - भ्रण (२६५) - मण (२६६) - धण (२६७) - ध्वण (२६८) - ध्रण (२६९) - कण (२७०) - 'क्वण शब्दे' (२७१) क्वण् । क्वणनं = क्वणः । अनेन अल्प्र० → अ । एवम् - क्वाणः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ यमः, यामः ]** 'यमूं उपरमे' (३८६) यम् । यमनं = यमः । अनेन अल्प्र० → अ । एवम् - यामः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ हसः, हासः ]** 'हसे हसने' (५४५) हस् । हसनं = हसः । अनेन अल्प्र० → अ । एवम् - हासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ स्वनः, स्वानः ]** स्तन (३२३) - धन (३२४) - ध्वन (३२५) - चन (३२६) - 'स्वन शब्दे' (३२७) स्वन् । स्वननं = स्वनः । अनेन अल्प्र० → अ । एवम् - स्वानः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रक्वाणः ]** प्रक्वणनं = प्रक्वाणः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रयामः ]** प्रयमनं = प्रयामः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ प्रहासः ]** प्रहसनं = प्रहासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ विष्वाणः ]** विष्वणं = विष्वाणः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'व्यवात् स्वनोऽशने' (२।३।४३) षत्वम् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । अप्राप्तविभाषेयम् ॥छा॥

## आङो रु-प्लोः ॥५।३।४९ ॥

**[ आङः ]** आङ् पञ्चमी ङसि ।

**[ रुप्लोः ]** रुश्च प्लुश्च = रुप्लु, तस्मात् ।

**[ आरवः, आरावः ]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु, आङ्पूर्व० । आरवणं = आरवः । अनेन अल्प्र० → अ । एवम् - आरावः । घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ आप्लवः, आप्लावः ]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - प्रुंङ् (५९७) - 'प्लुंङ् गतौ' (५९८) प्लु, आङ्पूर्व० । आप्लवनं = आप्लवः । अनेन अल्प्र० → अ । एवम् - आप्लावः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनो०' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ विरावः ]** विरवणं = विरावः । 'रोरुपसर्गात्' (५।३।२२) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ विप्लवः ]** विप्लवनं = विप्लवः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छा॥

## वर्षविघ्नेऽवाद् ग्रहः ॥५।३।५० ॥

**[ वर्षविघ्ने ]** विपूर्व० 'हनंक् हिंसा-गत्योः' (११००) हन् । विहन्यते कार्यमनेनेति विघ्नः । 'स्थादिभ्यः कः' (५।३।८२) कप्र० → अ । 'गम-हन-जन-खन-घसः'० (२।१।११२) "घ्न" आदेशः । वर्षस्य विघ्नं = वर्षविघ्नम्, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अवात्]** अव पञ्चमी ङसि ।

**[ग्रहः]** ग्रह् पञ्चमी ङसि ।

वर्षविघ्नो वृष्टिविष्कंभः, स च प्राप्तकालस्य वर्षस्य कुतश्चित् निमित्तादभावः ।

**[अवग्रहः, अवग्राहः]** अव 'ग्रहीश् उपादाने' (१५१७) ग्रह् । अवग्रहणमवग्रहः । अनेन अल्प्र० → अ । एवम् - अवग्राहः । घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वृष्टेः प्रतिबन्ध इत्यर्थः ।

**[अवग्रहः पदस्य]** अवग्रहणमवग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ, पर(द)स्य ।

**[अवग्रहोऽर्थस्य]** अवग्रहणमवग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ, अर्थस्य ॥छ॥

## प्राद रश्मि-तुलासूत्रे ॥५।३।५१ ॥

**[प्रात्]** प्र पञ्चमी ङसि ।

**[रश्मितुलासूत्रे]** रश्मिश्च तुलासूत्रं च = रश्मितुलासूत्रम्, तस्मिन् ।

**[प्रगहः, प्रगाहः]** प्रगृह्यत इति प्रग्रहः । अनेन अल्प्र० → अ । एवम् - प्रग्राहः । घञ्प्र० → अ । **अश्वादेः संयमनरज्जुस्तुलासूत्रं चोच्यते** ।

अन्यस्तु **[प्रग्रहः]** प्रग्रहणं = प्रग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ ॥छ॥

## वृगो वस्त्रे ॥५।३।५२ ॥

**[वृगः]** वृग् पञ्चमी ङसि ।

**[वस्त्रे]** वस्त्र सप्तमी ङि ।

**[प्रवरः, प्रावारः]** 'वृग्ट् वरणे' (१२९४) वृ, प्रपूर्व० । प्रवृण्वन्ति तमिति प्रवरः । अनेन अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । एवम् - प्रावारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः आ ।

अन्ये तु प्राङ् पूर्व एव वृणोतिः स्वभावाद् वस्त्रविशेषे वर्तते, तेन -

**[प्रावारः, प्रावरः]** प्रावरणम् । घञा मतान्तरेऽल् द्वितीये । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'नामिनो'० (४।३।१) गु० अर् ।

**[प्रवरो यतिः]** प्रवरणं = प्रवरो यतिः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ॥छ॥

## उदः श्रेः ॥५।३।५३ ॥

**[उदः]** उद्(त्) पञ्चमी ङसि ।

**[श्रेः]** श्रि पञ्चमी ङसि ।

**[उच्छ्रयः, उच्छ्रायः]** उत्पूर्व०, 'श्रिग् सेवायाम्' (८८३) श्रि । उच्छ्रयणं = उच्छ्रयः । अनेनैव अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । एवम् - उच्छ्रायः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## यु-पू-द्रोर्घञ् ॥५।३।५४ ॥

**[ युपूद्रोः ]** युश्च पूश्च द्रुश्च = युपूद्रु, तस्मात् ।

**[ घञ् ]** घञ् प्रथमा सि ।

वेति निवृत्तम्, पृथग्योगात् ।

**[ उद्यावः ]** 'युक् मिश्रणे' (१०८०) यु, उत्पूर्व० । उद्यवनं = उद्यावः । अनेन अलोऽपवादो घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ उत्पावः ]** 'पूग्श् पवने' (१५१८) पू, उत्पूर्व० । उत्पवनं = उत्पावः । अनेन अलोऽपवादो घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ उद्द्रावः ]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु, उत्पूर्व० । उद्द्रवणं = उद्द्रावः । अनेन अलोऽपवादो घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

## ग्रहः ॥५।३।५५ ॥

**[ ग्रहः ]** ग्रह् पञ्चमी ङसि ।

**[ उद्ग्राहः ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह्, उत्पूर्व० । उद्ग्रहणं = उद्ग्राहः । अनेन अलोऽपवादो घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ ग्रहः ]** ग्रहणं = ग्रहः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ ।

**[ विग्रहः ]** विग्रहणं = विग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ ॥छ॥

## न्यवाच्छापे ॥५।३।५६ ॥

**[ न्यवात् ]** निश्च अवश्च = न्यवम्, तस्मात् ।

**[ शापे ]** शाप सप्तमी ङि ।

**[ निग्राहो ह ते वृषल ! भूयात् ]** निग्रहणं = निग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । युष्मद् षष्ठी ङस् । 'ङे-ङसा ते-मे' (२।१।२३) "ते"आदेशः ।

**[ अवग्राहो ह ते जाल्म ! भूयात् ]** अवग्रहणं = अवग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । युष्मद् षष्ठी ङस् । 'ङे-ङसा ते-मे' (२।१।२३) "ते"आदेशः ।

**[ निग्रहश्चौरस्य ]** निग्रहणं = निग्रहश्चौरस्य । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ ।

**[ अवग्रहः पदस्य ]** अवग्रहणमवग्रहः पदस्य । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ ॥छ॥

## प्राल्लिप्सायाम् ॥५।३।५७ ॥

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ लिप्सायाम् ]** लिप्सा सप्तमी ङि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षुः ]** प्रग्रहणं = प्रग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पात्रस्य प्रग्राहः = पात्रप्रगाहः, तेन । 'अर्थणि उपयाचने' (१९३१) अर्थ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । पिण्डपातं अर्थयतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । अर्थयमानो गच्छतीत्यर्थः ।

**[ स्त्रुवस्य प्रग्राहेण चरति दक्षिणार्थी द्विजः ]** स्त्रुवो यज्ञपात्रं, तस्य । इं (११) – दुं (१२) – द्रुं (१३) शुं (१४) – 'स्त्रुं गतौ' (१५) स्त्रु । स्त्रवति अस्यां हविरिति स्त्रुक् । 'स्त्रोश्चिक्' (उणा० ८७१) चिक्प्र० ।

**[ स्त्रुवस्य प्रग्रहः ]** प्रग्रहणं = प्रग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ ॥छा॥

## समो मुष्टौ ॥५।३।५८ ॥

**[ समः ]** सम् पञ्चमी ङसि ।

**[ मुष्टौ ]** मुष्टि सप्तमी ङि ।

मुष्टिरङ्गुलिसंनिवेशो न परिमाणम्, तत्र 'माने' (५।३।८१) इत्येव सिद्धत्वात् ।

**[ संग्राहो मल्लस्य ]** संग्रहणं = संग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अहो मौष्टिकस्य संग्राहः ]** मुष्टिः प्रहरणमस्य = मौष्टिकः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । संग्रहणं = संग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । मुष्टेर्दार्ढ्यमुच्यते ।

**[ संग्रहः शिष्यस्य ]** संग्रहणं = संग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ, शिष्यस्य ॥छा॥

## यु-दु-द्रोः ॥५।३।५९ ॥

**[ युदुद्रोः ]** युश्च दुश्च द्रुश्च = युदुद्रु, तस्मात् ।

**[ संयावः ]** 'युक् मिश्रणे' (१०८०) यु, सम्पूर्व० । संयवनं = संयावः ।

**[ संदावः ]** इं (११) – 'दुं गतौ' (१२) दु, सम्पूर्व० । संदवनं = संदावः ।

**[ संद्रावः ]** इं (११) – दुं (१२) – 'द्रुं गतौ' (१३) द्रु । संद्रवणं = संद्रावः ।

सर्वत्र अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ विद्रवः ]** विद्रवणं = विद्रवः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ उपद्रवः ]** उपद्रवणं = उपद्रवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छा॥

## नियश्चानुपसर्गाद् वा ॥५।३।६० ॥

**[ नियः ]** नी पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् ।

**[ च ]** च प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अनुपसर्गात्]** न विद्यते उपसर्गो यस्य सः अनुपसर्गस्तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[नयः, नायः]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयनं = नयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । एवम्-नायः । अनेन घञ्प्र० → अ । शेषं पूर्ववत् ।

**[यवः, यावः]** यवनं = यवः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । एवम्-यावः । अनेन घञ्प्र० → अ । शेषं पूर्ववत् ।

**[दवः, दावः]** दवनं = दवः - दावः । शेषं पूर्ववत् ।

**[द्रवः, द्रावः]** द्रवणं = द्रवः - द्रावः । शेषं पूर्ववत् ।

**[प्रणयः]** प्रणयनं = प्रणयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए। 'एदैतोऽयाय्' (१।२।२३) अय् । 'अदुरुपसर्गान्तरो ण'० (२।३।७७) णत्वम् ।

## वोदः ॥५।३।६१ ॥

**[वा]** वा प्रथमा सि ।

**[उदः]** उद्(त्) पञ्चमी ङसि ।

**[उन्नायः, उन्नयः]** उन्नयनं = उन्नायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । एवम् - उन्नयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छा।

## अवात् ॥५।३।६२ ॥

**[अवात्]** अव पञ्चमी ङसि ।

**[अवनायः]** अवनयनं = अवनायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।।छा।

## परेर्द्यूते ॥ ५।३।६३ ॥

**[परेः]** परि पञ्चमी ङसि ।

**[द्यूते]** द्यूत सप्तमी ङि ।

**विजिगीषया आख्यादिपातो द्यूतम् ।**

**[परिणायेन शारीन् हन्ति]** परिणयनं = परिणायस्तेन । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अदुरुपसर्गान्तरो ण'० (२।३।७७) णत्वम् । शारि द्वितीया शस् । 'हनंक् हिंसा-गत्योः' (११००) हन् । वर्त्त० तिव् । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) न० → न० । समन्तान्नयनेनेत्यर्थः ।

**[परिणयः कन्यायाः]** परिणयनं = परिणयः । 'युवर्ण-वृ-दृ-वृश'० (५।३।२८) अल्प्र० → अ ।।छा।

## भुवोऽवज्ञाने वा ॥५।३।६४ ॥

**[भुवः]** भू पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अवज्ञाने ]** अवज्ञायतेऽवज्ञानम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । तस्मिन् = अवज्ञाने । सप्तमी ङि ।

**[ वा ]** वा प्रथमा सि ।

**अवज्ञानमसत्कारपूर्वकोऽवक्षेपः ।**

**[ परिभावः, परिभवः ]** 'भू सत्तायाम्' (१) भू, परिपूर्व० । परिभवनं = परिभावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । एवम्- परिभवः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ परिभवः ]** समन्ताद् भवनं = परिभवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

## यज्ञे ग्रहः ॥५।३।६५ ॥

**[ यज्ञे ]** यज्ञ सप्तमी ङि ।

**[ ग्रहः ]** ग्रह् पञ्चमी ङसि ।

**[ पूर्वपरिग्राहः ]** परिग्रहणं = परिग्राहः । पूर्वस्याः परिग्राहः = पूर्वपरिग्राहः । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् ।

**[ उत्तरपरिग्राहः ]** परिग्रहणं = परिग्राहः । उत्तरस्याः परिग्राहः = उत्तरपरिग्राहः । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् ।

वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते ।

**[ परिग्रहः कुटुम्बिनः ]** परिग्रहणं = परिग्रहः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । कुटुम्बिन् षष्ठी ङस् ॥छ॥

## संस्तोः ॥५।३।६६ ॥

**[ संस्तोः ]** सम्पूर्वः स्तुः = संस्तु, तस्मात् ।

**[ संस्तावश्छन्दोगानाम् ]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव'० (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र(२९)) स्तु, सम्पूर्व० । संस्तवनं = संस्तावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । छन्दस् कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । छन्दो गायन्ति = छन्दोगास्तेषाम् = छन्दोगानाम् । 'गायोऽनुपसर्गाट्टक्' (५।१।७४) टक्प्र० → अ । 'इडेत् - पुसि'० (४।३।९४) आलुक् । **समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः संस्ताव उच्यते ।**

**[ संस्तवोऽन्यदृष्टे ]** संस्तवनं = संस्तवः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ ॥छ॥

## प्रात् स्रु-द्रु-स्तोः ॥५।३।६७ ॥

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ स्रुद्रुस्तोः ]** स्रुश्च द्रुश्च स्तुश्च = स्रुद्रुस्तु, तस्मात् ।

**[ प्रस्रावः ]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु, प्रपूर्व० । प्रस्रवणं = प्रस्रावः । अनेन घञ्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ प्रद्रावः ]** इं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु, प्रपूर्व० । प्रद्रवणं = प्रद्रावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रस्तावः]** 'ष्टुंगक् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै'० (२।३।९८) स्तु । निमित्ताभावे'० (न्या० सं० वक्ष० (१)/सूत्र(२९)) स्तु, प्रपूर्व० । प्रस्तवनं = प्रस्तावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[स्रवः]** स्रवणं = स्रवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[द्रवः]** द्रवणं = द्रवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणो०' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[स्तवः]** स्तवनं = स्तवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[स्रावः]** स्रवणं = स्रावः । बहुलाधिकारादनेनैव घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ॥छ॥

## अयज्ञे स्त्रः ॥५।३।६८ ॥

**[अयज्ञे]** न यज्ञः = अयज्ञस्तस्मिन् ।

**[स्त्रः]** स्तृ पञ्चमी ङसि । 'इवर्णादेरस्वे'० (१।२।२१) रत्वम् ।

**[प्रस्तारः]** 'स्तृग्श् आच्छादने' (१५२१) स्तृ, प्रपूर्व० । प्रस्तरणं = प्रस्तारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[मणिप्रस्तारः]** मणीनां प्रस्तारः = मणिप्रस्तारः ।

**[विमानप्रस्तारः]** विमानानां प्रस्तारः = विमानप्रस्तारः ।

**[नयप्रस्तारः]** नयस्य-नयानां वा प्रस्तारः = नयप्रस्तारः ।

**[बर्हिष्प्रस्तरः]** प्रस्तरणं = प्रस्तरः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । बर्हिषां प्रस्तरः = बर्हिष्प्रस्तरः । 'समासेऽसमस्तस्य' (२।३।१३) षत्वम् ॥छ॥

## वेरशब्दे प्रथने ॥५।३।६९ ॥

**[वेः]** वि पञ्चमी ङसि ।

**[अशब्दे]** न शब्दोऽशब्दस्तस्मिन् ।

**[प्रथने]** प्रथते = प्रथनम्, तस्मिन् । **प्रथनं - विस्तीर्णता ।**

**[विस्तारः पटस्य]** विस्तरणं = विस्तारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । पटस्य ।

**[तृणस्य विस्तरः]** विस्तरणं = विस्तरः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् । तृणस्य छादनमित्यर्थः ।

**[अहो द्वादशाङ्गस्य विस्तरः]** अहो प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । द्वादशाङ्गस्य । विस्तरणं = विस्तरः । 'युवर्ण-वृ-दृ०' (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## छन्दोनाम्नि ॥५।३।७० ॥

**[ छन्दोनाम्नि ]** छन्दसां नाम = छन्दोनाम, तस्मिन् ।

**छन्दः - पद्यो वर्णविन्यासः ।**

**[ विष्टारपङ्क्तिः ]** विस्तरणं = विष्टारः । विष्टारस्य पङ्क्तिः = विस्टारपङ्क्तिः । अनेन घञ्प्र० → अ । 'वेः स्त्रः' (२।३।२३) षत्वम् । 'तवर्गस्य श्चवर्ग'० (१।३।६०) तस्य टः । पङ्क्तिपर्यन्तं छन्दोनामेति वाक्यावस्थायां घञ् न प्राप्नोतीति 卐 विष्ट(ष्टा)रश्चासौ पङ्क्तिश्चेति कर्मधारयः षष्ठी-पञ्चमीतत्पुरुषो वा ।

**[ आस्तारपङ्क्तिः ]** आस्तरणं = आस्तारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । आस्तारस्य पङ्क्तिः = आस्तारपङ्क्तिः ।

**[ प्रस्तारपङ्क्तिः छन्दोनाम ]** प्रस्तरणं = प्रस्तारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रस्तारस्य पङ्क्तिः = प्रस्तारपङ्क्तिः छन्दोनाम ॥छ॥

## क्षु-श्रोः ॥५।३।७१ ॥

**[ क्षुश्रोः ]** क्षुश्च श्रुश्च = क्षुश्रु, तस्मात् ।

**[ विक्षावः ]** 'टुक्षु शब्दे' (१०८४) क्षु, विपूर्व० । विक्षवणं = विक्षावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ विश्रावः ]** 'श्रुंट् श्रवणे' (१२९६) श्रु, विपूर्व० । विश्रवणं = विश्रावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ क्षवः ]** क्षवणं = क्षवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ श्रवः ]** श्रवणं = श्रवः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

## न्युदो ग्रः ॥५।३।७२ ॥

**[ न्युदः ]** निश्च उद् च = न्युद्, तस्मात् ।

**[ ग्रः ]** गृ पञ्चमी ङसि । 'इवर्णादेरस्वे'० (१।२।२१) रत्वम् ।

**[ निगारः ]** 'गृत् निगरणे' (१३३५) गृ । 'गृश् शब्दे' (१५३८) गृ, निपूर्व० । निगरणं = निगारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ उद्गारः ]** उद्गीर्यते = उद्गारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ संगरः ]** संगीर्यते - अभ्युपगम्यते योद्धृभिरिति संगरो युद्धम् । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ॥छ॥

---

卐 श० म० न्या० - विस्तारश्चासौ पङ्क्तिश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## किरो धान्ये ॥५।३।७३ ॥

**[ किरः ]** किर् पञ्चमी ङसि ।

**[ धान्ये ]** धान्य सप्तमी ङि ।

**[ निकारो धान्यस्य ]** 'कृत् विक्षेपे' (१३३४) कृ, निपूर्व० । निकीर्यते = निकारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । धान्यस्य ।

**[ उत्कारो धान्यस्य ]** 'कृत् विक्षेपे' (१३३४) कृ, उत्पूर्व० । उत्कीर्यते = उत्कारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । धान्यस्य, राशिरित्यर्थः ।

निकारस्तिरस्कार इति करोतेर्घञ् ।

**[ फलनिकरः ]** निकरणं = निकरः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । फलानां निकरः = फलनिकरः ।

**[ पुष्पोत्करः ]** उत्करणं = उत्करः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् । पुष्पाणां उत्करः = पुष्पोत्करः ॥छा॥

## नेर्वुः ॥५।३।७४ ॥

**[ नेः ]** नि पञ्चमी ङसि ।

**[ वुः ]** वृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ नीवारा नाम व्रीहिविशेषाः ]** 'वृङ्श् सम्भक्तौ' (१५६७) वृ । 'वृग्ट् वरणे' (१२९४) वृ, निपूर्व० । नितरां व्रियन्ते-याच्यन्ते तपस्विभिरिति नीवारा नाम व्रीहयः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घत्वम् ।

**[ निवरा कन्या ]** निव्रियते = निवरा कन्या । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ । स्वभावादलन्तोऽप्ययं स्त्रियां वर्तते । क्तिस्तु बहुलाधिकारान्न भवति ॥छा॥

## इणोऽभ्रेषे ॥५।३।७५ ॥

**[ इणः ]** इण् पञ्चमी ङसि ।

**[ अभ्रेषे ]** न भ्रेषः = अभ्रेषस्तस्मिन् ।

**स्थितेरचलनमभ्रेषः ।**

**[ न्यायः ]** 'इंण्क् गतौ' (१०७५) इ, निपूर्व० । शास्त्रलोकप्रसिद्ध्यादिना नियतमयनं = न्यायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ न्ययं गतश्चौरः ]** न्ययनं = न्ययः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । गत प्रथमा सि । चौरः ॥छा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परेः क्रमे ॥५।३।७६ ॥

**[ परेः ]** परि पञ्चमी ङसि ।

**[ क्रमे ]** क्रम सप्तमी ङि ।

**क्रमः - परिपाटी ।**

**[ तव पर्यायो भोक्तुम् ]** तव षष्ठ्यन्तं पदम् । 'इंण्क् गतौ' (१०७५) इ, परिपूर्व० । पर्ययणं = पर्यायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनाय = भोक्तुम् । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० ।

**[ मम पर्यायो भोक्तुम् ]** मम षष्ठ्यन्तं पदम् । शेषं पूर्ववत् । **क्रमेण पदार्थानां क्रियासंबंधः = पर्यायः ।**

**[ पर्ययः स्वाध्यायस्य ]** पर्ययणं = पर्ययः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । स्वाध्यायस्य । अतिक्रम इत्यर्थः ।

**[ विपर्ययो मतेः ]** विपर्ययणं = विपर्ययो मतेः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अन्यथाभवनमित्यर्थः ॥छ॥

## व्युपात् शीङः ॥५।३।७७ ॥

**[ व्युपात् ]** विश्च उपश्च = व्युपम्, तस्मात् ।

**[ शीङः ]** शीङ् पञ्चमी ङसि ।

**[ तव राजविशायः ]** 'शीङ्क् स्वप्ने' (११०५) शी, विपूर्व० । विशयितुं पर्यायः = विशायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । राज्ञि विशायः = राजविशायः ।

**[ मम राजोपशायः ]** उपशयितुं पर्यायः = उपशायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । राज्ञि उपशायः = राजोपशायः ।

क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते ।

**[ विशयः ]** विशयनं = विशयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ उपशयः ]** उपशयनं = उपशयः । शेषं "विशयः" वत् ॥छ॥

## हस्तप्राप्ये चेरस्तेये ॥५।३।७८ ॥

**[ हस्तप्राप्ये ]** हस्तेनोपायान्तरनिरपेक्षेण प्राप्तुं शक्यं = हस्तप्राप्यम्, हस्तेनैव प्राप्तुं शक्यमित्यर्थः, तस्मिन् ।

**[ चेः ]** चि पञ्चमी ङसि ।

**[ अस्तेये ]** न स्तेयोऽस्तेयस्तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपायान्तरेणापि पुष्पादः(?)(पुष्पादिप्रापणे) पुष्पप्रचाय इति दृश्यते तत् कथं लभ्यते इत्याशङ्काऽऽह - हस्तप्राप्यशब्देन प्रत्यासत्तिः प्राप्यस्य लक्ष्यते, तेन प्रत्यासत्तिविषये धात्वर्थे विधानम् ।

**[ पुष्पप्रचायः ]** प्र 'चिंगृट् चयने' (१२९०) चि । प्रचयनं = प्रचायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । पुष्पाणां प्रचायः = पुष्पप्रचायः ।

**[ फलावचायः ]** अवचयनं = अवच्चायः । फलानामवचायः = फलावचायः ।

**[ फलोच्चायः ]** उच्चयनं = उच्चायः । अनेन घञ्प्र० → अ । फलानामुच्चायः = फलोच्चायः ।

**[ फलोच्चयः ]** उच्चयनं = उच्चयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । एदैतोऽयाय्' (१।२।२३) अय् । फलानामुच्चयः = फलोच्चयः ।

**[ पुष्पप्रचयं करोति तरुशिखरे ]** प्रचयनं = प्रचयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । एदैतोऽयाय्' (१।२।२३) अय् । पुष्पाणां प्रचयः = पुष्पप्रचयः, तम् ।

हस्तप्राप्यशब्देन प्रमाणमप्युच्यते - यद्धस्ते संभवति न हस्तादतिरिच्यते इति, ततश्च 'माने' (५।३।८१) इत्यनेनैव सिद्धे नियमार्थं वचनम् - **अस्तेय एवेति** ।।छा।

## चिति-देहा-ऽऽवासोपसमाधाने कश्चाऽऽदेः ।।५।३।७९ ।।

**[ चितिदेहाऽऽवासोपसमाधाने ]** चितिश्च देहश्च आवासश्च उपसमाधानं च = चितिदेहाऽऽवासोपसमाधानम्, तस्मिन् ।

**[ कः ]** क प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ आदेः ]** आदि षष्ठी ङस् ।

**चीयत इति चितिर्यज्ञेऽग्निविशेषः, तदाधारो वा । देहः - शरीरम् । आवासो निवासः । उपसमाधानमुपर्युपरि राशीकरणम् ।**

**[ आकायमग्निं चिन्वीत ]** 'चिंगृट् चयने' (१२९०) चि, आङ्पूर्व० । आसमन्तात् चीयते समिदादिभिरिति कायः, तम् = आकायमग्निम् । अनेन घञ्प्र० → अ - चस्य कत्वं च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'चिंगृट् चयने' (१२९०) चि । सप्तमी ईत । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'इवर्णादेरस्वे'० (१।२।२१) वत्वम् ।

**[ कायः शरीरम् ]** चीयते आहारेणेति कायः शरीरम् ।

**[ ऋषिनिकायः ]** निचीयते तृणादिभिरिति निकायः । ऋषीणां निकायः = ऋषिनिकायः । आ - एत्य वसन्त्यस्मिन्निति आवास इत्यर्थः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः ।

**[ गोमयनिकायः ]** नितरां चीयते = निकायः । गोः पुरीषं = गोमयम् । 'गोः पुरीषे' (६।२।५०) मयट्प्र० → मय । गोमयानां निकायः = गोमयनिकायः । उपसमाधीयते साराणां उपसमाधानमित्यर्थः ।

**[ काष्ठनिचयः ]** निचीयते = निचयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । काष्ठानां निचयः = काष्ठनिचयः ।

चः क इत्येव सिद्धे आदिग्रहणमादेरेव यथा स्यात्, तेन चेर्यङ्लुपि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ निकेचायः ]** भृशं पुनः पुनर्वा निचिनोति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) गु० ए । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । निचेचयनं = निकेचायः । अनेन घञ्प्र० → अ - चस्य कत्वं च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ॥छ॥

## सङ्घेऽनूर्ध्वे ॥५।३।८० ॥

**[ सङ्घे ]** सङ्घ सप्तमी ङि ।

**[ अनूर्ध्वे ]** न विद्यते कुतश्चिदूर्ध्वमुपरि किञ्चिद् यस्मिन् सोऽनूर्ध्वः, तस्मिन् । 'अन् स्वरे' (३।२।१२९) अन् ।

**[ वैयाकरणनिकायः ]** निपूर्व० 'चिंग्ट् चयने' (१२९०) चि । निचयनं = निकायः । अनेन घञ्प्र० → अ - चस्य कत्वं च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । वैयाकरणानां निकायः = वैयाकरणनिकायः ।

**[ तार्किकनिकायः ]** तार्किकाणां निकायः = तार्किकनिकायः ।

**[ सारसमुच्चयः ]** सम्-उत्पूर्व०, चि । सागरा(रा)णां समुच्ययनं = सारसमुच्ययः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ प्रमाणसमुच्चयः ]** सम्-उत्पूर्व० चि । प्रमाणानां समुच्चयनं = प्रमाणसमुच्चयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ सूकरनिचयः ]** सूकरा उपर्युपरि चीयन्ते । नियमनं(निचयनं) = निचयः । सूकराणां निचयः = सूकरनिचयः । पूर्वेणाऽपि न भवति व्यावृत्तिबलात् । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## माने ॥५।३।८१ ॥

**[ माने ]** मान सप्तमी ङि ।

मानमियत्ता, सा च द्वेधा, संख्या-परिमाणं च ।

ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः ।

आयामस्तु प्रमाणं स्यात्, संख्या बाह्या तु सर्वतः ॥ १ ॥

**[ एको निघासः ]** एक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । निपूर्व० 'अदं भक्षणे' (१०५९) अद् । न्यदनं = निघासः । अनेन घञ्प्र० → अ । 'घस्लृ सनद्यतनी-घञचलि' (४।४।१७) अद्० → घस्० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा सि ।

**[ द्वौ निघासौ ]** द्वि । औ । निपूर्व० 'अदं भक्षणे' (१०५९) अद् । न्यदने = निघासौ । अनेन घञ्प्र० → अ । 'घस्लृ सनद्यतनी-घञचलि' (४।४।१७) अद्० → घस्० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रथमा औ ।

**[ एकस्तण्डुलावक्षायः ]** अवपूर्व० 'क्षिं क्षये' (१०) क्षि । अवक्षयणं = अवक्षायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । तण्डुलानामवक्षायः = तण्डुलावक्षायः ।

**[ एकस्तण्डुलनिश्चायः ]** नितरां चीयते = निश्चायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । तण्डुलानां निश्चायः = तण्डुलनिश्चायः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ एकः कारः ]** 'डुकृंग करणे' (८८८) कृ । करणं = कारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा सि ।

**[ द्वौ कारौ ]** करणे = कारौ । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा औ ।

**[ त्रयः काराः ]** करणानि = काराः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । प्रथमा जस् ।

**[ द्वौ सूर्यनिष्पावौ ]** 'पूङ् पवने' (६००) पू, निर्पूर्व० । पवने = पावौ । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । निश्चिते पावौ = निष्पावौ, सूर्यस्य निष्पावौ = सूर्यनिष्पावौ ।

**[ समित्संग्राहः ]** संग्रहणं = संग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । समिधां संग्राहः = समित्संग्राहः ।

**[ तण्डुलसंग्राहः ]** संग्रहणं = संग्राहः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । तण्डुलानां संग्राहः = तण्डुलसंग्राहः । मुष्टिरित्यर्थः ।

**[ निश्चयः ]** नितरां चयनं = निश्चयः । 'युवण-वृ-दृ'० (५।३।२८) अल्प्र० → अ ।

अल एवायमपवादः, क्त्यादिभिस्तु बाध्यते । 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' (न्या० सं० वक्ष० (१)/सूत्र (३७)) इति न्यायात् ।

**[ एका तिलोच्छ्रितिः ]** उत्पूर्व० 'श्रिग् सेवायाम्' (८८३) श्रि । उच्छ्रयणं = उच्छ्रितिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । तिलानामुच्छ्रितिः = तिलोच्छ्रितिः । 'प्रथमादधुटि शश्छः' (१।३।४) श० → छ० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → च० । एक 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ द्वे प्रसृती ]** द्वि । औ । 'आ द्वेरः' (२।१।४१) इ० → अ० । 'आत्' (२।४।१८) आप्प्र० → आ । 'औता' (१।४।२०) ए । प्रसरणे = प्रसृती । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) ई ॥छ॥

## स्थादिभ्यः कः ॥५।३।८२ ॥

**[ स्थादिभ्यः ]** स्था आदिर्येषां ते = स्थादयः, तेभ्यः = स्थादिभ्यः । पञ्चमी भ्यस् ।

**[ कः ]** क प्रथमा सि ।

**[ आखूत्थो वर्तते ]** आखु 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र (२९)) स्था, उत्पूर्व० । आखूनामुत्थानं = आखूत्थः । अनेन कप्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । एवमग्रेऽपि । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक् ।

**[ शलभोत्थो वर्तते ]** शलभानामुत्थानं = शलभोत्थो वर्तते । शेषं पूर्ववत् ।

**[ प्रस्थः सानुः ]** प्रतिष्ठन्तेऽस्मिन्निति प्रस्थः । अनेन कप्र० → अ, सानुः ।

**[ संस्था ]** सम्पूर्व० स्था । संतिष्ठन्तेऽस्यामिति संस्था ।

**[ व्यवस्था ]** वि-अवपूर्व० स्था । व्यवतिष्ठन्तेऽनयेति व्यवस्था ।

**[ प्रस्नः ]** प्रपूर्व० 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै'० (२।३।९८) स्ना । प्रस्नात्यस्मिन्निति प्रस्नः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रपा ]** प्रपूर्व० 'पां पाने' (२) पा । प्रपिबन्त्यस्यामिति प्रपा । अनेन कप्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ विधः ]** 'व्यधंच् ताडने' (११५७) व्यध् । विध्यतेऽनेनेति विधः । अनेन कप्र० → अ । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् व्य० → वि० ।

**[ आविधः ]** 'व्यधंच् ताडने' (११५७) व्यध्, आङ्पूर्व० । आविध्यन्त्यनेनेत्याविधः । अनेन कप्र० → अ । 'ज्या-व्यधः क्ङिति' (४।१।८१) य्वृत् व्य० → वि० ।

**[ विघ्नः ]** विपूर्व० 'हनंक् हिंसा-गत्योः' (११००) हन् । विहन्यतेऽनेनास्मिन् वा = विघ्नः । स्थादिगणपाठबलात् करणेऽपि अनेन कप्र० → अ, न तु 'व्ययो-द्रोः करणे' (५।३।३८) इत्यनेन अल्प्र० । 'गम-हन-जन-खन'० (४।२।४४) अलुक् । 'हनो ह्नो घ्नः' (२।१।११२) "घ्न"आदेशः ।

**[ आयुधम् ]** 'युधिंच् सम्प्रहारे' (१२६०) युध्, आङ्पूर्व० । आयुध्यन्तेऽनेनेत्यायुधम् । अनेन कप्र० ।

**[ आढ्यः ]** 'ध्यैं चिन्तायाम्' (३०) ध्यै । 'आत् सन्ध्यक्षरस्य' (४।२।१) ध्या, आङ्पूर्व० । आध्यायन्ति तमित्याढ्यः । अनेन कप्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'पृषोदरादयः' (३।२।१५५) धस्य ढत्वम् । सर्वापवादत्वादनटमपि कप्रत्ययो बाधते ।

**[ व्याधः ]** व्यधनं = व्याधः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ घातः ]** हननं = घातः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) "घात्" आदेशः ।

**[ विघातः ]** विहननं = विघातः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) "घात्" आदेशः ।

**[ उपघातः ]** उपहननं = उपघातः । बहुलाधिकारात् 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति घात्' (४।३।१००) "घात्" आदेशः ॥छा।

## ट्वितोऽथुः ॥५।३।८३ ॥

**[ ट्वितः ]** टु इदनुबन्धो यस्य सः = ट्वित्, तस्मात् ।

**[ अथुः ]** अथु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वेपथुः ]** 'टुवेपृङ् चलने' (७५४) वेप् । वेपनं = वेपथुः । अनेन अथुप्र० ।

**[ वमथुः ]** 'टुवमू उद्गिरणे' (९६९) वम् । वमनं = वमथुः । अनेन अथुप्र० ।

**[ स्फूर्जथुः ]** 'ट्वोस्फूर्जा वज्रनिर्घोषे' (१४९) स्फूर्ज् । स्फूर्जनं = स्फूर्जथुः । अनेन अथुप्र० ।

**[ भ्रासथुः ]** भासि (८४६) - 'टुभ्रासि दीप्तौ' (८४७) भ्रास् । भ्रासनं = भ्रासथुः । अनेन अथुप्र० ।

**[ नन्दथुः ]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नन्द् । नन्दनं = नन्दथुः । अनेन अथुप्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्षवथुः ]** 'टुक्षु शब्दे' (१०८४) क्षु । क्षवणं = क्षवथुः । अनेन अथुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ दवथुः ]** 'टुदुंट् उपतापे' (१२९७) दु । दवनं = दवथुः । अनेन अथुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

असरूपत्वात् घञलावपि -

**[ वेपः ]** वेपनं = वेपः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ ।

**[ क्षवः ]** क्षवणं = क्षवः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

## ड्वितस्त्रिमक् तत्कृतम् ॥५।३।८४ ॥

**[ ड्वितः ]** डु इदनुबन्धो यस्य सः = ड्वित्, तस्मात् ।

**[ त्रिमक् ]** त्रिमक् प्रथमा सि ।

**[ तत्कृतम् ]** तेन-धात्वर्थेन कृतं = तत्कृतम् । सि-अम् ।

**[ पक्त्रिमम् ]** 'डुपचींष् पाके' (८९२) पच् । पाकेन निर्वृत्तं = पक्त्रिमम् । अनेन त्रिमक्प्र० → त्रिम । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ उप्त्रिमम् ]** 'डुवपीं बीजसन्ताने' (९९५) वप् । वापेन निर्वृत्तं = उप्त्रिमम् । अनेन त्रिमक्प्र० → त्रिम । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० ।

**[ कृत्रिमम् ]** 'डुकृंग् करणे' (८८८) कृ । 卐卐कारेण निर्वृत्तं = कृत्रिमम् । अनेन त्रिमक्प्र० → त्रिम ।

**[ लब्ध्रिमम् ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लाभेन निर्वृत्तं = लब्ध्रिमम् । अनेन त्रिमक्प्र० → त्रिम । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० ।

**[ विहित्रिमम् ]** विपूर्व०, 'डुधांग्क् धारणे च' (११३९) धा । 卐 विधानेन निर्वृत्तं = विहित्रिमम् । अनेन त्रिमक्प्र० → त्रिम । 'धागः' (४।४।१५) धा० → हि० ।

**[ याचित्रिमम् ]** 'डुयाचृग् याच्ञायाम्' (८९१) याच् । याच्ञया निर्वृत्तं = याचित्रिमम् । अनेन त्रिमक्प्र० → त्रिम । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ याचथुः ]** याच्ञया निर्वृत्तं = याचथुः । मतान्तरेऽनेनैव अथुप्र० ।

ककारः कित्कार्यार्थः ॥छ॥

## यजि-स्वपि-रक्षि-यति-प्रच्छो नः ॥५।३।८५ ॥

**[ यजिस्वपिरक्षियतिप्रच्छः ]** यजिश्च स्वपिश्च रक्षिश्च यतिश्च प्रच्छ् च = यजिस्वपिरक्षियतिप्रच्छ्, तस्मात् ।

**[ नः ]** न प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

---

卐 श० म० न्या० - विधिना निर्वृत्तं = विहित्रिमम् । 卐卐 श० म० न्या० - करणेन निर्वृत्तं = कृत्रिमम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यज्ञः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजनं = यज्ञः । अनेन नप्र० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) न० → ञ० ।

**[स्वप्नः]** 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । स्वपनं = स्वप्नः । अनेन नप्र० ।

**[रक्ष्णः]** 'रक्ष पालने' (५६७) रक्ष् । रक्षणं = रक्ष्णः । अनेन नप्र० । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[यत्नः]** 'यतैङ् प्रयत्ने' (७११) यत् । यतनं = यत्नः । अनेन नप्र० ।

**[प्रश्नः]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । प्रच्छनं = प्रश्नः । अनेन नप्र० । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) श० ॥छ॥

## विच्छो नङ् ॥५।३।८६ ॥

**[विच्छः]** विछ् पञ्चमी ङसि ।

**[नङ्]** नङ् प्रथमा सि ।

**[विश्नः]** 'विछत् गतौ' (१३४३) विछ् । विच्छनं = विश्नः । अनेन नप्र० । 'अनुनासिके च'० (४।१।१०८) श० ।

ङकारो गुणप्रतिषेधार्थः ॥छ॥

## उपसर्गाद् दः किः ॥५।३।८७ ॥

**[उपसर्गात्]** उपसर्ग पञ्चमी ङसि ।

**[दः]** दा पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[किः]** कि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[आदिः]** 'डुदांग्क् दाने' (११३८) दा, आङ्पूर्व० । आदानमादिः । अनेन किप्र० → इ । 'इडेत् - पुसि'० (४।३।९४) आलुक् ।

**[प्रदिः]** प्रदानं = प्रदिः ।

**[प्रधिः]** 'डुधांग्क् धारणे च' (११३९) धा, प्रपूर्व० । प्रधानं = प्रधिः ।

**[आधिः]** आधानमाधिः ।

**[निधिः]** निधानं = निधिः ।

**[विधिः]** विधानं = विधिः ।

**[उपधिः]** उप-समीपे धानं-धारणं = उपधिः ।

**[संधिः]** संधानं = संधिः ।

**[समाधिः]** समाधानं = समाधिः ।

सर्वत्र अनेन किप्र० → इ । 'इडेत्-पुसि'० (४।३।९४) आलुक् ।

**कित्करणमालोपार्थम्** ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## व्याप्यादाधारे ।।५।३।८८ ।।

**[ व्याप्यात् ]** व्याप्य पञ्चमी ङसि ।

**[ आधारे ]** आधार सप्तमी ङि ।

**[ जलधिः ]** 'डुधांग्क् धारणे च' (११३९) धा । जलं-जलानि वा धीयन्तेऽस्मिन्निति जलधिः ।

**[ शरधिः ]** शरा धीयन्तेऽस्मिन्निति शरधिः ।

**[ इषुधिः ]** इषव धीयन्तेऽस्मिन्निति इषुधिः ।

**[ वालधिः ]** वाला धीयन्तेऽस्मिन्निति वालधिः ।

**[ शेवधिः ]** से(शे)वं - स्थाप्यं धनं तद्धीयतेऽस्मिन्निति शेवधिः ।

सर्वत्र अनेन किप्र० → इ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**आधारग्रहणमर्थान्तरनिषेधार्थम्** ।।छा।

## अन्तर्धिः ।।५।३।८९ ।।

**[ अन्तर्धिः ]** अखण्डमिदम् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अन्तर्धिः ]** अन्तर् 'डुधांग्क् धारणे च' (११३९) धा । अन्तर्धानं = अन्तर्धिः । अनेन किप्र० - आलुक् निपात्यते ।।छा।

## अभिव्याप्तौ भावेऽन-ञिन् ।।५।३।९० ।।

**[ अभिव्याप्तौ ]** अभिव्यापनमभिव्याप्तिस्तस्याम् ।

**[ भावे ]** भाव सप्तमी ङि ।

**[ अनञिन् ]** अनश्च ञिन् च = अनञिन् । प्रथमा सि ।

**क्रियया स्वसंबन्धिनः साकल्येनाऽभिसंबन्धोऽभिव्याप्तिः ।**

**[ संरवणं-सांराविणं वर्तते ]** सम् टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । समन्ताद्रावः = संरवणं - सांरविणम् । अनेन अन-ञिन्प्र० → इन् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । सि-अम् । सेनायां वर्तते ।

**[ संकुटनं-सांकोटिनमेषाम् ]** 'कुटत् कौटिल्ये' (१४२६) कुट्, सम्पूर्व० । समन्तात् कोटः = संकुटनं-सांकोटिनमेषाम् । अनेन अन-ञिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । संकोट्येव । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृद्धिः आ । सि-अम् ।

**[ संरावः ]** संरवणं = संरावः । 'रोरुपसर्गात्' (५।३।२२) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ संकोटः ]** संकोटनं = संकोटः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावग्रहणं कर्मादिप्रतिषेधार्थम् । असरूपविधिना क्त-घञादिनिवृत्त्यर्थमनग्रहणम् ॥छ॥

**स्त्रियां क्तिः ॥५।३।९१ ॥**

**[ स्त्रियाम् ]** स्त्री सप्तमी ङि । 'स्त्रीदूतः' (१।४।२९) ङि० → दाम्० → आम्० । 'स्त्रियाः' (२।१।५४) इय् ।

**[ क्तिः ]** क्ति प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

स्त्रियामिति प्रत्ययार्थविशेषणम् ।

**[ कृतिः ]** 'डुकृंग् करणे' (८८८) कृ । करणं = कृतिः ।

**[ हृतिः ]** 'हृंग् हरणे' (८८५) हृ । हरणं = हृतिः ।

**[ चितिः ]** 'चिंगट् चयने' (१२९०) चि । चयनं = चितिः ।

**[ नीतिः ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । नयनं = नीतिः ।

**[ नुतिः ]** 'णुक् स्तुतौ' (१०८१) णु । 'पाठे धात्वादेर्णो नः' (२।३।९७) नु । नवनं = नुतिः ।

**[ भूतिः ]** 'भू सत्तायाम्' (१) भू । भवनं = भूतिः । सर्वत्र अनेन क्तिप्र० → ति । घञादेरपवादः ।

**[ कारः ]** करणं = कारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ चयः ]** चयनं = चयः । 'युवर्ण-वृ-दृ'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

**श्वादिभ्यः ॥५।३।९२ ॥**

**[ श्वादिभ्यः ]** श्रुरादिर्येषां ते = श्वादयः, तेभ्यः = श्वादिभ्यः । पञ्चमी भ्यस् ।

वक्ष्यमाणैः क्विबादिभिः सह समावेशार्थं वचनम् ।

**[ श्रुतिः ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । श्रवणं = श्रुतिः । अनेन क्तिप्र० → ति ।

**[ प्रतिश्रुत् ]** प्रतिश्रवणं = प्रतिश्रुत् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

卐**[ स्तुतिः ]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै'० (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या०सं०वक्ष० (१)/सूत्र(२९))स्तु । स्तवनं = स्तुतिः । अनेन क्तिप्र० → ति ।

卐卐**[ प्रतिस्तुत् ]** प्रतिस्तवनं = प्रतिस्तुत् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ संपत्तिः ]** 'पदिंच् गतौ' (१२५७) पद्, सम्पूर्व० । संपदनं = संपत्तिः । अनेन क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

---

卐 श० म० न्या० - स्तुतिः । 卐卐 श० म० न्या० - प्रतिस्तुत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ संपत् ]** संपदनं = संपत् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ आसत्तिः ]** 'षद्लृं विशरण-गत्यवसादनेषु (९६६) षद् । 'षः सोऽष्ट्यै'० (२।३।९८) सद्, आङ्पूर्व० । आसदनं = आसत्तिः । अनेन क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

**[ संसत् ]** संसदनं = संसत् । क्विप्प्र० ।

**[ उपनिषत् ]** उपनिषदनं = उपनिषत् । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० ।

**[ निषद्या ]** निषदनं = निषद्या । 'समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः' (५।३।९९) क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ संवित्तिः ]** 'विदक् ज्ञाने' (१०९९) विद्, सम्पूर्व० । संवेदनं = संवित्तिः । अनेन क्तिप्र० → ति । 'अघोषे' (१।३।५०) द० → त० ।

**[ संवित् ]** संवेदनं = संवित् । 'क्रुत्-संपदादि'० (५।३।११४) क्विप्प्र० ।

**[ विद्या ]** वेदनं = विद्या । 'समज-निपत्-निषद्'० (५।३।९९) क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वेदना ]** वि(वे)दनं = वेदना । 'णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ लब्धिः ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । लभनं = लब्धिः । अनेन क्तिप्र० → ति । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) ति० → धि० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) भ० → ब० ।

**[ लभा ]** लभनं = लभा । 'षितोऽङ्' (५।३।१०७) अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ शिरोऽर्तिः ]** शिरस् 'अर्द गति-याचनयोः' (३०१) अर्द् । शिरसोऽर्दनं = शिरोऽर्तिः । अनेन क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

**[ अर्दिका ]** अर्दिकेति यद्यपि णकप्रस्तावे शिरसोऽर्दनं = शिरोऽर्ति इत्यत्र बाहुलकात् णको निषिद्धः, 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) इति अप्रत्ययोऽपि तथापि तत्र भाव एवाऽत्र त्वपानादौ(अपादाने) अर्द्यतेऽस्याः । 'नाम्नि पुंसि च' (५।३।१२१) णकः । भावे तु न तत्रैव बाहुलकादिति भणनात् ।

**[ प्रशस्तिः ]** 'शंसू स्तुतौ च' (५५०) शंस्, प्रपूर्व० । प्रशंसनं = प्रशस्तिः । अनेन क्तिप्र० → ति । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् ।

**[ प्रशंसा ]** प्रशंसनं = प्रशंसा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पक्तिः ]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पक्तिः । अनेन क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ पचा ]** पच्यते = पचा । 'षितोऽङ्' (५।३।१०७) अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

कर्मादौ वाक्यं, भावे तु 'गा-पा-पचो भावे' (५।३।९५) इत्यनेनैव सिद्धम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ कण्डूतिः ]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयनं = कण्डूतिः । अनेन क्तिप्र० → ति । 'अतः' (४।३।८२) अलोपः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलुक् ।

**[ कण्डूः ]** कण्डूयनं - कण्डूयते वा = कण्डूः । 'भ्यादिभ्यो वा' (५।३।११५) क्विप्प्र० । 'अतः' (४।३।८२) अलुक् । 'य्वोः प्वय्०' (४।४।१२१) यलुक् ।

**[ कण्डूया ]** कण्डूयनं - कण्डूयते वा = कण्डूया । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यवक्रुष्टिः ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, वि-अवपूर्व० । व्यवक्रोशनं = व्यवक्रुष्टिः । अनेन क्तिप्र० → ति । 'यज-सृज-मृज-राज-भ्राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्ववर्ग'० (१।३।६०) त० → ट० ।

**[ व्यावक्रोशी ]** व्यवक्रोशनम् । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । व्यवक्रोश एव = व्यावक्रोशी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य (७।४।६८) अलुक् । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ इष्टिः ]** 'इषत् इच्छायाम्' (१४१९) इष् । एषणं = इष्टिः । अनेन क्तिप्र० → ति । 'तवर्गस्य श्ववर्ग'० (१।३।६०) त० → ट० ।

**[ इच्छा ]** एषणं = इच्छा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्धा' (५।३।१०१) शप्र०-क्याभावश्च निपात्यते । 'गमिषद्यमश्छः' (४।२।१०६) ष० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे' (१।३।५०) छ० → च० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ इष्टिः ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजनं=इष्टिः । अनेन क्तिप्र० → ति । 'यजादि-वचेः किति' (४।१।७९) य्वृत् यस्य इ० । 'यज-सृज-मृज-'० (२।१।८७) ज० → ष० । 'तवर्गस्य श्ववर्ग'० (१।३।६०) त० → ट० ।

**[ इज्या ]** यजनं = इज्या । 'आस्यटि-व्रज्-यजः क्यप्' (५।३।९७) क्यप्प्र० → य । 'यजादि-वचेः किति' (४।१।७९) य्वृत् यस्य इ० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ मतिः ]** बुधिं (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । मननं = मतिः । अनेन क्तिप्र० → ति । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) नलुक् ।

**[ मन्या ]** मननं - मन्यतेऽनेन या वा = मन्या । 'समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः' (५।३।९९) क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आस्या ]** 'आसिक् उपवेशने' (१११९) आस् । आसनं = आस्या । 'आस्यटि-व्रज्-यजः क्यप्' (५।३।९७) क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उपास्तिः ]** आस्, उपपूर्व० । उपासनं = उपास्तिः । अनेन क्तिप्र० → ति ।

**[ उपासना ]** उपासनं = उपासना । 'णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अनुशिष्टिः ]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, अनुपूर्व० । अनुशासनं = अनुशिष्टिः । अनेन क्तिप्र० → ति । 'इसासः शासोऽङ्-व्यञ्जने' (४।४।११८) आकारस्य इ० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[ आशीः ]** आशासनमाशीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'आङः' (४।४।१२०) आ० → इ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते' (२।१।६४) दीर्घः ।

**[ भृतिः ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । भरणं = भृतिः । अनेन क्तिप्र० → ति ।

**[ भृत्या ]** भृ । भरणं = भृत्या । 'भृगो नाम्नि' (५।३।९८) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्तुतिः ]** 'ष्टुंग्क स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै'० (२।३।९८) स्तु । 'निमित्ताभावे'० (न्या० सं० वक्ष० (१)/सूत्र (२९)) स्तु । स्तूयतेऽनयेति स्तुतिः । अनेन क्तिप्र० → ति ।

**[ इष्टिः ]** इष्यतेऽनयेति इष्टिः । अनेन क्तिप्र० → ति ।

**[ इष्टिः ]** इज्यतेऽनयेति इष्टिः । अनेन क्तिप्र० → ति । 'यजादि-वचेः किति' (४।१।७९) य्वृत् यस्य इ० ।

संज्ञाशब्दत्वात् करणेऽपि क्तिरेव नाऽनट् ।

**[ स्रुतिः ]** स्रूयतेऽनयेति स्रुतिः । अनेन क्तिप्र० → ति ॥छ॥

## समिणा सुगः ॥५।३।९३ ॥

**[ समिणासुगः ]** सम्पूर्वक इण् = समिण् । आङ्पूर्वकः सुग् = आसुग् । समिण् च आसुग् च = समिणासुग्, तस्मात् ।

**[ समितिः ]** सम्पूर्व०, 'इंण्क् गतौ' (१०७५) इ । समयनं = समितिः । अनेन क्तिप्र० → ति ।

**[ आसुतिः ]** 'षुंगट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु, आङ्पूर्व० । आसवनं = आसुतिः । अनेन क्तिप्र० → ति ।

**[ इत्या ]** अयनं - एत्यनयेति, वा = इत्या । 'समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः' (५।३।९९) क्यप्प्र० → य । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आसुत्या ]** आसवनं - आसुन्वन्त्यस्यामिति आसुत्या । 'समज-निपत्-निषद्०' (५।३।९९) क्यप्प्र० → य । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## साति-हेति-यूति-जूति-ज्ञप्ति-कीर्ति ॥५।३।९४ ॥

**[ सातिहेतियूतिजूतिज्ञप्तिकीर्ति ]** सातिश्च हेतिश्च यूतिश्च जूतिश्च ज्ञप्तिश्च कीर्तिश्च = सातिहेतियूतिजूतिज्ञप्तिकीर्ति ।

**[ सातिः ]** 'षिंगट् बन्धने' (१२८७) षि । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सि । 'षुंगट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै'० (२।३।९८) सु । 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै'० (२।३।९८) सो । 'आत् सन्ध्यक्षरस्य' (४।२।१) सा । सयनं-सवनं-सानं वा = सातिः । अनेन क्तिप्र०-आत्वं-इत्वाभावश्च निपात्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ हेतिः ]** 'हिंट् गति-वृद्ध्योः' (१२९५) हि । 'हनंक् हिंसा-गत्योः' (११००) हन् । हीयते-हन्यते वा = हेतिः । अनेन क्तिप्र० - गुणे-हन्तेर्वाऽन्त्यस्वरादेत्वे निपात्यते ।

**[ यूतिः ]** 'युक् मिश्रणे' (१०८०) यु । यवनं = यूतिः । अनेन क्तिप्र० - दीर्घत्वं च निपात्यते ।

**[ जूतिः ]** 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः । जवनं = जूतिः । अनेन क्तिप्र० - दीर्घत्वं च निपात्यते ।

**[ ज्ञप्तिः ]** 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । जानन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । अर्त्ति-री-व्ली-ह्री'० (४।२।२१) पोऽन्तः । 'मारण-तोषण-निशाने ज्ञश्च' (४।२।३०) ह्रस्वः । ज्ञपनं = ज्ञप्तिः । अनेन क्तिप्र० निपात्यते ।

**[ कीर्तिः ]** 'कृतण् संशब्दने' (१६४९) कृत् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'कृतः कीर्त्तिः'(४।४।१२२) कीर्त्त० । कीर्त्तनं = कीर्त्तिः । अनेन निपात्यते । आभ्यां ण्यन्तलक्षणोऽनो न भवति ।

**[ कीर्त्तना ]** कीर्त्तनं = कीर्त्तना । मतान्तरे 'णि-वेत्त्यास'० (५।३।१११) अनप्र० । 'णेरनिटि' (४।३।८२) णिच्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा॥

## गा-पा-पचो भावे ॥५।३।९५ ॥

**[ गापापचः ]** गाश्च पाश्च पच्च = गापापच्, तस्मात् ।

**[ भावे ]** भाव सप्तमी ङि ।

**[ प्रगीतिः ]** कैं (३६) - 'गैं शब्दे' (३७) गै, प्रपूर्व० । 'आत् सन्ध्यक्षरस्य' (४।२।१) प्रगा । प्रगानं = प्रगीतिः । अनेन क्तिप्र० → ति । 'ईर्व्यञ्जनेऽयपि (४।३।९७) आ० → ई० ।

**[ संगीतिः ]** संगानं = संगीतिः । अनेन क्तिप्र० → ति । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

पा इति गा-पचिसाहचर्यात् पिबतेर्ग्रहणम् ।

**[ प्रपीतिः ]** 'पां पाने' (२) पा, प्रपूर्व० । प्रपानं = प्रपीतिः । अनेन क्तिप्र० → ति । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

**[ संपीतिः ]** संपानं = संपीतिः । अनेन क्तिप्र० → ति । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० ।

**[ पक्तिः ]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पक्तिः । अनेन क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ प्रपक्तिः ]** प्रपचनं = प्रपक्तिः । अनेन क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) च० → क० ।

भावग्रहणमर्थान्तरनिरासार्थम् । बाधकस्याङोऽपवादः ॥छा॥

## स्थो वा ॥५।३।९६ ॥

**[ स्थः ]** स्था पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[ वा ]** वा प्रथमा सि ।

**[ प्रस्थितिः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सौऽष्ट्यै'० (२।३।९८) स्था । 'निमित्ताभावे'० (न्या० सं० वक्ष०(१) सूत्र (२९)) स्था, प्रपूर्व० । प्रस्थानं = प्रस्थितिः । अनेन क्तिप्र० → ति । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ उपस्थितिः ]** उपस्थानं = उपस्थितिः । अनेन क्तिप्र० → ति । 'दो-सो-मा-स्थ इः' (४।४।११) आ० → इ० ।

**[ आस्था ]** आस्थानं = आस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यवस्था ]** व्यवस्थानं = व्यवस्था । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ संस्था ]** संस्थानं = संस्था । शेषं पूर्ववत् ॥छा।

## आस्यटि-व्रज्-यजः क्यप् ॥५।३।९७ ॥

**[ आस्यटिव्रज्यजः ]** आसिश्च अटिश्च व्रज् च यज् च = आस्यटिव्रज्यज्, तस्मात् ।

**[ क्यप् ]** क्यप् प्रथमा सि ।

**[ आस्या ]** 'आसिक् उपवेशने' (१११९) आस् । आसनं = आस्या । अनेन क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अट्या ]** 'अट गतौ' (१९४) अट् । अटनं = अट्या । अनेन क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्रज्या ]** धृज (१३०) - धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) - ध्रज (१३४) - ध्रजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज् । व्रजनं = व्रज्या । अनेन क्यप्प्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ इज्या ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजनं = इज्या । अनेन क्यप्प्र० → य । 'यजादि-वचेः किति' (४।१।७९) य्वृत् यस्य इ० । 'आत्' (२।४।१८) आप्प्र० → आ।

## भृगो नाम्नि ॥५।३।९८ ॥

**[ भृगः ]** भृग् पञ्चमी ङसि ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ भृत्या ]** 'टुडुभृंगक् पोषणे च' (११४०) भृ । 'भृंग् मरणे' (८८६) भृ । भरणं = भृत्या । अनेन क्यप्प्र० → य । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ भृतिः ]** भरणं = भृतिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति ।

**[ भार्या वधूः ]** भ्रियत इति भार्या वधूः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'आत्' (२।४।१८) आप्प्र० → आ।

## समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः ॥५।३।९९ ॥

**[ समजनिपत्निषद्शीङ्सुग्विदिचरिमनीणः ]** सम्पूर्वः अजः = समजः, निपूर्वः पत् = निपत्, निपूर्वः षद् = निषद्, समजश्च निपत् च निषद् च शीङ् च सुग् च विदिश्च चरिश्च मनिश्च इण् च = समजनिपत्निषद्शीङ्सुग्विदिचरिमनीण्, तस्मात् ।

योगविभागाद् भाव एवेति निवृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ समज्या ]** 'अज क्षेपणे च' (१३९) अज्, सम्पूर्व० । समजनं-समजत्यस्यामिति वा = समज्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

निपन्निषदेति संहितानिर्देशात् पतेः पदेश्च ग्रहणम् ।

**[ निपत्या ]** 'पत्लृ गतौ' (९६२) पत्, निपूर्व० । निपतनं-निपतन्त्यस्यामिति वा = निपत्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ निपद्या ]** 'पदिंच् गतौ' (१२५७) पद्, निपूर्व० । निपदनं-निपद्यन्तेऽस्यामिति वा = निपत्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ निषद्या ]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै'० (२।३।९८) सद्, निपूर्व० । निषदनं-निषीदन्त्यस्यामिति वा = निपत्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ। 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) षत्वम् ।

**[ शय्या ]** 'शीङ्क् स्वप्ने' (११०५) शी । शयनं-शेरतेऽस्यामिति वा = शय्या । अनेन क्यपप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) "शय्"आदेशः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ सुत्या ]** 'षुंगट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः (२।३।९८) सु । सवनं-सुन्वन्त्यस्यामिति वा = सुत्या । अनेन क्यपप्र० → य । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ विद्या ]** 'विदक् ज्ञाने' (१०९९) विद् । वेदनं-विदन्ति तस्यां तया वा हिताहितमिति विद्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ चर्या ]** 'चर भक्षणे च' (४१०) चर् । चरणं-चरन्त्यनया वा = चर्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ मन्या ]** बुधि (१२६२) - 'मनिंच् ज्ञाने' (१२६३) मन् । मननं-मन्यतेऽनयेति वा = मन्या । अनेन क्यपप्र० → य । 'आत्' (२।४।१८) आप्प्र० → आ।

**[ इत्या ]** 'इंण्क् गतौ' (१०७५) इ । अयनमेत्यनयेति वा = इत्या । अनेन क्यपप्र० → य । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ संवीतिः ]** 'अज क्षेपणे च' (१३९) अज्, संपूर्व० । समजनं = संवीतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० । 'अघञ्क्यबल'० (४।४।२) अज्० → वी० ।

**[ निपत्तिः ]** आ(नि)पतनं आ(नि)पदनं वा=आ(नि)पत्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ निषत्तिः ]** निषदनं = निषत्तिः । क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० । 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) षत्वम् ॥छा।

## कृगः श च वा ॥५।३।१०० ॥

**[ कृगः ]** कृग् पञ्चमी ङसि ।

**[ श ]** श प्रथमा सि । सूत्रत्वात् लोपः ।

**[ च ]** च प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ वा ]** वा प्रथमा सि ।

**[ क्रिया, कृत्या, कृतिः ]** 'डुकृंग् करणे' (८८८) कृ । करणं = क्रिया । अनेन शप्र० → अ । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋकारस्य रिः । यद्वा क्रियतेऽस्या इति क्रिया । अनेन शप्र० । शस्य अपादाने विधानात् क्यो न भवति । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) रिः । 'संयोगात्' (२।१।५२) इय् । 'आत्' (२।४।१८) आप्प्र० → आ । द्वितीयपरिः करणं = कृत्या । अनेन च शब्दात् क्यप्प्र० → य । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । पक्षे-कृतिः । करणं वाक्यम् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

क्रियेति यदा भाव-कर्मणोः शस्तदा मध्ये क्यः, यदात्वपादानादौ शस्तदा क्यो नास्तीति रेरिकारस्येयादेशः ।।छा।

## मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-अन्तर्धा ।।५।३।१०१ ।।

**[ मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धाअन्तर्धा ]** मृगया च इच्छा च याच्ञा च तृष्णा च कृपा च भा च श्रद्धा च अन्तर्धा च = मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धाअन्तर्धा ।

तत्रेच्छा भाव एव, शेषास्तु भावाऽकर्त्रोः ।

**[ मृगया ]** 'मृगणि अन्वेषणे' (१९३०) मृग । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । मृगणं-मृग्यन्तेऽस्यामीति मृगया । अनेन शप्र०-शव् च । क्यापवादो निपात्यते । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ इच्छा ]** 'इषत् इच्छायाम्' (१४१९) इष् । एषणं = इच्छा । अनेन शप्र० - क्याभावश्च निपात्यते । 'गमिषद्यमश्छः' (४।२।१०६) ष० → छ० । 'स्वरेभ्यः' (१।३।३०) द्विः । 'अघोषे'० (१।३।५०) छ० → च० । 'आत्' (२।४।१८) आप्प्र० → आ ।

याचि-तृष्योर्न-नङौ निपात्येते ।

**[ याच्ञा ]** 'डुयाचृग् याच्ञायाम्' (८९१) याच् । याचनं = याच्ञा । अनेन नप्र० - निपात्यते । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) न० → ञ० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ तृष्णा ]** 'ञितृषच् पिपासायाम्' (१२१२) तृष् । तर्षणं = तृष्णा । अनेन नङ्प्र० - निपात्यते । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कृपा ]** 'क्रपि कृपायाम्' (१००९) क्रप् । कृ(क्र)पणं = कृपा । अनेन अङ्प्र० → अ - रेफस्य च ऋकारो निपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भा ]** 'भांक् दीप्तौ' (१०६१) भा । भानं = भा । अनेन अङ्प्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ श्रद्धा ]** 'डुधांग्क् धारणे च' (११३९) धा, श्रत्पूर्व० । श्रद्धानं = श्रद्धा । अनेन अङ्प्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अन्तर्धा ]** 'डुधांग्क् धारणे च' (११३९) धा, अन्तर्पूर्व० । अन्तर्धानं = अन्तर्धा । अनेन अङ्प्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

यदसिद्धं तदेवं निपातनादेव सिद्धम् ।।छा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परेः सृ-चरेर्यः ॥५।३।१०२ ॥

**[परेः]** परि पञ्चमी ङसि ।

**[सृचरेः]** सृश्च चरिश्च = सृचरि, तस्मात् ।

**[यः]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

भावाऽकर्त्रोः ।

**[परिसर्या]** 'सृं गतौ' (२५) सृ, परिपूर्व० । परिसरणं = परिसर्या । अनेन यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[परिचर्या]** 'चर भक्षणे च' (४१०) चर्, परिपूर्व० । परिचरणं = परिचर्या । अनेन यप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[संसृतिः]** संसरणं = संसृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[चूर्त्तिः]** चरणं = चूर्तिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'ति चोपान्त्यातोऽनोदुः' (४।१।५४) अकारस्य उ० । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः ।

## वाऽटाट्यात् ॥५।३।१०३ ॥

**[वा]** वा प्रथमा सि ।

**[अटाट्यात्]** अटाट्य पञ्चमी ङसि ।

भावाऽकर्त्रोः ।

**[अटाट्या, अटाटा]** 'अट गतौ' (१९४) अट् । भृशं पुनः पुनर्वा अटति । 'अट्यर्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः' (३।४।१०) यङ्प्र० → य । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "ट्य"द्विः । 'व्यञ्जनस्याऽनादेलुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । अनेन यप्र० । 'अतः' (४।३।८२) अलोपः । 'योऽशिति' (४।३।८०) यलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । एवं-अटाटा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[अटाट्या]** 'अट गतौ' (१९४) अट् । अटनं = अटाट्या । मतान्तरेऽनेनैव यप्र०-द्विवर्चनं-पूर्वदीर्घत्वं च निपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## जागुरश्च ॥५।३।१०४ ॥

**[जागुः]** जागृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋकारस्य लोपः ।

**[अः]** अ प्रथमा सि ।

**[च]** च प्रथमा सि ।

भावाऽकर्त्रोः ।

**[जागरा, जागर्या]** जागृक् निद्राक्षये' (१०९३) जागृ । जागरणं = जागरा-जागर्या । अनेन अ-यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शंसि-प्रत्ययात् ॥५।३।१०५ ॥

**[ शंसिप्रत्ययात् ]** शंसिश्च प्रत्ययश्च = शंसिप्रत्ययम्, तस्मात् ।

**[ प्रशंसा ]** 'शंसू स्तुतौ च' (५५०) शंस्, प्रपूर्व० । प्रशंसनं = प्रशंसा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ गोपाया ]** 'गुपौ रक्षणे' (२३२) गुप् । 'गुपौ-धूप-विच्छि-पणि-पनेरायः' (३।४।१) आयप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । गोपायनं = गोपाया । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ऋतीया ]** 'ऋत् घृणा-गति-स्पर्धेषु' (२८७) ऋत् । 'ऋतेर्ङीयः (३।४।३) ङीयप्र० → ईय । ऋतीयनं = ऋतीया ।

**[ मीमांसा ]** 'मानि पूजायाम्' (७४९) मान् । 'शान्-दान्-मान्-बधान्निशाना-ऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः' (३।४।७) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'सन्यस्य' (४।१।५९) इ । 'शान्-दान्-मान्'० (३।४।७) इत्यनेनैव दीर्घः-इकारस्य ई० । मीमांसनं = मीमांसा । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कण्डूया ]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू इति सौत्रो धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयनं → कण्डूया । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ लोलूया ]** 'लूग्श् छेदने' (१५१९) लू । भृशं पुनः पुनर्वा लुनाति । 'व्यञ्जनादेरेकस्वराद्'० (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । आ-गुणावन्यादेः' (४।१।४८) गु० ओ । लोलूयनं = लोलूया । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'लोकात्' (१।१।३) अकारेण संहिता ।

**[ चिकीर्षा ]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ऋतां क्ङितीर्' (४।४।११६) इर् । 'सन्-यङश्च' (४।१।३) "किर्"द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'नाम्यन्तस्था-कवर्गात्० (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो दीर्घो'० (२।१।६३) दीर्घः । चिकीर्षणं = चिकीर्षा । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पुत्रकाम्या ]** पुत्रकाम्यनं = पुत्रकाम्या । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पुत्रीया ]** पुत्रीयनं = पुत्रीया । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ गल्भा ]** गल्भ मण्ड्यते । गल्भ इवाचरति । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । गल्भनं = गल्भा । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ श्येनाया ]** श्येन इवाचरति = श्येनायते । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । श्येनायनं = श्येनाया । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पटपटाया ]** पटत् मांडणीयइ । अपटत् पटत् भवति = पटपटायते । 'अव्यक्तानुकरणानेकस्वरात् कृ-भ्वस्तिनाऽनितो द्विश्च' (७।२।१४५) डाच्प्र० → आ - द्वित्वं च । 'डाच्-लोहितादिभ्यः षित्' (३।४।३०) षित् क्यङ्प्र० → य । 'डाच्यादौ' (७।२।१४९) द्विर्वचनस्य तस्य लुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) "अत्"लुक् । पटपटायनं = पटपटाया । अनेन अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

शंसूः क्तेऽनिडिति वचनम् ॥छ॥

## क्तेटो गुरोर्व्यञ्जनात् ॥५।३।१०६ ॥

**[ क्तेटः ]** क्तस्य इट् यस्मात् सः = क्तेट्, तस्मात् ।

**[ गुरोः ]** गुरु पञ्चमी ङसि ।

**[ व्यञ्जनात् ]** व्यञ्जन पञ्चमी ङसि ।

**[ ईहा ]** 'ईहि चेष्टायाम्' (८५७) ईह् । ईहनं = ईहा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ऊहा ]** 'ऊहि तर्के' (८७०) ऊह् । ऊहनं = ऊहा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ईक्षा ]** 'ईक्षि दर्शने' (८८२) ईक्ष् । ईक्षणं = ईक्षा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उक्षा ]** 'उक्ष सेचने' (५६६) उक्ष् । उक्षणं = उक्षा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कुण्डा ]** 'कुडुङ् दाहे' (६९०) कुड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कुन्ड् । कुण्डनं = कुण्डा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ हुण्डा ]** 'हुडुङ् सङ्घाते' (६८३) हुड् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) हुन्ड् । हुण्डनं = हुण्डा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ शिक्षा ]** 'शिक्षि विद्योपादाने' (८७९) शिक्ष् । शिक्षणं = शिक्षा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भिक्षा ]** 'भिक्षि याच्ञायाम्' (८८०) भिक्ष् । भिक्षणं = भिक्षा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यतीहा ]** 'ईहि चेष्टायाम्' (८५७) ईह्, वि-अतिपूर्व० । व्यतीहनं = व्यतीहा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यतीक्षा ]** 'ईक्षि दर्शने' (८८२) ईक्ष्, वि-अतिपूर्व० । व्यतीक्षणं = व्यतीक्षा । अनेन अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्रस्तिः ]** 'स्रंसूङ् अवस्रंसने' (९५३) स्रंस् । स्रसनं = स्रस्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् ।

**[ ध्वस्तिः ]** 'ध्वंसूङ् गतौ च' (९५४) ध्वंस् । ध्वंसनं = ध्वस्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् ।

**[ आप्तिः ]** 'आप्लृंट् व्याप्तौ' (१३०७) आप् । आपनं = आप्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ दीप्तिः ]** 'दीपैचि दीप्तौ' (१२६६) दीप् । दीपनं = दीप्तिः । स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ अक्तिः ]** 'अञ्जू(जौ)प् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज् । अञ्जनं = अक्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० ।

**[ अपचितिः ]** 'चायृग् पूजा-निशामनयोः' (९१७) चाय्, अपपूर्व० । अपचायनं = अपचितिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अपाच्चायश्चिः क्तौ' (४।२।६६) चाय्० → चि० ।

**[ स्फूर्तिः ]** 'स्फुर्छा विस्मृतौ' (१२७) स्फुर्छ् । स्फूर्छनं = स्फूर्तिः । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः ।

**[ मूर्तिः ]** 'मुर्छा मोह-समुच्छ्राययोः' (१२६) मुर्छ् । मूर्छनं = मूर्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'राल्लुक्' (४।१।११०) छ्लुक् । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः ।

**[ स्फूर्तिः ]** 'स्फुरत् स्फुरणे' (१४६०) स्फुर् । स्फुरणं = स्फूर्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घत्वम् ।

**[ निपठितिः ]** 'पठ व्यक्तायां वाचि' (२१३) पठ्, निपूर्व० । निपठनं = निपठितिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'तेर्ग्रहादिभ्यः' (४।४।३३) इट् ।

**[ संशीतिः ]** 'शीङ्क् स्वप्ने' (११०५) शी, सम्पूर्व० । संशयनं = संशीतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।।छ।।

## षितोऽङ् ।।५।३।१०७ ।।

**[ षितः ]** ष् इदनुबन्धो यस्य सः = षित्, तस्मात् ।

**[ अङ् ]** अङ् प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

**[ पचा ]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पचा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ क्षमा ]** 'क्षमौषि सहने' (७८८) क्षम् । क्षमणं = क्षमा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ क्षान्तिः ]** 'क्षमौच् सहने' (१२३५) क्षम् । क्षमा(क्षम)णं = क्षान्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अहन्पञ्चमस्य'० (४।१।१०७) दीर्घः ।

**[ घटा ]** 'घटिष् चेष्टायाम्' (१०००) घट् । घटनं = घटा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ त्वरा ]** 'ञित्वरिष् संभ्रमे' (१०१०) त्वर् । त्वरणं = त्वरा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ प्रथा ]** 'प्रथिष् प्रख्याने' (१००३) प्रथ् । प्रथनं = प्रथा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यथा ]** 'व्यथिष् भय-चलनयोः (१००२) व्यथ् । व्यथनं = व्यथा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[जरा]** 'जृष्च् जरसि' (११४५) जॄ । जरणं = जरा । अनेन अङ्प्र० → अ । 'ऋवर्ण-दृशोऽङि' (४।३।७) गु० अर् । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा।

## भिदादयः ॥५।३।१०८ ॥

**[भिदादयः]** भिदा आदिर्येषां ते = भिदादयः ।

**[भिदा विदारणम्]** 'भिदृंपी विदारणे' (१४७७) भिद् । भेदनं = भिदा विदारणम् । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ।

**[छिदा द्वैधीकरणम्]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छेदनं = छिदा द्वैधीकरणम् । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ।

**[विदा विचारणा]** 'विदिंप् विचारणे' (१४९७) विद् । वेदनं = विदा विचारणा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ।

**[मृजा शरीरसंस्कारः]** 'मृजौक् शुद्धौ' (१०९७) मृज् । मार्जनं = मृजा शरीरसंस्कारः ।

**[क्षिपा प्रेरणम्]** 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । क्षेपणं = क्षिपा प्रेरणम् ।

**[दया अनुकम्पा]** 'दयि दान-गति-हिंसा-दहनेषु च' (७९९) दय् । दयनं = दया अनुकम्पा ।

**[रुजा रोगः]** 'रुजोंत् भङ्गे' (१३५०) रुज् । रोजनं = रुजा रोगः ।

**[चुरा चौर्यम्]** 'चुरण् स्तेये' (१५६८) चुर् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । चोरणं = चुरा चौर्यम् । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ।

**[पृच्छा प्रश्नः]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ् । प्रच्छनं = पृच्छा प्रश्नः । अनेन अङ्प्र० → अ । 'ग्रह-व्रस्व-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् प्र० → पृ० । 'आत्' (२।४।१८) आप्प्र० → आ। एतेऽर्थविशेषे ।

अन्यत्र-

**[भित्तिः कुड्यम्]** भेदनं = भित्तिः कुड्यम् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

**[छित्तिश्चौर्यादिकरणाद् राजापराधः]** छेदनं = छित्तिश्चौर्यादिकरणाद् राजापराधः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अघोषे०' (१।३।५०) द० → त० ।

**[विच्छित्तिः प्रकारः]** विच्छेदनं = विच्छित्तिः प्रकारः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

**[आरा शस्त्री, ऋतिरन्या]** 卐'ऋक् गतौ' (११३५) ऋ । अरणं = आरा शस्त्री । अनेन अङ्प्र० → अ-वृद्धिश्च आर् । एवम् - ऋतिरन्या । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[कारा गुप्तिः, कृतिरन्या]** 卐卐'डुकृंग् करणे' (८८८) कृ । करणं = कारा गुप्तिः । अनेन अङ्प्र० → अ-वृद्धिश्च आर् । करणं = कृतिरन्या । क्तिप्र० → ति ।

---

卐 श० म० न्या० - 'ऋं प्रापणे च' चकाराद् गतौ । अतोऽङि 'ऋवर्ण'० (४।३।७) इति गुणे दीर्घे आपि च आरा शस्त्रीति ।

卐卐 श० म० न्या० - 'डुकृंग् करणे' अतः स्त्रियामङि गुणे दीर्घे आपि च कारा गुप्तिरिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ हारा मानम्, ह्वतिरन्या ]** 'हृंग् हरणे' (८८५) हृ । हरणं = हारा मानम् । अनेन अङ्प्र० → अ-वृद्धिश्च आर् । एवम् - हृतिरन्या । क्तिप्र० → ति ।

**[ धारा प्रपातः खड्गादेर्वा, धृतिरन्या ]** +'धृंग् धारणे' (८८७) धृ । धरणं = धारा प्रपातः खड्गादेर्वा । अनेन अङ्प्र० → अ-वृद्धिश्च आर् । एवम् - धृतिरन्या । क्तिप्र० → ति ।

**[ तारा ज्योतिः, तीर्णिरन्या ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । तरणं = तारा ज्योतिः । अनेन अङ्प्र० → अ-वृद्धिश्च आर् । एवम् - तीर्णिरन्या । क्तिप्र० → ति । 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ गुहा पर्वतकन्दरा औषधिश्च, गूढिरन्या ]** 'गुहौग् संवरणे' (९३५) गुह् । गूहनं = गुहा पर्वतकन्दरा । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ । एवम् - गूढिरन्या । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'हो धुट-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य'० (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलोपः - पूर्वस्वरस्य दीर्घः ।

**[ कुहा नाम नदी, कुहनाऽन्या ]** कुहनं = कुहा नाम नदी । 'कुहणि विस्मापने' (१९४०) कुह । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । कुहनं = कुहनाऽन्या । 'णि-वेत्त्यास श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वशा स्नेहनद्रव्यं धातुविशेषश्च, उष्टिरन्या ]** 'वशक् कान्तौ' (११०१) वश् । वशनं = वशा स्नेहनद्रव्यं धातुविशेषश्च । अनेन अङ्प्र० । वशनं = उष्टिरन्या । क्तिप्र० → ति । 'वशेरयङि' (४।१।८३) य्वृत् वस्य उ० । 'यज-सृज-मृज'० (२।१।८७) षत्वम् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ (१।३।६०) त० → ट० ।

**[ वपा मेदोविशेषः, उप्तिरन्या ]** 'डुवपीं बीजसन्ताने' (९९५) वप् । वपनं = वपा मेदोविशेषः । अनेन अङ्प्र० → अ । वपनं = उप्तिरन्या । क्तिप्र० → ति । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० ।

**[ तुला उन्मानम् ]** 'तुलण् उन्माने' (१६९२) तुल । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । तोलनं = तुला उन्मानम् । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ क्षपा रात्रिः ]** 'क्षपण् दौर्बल्ये(प्रेरणे) (१८९१) क्षप । 'चुरादि'० (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । क्षपणं = क्षपा रात्रिः । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ क्षिया आचारभ्रंशः ]** 'क्षि क्षये' (१०) क्षि । क्षयणं = क्षिया आचारभ्रंशः । अनेन अङ्प्र० → अ । 'संयोगात्' (२।१।५२) इय् । 'आत्' (२।४।१८) आप्प्र० → आ ।

रिखि-लिखिः समानार्थौ सौत्रो धातुः ।

**[ रेखा राजिः ]** रेखणं = रेखा राजिः । अनेन अङ्प्र० → अ । गु० ए ।

**[ लेखा राजिः ]** लेखनं = लेखा राजिः । अनेन अङ्प्र० → अ । गु० ए ।

**[ शोभा कान्तिः ]** 'शुभि दीप्तौ' (९४७) शुभ् । शोभनं = शोभा कान्तिः । अनेन अङ्प्र० → अ - गुणश्च ओ ।

---

\+ श० म० न्या० - 'धृङ् अविध्वंसने' अतोऽङि धारा प्रपातः खड्गादेर्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सेधा सत्त्वम् ]** 'षिधू गत्याम्' (३२०) षिध् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिध् । सेधनं = सेधा सत्त्वम् । अनेन अङ्प्र० → अ - गुणश्च ए ।

**[ मेधा बुद्धिः ]** 卐'मेधृग् सङ्गमे च' (९०९) मेध् । मेधनं = मेधा बुद्धिः । अनेन अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ गोधा प्राणिविशेषो दोस्त्राणं च ]** 'गुधच् परिवेष्टने' (११५५) गुध् । गोधनं = गोधा प्राणिविशेषो दोस्त्राणं च । अनेन अङ्प्र० → अ - गु०ओ । 'आत्' (२।४।१८) आप्प्र० → आ ।

भिदादिराकृतिगणः, तेन चूडेत्यादि सिद्धम् ।

अकृतस्य क्रिया चैव, प्राप्तेर्बाधनमेव च ।
अधिकार्थविवक्षा च, त्रयमेतन्निपातनात् ॥१॥ ॥छा॥

**भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः ॥५।३।१०९ ॥**

**[ भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः ]** भीषिश्च भूषिश्च चिन्तिश्च पूजिश्च कथिश्च कुम्बिश्च चर्चिश्च स्पृहिश्च तोलिश्च दोलिश्च = भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलयः, तेभ्यः = भीषिभूषिचिन्तिपूजिकथि-कुम्बिचर्चिस्पृहितोलिदोलिभ्यः । पञ्चमी भ्यस् ।

ण्यन्तत्वात् 'णि-वेत्त्यास-श्रन्थ०' (५।३।१११) इत्यादिना अने प्राप्ते वचनम् ।

**[ भीषा ]** 'ञिभीँक् भये' (११३२) भी । बिभ्यतं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'बिभेतेर्भीष् च' (३।३।९२) भी० → भीष्० । भीषणं = भीषा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भूषा ]** 'भूष अलङ्कारे' (१७५६) भूष । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । भूषणं = भूषा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ चिन्ता ]** 'चितुण् स्मृत्याम्' (१६४५) चित् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) चिन्त् । 'चुरादि'० (३।४।१७) णिच्प्र० । चिन्तनं = चिन्ता । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पूजा ]** 'पूजण् पूजायाम्' (१५८६) पूज । 'चुरादि'० (३।४।१७) णिच्प्र० । पूजनं = पूजा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कथा ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'चुरादि'० (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । कथनं = कथा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कुम्बा ]** 'कुबुण् आच्छादने' (१६७७) कुब् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'चुरादि'० (३।४।१७) णिच्प्र० । कुम्बनं = कुम्बा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लोकात्' (१।१।३) अकारेण संहिता । 'आत्' (२।४।१८) आप्प्र० → आ ।

---

卐 श० म० न्या० - स्वमते 'मेधृग् सङ्गमे च' चकारान्मेधा - हिंसयोः, अस्यात्र न ग्रहणं गुणस्य सिद्धत्वात्, किन्तु अस्य स्थाने केचित् मिधृग् इति पठन्ति, तस्य ग्रहणं, सौत्रो वा मिध्धातुस्तस्य ग्रहणमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ चर्चा ]** 'चर्चण् अध्ययने' (१७२९) चर्च् । 'चुरादि'० (३।४।१७) णिच्प्र० । चर्चनं = चर्चा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लोकात्' (१।१।३) अकारेण संहिता । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्पृहा ]** 'स्पृहण् ईप्सायाम्' (१९२८) स्पृह । 'चुरादि'० (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलोपः । स्पृहणं = स्पृहा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लोकात्' (१।१।३) अकारेण संहिता । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ तोला ]** 'तुलण् उन्माने' (१६९२) तुल् । 'चुरादि'० (३।४।१७) णिच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । तोलनं = तोला । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लोकात्' (१।१।३) अकारेण संहिता । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ दोला ]** 'दुलण् उत्क्षेपे' (१६९३) दुल् । 'चुरादि'० (३।४।१७) णिच्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । दोलनं = दोला । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लोकात्' (१।१।३) अकारेण संहिता । 'आत्' (२।४।१८) आप्प्र० → आ ।

बहुवचनादन्येभ्योऽपि-

**[ पीडा ]** 'पीडण् गहने' (१६२५) पीड् । 'चुरादि'० (३।४।१७) णिच्प्र० । 'पीडनं = पीडा । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ऊना ]** 'ऊनण् परिहाणे' (१८८८) ऊन् । 'चुरादि'० (३।४।१७) णिच्प्र० । ऊननं = ऊना । अनेन अङ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

## उपसर्गादातः ।।५।३।११० ।।

**[ उपसर्गात् ]** उपसर्ग पञ्चमी ङसि ।

**[ आतः ]** आत् पञ्चमी ङसि ।

**[ उपदा ]** 'डुदांग्क् दाने' (११३८) दा, उपपूर्व० । उपदानं = उपदा ।

**[ उपधा ]** 'डुधांग्क् धारणे च' (११३९) धा, उपपूर्व० । उपधानं = उपधा ।

**[ आधा ]** आधानं = आधा ।

**[ प्रदा ]** प्रदानं = प्रदा ।

**[ प्रधा ]** प्रधानं = प्रधा ।

**[ विधा ]** विधानं = विधा ।

**[ संधा ]** संधानं = संधा ।

**[ प्रमा ]** 'मांङ्क् मान-शब्दयोः' (११३७) मा, प्रपूर्व० । प्रमाणं = प्रमा ।

सर्वत्र अनेन अङ्प्र० → अ । 'इडेत्-पुसि'० (४।३।९४) आलुक् । 'आत्' (२।४।१८० आप्प्र० → आ ।

**[ प्रमितिः ]** प्रमाणं = प्रमितिः । 'श्वादिभ्यः (५।३।९२) क्तिप्र० → ति । 'दो-सो-मा-स्थ इः' (४।४।११) आकारस्य इ ।

**[ दत्तिः ]** दानं = दत्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'दत्' (४।४।१०) दा० → दत्० ।।छ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरन: ॥५।३।१११ ॥

**[ णिवेत्त्यासश्रन्थघट्टवन्दे: ]** णिश्च वेत्तिश्च आसश्च श्रन्थश्च घट्टश्च वन्दिश्च = णिवेत्त्यासश्रन्थघट्टवन्दि, तस्मात् ।

**[ अन: ]** अन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कारणा ]** 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कारणं = कारणा । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ हारणा ]** 'हृंग् हरणे' (८८५) हृ । हरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । हारणं = हारणा । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ कामना ]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । कामनं = कामना । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिङ्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ लक्षणा ]** 'लक्षीण् दर्शनाङ्कनयोः' (१७१९) लक्ष् । 'चुरादि'० (३।४।१७) णिच्प्र० । लक्षणं = लक्षणा । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भावना ]** 卐 'भू सत्तायाम्' (१) भू । भवन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । भावनं = भावना । अनेन अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वेदना ]** 'विदक् ज्ञाने' (१०९९) विद् । वेदनं = वेदना । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आसना ]** 'आसिक् उपवेशने' (१११९) आस् । आसनं = आसना । अनेन अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उपासना ]** 'आसिक् उपवेशने' (१११९) आस्, उपपूर्व० । उपासनं = उपासना । अनेन अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ श्रन्थना ]** 'श्रन्थश् मोचन-प्रतिहर्षयोः' (१५४६) श्रन्थ् । श्रन्थनं = श्रन्थना । अनेन अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

मतान्तरे- **[ ग्रन्थना ]** 'ग्रन्थश् संदर्भे' (१५४८) ग्रन्थ् । ग्रन्थनं = ग्रन्थना । अनेन अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ घट्टना ]** 'घट्टि चलने' (६६८) घट्ट् । घट्टनं = घट्टना । अनेन अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वन्दना ]** 'वदुङ् स्तुत्यभिवादनयोः' (७२१) वद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) वन्द् । वन्दनं = वन्दना । अनेन अनप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

---

卐 श० म० न्या० - भूधातोः प्राप्त्यर्थात् 'भूङः प्राप्तौ णिङ्' (३।४।१९) णिङि अने च भावना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## इषोऽनिच्छायाम् ॥५।३।११२ ॥

**[ इषः ]** इष् पञ्चमी ङसि ।

**[ अनिच्छायाम् ]** न इच्छा = अनिच्छा, तस्याम् ।

**[ अन्वेषणा ]** 'इषच् गतौ' (११६८) इष्, अनुपूर्व० । अन्वेषणं = अन्वेषणा ।

**[ एषणा ]** एषणं = एषणा ।

**[ पिण्डैषणा ]** 卐 पिण्डैषणं = पिण्डैषणा ।

सर्वत्र अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए। 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ इष्टिः ]** इष् । एषणं = इष्टिः । 'श्रवादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[ प्राणैषणा ]** प्राणस्य एषणं = प्राणैषणा ।

**[ वित्तैषणा ]** वित्तस्य एषणं = वित्तैषणा ।

**[ परलोकैषणा ]** परलोकस्य एषणं = परलोकैषणा । बहुलाधिकारात् सर्वत्र अनेनैव अनप्र० । शेषं स्पष्टम् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ ॥छा॥

## पर्यधेर्वा ॥५।३।११३ ॥

**[ पर्यधेः ]** परिश्च अधिश्च = पर्यधि, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ पर्येषणा, परीष्टिः ]** पर्येषणं = पर्येषणा, एवम् - परीष्टिः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) । गु० ए । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'तवर्गस्य श्चवर्ग'० (१।३।६०) तस्य टः ।

**[ अध्येषणा, अधीष्टिः ]** अध्येषणं = अध्येषणा, एवम् - अधीष्टिः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) । गु० ए । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'तवर्गस्य श्चवर्ग'० (१।३।६०) तस्य टः ॥छा॥

## क्रुत्संपदादिभ्यः क्विप् ॥५।३।११४ ॥

**[ क्रुत्संपदादिभ्यः ]** क्रुध् च संपद् च = क्रुत्संपद्, क्रुत्संपदादिर्येषां ते = क्रुत्संपदादयः, तेभ्यः = क्रुत्संपदादिभ्यः । पञ्चमी भ्यस् ।

**[ क्विप् ]** क्विप् प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

---

卐 श० म० न्या० - पिण्डस्य एषणा = पिण्डैषणा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[क्रुत्]** 'क्रधंच् कोपे' (११८४) क्रुध् । क्रोधनं = क्रुत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) ध० → त० ।

**[युत्]** 'युधिंच् संप्रहारे (१२६०) युध् । योधनं = युत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) ध० → त० ।

**[तृट्]** 'ञितृषच् पिपासायाम्' (१२१२) तृष् । तर्षणं = तृट् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[त्विट्]** 'त्विषीं दीप्तौ' (९३०) त्विष् । त्वेषणं = त्विट् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे त्रा' (१।३।५१) ड० → ट० ।

**[रुट्]** रुषच् रोषे' (१२१५) रुष् । रोषणं = रुट् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[रुक्]** 'रुजोंत् भङ्गे' (१३५०) रुज् । रोजनं = रुक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[रुक्]** 'रुचि अभिप्रीत्यां च' (९३८) रुच् । रोचनं = रुक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[शुक्]** 'शुचि(च) शोके' (९९) शुच् । शोचनं = शुक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब् - व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[मुत्]** 'मुदि हर्षे (७२६) मुद् । मोदनं = मुत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[मृत्]** 'मृदश् क्षोदे' (१५५०) मृद् । मर्दनं = मृत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।।१३७) क्विप्लोपः ।

**[गीः]** 'गृत् निगरणे' (१३३५) गृ । गिरणं = गीः । अनेन क्विप्प्र० । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ।

**[त्राः]** देंङ् (६०४) 'त्रैंङ् पालने' (६०५) त्रै । 'आत् सन्ध्यक्षरस्य' (४।२।१) त्रा । त्राणं = त्राः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[दिक्]** दिशींत् अतिसर्जने'(१३१८) दिश् । देशनं = दिक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'ऋत्विज-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः' (२।१।६९) श० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

**[स्रक्]** 'सृजीं(जं)त् विसर्गे' (१३४९) सृज् । सर्जनं = स्रक् । अनेन क्विप्प्र० । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारागमः । 'इवणादेरस्वे'० (१।२।२१) रत्वम् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'ऋत्विज-दिश्-दृश्-स्पृश्-स्रज्'० (२।१।६९) ज० → ग० । 'विरामे वा' (१।३।५१) ग० → क० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ संपत् ]** 'पंदिच् गतौ' (१२५७) पद्, सम्पूर्व० । संपदनं = संपत् ।

**[ विपत् ]** विपदनं = विपत् ।

**[ आपत् ]** आपदनं = आपत् ।

**[ व्यापत् ]** व्यापदनं = व्यापत् ।

**[ प्रतिपत् ]** प्रतिपदनं = प्रतिपत् ।

सर्वत्र अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

**[ संसत् ]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । ष: सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद्, सम्पूर्व० । संसदनं = संसत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । शेषं पूर्ववत् ।

**[ परिषत् ]** परिषदनं = परिषत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) षत्वम् । शेषं पूर्ववत् ।

**[ उपसत् ]** उपसदनं = उपसत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । शेषं पूर्ववत् ।

**[ उपनिषत् ]** उपनिषदनं = उपनिषत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४८) षत्वम् । शेषं पूर्ववत् ।

**[ निवित् ]** 'विदक् ज्ञाने' (१०९९) विद् । 'विदिंच् सत्तायाम्' (१२५८) विद्, निपूर्व० । निवेदनं = निवित् ।

**[ प्रशीः ]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, प्रपूर्व० । प्रशासनं = प्रशीः । अनेन क्विप्प्र० । 'क्वौ' (४।४।११९) इत्यनेन आकारस्य इ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते' (२।१।६४) दीर्घत्वम् । 'र: पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ आशीः ]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, आङ्पूर्व० । आशासनं = आशीः । अनेन क्विप्प्र० । 'आङः' (४।४।१२०) आकारस्य इ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते' (२।१।६४) दीर्घत्वम् । 'र: पदान्ते'० (१।३।५३) विसर्गः ।

**[ प्रतिश्रुत् ]** 'श्रुंट् श्रवणे' (१२९६) श्रु, प्रतिपूर्व० । प्रतिश्रवणं = प्रतिश्रुत् । अनेन क्विप्प्र० । 'ह्रस्वस्य: तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ उपश्रुत् ]** उपश्रवणं = उपश्रुत् । अनेन क्विप्प्र० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ परिस्रुत् ]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु, परिपूर्व० । परिस्रवणं = परिस्रुत् । अनेन क्विप्प्र० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ उपानत् ]** 'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नह्, उपपूर्व० । उपनहनं = उपानत् । अनेन क्विप्प्र० । 'गति - कारकस्य नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनौ क्वौ' (३।२।८५) उपस्य दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नहाहोर्ध-तौ' (२।१।८५) ह० → ध० । 'विरामे वा' (१।३।५१) ध० → त० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[प्रावृट्]** 卐 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च्, प्रपूर्व० । प्रवृश्चतीति प्रावृट् । अनेन क्विप्प्र० । 'घञ्युपसर्गस्य'० (३।२।८६) दीर्घः । ('गति-कारकस्य'० (३।२।८५) दीर्घः) । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् व्र० → वृ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'सस्य श-षौ (१।३।६१) स० → श० । 'पदस्य' (२।१।८९) चलुक् । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[विप्रुट्]** 'प्रुषू दाहे' (५३२) प्रुष्, विपूर्व० । विप्रोषणं = विप्रुट् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[नीवृत्]** 'वृतूङ् वर्त्तने' (९५५) वृत्, निपूर्व० । निवर्त्तनं = नीवृत् । अनेन क्विप्प्र० । 'गति-कारकस्य नहि-वृति'० (३।२।८५) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[उपावृत्]** 'वृतूङ् वर्त्तने' (९५५) वृत्, उपपूर्व० । उपवर्त्तनं = उपावृत् । अनेन क्विप्प्र० । 'गति-कारकस्य नहि-वृति'० (३।२।८५) दीर्घः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[संयत्]** 'यतैङ् प्रयत्ने' (७११) यत्, सम्पूर्व० । संयमनं = संयत् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[समित्]** सम्पूर्व० इंण्क् गतौ' (१०७५) इ । समयनं = समित् । 'अनेन क्विप्प्र० । ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[उपभृत्]** डुडुभृंग्क् पोषणे च' (११४०) भृ, उपपूर्व० । उपभरणं = उपभृत् । 'अनेन क्विप्प्र० । ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[समित्]** 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध्, सम्पूर्व० । समिन्धनं = समित् । अनेन क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

क्रुधादिः संपदादिश्चाकृतिगणः ।।छा।

## भ्यादिभ्यो वा ॥ ५।३।११५ ॥

**[भ्यादिभ्यः]** भीरादिर्येषां ते = भ्यादयः, तेभ्यः = भ्यादिभ्यः । पञ्चमी भ्यस् ।

**[वा]** वा प्रथमा सि ।

**[भीः, भीतिः]** 'ञिभींक् भये' (११३२) भी । भयनं-भीयते वा = भीः । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । एवम् - भीतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ह्रीः, ह्रीतिः]** 'ह्रींक् लज्जायाम्' (११३३) ह्री । ह्रयणं-ह्रीयते वा = ह्रीः । एवम् - ह्रीतिः ।

**[लूः, लूनिः]** 'लूग्श् छेदने' (१५१९)लू । लवनं-लूयते वा = लूः । एवम् - लूनिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'ऋल्वादेरेषां तो नोऽप्रः' (४।२।६८) त० → न० ।

---

卐 श० म० न्या० - 'वृषू सेचने' प्रवर्षन्ति मेघा अत्रेति प्रावृट् । अत्र 'गति-कारकस्य'० (३।२।८५) इति दीर्घः, षस्य च डत्वे टत्वे च प्रावृट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ भूः, भूतिः ]** 'भू सत्तायाम्' (१) भू । भवनं-भूयते वा = भूः । एवम्-भूतिः ।

**[ कण्डूः कण्डूया ]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू इति सौत्रो धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयनं - कण्डूयते वा = कण्डूः । अनेन क्विप्प्र० । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । एवम्-कण्डूया । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कृत्, कृतिः ]** 'डुकृंग् करणे' (८८८) कृ । करणं-क्रियते वा = कृत् । क्विप्प्र० । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । एवम्-कृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ भित्, भित्तिः ]** 'भिदृंपी विदारणे' (१४७७) भिद् । भेदनं-भिद्यते वा = भित् । अनेन क्विप्प्र० । एवम्-भित्तिः । क्तिप्र० → ति । 'अघोषे प्रथमोऽशिटः (१।३।५०) द० → त० ।

**[ छित्, छित्तिः ]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । छेदनं-छिद्यते वा = छित् । अनेन क्विप्प्र० । एवम्-छित्तिः । क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

卐**[ नुत्, नुत्तिः ]** 'णुदंत् प्रेरणे' (१३७०) णुद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नुद् । नोदनं-नुद्यते वा = नुत् । एवम्-नुत्तिः ।

**[ दृक्, दृष्टिः ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । दर्शनं-दृश्यते वा = दृक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'ऋत्विज्-दिश्-दृश्'० (२।१।६९) श० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । एवम्-दृष्टिः । क्तिप्र० → ति । 'यज-सृज-मृज-राज-भ्राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[ नक्, नष्टिः ]** 'नशौच् अदर्शने' (१२०२) नश् । नशनं-नश्यते वा = नक् । अनेन क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नशो वा' (२।१।७०) श० → ग० । 'विरामे वा' (१।३।५१) ग० → क० । एवम्-नष्टिः । क्तिप्र० → ति । 'यज-सृज-मृज-राज-भ्राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[ युक्, युक्तिः ]** +'युजूंपी योगे' (१४७६) युज् । योजनं = युक् । एवम्-युक्तिः । क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग → क० ।

**[ जूः, जूर्तिः ]** 'ज्वर रोगे' (१०५४) ज्वर् । ज्वरणं-जूर्यते वा = जूः । अनेन क्विप्प्र० । एवम् - जूर्तिः । क्तिप्र० → ति । 'मव्यवि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन' । (४।१।१०९) उपान्त्याकारेण सह वस्य ऊट् → ऊ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ तूः, तूर्ति ]** 'ञित्वरिष् संभ्रमे' (१०१०) त्वर् । त्वरणं-तूर्यते वा = तूः । अनेन क्विप्प्र० । एवम्-तूर्तिः । क्तिप्र० → ति । 'मव्यवि श्रिवि-ज्वरि-त्वरेरुपान्त्येन' (४।१।१०९) उपान्त्याकारेण सह वस्य ऊट् → ऊ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ ऊः, ऊतिः ]** 'अव रक्षण-गति-कान्ति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्याऽऽलिङ्गन-हिंसा-दहन-भाव-वृद्धिषु' (४८९) अव् । अवनं-ऊयते वा = ऊः । अनेन क्विप्प्र० । एवम्-ऊतिः । क्तिप्र० → ति । 'मव्यवि-श्रिवि'० (४।१।१०९) उपान्त्याकारेण सह वस्य ऊट् → ऊ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

---

卐 बृहद्वृत्तौ - तुत्, तुत्तिः । + श० म० न्या० - 'युजिच् समाधौ ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**[ श्रूः, श्रूतिः ]** 'श्रिवूच् गति-शोषणयोः' (११६५) श्रिव् । श्रिवणं-श्रूयते वा = श्रूः । अनेन क्विप्प्र० । एवम्-श्रूतिः । क्तिप्र० → ति । 'मव्यवि-श्रिवि'० (४।१।१०९) उपान्त्याकारेण सह वस्य ऊट् → ऊ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ मूः, मूतिः ]** 'मव बन्धने' (४८०) मव् । मवनं-मूयते वा = मूः । अनेन क्विप्प्र० । एवम्-मूतिः । क्तिप्र० → ति । 'मव्यवि-श्रिवि'० (४।१।१०९) उपान्त्याकारेण सह वस्य ऊट् → ऊ । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः ।

**[ नुत्, नुतिः ]** 'णुक् स्तुतौ' (१०८१) णु । 'पाठे धात्वादेर्णो नः' (२।३।९७) नु । नवनं-नूयते वा = नुत् । अनेन क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । एवम्-नुतिः । क्तिप्र० → ति ।

**[ शक्, शक्तिः ]** 'शक्लृंट् शक्तौ' (१३००) शक् । शकनं-शक्यते वा = शक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । एवम्-शक्तिः । क्तिप्र० → ति ॥छ॥

## व्यतिहारेऽनीहादिभ्यो ञः ॥ ५।३।११६ ॥

**[ व्यतिहारे ]** व्यतिहरणं = व्यतिहारः । घञ्प्र०, तस्मिन् ।

**[ अनीहादिभ्यः ]** ईह् आदिर्येषां ते = ईहादयः, न ईहादयः = अनीहादयस्तेभ्यः = अनीहादिभ्यः । पञ्चमी भ्यस् ।

**[ ञः ]** ञ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**परस्परस्य कृतप्रतिकृतिर्व्यतिहारः** । बाहुलकाद्भावे क्त्यादीनामपवादे ञप्रत्ययः ।

**[ व्यावक्रोशी, व्याक्रोशी ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, वि-अवपूर्व० । परस्परमाक्रोशनं = व्यवक्रोशा। अनेन ञप्र० → अ । व्यवक्रोशैव = व्यावक्रोशी - व्याक्रोशी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्-नञ्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

**[ व्यावमोषी ]** 'मुषश् स्तेये' (१५६३) मुष्, वि-अवपूर्व० । परस्परमामोषणं = व्यवमोषा । व्यवमोषैव = व्यावमोषी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्-नञ्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

**[ व्यावहासी ]** 'हसे हसने' (५४५) हस्, वि-अवपूर्व० । परस्परमाहसनं = व्यवहासा । व्यवहासैव = व्यावहासी । 'नित्यं ञ०' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्-नञ्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

**[ व्यावलेखी ]** 'लिखत् अक्षरविन्यासे' (१३३६) लिख्, वि-अवपूर्व० । परस्परमालेखनं = व्यवलेखा । व्यवलेखैव = व्यावलेखी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्-नञ्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

卐**[ व्यातिचोरी ]** व्यतिचोरणं = व्यतिचोरा । व्यतिचोरैव = व्यातिचोरी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

**[ व्यावचर्ची ]** 'चर्चण् अध्ययने (१७२९) चर्च्, वि-अवपूर्व० । व्यवचर्चणं = व्यवचर्चा । व्यवचर्चैव = व्यावचर्ची । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

**[ व्यात्युक्षी ]** 'उक्ष सेचने' (५६६) उक्ष्, वि-अतिपूर्व० । व्यत्युक्षणं = व्यत्युक्षा । व्यत्युक्षैव = व्यात्युक्षी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णलुक् । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'य्वःपदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना ऐकारो न भवति, 'न ञ-स्वाङ्गादेः' (७।४।९) इति निषेधात् ।

**[ व्यतीहा ]** 'ईहि चेष्टायाम्' (८५७) ईह्, वि-अतिपूर्व० । व्यतीहनं = व्यतीहा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यतीक्षा ]** 'ईक्षि दर्शने' (८८२) ईक्ष्, वि-अतिपूर्व० । व्यतीक्षणं = व्यतीक्षा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यतिपृच्छा ]** 'प्रछंत् ज्ञीप्सायाम्' (१३४७) प्रछ्, वि-अतिपूर्व० । व्यतिपृ(प्र)च्छनं = व्यतिपृच्छा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'ग्रह-व्रस्व'० (४।१।८४) य्वृत् प्र० → पृ० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ व्यवहृतिः ]** 'हृंग् हरणे' (८८५) हृ, वि-अवपूर्व० । व्यवहरणं = व्यवहृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ व्यवक्रुष्टिः ]** 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश्, वि-अवपूर्व० । व्यवक्रोशनं = व्यवक्रुष्टिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'यज-सृज-मृज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्ववर्ग'० (१।३।६०) त० → ट० ।

**[ व्याक्रुष्टिः ]** व्याक्रोशनं = व्याक्रुष्टिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'यज-सृज०' (२।१।८७) श० → ष० । 'तवर्गस्य०' (१।३।६०) त० → ट० ।

**[ व्यतिपाको वर्तते ]** 'डुपचींष् पाके' (८९२) पच्, वि-अतिपूर्व० । व्यतिपचनं = व्यतिपाकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) च० क० ।।छा।

## नञोऽनिः शापे ॥ ५।३।११७ ॥

**[ नञः ]** नञ् पञ्चमी ङसि ।

**[ अनिः ]** अनि प्रथमा सि ।

**[ शापे ]** शाप सप्तमी ङि ।

**[ अजननिस्ते वृषल ! भूयात् ]** नञ्पूर्व० 'जनैचि प्रादुर्भावे' (१२६५) जन् । न जननं = अजननिः । अनेन अनिप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

卐 बृहद्वृत्तौ - व्यातिचारी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अजीवनिः ]** नञ्पूर्व० 'जीव प्राणधारणे' (४६५) जीव् । न जीवनं = अजीवनिः । अनेन अनिप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अकरणिः ]** 'डुकृंग् करणे' (८८८) कृ, नञ्पूर्व० । न करणं = अकरणिः । अनेन अनिप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अप्रयाणिः ]** नञ्-प्रपूर्व० 'यांक् प्रापणे' (१०६२) या । न प्रयानं(णं) = अप्रयाणिः । अनेन अनिप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अगमनिः ]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्, नञ्पूर्व० । न गमनं = अगमनिः । अनेन अनिप्र० । 'नञत्' (३।२।१२५) न० → अ० ।

**[ मृतिस्ते जाल्म ! भूयात् ]** 'मृंत् प्राणत्यागे' (१३३३) मृ । मरणं = मृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ अकृतिस्तस्य पटस्य ]** न करणं = अकृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ॥छ॥

## ग्ला-हा-ज्यः ॥ ५।३।११८ ॥

**[ ग्लाहाज्यः ]** ग्लाश्च हाश्च ज्याश्च = तत्, तस्मात् । लुगाऽऽतोऽनापः (२।१।१०७) आलुक् ।

**[ ग्लानिः ]** 'ग्लैं हर्षक्षये' (३१) ग्लै । 'आत् सन्ध्यक्षरस्य (४।२।१) ग्ला । ग्लानं = ग्लानिः । अनेन अनिप्र० ।

**[ हानिः ]** 'ओहांक् त्यागे' (११३१) हा । हानं = हानिः । अनेन अनिप्र० ।

**[ ज्यानिः ]** 'ज्यांश् हानौ' (१५२४) ज्या । ज्यानं = ज्यानिः । अनेन अनिप्र० ।

**[ म्लानिः ]** 'म्लैं गात्रविनामे' (३२) म्लै । 'आत् सन्ध्यक्षरस्य' (४।२।१) म्ला । म्लानं = म्लानिः । अनेन अनिप्र० । मतान्तरे उदाहरणमिदम् ॥छ॥

## प्रश्ना-ऽऽख्याने वेञ् ॥ ५।३।११९ ॥

**[ प्रश्नाऽऽख्याने ]** प्रश्नं च आख्यानं च = प्रश्नाऽऽख्यानम्, तस्मिन् ।

**[ वा ]** वा प्रथमा सि ।

**[ इञ् ]** इञ् प्रथमा सि ।

**[ कां त्वं कारिमकार्षीः ? कां कारिकां, कां क्रियां, कां कृत्यां, कां कृतिम् । सर्वां कारिमकार्षम्, सर्वां कारिकां, सर्वां क्रियां, सर्वां कृत्यां, सर्वां कृतिम् । ]** किम् द्वितीया अम् । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० । 'आत्' (२।४।१८) आप्प्र० → आ । 'समानादमोऽतः' (१।४।४६) अलुक् । 'डुकृंग् करणे' (८८८) कृ । करणं = कारिम् । अनेन इञ्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । द्वितीया अम् ।

एवम्-कारिकाम् । 'पर्यायाऽर्हर्णोत्पत्तौ च णकः' (५।३।१२०) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

अकार्षीरिति प्रत्येकं संबध्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणं = क्रिया-कृत्या, ताम् । 'कृगः श च वा' (५।३।१००) शप्र० → अ - क्यप्प्र० → य । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'रिः श-क्या-ऽऽशीर्ये' (४।३।११०) ऋ०→रि०-क्रि० । क्रियते । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[कां त्वं गणिमजीगणः ? कां गणिकां, कां गणनाम्; सर्वां गणिमजीगणम्, सर्वां गणिकाम्, सर्वां गणनाम्]** 'गणण् संख्याने' (१८७४) गण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । गणनं = गणिः-गणिका, ताम् । अनेन इञ्प्र० → इ । 'पर्यायाऽर्हर्णोत्पत्तौ च णकः' (५।३।१२०) णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ ।

'गणण् संख्याने' (१८७४) गण । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । अद्यतनी सि-अम् । 'णि-श्रि-द्रु-स्रु-कमः कर्तरि ङः' (३।४।५८) ङप्र० → अ । 'व्यञ्जनस्या०' (४।१।४४) अनादिव्यञ्जनलोपः। 'ग-होर्जः' (४।१।४०) ग० → ज० । 'ई च गणः' (४।१।६७) अ० → ई । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

गणनं = गणना, ताम् । 'णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पाचिं, पाचिकां, पक्तिं, पचाम्]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पाचिम्-पाचिकाम् । अनेन इञ्प्र० → इ । 'पर्यायाऽर्हर्णोत्पतौ च णकः (५।३।१२०) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

पचनं = पक्तिम्-पचाम् । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'षितोऽङ्' (५।३।१०७) अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[पाठिं, पाठिकां, पठितिम्]** 'पठ व्यक्तायां वाचि' (२१३) पठ् । पठनं = पाठिं, पाठिकां, पठितिम् । अनेन इञ्प्र० → इ । 'पर्याया'० (५।३।१२०) णकप्र० → अक । शेषं पूर्ववत् । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'तेर्ग्रहादिभ्यः' (४।४।३३) इट् ।।छा।

## पर्यायाऽर्हर्णोत्पत्तौ च णकः ॥ ५।३।१२० ॥

**[पर्यायाऽर्हर्णोत्पत्तौ]** पर्ययश्च अर्हश्च ऋणं च उत्पत्तिश्च = पर्यायाऽर्हर्णोत्पत्ति, तस्याम् ।

**[च]** च प्रथमा सि ।

**[णकः]** णक प्रथमा सि ।

**पर्यायः = क्रमः - परिपाटिरिति यावत् ।**

**[भवत आसिका]** 'भांक् दीप्तौ' (१०६१) भा । भातीति भवत्, तस्य । 'भातेर्डवतुः' (उणा० ८८६) डवतुप्र० → अवत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'आसिक् उपवेशने' (१११९) आस् । आसितुं पर्यायः । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) अ० → इ० । आसितुं भवतः क्रम इत्यर्थः ।

**[भवतः शायिका]** 'शीङ्क् स्वप्ने' (११०५) शी । शयितुं पर्यायः = शायिका । अनेन णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) अ० → इ० । शयितुं भवतः क्रम इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[भवतोऽग्रगामिका]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम्। अग्रे गन्तुं पर्यायः । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) अ० → इ० । अग्रे गन्तुं भवतः क्रम इत्यर्थः ।

'अर्ह पूजायाम्' (५६४) अर्ह् । अर्हणमर्हः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । अर्हः - योग्यता उच्यते ।

**[अर्हति भवान् इक्षुभक्षिकाम्]** 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । इक्षूणां भक्षणं = इक्षुभक्षिकाम् । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) इ० ।

**[अर्हति भवान् ओदनभोजिकाम्]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । ओदनस्य भोजनं = ओदनभोजिका, ताम् । अनेन णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) इ० ।

**[अर्हति भवान् पयःपायिकाम्]** 'पां पाने' (२) पा । पयसः पानं = पयःपायिका, ताम् । अनेन णकप्र० → अक । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) इ० । 'कृति' (३।१।७७) इत्यनेन षष्ठीसमासः ।

**ऋणं-यत् परस्मै धार्यते ।**

**[इक्षुभक्षिकां मे धारयसि]** 'रुचि-कृप्यर्थ-धारिभिः प्रेय-विकारोत्तमर्णेषु' (२।२।५५) इत्यादिना चतुर्थ्यन्तस्य युष्मदः स्थाने 'ङे-ङसा ते-मे' (२।१।२३) "मे"आदेशः ।

**उत्पत्तिर्जन्म ।**

**[इक्षुभक्षिका मे उदपादि]** इक्षुभक्षिका मे उत्पूर्व० 'पदिंच् गतौ' (१२५७) पद् । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ - तलुक् च । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अड् धातोरादि'० (४।४।२९) अट् । 'धुटस्तृतीयः' (२।१।७६) त० → द० ।

प्रश्ने-आख्याने च पूर्वसूत्रेण निष्पन्नम् ।

**[चिकीर्षा मे उदपादि]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छा = चिकीर्षा । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ऋतां क्ङितीर्' (४।४।११६) किर् । 'सन्-यङश्च' (४।१।३) "किर्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) कि० → चि० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'भ्वादेर्नामिनो'० (२।१।६३) दीर्घः । चिकीर्षणं = चिकीर्षा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[बुभुक्षा मे उदपादि]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोक्तुमिच्छति । 'तुमर्हादिच्छायां'० (३।४।२१) सन्प्र० । 'सन्-यङश्च' (४।१।३) द्विः । 'द्वितीय-तुर्ययोः पूर्वौ (४।१।४२) भु० → बु० । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । बुभुक्षणं = बुभुक्षा । 'शंसि-प्रत्ययात्' (५।३।१०५) अप्र० । 'अतः' (४।३।८२) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र बहुलाधिकारात् णको न भवति, ननु यदा पर्यायादीनामेव प्रश्नाऽऽख्यानं वा क्रियते तदा तेषु इञ् कस्मान्न भवति ? इत्याह - प्रत्युत्तरमाह - प्रश्नाऽऽख्यानयोगेऽपि पर्यायादिषु परत्वात् णक एव भवति नेञ् । यथा 卐**कुत्र भवत आसिकेति** आसितुं पर्यायः ।।छ।।

## नाम्नि पुंसि च ।। ५।३।१२१ ।।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ पुंसि ]** पुम्स् सप्तमी ङि । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[ च ]** च प्रथमा सि ।

यथादर्शनं पुंसि च ।

**[ प्रच्छर्दिका ]** 'छर्दण् वमने' (१६५९) छर्द्, प्रपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । प्रच्छर्दनं-प्रच्छर्द्यतेऽनयेति वा = प्रच्छार्दिका वमनम् । अनेन णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ० ।

**[ प्रवाहिका ]** 'वहीं प्रापणे' (९९६) वह्, प्रपूर्व० । प्रवहणं-प्रोह्यतेऽनयेति वा = प्रवाहिका आरजः प्रवृत्तिः । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ विचर्चिका ]** 'चर्चण् अध्ययने' (१७२९) चर्च्, विपूर्व० 'चुरादि'० (३।४।१७) णिच्प्र० । विचर्चनं-विचर्च्यतेऽनयेति वा = विचर्चिका पामा । अनेन णकप्र० → अक । 'णेरनिटि' (४।३।८३) णिच्लोपः ।

**[ प्रस्कन्दिका ]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द, प्रपूर्व० । प्रस्कन्दनं - प्रस्कद्यतेऽनयेति वा = प्रस्कन्दिका क्षया(य)रोगः । अनेन णकप्र० → अक ।

**[ विपदिका ]** विपूर्व० 'पदिच् गतौ' (१२५७) पद् । विपदनं-विपद्यतेऽनयेति वा = विपादिका-विस्फोटिकाप्युच्यते । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

सर्वत्र 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ० । एते(ताः) रोगसंज्ञाः ।

**[ उद्दालकपुष्पभञ्जिका ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । उद्दालकपुष्पेति । 'कृति' (३।१।७७) इति षष्ठीसमासः । उद्दालकपुष्पाणि भज्यन्ते यस्यामिति अर्थकथनम्, वाक्यं तु - भज्यन्ते यस्यां सा = भञ्जिका । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) इ० । उद्दालकपुष्पाणां भञ्जिका इति कार्यम्, न तु 'अकेन क्रीडा-ऽऽजीवे' (३।१।८१) इति समासः, तेन कर्तृविहिताकान्तेन सह विधानात्, णकस्त्वनेन कर्तृवर्जं प्रवर्तते ।

**[ वारणपुष्पप्रचायिका ]** वरणो वृक्षविशेषस्तस्येमानि = वारणानि । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वारणानि च तानि पुष्पाणि च = वारणपुष्पाणि । 'चिंग्ट् चयने (१२९०) चि, प्रपूर्व० । प्रचीयन्ते यस्यां सा = प्रचायिका । अनेन णकप्र० → अक । 'नामिनोऽकालि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्'० (२।४।१११) इ । वारणपुष्पाणां प्रचायिका = वारणपुष्पप्रचायिका ।

---

卐 श० म० न्या० - कदा भवत आसिका ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अभ्योषखादिका ]** अभिपूर्व० 'उषू दाहे' (५२९) उष् । अभ्योषणानि = अभ्योषाः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'खादृ भक्षणे' (२९४) खाद् । अभ्योषाः खाद्यन्तेऽस्यामिति अभ्योषखादिका । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ ।

**[ अवोषखादिका ]** अवपूर्व० 'उषू दाहे' (५२९) उष् । अवोष्यन्ते = अवोषाः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'उपसर्गस्यानिणेधेदोति' (१।२।१९) अलुक् । अवोषाः खाद्यन्तेऽस्यामिति अवोषखादिका । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ ।

**[ शालभञ्जिका ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । शाला भज्यन्ते यस्यां सा = शालभञ्जिका । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ । एवं नामानः क्रीडाः ।

बहुलाधिकारादिह न भवति-

**[ शिरोर्तिः ]** शिरस् 'अर्द गति-याचनयोः' (३०१) अर्द् । शिरसोऽर्दनं = शिरोर्तिः । 卐 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० । 'सो रुः' (२।१।७२) स० → र० । 'अतोऽति रोरुः' (१।३।२०) र० → उ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ । 'एदोतः पदान्तेऽस्य लुक्' (१।२।२७) अलुक् ।

**[ शीर्षार्त्तिः ]** शीर्ष 'अर्द गति-याचनयोः' (३०१) अर्द् । शीर्षस्य अर्दनं = शीर्षार्त्तिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'अघोषे'० (१।३।५०) द० → त० ।

**[ शिरोऽभितप्तिः ]** शिरसोऽभितपनं = शिरोऽभितप्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ चन्दनतक्षा क्रीडा ]** चन्दनतक्षेति चन्दन 'तक्षौ तनूकरणे' (५७१) तक्ष् । चन्दनास्तक्ष्यन्ते यस्यां सा । बाहुलकात् पुन्नाम्नि विहितोऽपि स्त्रियामपि 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ् भवति, न तु यथा शिरोर्तिरित्यत्र बाहुलकाद् णको निषिद्धः तथापि क्तिरपि न प्राप्नोति । 'स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ' (न्या०सं०वक्ष०(२)/सूत्र (५५)) इति न्यायात्, इत्याह-'बहुलाधिकारादिति' बहुलाधिकारादेव चार्तिरित्यत्रार्दतेरर्दयतेश्च यथाक्रममप्रत्ययमनप्रत्ययं च बाधित्वा क्तिरेव भवति ।

पुंसि च -

**[ अरोचकः ]** 'रुचि अभिप्रीत्यां च' (९३८) रुच्, नञ्पूर्व० । अरोचनं - न रोचतेऽस्मिन्निति वा = अरोचकः । अनेन णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अनाशकः ]** 'अशश् भोजने' (१५५८) अश्, नञ्पूर्व० । नाश्नाति-नाश्यतेऽस्मिन्निति वा = अनाशकः । अनेन णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'अन् स्वरे' (३।२।१२९) अन् ।

**[ उत्कन्दकः ]** 'कदु रोदनाह्वानयोः' (३१५) कद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) कन्द्, उत्पूर्व० । अथवा 'स्कन्दृं गति-शोषणयो' (३१९) स्कन्द्, उत्पूर्व० । उत्कन्दनमुत्कन्द्यन्तेऽस्मिन् वा - यद्वा उत्स्कन्दनमुत्स्कद्यतेऽनेनेति वा = उत्कन्दकः । अनेन णकप्र० → अक । 'पृषोदरादयः' (३।२।१५५) सलोपः ।

**[ उत्कर्णकः ]** 'कर्णण् भेदे' (१८७२) कर्ण्, उत्पूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । उत्कर्ण्यतेऽनेनेति उत्कर्णकः । अनेन णकप्र० → अक । 'णेरनिटि (४।३।८३) णिच्लोपः ॥छ॥

---

卐 न्यायसंग्रहे - 'स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ' (२।५५) इति न्यायसूत्रे 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## भावे ॥ ५।३। १२२ ॥

**[ भावे ]** भाव सप्तमी ङि ।

**धात्वर्थक्रिया तस्य निर्देशः - कथनं भावस्तस्मिन् ।**

**[ आसिका ]** 'आसिक् उपवेशने' (१११९) आस् । आसनं = आसिका । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ शायिका ]** 'शीङ्क् स्वप्ने' (११०५) शी । शयनं = शायिका । अनेन णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ ।

**[ जीविका ]** 'जीव प्राणधारणे' (४६५) जीव् । जीवनं = जीविका । अनेन णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ ।

**[ कारिका ]** 'डुकृंग् करणे' (८८८) कृ । करणं = कारिका । अनेन णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्'० (२।४।१११) इ ।

**[ ईक्षा ]** 'ईक्षि दर्शने' (८८२) ईक्ष् । ईक्षणं = ईक्षा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ऊहा ]** 'ऊहि, तर्के' (८७०) ऊह् । ऊहनं = ऊहा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ ईहा ]** 'ईहि चेष्टायाम्' (८५७) ईह् । ईहनं = ईहा ।'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्मरणा ]** 'स्मृं चिन्तायाम्' (१८) स्मृ । स्मरन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'घटादेर्ह्रस्वो'० (४।२।२४) ह्रस्वत्वम् । स्मरणं = स्मरणा । 'णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः' (५।३।१११) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ ।।छा।

## क्लीबे क्तः ॥ ५।३।१२३ ॥

**[ क्लीबे ]** क्लीब सप्तमी ङि ।

**[ क्तः ]** क्त प्रथमा सि ।

घञादिरपवादः । आदिशब्दात् 'ट्वितोऽथुः' (५।३।८३) इत्यादयः । स्त्रियां 'भावा-ऽकर्त्रोः' (५।३।१८) इति च निवृत्तम् ।

**[ हसितं छात्रस्य ]** 'हसे हसने' (५४५) हस् । हसनं = हसितम् । अनेन क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

**[ नृत्तं मयूरस्य ]** 'नृतैच् नर्त्तने' (११५२) नृत् । नर्त्तनं = नृत्तम् । अनेन क्तप्र० । मयूरस्य इत्यत्र 'वा क्लीवे' (२।२।९२) षष्ठी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[व्याहृतं कोकी(कि)लस्य]** 'हृंग् हरणे' (८८५) हृ, वि-आङ्पूर्व० । व्याहरणं = व्याहृतम् । अनेन क्तप्र० → त ।

**[गतं मतङ्गजस्य]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । गमनं = गतम् । अनेन क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक् । प्र० सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[हसः, हासः]** हसनं = हसः । 'नवा क्वण-यम-हस-स्वनः' (५।३।४८) विकल्पेन अल्प्र० → अ । एवम्-हासः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छा॥

## अनट् ॥ ५।३।१२४ ॥

**[अनट्]** अनट् प्रथमा सि ।

पृथग्योग उत्तरार्थः ।

**[गमनम्]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) 'गम्लृं गतौ' (३९६) गम् । गम्यते = गमनम् । अनेन अनट्प्र० → अन । सि-अम् ।

**[भोजनम्]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यते = भोजनम् । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । सि-अम् ।

**[वचनम्]** 'वचंक् भाषणे' (१०९६) वच् । उच्यते = वचनम् । अनेन अनट्प्र० → अन । सि-अम् ।

**[हसनं छात्रस्य]** 'हसे हसने' (५४५) हस् । हस्यते = हसनम् । अनेन अनट्प्र० → अन । सि-अम् ।

टकार उत्तरत्र ङ्यर्थः ॥छा॥

## यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः ॥ ५।३।१२५ ॥

**[यत्कर्मस्पर्शात्]** यच्च तत् कर्म च = यत्कर्म, तस्य स्पर्शः = यत्कर्मस्पर्शस्तस्मात् ।

**[कर्त्रङ्गसुखम्]** कर्तुरङ्गसुखं = कर्त्रङ्गसुखम् । प्रथमा सि ।

**[ततः]** तद् । तस्मात् = ततः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित्तस्' (७।२।८९) पित्तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

येन कर्मणा संस्पृश्यमानस्य कर्तुरङ्गस्य-शरीरस्य सुखमुत्पद्यते ततः कर्मणः पराद्धातोः क्लीबे भावेऽनट् स्यात् ।

पूर्वेणैव प्रत्ययेनैव सिद्धे नित्यसमासार्थं वचनम्, प्रक्रियार्थं प्रविभागो दृश्यते, अस्वपदविग्रहो वा ।

**[पयःपानं सुखम्]** पयसः पीतिः = पयःपानम् । अनेन अनट्प्र० → अन । सुख सि-अम् ।

卐 **[ओदनभोजनं सुखम्]** ओदनस्य भुक्तिः = ओदनभोजनम् । अनेन अनट्प्र० → अन । सुख सि-अम् ।

अपादानादिस्पर्शे मा भूत्-

**[तूलिकाया उत्थानं सुखम्]** तूलिका पञ्चमी ङसि । उत्-स्था । उत्थीयते = उत्थानम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक्, सुखम् । वाक्यमेव न समासो लक्षणाभावात् ।

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अग्निकुण्डस्योपासनं सुखम्]** अग्निकुण्ड षष्ठी ङस् । उप 'आसिक् उपवेशने' (१११९) आस् । उपास्ते = उपासनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन, सुखम् ।

**[शिष्येण गुरोः स्नापनं सुखम्]** शिष्य तृतीया टा । गुरु षष्ठी ङस् । 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । स्नान्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री'० (४।२।२१) पोऽन्तः । स्नाप्यते = स्नापनं सुखम् । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लोपः । सि-अम् । स्नापयतेर्न गुरुः कर्त्ता, किं तर्हि ? कर्म ।

**[पुत्रस्य परिष्वञ्जनं सुखम्]** पुत्रस्य 'ष्वञ्जित् सङ्गे' (१४७१) ष्वञ्ज् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वञ्ज्, परिपूर्व० । परिष्वज्यते = परिष्वञ्जनम्, सुखम् । 'स्वञ्जश्च' (२।३।४५) षत्वम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । पुत्रस्य स्पर्शात्(पुत्रस्पर्शः) न शरीरस्य सुखं, किं तर्हि ! मानसी प्रीतिः, अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यात् ।

**[कण्टकानां मर्दनम्]** 'मृदश् क्षोदे' (१५५०) मृद् । मृद्यते = मर्दनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

व्यावृत्त्युदाहरणेषु सर्वत्रासमासः प्रत्युदाहार्यः ।

अथवा तत इति तस्मिन् = ततः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् तदा पृषोदरादित्वात् दलोपः । 'आ द्वेरः' (२।१।४१) इति तु न, तसादौ चेत्यधिकारात् । एके तु न(त)सादावपीच्छन्ति ।

**[राजभोजनाः शालयः]** राजन् 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । राज्ञा भुज्यन्ते = राजभोजनाः शालयः । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा जस् ।

**[राजाच्छादनाः प्रावाराः]** राजन् 'छदण् अपवारणे' (१९६४) छद् । 'चुरादि'० (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । राजा आच्छाद्यते यैः ते = राजाच्छादनाः । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रथमा जस् । प्र-आङ्पूर्व० 'वृग्ट् वरणे' (१२९४) वृ । प्राव्रियन्ते = प्रावाराः । 'वृगो वस्त्रे' (५।३।५२) इत्यलो विकल्पपक्षे 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा जस् ।

**[राजपरिधानानि वासांसि]** राजन् 'डुधांग्क् धारणे च' (११३९) धा, परिपूर्व० । राज्ञा परिधीयन्ते यानि तानि = राजपरिधानानि । अनेन अनट्प्र० → अन । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । वासस् प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः ॥छ॥

## रम्यादिभ्यः कर्तरि ॥ ५।३।१२६ ॥

**[रम्यादिभ्यः]** रमिरादिर्येषां ते = रम्यादयः, तेभ्यः = रम्यादिभ्यः । पञ्चमी भ्यस् ।

**[कर्तरि]** कर्तृ सप्तमी ङि ।

**[रमणी]** 'रमिं क्रीडायाम्' (९८९) रम् । रममाणं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । रमयतीति रमणी । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'अणञेयेकण्-नञ्'० (२।४।२०) ङी । रमत इति कृते णकतृचादयोऽनेन बाधिताः सन्तो बाहुलकादेव भवन्ति । एवमन्येषाम्

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

**[नन्दनी]** 'टुनदु समृद्धौ' (३१२) नद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः-नन्द् । नन्दन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । नन्दयतीति नन्दनी । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[कमनी]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० । कामयते = कमनी स्त्री । अनेन अनट्प्र० → अन । शेषं पूर्ववत् ।

**[ह्लादनी]** 'ह्लादैङ् सुखे च' (७३८) ह्लाद् । ह्लादमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । ह्लादयते = ह्लादनी । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[इध्मव्रश्चनः]** 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । व्र(वृ)श्चन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । व्रश्चयतीति व्रश्चनः । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः । इध्म(मा)नां व्रश्चनः = इध्मव्रश्चनः ।

**[पलाशशातनः]** 'शद्लृं शातने' (९३७) शद् । शीयते कश्चित् तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'शदिरगतौ शात्' (४।२।२३) "शात्"आदेशः । शातयतीति शातनः । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः । पलाशानां शातनः = पलाशशातनः । 'कृति' (३।१।७७) इत्यनेन समासः ।

बहुवचनं प्रयोगानुसरणार्थम् ॥छा॥

## कारणम् ॥ ५।३।१२७ ॥

**[कारणम्]** 'डुकृंग् करणे' (८८८) कृ । करोति = कारणम् । अनेन अनट्प्र० → अन-वृद्धिश्च आर् । सि-अम् ॥छा॥

## भुजि-पत्यादिभ्यः कर्मा-ऽपादाने ॥ ५।३।१२८ ॥

**[भुजिपत्यादिभ्यः]** भुजिश्च पतिश्च = भुजिपती, भुजिपती आदी येषां ते = भुजिपत्यादयः, तेभ्यः = भुजिपत्यादिभ्यः । पञ्चमी भ्यस् ।

**[कर्माऽपादाने]** कर्म चं अपादानं च = कर्माऽपादानम्, तस्मिन् ।

**[भोजनम्]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यते = भोजनम् । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[निरदनम्]** निर् 'अदं भक्षणे' (१०५९) अद् । निरत्ति तदिति निरदनम् । अनेन अनट्प्र० → अन ।

**[आच्छादनम्]** 'छदण् संवरणे' (१६५५) छद्, आङ्पूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धि छ० → छा० । आच्छाद्यते = आच्छादनम् । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८२) णिच्लोपः ।

**[अवस्रावणम्]** इं (११) - दुं (१२) - द्रुं (१३) - शुं (१४) - 'स्रुं गतौ' (१५) स्रु, अवपूर्व० । अवस्रवत् अधःपतत् प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अवस्राव्यते = अवस्रावणम् । अनेन अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अवसेचनम्]** षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिच्, अवपूर्व० । अवसिच्यते = अवसेचनम् । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

卐**[अशनम्]** 'अशश् भोजने' (१५५८) अश् । अश्यते = अशनम् । अनेन अनट्प्र० → अन ।

**[वसनम्]** वसिक् आच्छादने' (१११७) वस् । वस्यते = वसनम् । अनेन अनट्प्र० → अन ।

**[आभरणम्]** 'डुडुभृंगक् पोषणे च' (११४०) भृ, आङ्पूर्व० । आभ्रियते तदिति आभरणम् । अनेन अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

अपादाने -

**[प्रपतनः]** 'पत्लृ गतौ' (९६२) पत्, प्रपूर्व० । प्रपतत्यस्मादिति प्रपतनः । अनेन अनट्प्र० → अन ।

**[प्रस्कन्दनः]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द्, प्रपूर्व० । प्रस्कन्दत्यस्मादिति प्रस्कन्दनः । अनेन अनट्प्र० → अन ।

**[प्रश्च्योतनः]** चुतृ (२८१) - स्चुतृ (२८२) - 'स्(श्)च्युतृ क्षरणे' (२८३) श्च्युत्, प्रपूर्व० । प्रश्च्योतत्यस्मादिति प्रश्च्योतनः । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[निर्झरणः]** निर् जृष् (११४५) - 'झृष्च् जरसि' (११४६) झृ । निर्झरति (निर्झीर्यति) जलमस्मादिति निर्झरणः । अनेन अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[शङ्खोद्धरणः]** शङ्ख उत् 'धृंग् धारणे' (८८७) धृ । शङ्खमुद्धरत्यस्मादिति शङ्खोद्धरणः । अनेन अनट्प्र० → अन । 'नामिनो'० (४।३।१) गु० अर् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[अपादानम्]** अप-आङ्पूर्व० 'डुदांगक् दाने' (११३८) दा । अपादीयते यस्मादित्यपादानम् । अनेन अनट्प्र० → अन । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

बहुवचनं प्रयोगानुसरणार्थम् ॥छ॥

## करणा-ऽऽधारणे ॥ ५।३।१२९ ॥

**[करणाऽऽधारे]** करणं च आधारश्च = करणाऽऽधारम्, तस्मिन् ।

करणे- **[एषणी]** 'इषच् गतौ' (११६८) इष् । 'इषश् आभीक्ष्ण्ये' (१५५९) इष् । इष्यतेऽनया = एषणी । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[लेखनी]** 'लिखत् अक्षरविन्यासे' (१३३६) लिख् । लिख्यत अक्षराण्यनयेति लेखनी । अनेन अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[विचयनी]** 'चिंगट् चयने' (१२९०) चि, विपूर्व० । विचीयतेऽनयेति विचयनी । अनेन अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अणञेयेकण्'० (२।४।२०) ङी ।

**[इध्मव्रश्चनः]** इध्मन् 'ओव्रस्चौत् छेदने' (१३४१) व्रस्च् । वृश्च्यतेऽनेनेति व्रश्चनः । इध्मानां व्रश्चनः = इध्मव्रश्चनः ।

卐 श० म० न्या० - 'असूच-क्षेपणे' (१२२१) अस् । अस्यन्ति तदिति असनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पलाशशातनः ]** 'शद्लृं शातने' (९६७) शद् । शीयते कश्चित् तमन्यः प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'शदिरगतौ शात्' (४।२।२३) शात् । पलाशानि शात्यन्तेऽनेन = पलाशशातनः । अनेन अनट्प्र० → अन। 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ अविलवनः ]** 'लुग्श् छेदने' (१५१९) लू, नञ्-विपूर्व० । न विलूयते - न छिद्यतेऽनेनेति अविलवनः । अनेन अनट्प्र० → अन। 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ श्मश्रुकर्तनः ]** 'कृतैत् छेदने' (१३२५) कृत् । श्मश्रूणि-कूर्चकेशाः कृत्यन्ते-छिद्यन्तेऽनेनेति श्मश्रुकर्तनः । अनेन अनट्प्र० → अन। 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

आधारे-**[ गोदोहनी ]** गो 'दुहीँक् क्षरणे' (११२७) दुह् । गावो दुह्यन्तेऽस्यामिति गोदोहनी । अनेन अनट्प्र० → अन। 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ सक्तुधानी ]** सक्तु 'डुधांग्क् धारणे च' (११३९) धा । सक्तवो धीयन्तेऽस्यामिति सक्तुधानी । अनेन अनट्प्र० → अन।

**[ तिलपीडनी ]** तिल 'पीडण् गहने' (१६२५) पीड् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । तिलानि पीड्यन्तेऽस्यामिति तिलपीडनी । अनेन अनट्प्र० → अन। 'णेरनिटि' (४।३।८३) णिच्लोपः । सर्वत्र 'अणञेयेकण्'० (२।४।२०) ङी ।

**[ शयनम् ]** 'शीङ्क् स्वप्ने' (११०५) शी । शय्यतेऽस्मिन्निति शयनम् । अनेन अनट्प्र० → अन। 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ आसनम् ]** 'आसिक् उपवेशने' (१११९) आस् । आस्यते सुखेनाऽस्मिन्नित्यासनम् । अनेन अनट्प्र० → अन।

**[ अधिकरणम् ]** अधि 'डुकृंग् करणे' (८८८) कृ । अधिक्रियतेऽस्मिन्नित्यधिकरणम् । अनेन अनट्प्र० → अन। 'नामिनो'० (४।३।१) गु० अर् ।

**[ आस्थानम् ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र (२९)) स्था, आङ्पूर्व० । आस्थीयतेऽस्मिन्नित्यास्थानम् । अनेन अनट्प्र० → अन। सि-अम् ।।छा।

## पुंनाम्नि घः ॥ ५।३।१३० ॥

**[ पुंनाम्नि ]** पुम्स्-नामन् । पुंसो नाम = पुंनाम, तस्मिन् । 'अनोऽस्य' (२।१।१०८) अलुक् । ('ई-ङौ वा' (२।१।१०९) अलुक्) । 'पदस्य' (२।१।८९) सलुक् । 'तौ मुमौ'० (१।३।१९) अनुस्वारः ।

**[ घः ]** घ प्रथमा सि ।

करणे -**[ प्रच्छदः ]** 'छदण् संवरणे' (१६५५) छद्, प्रपूर्व० । 'चुरादि'० (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः छ० → छा० । प्रच्छाद्यतेऽनेनेति प्रच्छदः । अनेन घप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'एकोपसर्गस्य च घे' (४।२।३४) ह्रस्वत्वम् ।

**[ उरश्छदः ]** 'छदण् संवरणे' (१६५५) छद् । 'चुरादि'० (३।४।१७) णिच्प्र० । ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । उरो वक्षस्थलं छाद्यतेऽनेनेति उरश्छदः । अनेन घप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'एकोपसर्गस्य च घे' (४।२।३४) ह्रस्वत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ दन्तच्छदः ]** 'छदण् संवरणे' (१६५५) छद् । 'चुरादि'० (३।४।१७) णिच्प्र० । ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । दन्ताः छाद्यन्तेऽनेनेति दन्तच्छदः । अनेन घप्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'एकोपसर्गस्य च घे' (४।२।३४) ह्रस्वत्वम् ।

**[ प्लवः ]** च्युंङ् (५९४) - ज्युंङ् (५९५) - जुंङ् (५९६) - प्रुंङ् (५९७) - प्लुंङ् गतौ' (५९८) प्लु । प्लूयते - गम्यतेऽनेनेति प्लवः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ प्रणवः ]** 'णुक् स्तुतौ' (१०८१) णु । 'पाठे धात्वादेर्णो नः' (२।३।९७) नु, प्रपूर्व० । प्रणूयते - प्रकर्षेण स्तूयतेऽनेनेति वा = प्रणवः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । ओदौतोऽवाव्' (१।२।२४) अव् । 'अदुरुपसर्गान्तरो ण-हिनु-मीना-ऽऽनेः' (२।३।७७) णत्वम् ।

**[ करः ]** 'डुकृंग् करणे' (८८८) कृ । क्रियते कार्यं-द्रव्यवृद्धि वाऽनेनेति करो हस्तो राजदेवभागो वा । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ प्रत्ययः ]** 'इंण्क् गतौ' (१०७५) इ, प्रतिपूर्व० । प्रतीयते-निश्चीयते जनोऽनेनेति प्रत्ययः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ शरः ]** कॄ (१५२९) - मॄ (१५२०) - 'शॄश् हिंसायाम्' (१५३१) शॄ । शीर्यते - प्राणिनां प्राणत्यागो विधीयतेऽनेनेति शरः । अनेन घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

आधारे -**[ आकरः ]** 'डुकंग् करणे' (८८८) कृ, आङ्पूर्व० । एत्य कुर्वन्त्यस्मिन्नित्याकरः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ आलवः ]** 'लूग्श् छेदने' (१५१९) लू, आङ्पूर्व० । एत्य लुनात्यस्मिन्नित्यालवः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ आपवः ]** 'पूग्श् पवने' (१५१८) पू, आङ्पूर्व० । एत्य पुनात्यस्मिन्नित्यापवः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ भवः ]** 'भू सत्तायाम्' (१) भू । भवन्ति-उत्पद्यन्ते प्राणिनोऽस्मिन्निति भवः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ लयः ]** 'लींङ्च् श्लेषणे' (१२४८) ली । लीयते जनोऽस्मिन्निति लयः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ भरः ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । बिभर्त्ति जनोऽनेनेति भरः । अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ प्रहरः ]** 'हृंग् हरणे' (८८५) हृ, प्रपूर्व० । प्रहरति कालं - घटिकादिकं जनोऽनेनेति प्रहरः । अनेन घप्र० । 'नामिनो'० (४।३।१) गु० अर् ।

**[ प्रसरः ]** 'सृं गतौ' (२५) सृ, प्रपूर्व० । प्रसरन्त्यस्मिन्निति प्रसरः ।

**[ अवसरः ]** 'सृं गतौ' (२५) सृ, अवपूर्व० । अवसरन्ति जना अस्मिन्नित्यवसरः ।

**[ परिसरः ]** 'सृं गतौ' (२५) सृ, परिपूर्व० । परिसरन्ति जना अस्मिन्निति परिसरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ विसरः ]** 'सृं गतौ' (२५) सृ, विपूर्व० । विसरन्ति जना अस्मिन्निति विसरः ।

**[ प्रतिसरः ]** 'सृं गतौ' (२५) सृ, प्रतिपूर्व० । प्रतिसरत्यस्मिन्निति प्रतिसरः ।

सर्वत्र अनेन घप्र० → अ । 'नामिनो'० (४।३।१) गु० अर् ।

**[ विचयनी ]** विपूर्व० 'चिंगूट् चयने' (१२९०) चि । विचीयतेऽनयेति विचयनी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ प्रधानम् ]** प्रधीयते विकारोऽस्मिन्निति प्रधानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अ । सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ।

**[ प्रहरणो दण्डः ]** प्रपूर्व० 'हृंग् हरणे' (८८५) हृ । प्रह्रियतेऽनेनेति प्रहरणो दण्डः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'नामिनो'० (४।३।१) गु० अर् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ प्रसाधनः ]** 'षिधूंच संराद्धौ' (११८५) षिध् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिध्, प्रपूर्व० । प्रसिध्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'सिध्यतेरज्ञाने' (४।२।११) इकारस्य आत्त्वम् । प्रसाध्यतेऽनेनेति प्रसाधनः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

**[ दोहनः ]** 'दुहींक् क्षरणे' (११२७) दुह् । दुहन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । दोह्यते जनेनाऽस्मिन्निति दोहनः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लोपः ।

घकार 'एकोपसर्गस्य च घे' (४।२।३४) इत्यत्र विशेषणार्थः ॥छ॥

**गोचर-संचर-वह-व्रज-व्यज-खला-ऽऽपण-निगम-बक-भग-कषा-ऽऽकष-निकषम् ॥ ५।३।१३१ ॥**

**[ गोचरसंचरवहव्रजव्यजखलाऽऽपणनिगमबकभगकषाऽऽकषनिकषम् ]** गोचरश्च संचरश्च वहश्च व्रजश्च व्यजश्च खलश्च आपणश्च निगमश्च बकश्च भगश्च कषश्च आकषश्च निकषश्च - गोचरसंचरवहव्रजव्यजखलाऽऽपणनिगमबकभगकषा-ऽऽकषनिकषम् ।

**[ गोचरो देशः ]** गो 'चर भक्षणे च' (४१०) चर् । गावश्चरन्त्यस्मिन्निति गोचरो देशः । व्युत्पत्तिमात्रं चेदम् ।

विषयस्य तु संज्ञा -

**[ अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ]** सर्व सम्पूर्व० 'विदक् ज्ञाने' (१०९९) विद् । सर्वं संविदन्ति = सर्वसंविदस्तेषाम् । 'क्विप्' (५।१।१४८) क्विपप्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अनेकान्तात्मकं वस्तु गोचरः ।

**[ संचरः ]** 'चर भक्षणे च' (४१०) चर्, सम्पूर्व० । संचरन्तेऽनेनेति संचरः ।

**[ वहः वृषस्कन्धदेशः ]** 'वहीं प्रापणे' (९९६) वह् । वहन्ति भारं तेन = वहः वृषस्कन्धदेशः ।

**[ व्रजः ]** धृज (१३०) - धृजु (१३१) - ध्वज (१३२) - ध्वजु (१३३) - ध्रज (१३४) - ध्रजु (१३५) - वज (१३६) - 'व्रज गतौ' (१३७) व्रज् । व्रजत्यस्मिन्निति व्रजः - गोकुलम् ।

**[ व्यजः ]** विपूर्व० 'अज क्षेपणे च' (१३९) अज् । व्यजत्यनेनेति व्यजः । अनेन घप्र० → अ । 'अघञ्क्यबलच्यजेर्वी' (४।४।२) इत्यनेन वी प्राप्तावपि निपातनात् वींभावाभावश्च । प्रेरणदण्ड उच्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ खलः ]** 'खल संचये च' (४४९) खल् । खलन्ति-संचिन्वन्ति पापानि लोका अस्मिन्निति खलो दुर्जनः ।

**[ आपणः ]** 'पणि व्यवहार-स्तुत्योः' (७१०) पण्, आङ्पूर्व० । आ एत्य पणायन्त्यस्मिन्नित्यापणः ।

**[ निगमः ]** निपूर्व० अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृ गतौ' (३९६) गम् । निगच्छन्ति तत्रेति निगमः - नगरविशेषः ।

**[ बकः ]** 'वचंक् भाषणे' (१०९६) वच् । वक्तीति बकः । बाहुलकात् कर्त्तरि ।

**[ निपकः ]** निपचन्त्यनेनेति निपकः ।

**[ भगः ]** 'भजीं सेवायाम्' (८९५) भज् । भज्यतेऽनेनास्मिन्निति वा = भगः । अनेन घप्र० । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० ।

**[ कषः ]** 'कष हिंसायाम्' (५०७) कष् । कषत्यस्मिन्निति कषः ।

**[ आकषः ]** आङ्पूर्व० 'कष हिंसायाम्' (५०७) कष् । आ एत्य कषन्त्यस्मिन्निति आकषः ।

**[ निकषः ]** निपूर्व० 'कष हिंसायाम्' (५०७) कष् । निकषन्त्यस्मिन्निति निकषः । अनेन सर्वत्र घप्र० → अ । निपातनात् साध्यः ॥छ॥

## व्यञ्जनाद् घञ् ॥ ५।३।१३२ ॥

**[ व्यञ्जनात् ]** व्यञ्जन पञ्चमी ङसि ।

**[ घञ् ]** घञ् प्रथमा सि ।

घस्यापवादः ।

**[ वेदः ]** 'विदक् ज्ञाने' (१०९९) विद् । 'विद्लृंती लाभे' (१३२२) विद् । 'विदिंप् विचारणे' (१४९७) विद् । विदन्ति-विन्दन्ति-विन्दते वा अनेनेति वेदः । अनेन घञ्प्र० → अ ।

**[ चेष्टो बलम् ]** 'चेष्टि चेष्टायाम्' (६७०) चेष्ट् । चेष्टतेऽनेनेति चेष्टो बलम् । अनेन घञ्प्र० → अ ।

**[ आपाकः ]** आङ्पूर्व०, 'डुपचींष् पाके' (८९२) पच् । एत्य पचन्त्यस्मिन्नित्यापाकः । अनेन घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च'० (४।१।१११) च० → क० ।

**[ आरामः ]** 'रमिं क्रीडायाम्' (९८९) रम्, आङ्पूर्व० । एत्य रमन्ति जना अस्मिन्नित्यारामः । अनेन घञ्प्र० → अ। शेषं पूर्ववत् ।

**[ लेखः ]** 'लिखत् अक्षरविन्यासे' (१३२६) लिख् । लिखति वर्णानि जनोऽस्मिन्निति लेखः । अनेन घञ्प्र० → अ। 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ बन्धः ]** 'बन्धंश् बन्धने' (१५५२) बन्ध् । बध्यते जनोऽनेनेति बन्धः । अनेन घञ्प्र० ।

**[ नेगः ]** 'णिजृंकी शौचे च' (११४१) णिज् । 'पाठे धात्वादेर्णो नः' (२।३।९७) निज् । नेनेक्ति अस्मिन्निति नेगः । अनेन घञ्प्र० → अ। 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'क्तेऽनिटश्च'० (४।१।१११) ज० → ग० ।

**[ वेगः ]** 'विजृंकी पृथग्भावे' (११४२) विज् । वेवेक्ति अस्मिन्निति वेगः । अनेन घञ्प्र० → अ। 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'क्तेऽनिटश्च'० (४।१।१११) ज० → ग० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ रागः ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रजत्यनेनेति रागः । अनेन घञ्प्र० → अ। 'घञि भाव-करणे' (४।२।५२) नलुक् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिटश्च'० (४।१।१११) ज० → ग० ।

**[ रङ्गः ]** 'रञ्जीं रागे' (८९६) रञ्ज् । रजत्यस्मिन्निति रङ्गः । अनेन घञ्प्र० → अ। 'क्तेऽनिटश्च'० (४।१।१११) ज० → ग० ।

**[ क्रमः ]** 'क्रमू पादविक्षेपे' (३८५) क्रम् । क्रामन्त्यनेनेति क्रमः । अनेन घञ्प्र० → अ।

**[ प्रासादः ]** प्रपूर्व०, 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । प्रसीदन्ति जगज्जननयनमनांसि अत्रेति प्रासादः । अनेन घञ्प्र० → अ। 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

**[ अपामार्गः ]** अपपूर्व० 'मृजौक् शुद्धौ' (१०९७) मृज् । अपमृजन्ति – शुद्धं कुर्वन्त्यनेनेति अपामार्गः । अनेन घञ्प्र० → अ। 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'मृजोऽस्य वृद्धिः' (४।३।४२) वृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।

卐**[ वीमार्गः ]** विपूर्व० 'मृजौक् शुद्धौ' (१०९७) मृज् । विमृजन्ति अनेन = वीमार्गः । अनेन घञ्प्र० → अ। 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'मृजोऽस्य वृद्धिः' (४।३।४२) वृद्धिः आ । 'क्तेऽनिटश्च-जोः'० (४।१।१११) ज० → ग० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः ।।छ।।

### अवात् तृ-स्तृभ्याम् ॥ ५।३।१३३ ॥

**[ अवात् ]** अव पञ्चमी ङसि ।

**[ तृस्तृभ्याम् ]** तृश्च स्तृश्च = तृस्तृ, ताभ्याम् = तृस्तृभ्याम् । पञ्चमी भ्याम् ।

**[ अवतारः ]** 'तृ प्लवन-तरणयोः' (२७) तृ, अवपूर्व० । अवतरन्त्यनेनास्मिन् वेति अवतारः । अनेन घञ्प्र० → अ। 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ अवस्तारः ]** 'स्तृगृश् आच्छादने' (१५२१) स्तृ, अवपूर्व० । अवस्तृणन्त्यनेनास्मिन्निति वा = अवस्तारः । अनेन घञ्प्र० → अ। 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

बहुलाधिकारादसंज्ञायामपि–

**[ अवतारो नद्याः ]** अवतारस्य वाक्यं पूर्ववत् । येन केनापि यथा अवतीर्यते स एव अवतारो न तु कस्यापि संज्ञा।

**[ नद्युत्तारः ]** उत्तरन्ति प्राणिनोऽनेनास्मिन्निति वा = उत्तारः । अनेन घञ्प्र० । नद्या उत्तारः = नद्युत्तार । एवम् –

**[ अवतरः ]** अवतरणमवतरः । अवतीर्यतेऽवतरः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।।छ।।

### न्याया-ऽऽवाया-ऽध्यायोद्याव-संहारा-ऽवहारा-ऽऽधार-दार-जारम् ॥ ५।३।१३४ ॥

**[ न्यायाऽऽवायाऽध्यायोद्यावसंहाराऽवहाराऽऽधारदारजारम् ]** न्यायश्च अ(आ)वायश्च अध्यायश्च उद्यावश्च संहारश्च अवहारश्च आधारश्च दारश्च जारश्च = न्यायाऽऽवायाऽध्यायोद्यावसंहाराऽवहाराऽऽधारदारजारम् ।

---

卐 बृहद्वृत्तौ – नीमार्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरान्तार्थ आरम्भः ।

**[ न्यायः ]** निपूर्व० 'इंण्क् गतौ' (१०७५) इ । नीयतेऽनेनेति न्यायः । अनेन घञ्प्र० । स्वरान्तत्वात् परत्वात् घस्य प्राप्तेः 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ आवायः ]** 'वेंग् तन्तुसंताने' (९९२) वे । पैं (४७) - 'ओवैं शोषणे' (४८) वै । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । एत्य वयन्ति - वायन्ति वा तत्रेति आवायः । अनेन घञ्प्र० → अ । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ अध्यायः ]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयतेऽनेनास्मिन् वा = अध्यायः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ उद्यावः ]** 'युक् मिश्रणे' (१०८०) यु, उत्पूर्व० । उद्युवन्ति तेन तस्मिन् वा = उद्यावः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ संहारः ]** सम्पूर्व० 'हृंग् हरणे' (८८५) हृ । संहरन्ति तेन तस्मिन् वा = संहारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ अवहारः ]** अवपूर्व० 'हृंग् हरणे' (८८५) हृ । अवहरन्ति तेन तस्मिन् वा = अवहारः । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् ।

**[ आधारः ]** 'धृंग् धारणे' (८८७) धृ, आङ्पूर्व० । आध्रियते तत्रेत्याधारः ।

**[ दाराः ]** 'दॄश् विदारणे' (१५३५) दॄ । दीर्यन्ते पुरुषा एभिरिति दाराः । अनेन घञ्प्र० → अ ।

**[ जारः ]** 'जॄश् वयोहानौ' (१५३६) जॄ । जीर्यतेऽनेनेति जारः । अनेन घञ्प्र० → अ ।

**[ दाराः ]** 'दॄश् विदारणे' (१५३५) दॄ । दृणन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । दारयन्तीति । अनेन घञ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । प्रथमा जस् ।

**[ जारः ]** 'जॄश् वयोहानौ (१५३६) जॄ । जृणन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । जरयतीति जारः । अनेन घञ्प्र० → अ । 'णेरनिटि' (४।३।८३) णिग्लोपः । मतान्तरे एतदुहारणद्वयं ज्ञेयम् ।

ननु जार इत्यस्म(इत्यस्य) कार्ये 'कगे-वनू-जनै-जॄष्-क्नस्-रञ्जः' (४।२।२५) इति ह्रस्वत्वे दीर्घो न(नेति) निपातः क्रियताम्, दार इत्यस्म(इत्यस्य) तु किं निपातनेन ? सत्यम्-भयविवक्षायां दृधातोर्घटादित्वात् दरयतीति यदा क्रियते तदा अपि दीर्घो भूयात् इत्येवमर्थं निपातः ।।छ।।

## उदङ्कोऽतोये ।। ५।३।१३५ ।।

**[ उदङ्कः ]** उदङ्क प्रथमा सि ।

**[ अतोये ]** न तोयः = अतोयस्तस्मिन् ।

**[ तैलोदङ्कः ]** तैल उत् 'अञ्चू गतौ च' (१०५) अञ्चू । उदच्यतेऽनेन = उदङ्कः । अनेन घञ्प्र० - निपात्यते च । तैलस्य उदङ्कः = तैलोदङ्कः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ घृतोदङ्कः ]** घृत उत् 'अञ्चू गतौ च' (१०५) अञ्च् । उदच्यते = उदङ्कः । अनेन घञ्प्र० → निपात्यते च । घृतस्य उदङ्कः = घृतोदङ्कः ।

**[ उदकोदञ्चनः ]** उदच्यतेऽनेनेति उदञ्चनः । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । उदकस्योदञ्चनः = उदकोदञ्चनः । 'व्यञ्जनाद् घञ्' (५।३।१३२) इति सिद्धे तोये प्रतिषेधार्थं वचनम् ॥छ॥

## आनायो जालम् ॥ ५।३।१३६ ॥

**[ आनायः ]** आनाय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ जालम् ]** जाल सि-अम् ।

**[ आनायो मत्स्यानाम्-मृगाणाम् वा ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी, आङ्पूर्व० । आनयन्ति तेन = आनायो मत्स्यानाम्-मृगाणाम् वा । अनेन घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ॥छ॥

## खनो ड-डरेकेकवक-घं च ॥ ५।३।१३७ ॥

**[ खनः ]** खन् पञ्चमी ङसि ।

**[ डडरेकेकवकघम् ]** डश्च डरश्च इकश्च इकवकश्च घश्च = डडरेकेकवकघम् ।

**[ च ]** च प्रथमा सि ।

**[ आखः ]** 'खनूग् अवदारणे' (९१३) खन्, आङ्पूर्व० । आखायते-आखयन्ते वा अनेनास्मिन् वा = आखः । अनेन डप्र० → अ । 'डित्यन्त्य'० (२।१।११४) अन्लुक् ।

**[ आखरः ]** आखायते-आखन्यते वा अनेनास्मिन् वा = आखरः । अनेन डरप्र० → अर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् ।

**[ आखनिकः ]** आखायते-आखन्यते वा अनेनास्मिन् वा = आखनिकः । अनेन इकप्र० ।

**[ आखनिकवकः ]** आखायते - आखन्यते वा अनेनास्मिन् वा = आखनिकवकः । अनेन इकवकप्र० ।

**[ आखनः ]** आखायते-आखन्यते वा अनेनास्मिन् वा = आखनः । अनेन घप्र० → अ ।

**[ आखानः ]** आखायते-आखन्यते वा अनेनास्मिन् वा = आखानः । 'व्यञ्जनाद् घञ् (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ॥छ॥

## इ-कि-श्तिव् स्वरूपाऽर्थे ॥ ५।३।१३८ ॥

**[ इकिश्तिव् ]** इश्च किश्च श्तिव् च = इकिश्तिव् ।

**[ स्वरूपाऽर्थे ]** स्वरूपं च अर्थश्च = स्वरूपाऽर्थम्, तस्मिन् ।

**[ भञ्जिः ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । अनेन इप्र० ।

**[ क्रुधिः ]** 'क्रुधंच् कोपे' (११८४) क्रुध् । अनेन किप्र० → इ ।

**[ वेत्तिः ]** 'विदक् ज्ञाने' (१०९९) विद् । अनेन श्तिव्प्र० → ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थे -**[ यजेरङ्गानि ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । अनेन इप्र० । षष्ठी ङस् । यज्ञस्य अङ्गानीत्यर्थः ।

卐**[ भजिः क्रियते ]** 'भञ्जोंप् आमर्दने' (१४८६) भञ्ज् । अनेन किप्र० → इ । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् ।

**[ पचतिर्वर्तते ]** 'डुपचींष् पाके' (८९२) पच् । अनेन तिव्प्र०॰ → ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव्, पाक इत्यर्थः ।

### दुः-स्वीषतः कृच्छ्राऽकृच्छ्रार्थात्-( र्थे ) खल् ॥ ५।३।१३९ ॥

**[ दुःस्वीषतः ]** दुश्च सुश्च ईषच्च = दुःस्वीषत्, तस्मात् ।

**[ कृच्छ्राऽकृच्छ्रार्थात्-( र्थे ) ]** कृच्छ्रं च अकृच्छ्रं च = कृच्छ्राऽकृच्छ्रे, कृच्छ्राऽकृच्छ्रेऽर्थो(र्थौ) यस्य सः = कृच्छ्राऽकृच्छ्रं(च्छ्रार्थः), तस्मात्-तस्मिन् वा ॥

**कृच्छ्रं-दुःखम्, अकृच्छ्रं-सुखम् ।**

कृत्यादीनामपवादः ।

**[ दुःशयम् ]** दुर् 'शीङ्क् स्वप्ने' (११०५) शी । दुःखेन शय्यत इति दुःशयम् ।

**[ सुशयम् ]** सुखेन शय्यते = सुशयम् ।

**[ ईषच्छयं भवता ]** ईषदनायासेन शय्यते = ईषच्छयं भवता । अनेन खल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ दुष्करः ]** दुर् 'डुकृंग् करणे' (८८८) कृ । दुःखेन क्रियते = दुष्करः । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) षत्वम् ।

**[ सुकरः ]** सुखेन क्रियते = सुकरः ।

**[ ईषत्करः कटो भवता ]** ईषदनायासेन क्रियते = ईषत्करः । अनेन खल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[ दुष्करं, सुकरं, ईषत्करं भवता ]** दुःकरं-सुकरं-ईषत्करं पूर्ववत् ।

**[ कृच्छ्रसाध्यः ]** राधं (१३०४) - 'साधंट् संसिद्धौ' (१३०५) साध् । कृच्छ्रेण साध्यते = कृच्छ्रसाध्यः । 'य एच्चातः' (५।१।२८) यप्र० । ('ऋवर्ण-व्यञ्ज'० (५।१।१७) घ्यण्प्र० → य) ।

**[ सुखसाध्यः ]** सुखेन साध्यते = सुखसाध्यः । 'य एच्चातः' (५।१।२८) यप्र० । ('ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य) ।

**[ ईषल्लभ्यं धनं कृपणात् ]** 'डुलभिंष् प्राप्तौ' (७८६) लभ् । ईषदल्पं लभ्यते = ईषल्लभ्यम् । 'य एच्चातः' (५।१।२८) यप्र० । ('शकि-तकि-चति'० (५।१।२९) यप्र०) । सि-अम् । धनं कृपणात् । अल्पं लभ्यमित्यर्थः ।

खकार उत्तरत्र मागमार्थः । लकारः "खलर्थाश्च" इत्यत्र विशेषणार्थः ।

**[ चयः ]** 'चिंग्ट् चयने' (१२९०) चि । चयनं = चयः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

---

卐 बृहद्वृत्तौ - 'भुजिः क्रियते' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ जयः ]** 'जिं अभिभवे' (८) जि । जयनं = जयः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ लवः ]** 'लूग्श् छेदने' (१५१९) लू । लवनं = लवः । 'युवर्ण-वृ-दृ-वश'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव् (१।२।२४) अव् ।

**[ यवः ]** 'युक् मिश्रणे' (१०८०) यु । यवनं = यवः । 'युवर्ण-वृ-दृ-वश-रण'० (५।३।२८) अल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव् (१।२।२४) अव् ।

**[ कृतिः ]** 'डुकृंग् करणे' (८८८) कृ । करणं = कृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ हृतिः ]** 'हृंग् हरणे' (८८५) हृ । हरणं = हृतिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ चितिः ]** 'चिंग्ट् चयने' (१२९०) चि । चयनं = चितिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति ।

**[ स्तुतिः ]** स्तु । स्तवनं = स्तुतिः । 'श्वादिभ्यः' (५।३।९१) क्तिप्र० → ति ।

इत्यादौ उभयं प्राप्नोति, अलो षष्ठी ङस् लिङ्गिविशेषेण नाऽभिधानम्, अलोऽविशेषेणाभिधानात् तत्र परत्वात् स्त्रीप्रत्ययो भवति ।

**[ दुर्भेदः ]** दुर् । 'भिदृंपी विदारणे' (१४७७) भिद् । दुःखेन भिद्यते = दुर्भेदः । अनेनैव खल्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ सुभेदः ]** सुखेन भिद्यते = सुभेदः । अनेनैव खल्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[ दुश्चयम् ]** दुर् 'चिंग्ट् चयने' (१२९०) चि । दुःखेन चीयते = दुश्चयम् । अनेन खल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ सुचयम् ]** सुखेन चीयते = सुचयम् । अनेन खल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ दुर्लवम् ]** दुर् 'लूग्श् छेदने' (१५१९) लू । दुःखेन लूयते = दुर्लवम् । अनेन खल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ सुलवम् ]** सुखेन लूयते = सुलवम् । अनेन खल्प्र० → अ । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छा॥

## च्व्यर्थे कर्त्राप्याद् भू-कृगः ॥ ५।३।१४० ॥

**[ च्व्यर्थे ]** च्वेरर्थः = च्व्यर्थस्तस्मिन् ।

**[ कर्त्राप्यात् ]** कर्त्ता च आप्यं च = कर्त्राप्यम्, तस्मात् ।

**[ भूकृगः ]** भूश्च कृग् च = भूकृग्, तस्मात् ।

**[ दुराढ्यंभवं भवता ]** दुःखेनाऽनाढ्येनाऽऽढ्येन भूयते = दुराढ्यंभवम् । अनेन खल्प्र० → अ । 'खित्यनव्ययाऽरुषो मोऽन्तो ह्रस्वश्च' (३।२।१११) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'सि-अम् । 'समानादमोऽतः' (१।४।४६) अलुक् । भवत् तृतीया टा इति प्रत्येकं ज्ञेयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ स्वाढ्यंभवं भवता ]** सुखेनाऽनाढ्येनाऽऽढ्येन भूयते = स्वाढ्यंभवम् ।

**[ ईषदाढ्यंभवं भवता ]** ईषदनायासेनाऽनाढ्येनाऽऽढ्येन भूयते = ईषदाढ्यंभवम् । अनेन खल्प्र० । शेषं पूर्ववत् ।

इति कर्त्तरि उदाहरणत्रयम् ।

इदानीं कर्मणि –

**[ दुराढ्यंकरो मैत्रो भवता ]** दुःखेनाऽनाढ्य आढ्यः क्रियते = दुराढ्यंकरो मैत्रः ।

**[ स्वाढ्यंकरश्चैत्रो भवता ]** सुखेनाऽनाढ्य आढ्यः क्रियते = स्वाढ्यंकरश्चैत्रः ।

**[ ईषदाढ्यंकरश्चैत्रो भवता ]** ईषदनायासेनाऽनाढ्य आढ्यः क्रियते = ईषदाढ्यंकरश्चैत्रः । अनेन खल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'खित्यनव्ययाऽरुषो'० (३।२।१११) मोऽन्तः ।

**[ सुकटंकराणि वीरणानि ]** सुखेनाऽकटः कटः क्रियन्ते = सुकटंकराणि वीरणानि । अनेन खल्प्र० ।

**[ सुकरः कटो वीरणैः ]** सुखेन क्रियते सुकरः । 'दुः-स्वीषतः कृच्छ्रा'० (५।३।१३९) खल्प्र० → अ । 'नामिनो'० (४।३।१) गु० अर् । [सुकरः] कटो वीरणैरित्यत्र तु करणविवक्षा । 卐यद्यपि च सुकरो वीरणानि अकटः क्रियन्ते तथा न तेषां तद्भावः, इह विवक्षा किं तर्हि करणे करणभावः ? तत्र न दुः-स्वीषतः परात् कर्मणः परो धातुरपि, न (तु) दुः-स्वीषत एव पर इति, तत्र पूर्वेणैव प्रत्ययो भवति ।

**[ दुराढ्यः क्रियते ]** त(य)था शुक्लं करोतीति प्रयोगे **[ अ ]**शुक्लत्वलक्षणाप्रकृतिः विद्यमाना अपि न विवक्ष(क्ष्य)ते तथाऽत्रापि अनाढ्य एवंरूपायाः प्रकृतेरविवक्षणात् ॥छ॥

**शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः ॥ ५।३।१४१ ॥**

**[ शासूयुधिदृशिधृषिमृषाऽऽतः ]** शासूश्च युधिश्च दृशिश्च धृषिश्च मृषश्च आच्च = शासूयुधिदृशिधृषिमृषाऽऽत्, तस्मात् ।

**[ अनः ]** अन प्रथमा सि ।

**[ दुःशासन ]** 'शासूक् अनुशिष्टौ' (१०९५) शास्, दुर्पूर्व० । दुःखेन शिष्यते = दुःशासनः । अनेन अनप्र० ।

**[ सुशासनः ]** शास्, सुपूर्व० । सुखेन शिष्यते = सुशासनः । अनेन अनप्र० ।

**[ ईषच्छासनः ]** शास्, ईषत्पूर्व० । ईषदनायासेन शिष्यते = ईषच्छासनः । अनेन अनप्र० ।

**[ दुर्योधनः ]** दुर् 'युधिच् सम्प्रहारे' (१२६०) युध् । दुःखेन युध्यते = दुर्योधनः । अन्तर्भूतण्यर्थः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ दुर्दर्शनः ]** दुर् 'दृशृं प्रेक्षणे' (४९५) दृश् । दुःखेन दृश्यते = दुर्दर्शनः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ दुर्धर्षणः ]** दुर् 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । दुःखेन धृष्यते = दुर्धर्षणः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

---

卐 अयं पाठोऽशुद्धः प्रतिभाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दुर्मर्षणः]** दुर् 'मृषीच् तितिक्षायाम्' (१२८४) मृष् । दुःखेन मृष्यते = दुर्मर्षणः । अनेन अनप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

आदन्तः-

**[दुरुत्थानं भवता]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे'० (न्या०सं०वक्ष०(१)/सूत्र (२९)) स्था, उत्पूर्व० । दुःखेन उत्थीयते = दुरुत्थानम् । अनेन अनप्र० । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक् ।

**[सूत्थानं भवता]** सुखेन उत्थीयते = सूत्थानम् । अनेन अनप्र० । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक् ।

**[ईषदुत्थानं भवता]** ईषदनायासेन उत्थीयते = ईषदुत्थानम् । अनेन अनप्र० । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक् ।

**[दुष्पानं पयो भवता]** दुर् 'पां पाने' (२) पा । दुःखेन पीयते = दुष्पानम् । अनेन अनप्र० । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) रस्य षत्वम् ।

**[सुपानं पयो भवता]** सुखेन पीयते = सुपानम् । अनेन अनप्र० ।

**[ईषत्पानं पयो भवता]** ईषदनायासेन पीयते = ईषत्पानम् । अनेन अनप्र० ।

एवं दुःशास इत्यादिषु मतान्तरे विकल्पेन 'दुः-स्वीषतः कृच्छ्रा'० (५।३।१२९) खल्प्र० → अ ।

**[ईषद्दरिद्रः]** ईषत् 'दरिद्राक् दुर्गतौ' (१०९२) दरिद्रा । ईषदनायासेन दरिद्र्यते = ईषद्दरिद्रः । अस्य अनप्रत्ययस्य विषयेऽप्याकारस्य 'अशित्यस्सन्-णकज्-णकाऽनटि' (४।३।७७) इत्यादिना लोपेन आदन्तत्वाभावात् 'दुः-स्वीषतः कृच्छ्रा०' (५।३।१३९) खल्प्र० → अ ।

ननु धातोरकर्मकत्वाद्भावे प्रत्यये कथमत्र पुंस्त्वम् ? दुराढ्यंभवमित्यादिवत् नपुंसकत्वमाप्तेः । सत्यम् - 'काला-ऽध्वनोर्व्याप्तौ (२।२।४२) इत्यनेन मासादेः कर्मणि खल् न तु भावे, ततो यत्र मासादौ दरिद्रैर्भूयते स मास ईषद्दरिद्र उच्यते ।

खलोऽपवादो योगः सूत्रमुच्यते ॥छ॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ कृतस्य तृतीयः पादः ॥छ॥**

• • •

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

# ॥ अथ पञ्चमाध्यायस्य चतुर्थः पादः ॥

## सत्सामीप्ये सद्वद् वा ॥ ५।४।१ ॥

**[सामीप्ये]** समीपमेव = सामीप्यम् । 'भेषजादिभ्यष्ट्यण्' (७।२।१६४) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् = सामीप्ये ।

**[सद्वत्]** सदिव = सद्वत् । 'तत्र' (७।१।५३) इत्यनेन वत्प्र० । (स्यादेरिवे' (७।१।५२) वत्प्र०) । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

'सति' (५।२।१९) इति सूत्रादाराभ्याऽऽपादपरिसमाप्तेर्विहिताः प्रत्यया भूत-भविष्यतोर्वा अतिदिश्यते(न्ते) - अतिक्रम्य निजं कालं दिश्यन्त इत्यर्थः ।

**[कदा चैत्र ! आगतोऽसि ? अयमागच्छामि, आगच्छन्तमेव मां विद्धि । पक्षे - अयमागमम्, एषोऽस्म्यागतः]** किम् । कस्मिन् काले = कदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'किमः कस्तसादौ च' (२।१।४०) "क"आदेशः ।

चैत्र, आमन्त्र्ये सि ।

'असक् भुवि' (११०२) अस् । वर्त० सिव् । 'अस्तेः सि हस्त्वेति' (४।३।७३) सलोपः । यद्वा असि युष्मदर्थः त्याद्यन्तप्रतिरूपकोऽव्ययः । 'विभक्ति-थमन्त-तसाद्याभाः' (१।१।३३) इत्यनेन अव्ययसंज्ञा ।

आगच्छामि, आगच्छन्तमिति प्रयोगद्वयेऽपि भूतेऽर्थे वर्त्तमानप्रत्यया विहिता अनेन सूत्रेण । इदम् । प्रथमा सि । 'अयमियं पुं-स्त्रियोः सौ'(२।१।३८) "अयम्"आदेशः । आङ्पूर्व० गम् । वर्त्त० मिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे'० (१।३।५०) छ० → च० । 'म-व्यस्याः' (४।२।११३) आ० ।

आगच्छतीति आगच्छन्, तम् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्य'० (३।४।७१) शव् । शेषं पूर्ववत् । 'ऋदुदितः (१।४।७०) नोऽन्तः ।

अस्मद् द्वितीया अम् । 'लोकात्' (१।१।३) अद् अग्रे विश्लेषियइ । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) अस्म्० → मादेशः । 'अमौ मः' (२।१।१६) म० । 'युष्मदस्मदोः' (२।१।६) द० → आ । 'समानानां'० (१।२।१) दीर्घः ।

'विदक् ज्ञाने' (१०९९) विद् । पञ्चमी हि । 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पक्षे भूताः प्रत्ययाश्च । अयम् प्रथमा सि । गम् । अद्यतनी अम् । आङ्पूर्वत्वात् न अट् । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

एतद् प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'तः सौ सः' (२।१।४२) त० → स० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'अतोऽति रोरुः (१।३।२०) अ० → उ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ । अस्मि अस्मदर्थना(स्या)द्यन्तप्रतिरूपको अव्ययम् । सामान्यनिर्देशात् परोक्षा-ह्यस्तन्यौ न भवतः

अग्रे तु भविष्यदर्थे वर्त्तमाना न तृच्पक्षे भविष्यत्प्रत्ययाः ।

**[कदा मैत्र ! गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धि; पक्षे-एष गमिष्यामि, गन्ताऽस्मि, गमिष्यन्तमेव मां विद्धि]** गमिष्यामि, गन्ताऽस्मि । गमिष्यतीति गमिष्यन्, तम् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत्-स्य आदिः । 'गमोऽनात्मने' (४।४।५१) इट् ।

**[कदा भवान् सोमं पूतवान्, पविष्यते वा ? एषोऽस्मि पवमानः]** 'पूङ् पवने' (६००) पू । पवते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य (२।१।८९) तलुक् । पविष्यते । 'पूङ्-क्लिशिभ्यो नवा' (४।४।४५) इट् ।

पवते = पवमानः । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनशप्र० → आन । ('पूङ्-यजः शानः' (५।२।२३) शानप्र० → आन) । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[कदा भवान् इष्टवान्, यक्ष्यते वा ? एषोऽस्मि यजमानः]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजते स्म = इष्टवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'यजादि-वचेः किति' (४।१।७९) य्वृत् यस्य इ० । 'यज-सृज-मृज'० (२।१।८७) ज० → ष० ।

यजते = यजमानः । 'शत्रानशा'० (५।२।२०) आनशप्र० → आन । ('पूङ्-यजः शानः' (५।२।२३) शानप्र० → आन) । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

**[कदा भवान् कन्यामलङ्कृतवान्, करिष्यते वा ? एषोऽस्म्यलङ्करिष्णुरिति]** अलङ्करोति स्म = अलङ्कृतवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् ।

अलङ्करिष्यति(ते) - अलङ्करोतीत्येवंशीलः = अलङ्करिष्णुः । 'भ्राज्यलङ्कृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजनाऽपत्रप इष्णुः' (५।२।२८) इष्णुप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[परुदगच्छत्]** परुत् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । गम् । ह्यस्तनी दिव् → त् । 'कर्त्तय'० (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) म० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छ० → च० । 'अड् धातोरादि'० (४।४।२९) अट् ॥छा।

## भूतवच्चाऽऽशंस्ये वा ॥ ५।४।२ ॥

**[भूतवत्]** भूत इव = भूतवत् । 'तत्र' (७।१।५३) वत्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[च]** च प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ आशंस्ये ]** 'आङ: शसुङ् इच्छायाम्' (८५३) आशंस् । आशंस्यत इति आशंस्यम्, तस्मिन् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य ।

**[ वा ]** वा प्रथमा सि ।

अनागतस्य प्रियस्यार्थस्याशंसनं प्राप्तुमिच्छा = आशंसा, तद्विषय आशंस्यः, आशंस्यस्य भविष्यत्वादयमतिदेशः । वाग्रहणं यथाप्राप्तं च ।

**[ उपाध्यायश्चेदागमत्, एते तर्कमध्यगीष्महि, उपाध्यायश्चेदागतः, एतैस्तर्कोऽधीतः, उपाध्यायश्चेदागच्छति, एते तर्कमधीमहे, पक्षे-उपाध्यायश्चेदागमिष्यति, एते तर्कमध्येष्यामहे, उपाध्यायश्चेदागन्ता, एते तर्कमध्येतास्महे ]** उप-अधिपूर्व० 'इंङ्क् अध्ययने (११०४) इ । उपेत्य अधीयतेऽस्मादिति उपाध्यायः । 'इङोऽपादाने तु टिद् वा' (५।३।१९) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

अ(आ)गमत् । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० ।

तर्क द्वितीया अम् ।

अधिपूर्व० 'इंङ्क् अध्ययने' (११०४) इ । अद्यतनी महि । वाऽद्यतनी क्रियातिपत्त्योर्गीङ्' (४।४।२८) इ० → गीङ्० । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । अनेन च भूतप्रत्यय उभयस्याऽप्याशंस्य विद्यमानत्वात् अत्र आशंस्यस्य भविष्यत्वात् भविष्यत्प्रत्ययप्राप्त्या भूताः प्रत्यया विहिता अनेन सूत्रेण अग्रेतने तु वर्त्तमानाः प्रत्ययाश्च ।

पक्षे - आगमिष्यति 'गमोऽनात्मने' (४।४।५१) इट् । अत्र लाभेनाशीर्विषयस्याविष्करणाभावात् आशीः-पञ्चम्यौ न भवतः ।

अधि 'इंङ्क् अध्ययने' (११०४) इ । भविष्यन्ती स्यामहे । 'नामिनो'० (४।३।१) गु० ए ।

आगन्ता-श्वस्तनी ता ।

सामान्यस्यातिदेशे विशेषस्यानतिदेशात् ह्यस्तनी - परोक्षे न भवतः ।।छा।

## क्षिप्रा-ऽऽशंसाऽर्थयोर्भविष्यन्ती-सप्तम्यौ ॥ ५।४।३ ॥

**[ क्षिप्राऽऽशंसाऽर्थयोः ]** क्षिप्रं च आशंसा च = क्षिप्राऽऽशंसे, क्षिप्राऽऽशंसेऽर्थो(र्थौ) ययोः ते = क्षिप्राऽऽशंसार्थे, तयोः = क्षिप्राऽऽशंसाऽर्थयोः । सप्तमी ओस् ।

**[ भविष्यन्तीसप्तम्यौ ]** भविष्यन्ती च सप्तमी च = भविष्यन्तीसप्तम्यौ ।

अथ क्षिप्रार्थे आशंसार्थे चोपपदे आशंस्य एवार्थे वर्त्तमानाद्धातोर्भविष्यन्ती-सप्तम्यौ विधीयेते, तत्राऽऽशंस्यस्य भविष्यत्वाद्भविष्यन्ती सिद्धैव, 'विधि-निमन्त्रणा'० (५।४।२८) इति सप्तम्यपि प्रार्थनारूपत्वात्, किमर्थमिदमुच्यते इत्याह- **'भूतवच्चा'० ( ५।४।२ ) इत्यस्याऽपवादः ।**

**[ उपाध्यायश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता, क्षिप्रमाशु त्वरितमरं शीघ्रमेते सिद्धान्तमध्येष्यामहे ]** क्षिप्रं 'क्रियाविशेषणात्' (२।२।४१) अम् । एवं - आशु । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । एवं - अरम् - शीघ्रम् । सिद्धो अन्तो-निश्चयो यत्र सः = सिद्धान्तः, तम् = सिद्धान्तम् । द्वितीया अम् । अध्येष्यामहे । अत्र 'भूतवच्चाऽऽशंस्ये वा' (५।४।२) इत्यस्य प्राप्ते क्षिप्रार्थे भविष्यन्तीविहिता आशंसार्थे सप्तमी इति च पृथक् सूत्रद्वयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियताम्, किं क्षिप्रार्थे भविष्यन्तीविधानेन ? एवमपि कृते भविष्यन्ती सेत्स्यति । क्षिप्रार्थे नेति वक्तव्ये भविष्यन्तीवचनं श्वस्तनीविषयेऽपि भविष्यन्ती यथा स्यादित्येवमर्थम् ।

**[ उपाध्यायश्चेच्छ्वः शीघ्रमागमिष्यति एतेश्वः क्षिप्रमध्येष्यामहे ]** श्वस् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

आशंसार्थे खल्वपि दर्शयतीत्यर्थः-

**[ उपाध्यायश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता वा आशंसेऽवकल्पये संभावये युक्तोऽधीयीय ]** 'आङः शसुङ् इच्छायाम्' (८५३) आशंस् । वर्त्तमाना ए ।

'कृपौङ् सामर्थ्ये' (९५९) कृप्, अवपूर्व० । अवकल्पमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) लत्वम् ।

'भू सत्तायाम्' (१) भू, सम्पूर्व० । संभवन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । वर्त्तमाना ए । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । सप्तमी ईय । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् ।

अत्र 'भूतवच्चाऽऽशंस्ये वा' (५।४।२) इत्यस्य प्राप्तौ आशंसार्थोपपदयोगे सप्तमी विहिता ।

क्षिप्रा-ऽऽशंसार्थयोर्युगपत्योगे क्षिप्रार्थनिबन्धना भविष्यन्ती आशंसार्थनिबन्धना सप्तमी वा भवतीत्याह - **द्वयोरुपपदयोः सप्तम्येव भवति शब्दतः परत्वात्** - **'आशंसे क्षिप्रमधीयीय'** ॥छा।

## सम्भावने सिद्धवत् ॥ ५।४।४ ॥

**[ सम्भावने ]** सम् 'भूण् अवकल्कने' (१७२२) भू । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । सम्भाव्यते = सम्भावनम् । 'अनट्' (५।३।११४) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिच्लोपः । तस्मिन् ।

**[ सिद्धवत् ]** 'षिधू गत्याम्' (३२०) षिध् । ('षिधूंच् संराद्धौ' (११८५) षिध्) । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिध् । सिध्यति स्म = सिद्धः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य धः । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) धस्य दः । सिद्ध इव = सिद्धवत् । 'तत्र' (७।१।५३) वत्प्र० । ('स्यादेरिवे' (७।१।५२) वत्प्र०) । भूतवदित्यर्थः ।

हेतोः शक्तिश्रद्धानं-संभावनम्, तस्मिन् ।

**[ समये चेत् प्रयत्नोऽभूत्, उदभूवन् विभूतयः ]** 'भू सत्तायाम्' (१) भू । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट्' (४।३।६६) सिच्लुप् । 'भवतेः सिज्लुपि' (४।३।१२) इत्यनेन गुणनिषेधः । 'अड् धातो'० (४।४।२९) अट् ।

भू । अद्यतनी अन् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सिचि परस्मै'० (४।३।४४) वृद्धिः औ । 'ओदौतो'० (१।२।२४) आव् । 'भुवो वः'० (४।२।४३) ऊ । [पिबैति'० (४।३।६६) सिच्लुप् । 'धातोरिवर्णो० (२।१।५०) उव् । 'भुवो वः'० (४।२।४३) ऊ० । 'अड् धातो० (४।४।२९) अट्] । विभूति प्रथमा जस् । 'जस्येदोत्' (१।४।२२) इ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इषे चेन्माधवोऽवर्षीत्, समपत्सत शालयः]** इषे-अश्वयुधि, चेत् माधव प्रथमा सि । जिषू (५२२) - विषू (५२३) - मिषू (५२४) - निषू (५२५) - पृषू (५२६) - 'वृषू सेचने' (५२७) वृष् । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लुक् । 'समानानां'० (१।२।१) दीर्घः । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अड् धातोरादि'० (४।४।२९) अट् ।

'पदिच् गतौ' (१२५७) पद्, सम्पूर्व० । अद्यतनी अन्त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'अड् धातोरादि'० (४।४।२९) अट् । 'अनतोऽन्तोऽदात्मने' (४।२।११४) अन्त० → अत० । शालि प्रथमा जस् ।

**जातश्चायं मुखेन्दुश्चेत्, भृकुटिप्रणयी पुनः ।**

**गतं** च वसुदेवस्य, कुलं नामावशेषताम् ॥

**[जातः]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । अजनि-जायते स्म इति वाक्यं कार्यम्, ननु जनिष्यते इति तत्राऽप्यस्य प्रवर्त्तनात् । 'गत्यर्था-ऽकमर्क-पिब-भुजेः' (५।१।११) क्तप्र० त । 'आः खनि-सनि-जनः' (४।२।६०) न० → आ ।

**[गतम्]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । अगमत्-गच्छति स्म इति वाक्यं कार्यम्, ननु गमिष्यति इति तत्राऽप्यस्य प्रवर्त्तनात् । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक् । सि-अम् ।।छ।।

**नाऽनद्यतनः प्रबन्धा-ऽऽसत्त्योः ॥ ५।४।५ ॥**

**[न]** न प्रथमा सि ।

**[अनद्यतनः]** न अद्यतनः = अनद्यतनः, न तु विद्यतेऽद्यतनो यत्रेति बहुव्रीहेर्व्यापकत्वात् परोक्षाया अपि निषेधः स्यात्, तत्र अद्यतनो नास्तीति कृत्वा । नञ्तत्पुरुषे तु सामान्ये कृते विशेषे नान्तर्भवति, सामान्यमध्ये विशेषायोगात् ।

**[प्रबन्धाऽऽसत्त्योः]** 'प्रबन्धनं = प्रबन्धः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद्, आङ्पूर्व० । आसदनं = आसत्तिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । प्रबन्धश्च आसत्तिश्च प्रबन्धाऽऽसत्ती, तयोः = प्रबन्धाऽऽसत्त्योः । सप्तमी ओस् ।

सातत्य-सामीप्ययोरित्यर्थः । भूतानद्यतने ह्यस्तनी भविष्यदनद्यतने च श्वस्तनी विहिता, तयोरनेन प्रतिषेधः । 'सामान्यातिदेशे विशेषस्य नातिदेशः' (न्या०सं०वक्ष०(१)/सूत्र (५)) 'इति न्यायात् सामान्याऽनद्यतनस्यैव प्रतिषेधः, न विशेषाऽनद्यतनस्य' तेन परोक्षाया न प्रतिषेधः ।

**[यावज्जीवं भृशमन्नमदात्]** यावत् 'जीव प्राणधारणे' (४६५) जीव् । यावज्जीव्यते = यावज्जीवम् । 'यावतो विन्द-जीवः' (५।४।५५) णम्प्र० → अम् । भृश 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अदं भक्षणे' (१०५९) अद् । अद्यते तदिति अन्नम् । 'ज्ञानेच्छाऽर्चाऽर्थ-जीच्छील्यादिभ्यः क्तः' (५।२।९२) क्तप्र० → त । 'रदादमूर्छ-मदः क्तयोर्दस्य च' (४।२।६९) द-तस्य न० । अम् । अदात् 'पिबैति-दा-भू'० (४।३।६६) । सिच्लुप् ।

**[यावज्जीवं भृशमन्नं दत्तवान्]** ददाति स्म = दत्तवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'दत्' (४।४।१०) इत्यनेन दा० → दत्० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[यावज्जीवं युक्तोऽध्यापिपत्]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अधीयानं प्रायुक्त । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'णौ क्री-जीङः' (४।२।१०) इ० → आ । 'अर्त्ति-री-व्ली-ह्री'० (४।२।२१) पोऽन्तः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु-कमः कर्तरि ङः' (३।४।५८) ङप्र० → अ । 'स्वराऽऽदेर्द्वितीयः' (४।१।४) "पि"द्विः । 'णेरनिटि' (४।३।८३) णिग्लोपः । 'स्वरादेस्तासु' (४।४।३१) वृ० आ ।

**[यावज्जीवं युक्तोऽध्यापयिष्यति]** पूर्ववन्निष्पन्ना 'अध्यापि' मण्ड्यते । भविष्यन्ती स्यति । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।२९) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

आसत्तौ खल्वपि-

**[येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट, प्रवृत्तः]** या इयं पू(पौ)र्णमासी अतिक्रामति स्म = अतिक्रान्ता । 'गत्यर्थाऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

एतस्याम् - 'एतद् सप्तमी ङि । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) ङि० → डस्याम्० → अस्याम् ।

'महण् पूजायाम्' (१९२५) मह । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । महनं = महः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । जिनानां महः = जिनमहः ।

प्रपूर्व० 'वृतूङ् वर्त्तने' (९५५) वृत् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'अड् धातोरादि'० (४।४।२९) अट् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

प्रवृत्यते स्म = प्रवृत्तः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

**[येयं पौर्णमास्यागामिनी अस्यां जिनमहः प्रवर्तिष्यते]** आगमिष्यतीति आगामिनी । 'आङश्च णित् । (उणा० ९२०) णिद् इन्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङीप्र० ।

अस्याम्-इदम् सप्तमी ङि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङि० → याम् । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) याम्० → स्याम्० ।

द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाय ॥छ॥

## एष्यत्यवधौ देशस्याऽर्वाग्भागे ॥ ५।४।६ ॥

**[एष्यति]** 'इंण्क् गतौ' (१०७५) इ । एष्यतीति एष्यन्, तस्मिन् । 'शत्रानशावेष्यति'० (५।२।२०) शतृप्र० → अत्-स्य आदौ च । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[अवधौ]** 'डुधांग्क् धारणे च' (११३९) धा, अवपूर्व० । अवधानं = अवधिस्तस्मिन् । 'उपसर्गाद् दः किः' (५।३।८७) किप्र० → इ । 'इडेत्-पुसि'० (४।३।९४) आलुक् ।

**[देशस्य]** देश षष्ठी ङस् ।

**[अर्वाग्भागे]** अर्वाक् चासौ भागश्च = अर्वाग्भागस्तस्मिन् ।

**[योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे, द्विः सक्तून् पास्यामः]** अत्र सूत्रे देशः-प्रदेशमात्रं, तेन अध्वनोऽपि देशता । 'कालाध्व-भाव-देशं वाऽकर्म चाऽकर्मणाम्' (२।२।२३) इत्यत्र तु देशो राष्ट्रादि, अत एव तत्र देशे सत्यपि अध्वग्रहणम् । अध्वन् प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । गम्यते = गन्तव्यः । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । आ प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शत्रून्-रागादीन् जयतीति शत्रुञ्जयः । 'भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि' (५।१।११२) खप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'खित्यनव्ययाऽरुषो'० (३।२।१११) मोऽन्तः ।

यद् प्रथमा सि । अवर प्रथमा सि । वलभ्यास्तत्र ।

द्विः 'क्रियाविशेषणात्' (२।२।४१) अम् । प्रथमं द्वौ वारौ = द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र०, ततोऽम् ।

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भविष्यन्ती स्यामहे । 'लघोरुपान्त्यस्य (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'पां पाने (२) पा । भविष्यन्ती स्यामस् ।

**[ योऽयमध्वातिक्रान्त आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र युक्ता द्विरध्यैमहि, द्विः सक्तूनपिबाम ]** अतिक्रामति स्म । 'गत्यर्था-ऽकर्मक'० (५।१।११) क्तप्र० → त । अतिक्रम्यते स्म = अतिक्रान्तः । क्तप्र० → त । 'अहन्पञ्चमस्य क्वि-क्ङिति' (४।१।१०७) दीर्घत्वम् ।

युजृंपी योगे' (१४७६) युज् । युज्यते स्म = युक्ता-मिलिता इत्यर्थः ।

अधि 'इंङ्क् अध्ययने' (११०४) इ । ह्यस्तनी महि । 'स्वरादेस्तासु' (४।४।३१) वृ० ऐ । 'पां पाने' (२) पा । ह्यस्तनी म । 'कर्त्तर्य'० (३।४।७१) शव् । श्रौति-कृवु-धिवु-पा'० (४।२।१०४) पिबादेशः । 'म-व्यस्याः' (४।२।११३) ब० → बा० । अड् धातोरादि'० (४।४।२९) अट् ।

**[ योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः ]** निर्गतोऽवधिर्यस्मात् सः = निरवधिकः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क ।

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । श्वस्तनी तास्महे । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'पां पाने' (२) पा । श्वस्तनी तास्मस् ।

**[ योऽमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यत् परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः ]** 'भोक्तास्महे' पूर्ववत् । 'पां पाने (२) पा । श्वस्तनी तास्मस् ॥छ॥

## कालस्याऽनहोरात्राणाम् ॥ ५।४।७ ॥

**[ कालस्य ]** काल षष्ठी ङस् ।

**[ अनहोरात्राणाम् ]** अहश्च रात्रिश्च = अहोरात्रम् । 'ऋक्सामर्ग्यजुषधेन्वनडुह-वाङ्मनसा-ऽहोरात्र-रात्रिंदिव-नक्तंदिवा-ऽहर्दिवोर्वष्ठीव-पदष्ठीवा-ऽक्षिभ्रुव-दारगवम्' (७।३।९७) 卐 अहोरात्रं निपातितम् । अहोरात्रं च ३ = अहोरात्राणि । न अहोरात्राणि = अनहोरात्राणि, तेषाम् । 'अह्नः' (२।१।७४) रुत्वम् । अहःशब्दस्य रात्रिशब्दस्य च अर्वाग्भागश्चेन्न भवतीत्यर्थः ।

**[ योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे ]**

'ओहांक् त्यागे' (११३१) हा । जहाति कालान्तरमिति हायनः । 'हः काल-व्रीह्योः' (५।१।६८) टनण्प्र० → अन । 'आत ऐः कृञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । अग्रं हायनस्य = अग्रहायणः ।

卐 शब्दरत्नमहोदधौ-अमरकोषे च अहोरात्रशब्दः पुल्लिङ्गेऽस्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् । अग्रहायण एव = आग्रहायणी । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'अणञेयेकण्'० (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ततः पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

'डुकृंग् करणे' (८८८) कृ । भविष्यन्ती स्यामस् । इट् । 'नामिनो'० (४।३।१) गु० अर् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् ।

'डुदांग्क् दाने' (११३८) दा । भविष्यन्ती स्यामहे ।

यत्र अहःशब्दो रात्रिशब्दो वा प्रयुज्यते तत्र अहोरात्रत्वम् ।

**[योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता द्विरध्येतास्महे]** पञ्चभिरधिका दश = पञ्चदश । पञ्चदशानां रात्रीणां समाहारः = पञ्चदशरात्रः । अत्र कालसम्बन्धिरात्रेण अहोरात्ररूपोऽर्वाग्भागः । 'संख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत्' (७।३।११९) अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

'युजूंपी योगे' (१४७६) युज् । युञ्जमः स्म । 'गत्यर्था-ऽकर्मक'० (५।१।११) क्तप्र० → त ।

'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । श्वस्तनी तास्महे । 'नामिनो'० (४।३।१) गु० ए ।

**[योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र द्विरोदनं भोक्तास्महे]** त्रिंशतो रात्रीणां समाहारः = त्रिंशद्रात्रः । 'संख्यातैकपुण्य'० (७।३।११९) अत्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अर्धमासः । अत्र कालोऽहोरात्ररूपः ।

卐त्रिविधेऽप्यहोरात्रसंबन्धे मा भूत् । बहुवचनं कालस्येति सामानाधिकरण्यभ्रमनिरासार्थम् । कालस्य किम्भूतस्य ? अनहोरात्रस्येत्येवं सामानाधिकरण्यं निषिध्यते । कालसामानाधिकरण्ये हि व्यावृत्तिः(तौ), प्रथमोदाहरणेऽपि सूत्रप्रवृत्तौ श्वस्तनीनिषेधः स्यात् कालस्याऽनहोरात्ररूपत्वात्, वैयधिकरण्ये तु त्रिप्रकारेऽपि कालसंबंधे व्यावृत्तिर्भवति ॥छ॥

## परे वा ॥ ५।४।८ ॥

**[परे]** पर सप्तमी ङि ।

**[वा]** वा प्रथमा सि ।

**[आगामिनः संवत्सरस्याग्रहायण्याः परस्तात् द्विः सूत्रमध्येष्यामहे, अध्येतास्महे वा]** परस्मिन् देशे वसति = परस्तात् । 'पराऽवरात् स्तात्' (७।२।११६) स्तात्प्र० ।

प्रबन्धासत्तिविवक्षायामपि परत्वादयमेव विकल्पः ॥छ॥

## सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ॥ ५।४।९ ॥

**[सप्तम्यर्थे]** सप्तम्या अर्थः = सप्तम्यर्थस्तस्मिन् ।

**[क्रियातिपत्तौ]** क्रियाया अतिपत्तिः = क्रियातिपत्तिस्तस्याम्

卐 उपरि द्विविधेऽहोरात्रसंबंधे दर्शितम् । तृतीयाविधा तु एवम् - योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र द्विः सक्तून् पातास्म इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ क्रियातिपत्तिः ]** क्रियातिपत्ति प्रथमा सि ।

सप्तम्या अर्थो निमित्तं हेतुफलकथनादिका सामग्री । कुतश्चिद् वैगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिः = क्रियातिपत्तिस्तस्याम् ।

**[ दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् ]** दक्षिणस्यामदूरवर्त्तिन्यां दिशि (वसति) । दक्षिणेन मार्गेण । 'अदूरे एनः' (७।२।१२२) एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

पर्याभविष्यत् - परि-आङ्पूर्कः 'भू सत्तायाम् (१) भू । क्रियातिपत्तिः स्यत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था-कवर्गात्' (२।३।१५) षत्वम् ।

**[ यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यत् ]** यदि कमलकं 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) ह्वा, आङ्पूर्व० । क्रियातितित्तिः स्यत् ।

अत्र दक्षिणगमनं कमलकमाह्वानं वा हेतुरपर्याभवनं फलम्, तयोरर्थे 'वर्त्स्यति हेतु-फले' (५।४।२५) इत्यनेन प्राप्नुवत्यां सत्यां कुतश्चित् प्रमाणात् क्रियाया अनिष्पत्तौ अनेन क्रियातिपत्तिः । पर्याभवने(नम्)-उच्छलनम् । एवम्-

**[ अभोक्ष्यत भवान् घृतेन यदि मत्समीपमागमिष्यत् ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । क्रियातिपत्तिः स्यत । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'अड् धातोरादि'० (४।४।२९) अट् ।

आगमिष्यत् - आङ्पूर्व०, गम् । क्रियातिपत्तिः स्यत् । 'गमोऽनात्मने' (४।४।५१) इट् ॥छा।

## भूते ॥ ५।४।१० ॥

**[ भूते ]** भूत सप्तमी ङि ।

**[ दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाणः, अपरश्चातिथ्यर्थी, यदि स तेन दृष्टोऽभविष्यत्, उताभोक्ष्यत, अप्यभोक्ष्यत ]** अन्न 'अर्थणि उपयाचने' (१९३१) अर्थ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । अन्नमर्थयतीत्येवंशीलः = अन्नार्थी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'णेरनिटि' (४।३।८३) णिच्लोपः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घत्वम् । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

'क्रमू पादविक्षेपे' (३८५) क्रम् । कुटिलं क्रामति । 'गत्यर्थात् कुटिले' (३।४।११) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४) अनुस्वारः । चंक्रम्यते = चंक्रम्यमाणः । 'बहुलं लुप्' (३।४।१४) यङ्लुप् । 'शत्रानशावेष्यति'० (५।२।२०) आनश्प्र० → आन । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'अतो म आने' (४।४।११४) मोऽन्तः । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । तेन = अतिथ्यर्थिना ।

'भू सत्तायाम्' (१) भू । क्रियातिपत्तिः स्यत् । 'स्ताद्यशितो'० (४।४३२) इट् । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'अड् धातोरादि'० (४।४।२९) अट् ।

उतशब्दोऽत्यर्थे । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

अभोक्ष्यत - क्रियातिपत्तिः स्यत ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सप्तम्युताऽप्योर्बाढे' (५।४।२१) इत्यारभ्य सप्तम्यर्थेऽनेन विधानम्, ततः प्राक् 'वोतात् प्राक्' (५।४।११) इति विकल्पो वक्ष्यते ॥छ॥

## वोतात् प्राक् ॥ ५।४।११ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उतात् ]** उत पञ्चमी ङसि ।

**[ प्राक् ]** प्राक् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ कथं नाम संयतः सन्ननागाढे तत्रभवान् आधायकृतमसेविष्यत ? धिग् गर्हामहे, कथं सेवेत ? धिग् गर्हामहे ]** किम् । केन प्रकारेण = कथम् । 'कथमित्थम्' (७।२।१०३) "कथं"निपात्यते ।

नामशब्दः कोमलामन्त्रणे । सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

'यमूं उपरमे' (३८६) यम्, सम्पूर्व० । संयच्छतीति संयतः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'यमि-रमि-नमि-गमि'० (४।२।५५) मलुक् ।

'असक् भवे(भुवि)' (११०२) अस् । अस्तीति सन् । 'शत्रानशावेष्यति'० (५।२।२०) शतृप्र० → अत् । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

न अगाढं = अनागाढम्, तस्मिन् = अनागाढे - निःप्रयोजने इत्यर्थः ।

स भवान् = तत्रभवान् । 'त्रप् च' (७।२।९२) इति तच्छब्दात् त्रप्प्र० → त्र । 'आ द्वेरः' (२।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । तत्रभवान्-पूज्य इत्यर्थः ।

आङ्पूर्व० 'डुधांग्क् धारणे च' (११३९) धा । आधानं = आधाय । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप्प्र० → य । उद्दिश्य इत्यर्थः । 'डुकृंग् करणे' (८८८) कृ । क्रियते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त ।

'षेवृङ् सेवने' (८१८) षेव् । 'षः सोऽष्ट्यै'० (२।३।९८) सेव् । 'कथमि सप्तमी च वा' (५।४।१३) इत्यनेन सप्तम्यर्थतायां क्रियातिपत्तिः स्यत । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

धिग् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

'गर्हि कुत्सायाम्' (८६०) गर्ह् । वर्त्तमाना महे । 'कर्त्तर्यन'० (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) ह्र० → र्हा० ।

सेव् । सप्तमी ईत । 'कर्त्तर्यन'० (३।४।७१) शव् । 'अवर्णस्ये'० (१।२।६) ए ।

**[ कालो यदभोक्ष्यत भवान् ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । क्रियातिपत्तिः स्यत । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'अड् धातोरादि'० (४।४।२९) अट् । 'भुनजोऽत्राणे' (३।३।३७) इत्यनेनात्मनेपदम् ।

अत्र 'सप्तमी यदि' (५।४।३४) इत्यनेन सप्तम्यर्थतायां सत्यां ततो 'भूते' (५।४।१०) क्रियातिपत्तिः, एष्यर्थे नित्यमेव क्रियातिपत्तिः ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## क्षेपेऽपि-जात्वोर्वर्त्तमाना ॥ ५।४।१२ ॥

**[ क्षेपे ]** क्षेप सप्तमी ङि ।

**[ अपिजात्वोः ]** अपिश्च जातुश्च = अपिजातू, तयोः = अपिजात्वोः ।

**[ वर्त्तमाना ]** वर्त्तमाना प्रथमा सि ।

भूत इति निवृत्तम् । क्रियातिपत्तिः संबंधाद्भूतकालसामान्ये विधानात् कालविशेषे विहिता अपि प्रत्ययाः परत्वादनेन बाध्यन्ते ।

**[ अपि तत्रभवान् जन्तून् हिनस्ति ? धिग् गर्हामहे ]** स भवान् = तत्रभवान् । 'भवत्वायु'० (७।२।९१) त्रपूप्र० ('त्रप् च' (७।२।९२) त्रपूप्र०) । पूज्य इत्यर्थः । अपि संभावने । 'हिसु हिंसायाम्' (१४९४) हिस् । वर्त्तमाना तिव् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न ।

**[ जातु तत्रभवान् भूतानि हिनस्ति ? धिग् गर्हामहे ]** जातु प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । कदाचिदित्यर्थः ॥छ॥

## कथमि सप्तमी च वा ॥ ५।४।१३ ॥

**[ कथमि ]** कथम् सप्तमी ङि ।

**[ सप्तमी ]** सप्तमी प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ कथं नाम तत्रभवान् मांसं भक्षयेत् ? मांसं भक्षयति ? धिग् गर्हामहे, अन्याय्यमेतत्, पक्षे-अबभक्षत्, अभक्षयत्, भक्षयांचकार, भक्षयिता, भक्षयिष्यति ? ]** 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । भक्षयति-वर्त्तमाना तिव् ।

न्यायादनपेतं = न्याय्यम् । 'न्यायार्थादनपेते' (७।१।१३) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यस्य परगमनं न न्याय्यं = अन्याय्यम् । सि-अम् । एतत् प्रथमा सि ।

पक्षे - 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादि'० (३।४।१७) णिच्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु-कमः कर्तरि ङः' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे प्राक्'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) भ० → ब० । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि'० (४।४।२९) अट् ।

भक्ष् । 'चुरादि'० (३।४।१७) णिच्प्र० । परोक्षा णव् । 'धातोरनेकस्वरादाम्'० (३।४।४६) णव्० → आम्० । 'आमन्ताऽऽल्वाऽऽय्येत्नावय्' (४।३।८५) णिचोऽय् ।

भक्षयिता-श्वस्तनी ता । भक्षयिष्यति-भविष्यन्ती स्यति । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कथं नाम तत्रभवान् मांसमभक्षयिष्यत्, भक्षयेत्, भक्षयति, अबभक्षत्, अभक्षयत्, भक्षयाञ्चकार ?]** 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादि'० (३।४।१७) णिच्प्र० । क्रियातिपत्तिः स्यत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अड् धातोरादि'० (४।४।२९) अट् ।

भक्ष् । 'चुरादि'० (३।४।१७) णिच्प्र० । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्ये'० (१।२।६) ए० ।

भक्ष् । 'चुरादि'० (३।४।१७) णिच्प्र० । ह्यस्तनी दिव् → त् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[कथं नाम तत्रभवान् साधूनपूपुजत् ?]** 'पूजण् पूजने(पूजायाम्)' (१५८६) पूज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे प्राक्'० (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'ह्रस्वः' (४।१।३९) ह्रस्वतः । 'णेरनिटि' (४।३।८३) णिच्लोपः । 'अड् धातोरादि'० (४।४।२९) अट् ।

एवं यथाप्राप्ति वर्त्तमानादयोऽपि भवन्ति ॥छा।

## किंवृत्ते सप्तमी-भविष्यन्त्यौ ॥ ५।४।१४ ॥

**[किंवृत्ते]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तनं = वृत्तम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । किमो-विभक्त्यन्तस्य त(ड)तर-त(ड)तमान्तस्य वा वृत्तं = किंवृत्तम्, तस्मिन् ।

**[सप्तमीभविष्यन्त्यौ]** सप्तमी च भविष्यन्ती च = सप्तमीभविष्यन्त्यौ ।

**[किं तत्रभवाननृतं ब्रूयात् ? वक्ष्यति ?]** किम्शब्दः प्रश्ने । 'ॠंक् गतौ' (११३५) ॠ । 'ॠं प्रापणे च' (२६) ॠ । इयर्त्ति-ॠच्छति वा = ॠतम् । 'गत्यर्था-ऽकर्मक पिब-भुजेः' (५।१।११) क्तप्र० → त । न ॠतं = अनृतम् । 'अन् स्वरे' (३।२।१२९) अन् ।

'ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । सप्तमी यात् ।

ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । 'वचंक् भाषणे' (१०९६) वच् । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) ब्रू० → वच्'० । भविष्यन्ती स्यति । 'च-जः क-गम्' (२।१।८६) च → क० । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ।

**[को नाम, कतरो नाम, कतमो नाम यस्मै तत्रभवाननृतं ब्रूयात् ? अनृतं वक्ष्यति ?]** किम् । द्वयोर्मध्ये कः = कतरः । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । बहूनां मध्ये कः = कतमः । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । यस्मै-'तादर्थ्ये' (२।२।५४) चतुर्थी, यस्य निमित्तम् । शेषं स्पष्टम् ।

अत्रापि सप्तमी निमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः -

**[किं तत्रभवाननृतमवक्ष्यत् ? पक्षे - ब्रूयात् ?, वक्ष्यति ? च]** 'ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) ब्रू० → वच्० । क्रियातिपत्तिः स्यत् । 'च-जः क-गम्' (२।१।८६) च० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० । 'अड् धातोरादि'० (४।४।२९) अट् ॥छा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अश्रद्धा-ऽमर्षेऽन्यत्रापि ॥ ५।४।१५ ॥

**[ अश्रद्धाऽमर्षे ]** न श्रद्धा = अश्रद्धा, न मर्षः = अमर्षः, अश्रद्धा च अमर्षश्च = अश्रद्धाऽमर्षम्, तस्मात् (तस्मिन्) ।

**[ अन्यत्र ]** अन्यस्मिन् = अन्यत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अपि ]** अपि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

क्षेप इति निवृत्तम् । अश्रद्धा-असंभावना । अमर्षोऽक्षमा ।

अश्रद्धायाम् - **[ न श्रद्दधे, न संभावयामि, नावकल्पयामि, तत्रभवान् नामाऽदत्तं गृह्णीयात् ? ग्रहीष्यति ? ]** श्रत् प्रथमा सि । 'दीर्घङ्याब् व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'डुधांग्क् धारणे च' (११३९) धा । वर्त्तमाना ए । 'हवः शिति' (४।१।१२) "धा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वत् । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) धस्य दः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक् ।

'भूण् अवकल्कने' (१७२२) भू, सम्पूर्व० । 'चुरादि'० (३।४।१७) णिच्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । वर्त्त० मिव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'म-व्यस्याः' (४।२।११३) दीर्घः । यद्वा-संभवन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

अव 'कृपू(पौ)ङ् सामर्थ्ये' (९५९) कृप् । अवकल्पमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) लत्वम् । वर्त्त० मिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'म-व्यस्याः' (४।२।११३) दीर्घः ।

न दत्तं = अदत्तम् । 'ग्रहीश् उपादाने' (१५१७) ग्रह् । सप्तमी यात् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः (४।१।८४) य्वृत्-ग्र० → गृ० ।

ग्रह् । भविष्यन्ती स्यति । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

किंवृत्तेऽपि - [न श्रद्दधे, न संभावयामि, नावकल्पयामि, किं तत्रभवान् नामाऽदत्तमाददीत ? अदत्तमादास्यते ?] 'डुदांग्क् दाने' (११३८) दा, आङ्पूर्व० । सप्तमी ईत । 'हवः शिति' (४।१।१२) "दा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक् ।

आङ्-दा । भविष्यन्ती स्यते । 'दागोऽऽस्वाऽऽस्यप्रसारविकासे' (३।३।५३) इत्यनेनात्मनेपदम् ।

अमर्षे -**[ न मर्षयामि, न क्षमे, धिग् मिथ्या, नैतदस्ति, तत्रभवान् नामाऽदत्तं गृह्णीयात् ? अदत्तं ग्रहीष्यति ? ]** 'मृषिण् तितिक्षायाम्' (१९७६) मृष् । 'वर्त्त० मिव् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'लघोरुपान्त्यस्य (४।३।४) गु० अर् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'म-व्यस्याः' (४।२।११३) दीर्घः ।

एवं किंवृत्तेऽपि ।

अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति-

**[ तत्रभवानदत्तमग्रहीष्यत् ? पक्षे-गृह्णीयात्, ग्रहीष्यति च ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । क्रियातिपत्तिः' स्यत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'गृह्णोऽपरोक्षायां'० (४।४।३४) इटो दीर्घः । 'अड् धातोरादि'० (४।४।२९) अट् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यत्रापीति किम् ? यदाऽर्थात् प्रकरणाद् वाऽश्रद्धाऽमर्षयोर्गम्यमानत्वात् तद्वाचकेनाऽप्युपपदेन धातोर्न योगस्तदा मा भूत् ॥छ॥

## किङ्किला-ऽस्त्यर्थयोर्भविष्यन्ती ॥ ५।४।१६ ॥

**[ किङ्किलाऽस्त्यर्थयोः ]** अस्तेरर्थः = अस्त्यर्थः, किङ्किलश्च अस्त्यर्थश्च = किङ्किलाऽस्त्यर्थौ, तयोः = किङ्किला-ऽस्त्यर्थयोः । सप्तमी ओस् ।

**[ भविष्यन्ती ]** भविष्यन्ती प्रथमा सि ।

'अश्रद्धाऽमर्षे'० (५।४।१५) इत्यादिना प्राप्तायाः सप्तम्या अपवादः ।

**[ किङ्किल नाम तत्रभवान् परदारानुपकरिष्यते ]** किम् - प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । प्रश्नार्थे-किल-प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । किलशब्दः प्रसिद्धिद्योतने, वाक्यालंकारेऽमर्षद्योतने, कोमलामन्त्रणे । एवं किङ्किलशब्दोऽपि निपातनसमुदायो वा गृह्यते ।

परदारानुपकरिष्यते - 'गन्धना-ऽवक्षेप-सेवा-साहस-प्रतियत्न-प्रकथनोपयोगे' (३।३।७६) सूत्रेण साहसे आत्मनेपदम्।

अस्त्यर्था अस्ति-भवति-विद्यतयः ।

**[ न श्रद्दधे, न मर्षयामि, अस्ति नाम, भवति नाम, विद्यते नाम, तत्रभवान् परदारानुपकरिष्यते ]** 'परदारानुपकरिष्यते' पूर्ववत् साध्यः ।

अत्र सप्तमीनिमित्तं नास्तीति क्रियातिपतने क्रियातिपत्तिर्न भवति ॥छ॥

## जातु-यद्-यदा-यदौ सप्तमी ॥ ५।४।१७ ॥

**[ जातुयद्यदायदौ ]** जातुश्च यद् च यदा च यदि च = जातुयद्यदायदि, तस्मिन् ।

**[ सप्तमी ]** सप्तमी प्रथमा सि ।

भविष्यन्त्यपवादोऽयम् ।

**[ जातु-यद्-यदा-यदि तत्रभवान् सुरां पिबेत् ]** जातु-यद्-यदा-यदि । सर्वत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

'पां पाने' (२) पा । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा'० (४।२।१०८) पिबादेशः । 'यः सप्तम्याः' (४।२।१२२) या० → ई० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः-

**[ जातु तत्रभवान् सुरामपास्यत्, पक्षे-पिबेत् ]** 'पां पाने' (२) पा । क्रियातिपत्तिः स्यत् । 'अड् धातोरादि'० (४।४।२९) अट् ॥छ॥

## क्षेपे च यच्च-यत्रे ॥ ५।४।१८ ॥

**[ क्षेपे ]** क्षेप सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ यच्चयत्रे ]** यच्चश्च यत्रश्च = तत्, तस्मिन् ।

अश्रद्धामर्षयोर्भविष्यन्त्याः, क्षेपे तु सर्वविभक्तीनामपवादः ।

**[ धिग् गर्हामहे, यच्च तत्रभवानस्मानाक्रोशेत्, यत्र तत्रभवानस्मानाक्रोशेत् ]** यद् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । यच्च इति निपातसमुदायो वाऽप्यर्थे गृह्यते ।

**[ यच्च यत्र वा तत्रभवान् परिवादं कथयेत् ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'यः सप्तम्या' (४।२।१२२) या० → इ० । 'अवर्णस्ये'० (१।२।६) ए ।

अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः -

**[ यच्च-यत्र वा तत्रभवानस्मानाक्रोक्ष्यत्, पक्षे-आक्रोशेत् ]** आङ्पूर्व० 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । क्रियातिपत्तिः स्यत् । 'लघोरुपान्त्यस्य'(४।३।४) गु० ओ । 'यज-सृज-मृज-राज'० (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ।

पक्षे-आङ्पूर्व० क्रुश् । सप्तमी यात् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'लघोरुपान्त्यस्य'(४।३।४) गु० ओ । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येव'० (१।२।६) ए ।

भविष्यति तु नित्यम्-

**[ यच्च यत्र वा तत्रभवान् परिवादमकथयिष्यत् ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'चुरादि'० (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । क्रियातिपत्तिः स्यत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् ।।छा।

## चित्रे ।। ५।४।१९ ।।

**[ चित्रे ]** चित्र सप्तमी ङि ।

**चित्रमाश्चर्यं - विस्मय इति यावत् ।**

**[ चित्रमाश्चर्यमद्भुतं विस्मनीयं - यच्च तत्रभवानकल्प्यं सेवेत, यत्र तत्रभवानकल्प्यं सेवेत ]** चित्र प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । एवमग्रेऽपि । 'कृपू(पौ)ङ् सामर्थ्ये' (९५९) कृप् । न कृप्यते = अकल्प्यम् । 'शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र० । 'लघोरुपान्त्यस्य'(४।३।४) गु० अर् । 'ऋ-र लृ-लं कृपोऽकृपीटादिषु' (२।३।९९) र० → ल० । 'नञत्' (३।२।१२५) न० → अ० । अम् ।

'षेवृङ् सेवने' (८१८) षेव् । 'षः सोऽष्ट्यै-ष्ठिव'० (२।३।९८) सेव् । सप्तमी ईत । 'कर्त्तर्य'० (३।४।७१) शव् । 'अवर्णस्ये'० (१।२।६) ए ।

अग्रेतनेस्यापि क्रियातिपत्तिः -

**[ चित्रं यच्च यत्र वा तत्रभवानकल्प्यमसेविष्यत, पक्षे-सेवेत ]** सेव् । क्रियातिपत्तिः स्यत । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । अड् धातोरादि'० (४।४।२९) अट् । पक्षे-**सेवेत** पूर्ववत् ।।छा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शेषे भविष्यन्त्ययदौ ॥ ५।४।२० ॥

**[ शेषे ]** शेष सप्तमी ङि ।

**[ भविष्यन्ती ]** भविष्यन्ती प्रथमा सि ।

**[ अयदौ ]** न यदि = अयदिस्तस्मिन् ।

**[ चित्रमाश्चर्यमन्धो नाम पर्वतमारोक्ष्यति ]** 'रुहं जन्मनि' (९८८) रुह्, आङ्पूर्व० । भविष्यन्ती स्यति । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'ष-ढोः कस्सि' (२।१।६२) 'ढ० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ।

**[ बधिरो नाम व्याकरणं श्रोष्यति ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । भविष्यन्ती स्यति । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ ।

**[ मूको नाम धर्म कथयिष्यति ]** 'कथण् वाक्यप्रबन्धे' (१८८०) कथ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'अतः' (४।३।८२) अलुक् । भविष्यन्ती स्यति । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् ।

**[ आश्चर्यं यदि स भुञ्जीत ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । 'भुनजोऽत्राणे' (३।३।३७) आत्मनेपदम् । सप्तमी ईत । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'म्नां धुड्०' (१।३।३९) न० → ञ० ।

**[ चित्रं यदि सोऽधीयीत ]** 'इंङ्क् अध्ययने (११०४) इ, अधिपूर्व० । सप्तमी ईत । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् । 'समानानां'० (१।२।१) दीर्घत्वम् । केवल यदिशब्दयोगः । अत्राऽश्रद्धाप्यस्तीति 'जातु-यद्-यदा-यदौ' (५।४।१७) सप्तमी ॥छ॥

## सप्तम्युता-ऽप्योर्बाढे ॥ ५।४।२१ ॥

**[ सप्तमी ]** सप्तमी प्रथमा सि ।

**[ उताऽप्योः ]** उतश्च अपिश्च = उतापी, तयोः = उताऽप्योः । सप्तमी ओस् ।

**[ बाढे ]** बाढ सप्तमी ङि ।

**[ उत कुर्यात् ]** उत प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'डुकृंग् करणे' (८८८) कृ । सप्तमी यात् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अकारस्य उ० । 'कृगो यि च' (४।२।८८) उलुक् ।

**[ अपि कुर्यात् ]** अपि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'कुर्यात्' पूर्ववत् । बाढं करिष्यतीत्यर्थः ।

**[ उत दण्डः पतिष्यति ? ]** उत प्रथमा सि । दण्ड प्रथमा सि । 'पत्लृ गतौ' (९६२) पत् । भविष्यन्ती स्यति । 'स्ताद्यशितो'० (४।४।३२) इट् ।

**[ अपिधास्यति द्वारम् ]** अपिपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । भविष्यन्ती स्यति । द्वार द्वितीया अम् ।

प्रश्नः पिधानं च यथाक्रमं गम्यते । वोतात् प्रागिति निवृत्तम् ।

इतः प्रभृति सप्तमीनिमित्ते सति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ उताऽकरिष्यत् ]** उत प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'डुकृंग् करणे' (८८८) कृ । क्रियातिपत्तिः स्यत् । 'स्ताद्यशितो'० (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० अर् । 'अड् धातोरादि'० (४।४।२९) अट् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् ।

**[ अप्यकरिष्यत् ]** अपि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'अकरिष्यत्' पूर्ववत् ।।छा।

## संभावनेऽलमर्थे तदर्थानुक्तौ ॥ ५।४।२२ ॥

**[ संभावने ]** संभावन सप्तमी ङि ।

**[ अलमर्थे ]** अलमोऽर्थः = अलमर्थस्तस्मिन् ।

**[ तदर्थानुक्तौ ]** तस्य-अलमोऽर्थस्तदर्थः । वचनं = उक्तिः । न उक्तिरनुक्तिः । तदर्थस्य अनुक्तिः = तदर्थानुक्तिस्तस्याम् ।

शक्यसंभावने - **[ अपि मासमुपवसेत् ]** अपि संभावने । मास द्वितीया अम् । उपपूर्व० 'वसं निवासे' (९९९) वस् । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येव'० (१।२।६) ए । उपवासं कुर्यादित्यर्थः ।

**[ अपि पुण्डरीकाध्ययनमह्नाऽधीयीत ]** 'अपि' पूर्ववत् । पुण्डरीकाध्ययन द्वितीया अम् । 'अधीयीत' पूर्ववत् (५।४।२०) ।

**[ अपि स्कन्दकोद्देशं यामेनाधीयीत ]** 'अधीयीत' पूर्ववत् (५।४।२०) ।

अशक्यसंभावने - **[ अपि शिरसा पर्वतं भिन्द्यात् ]** अपि - शिरस् तृतीया टा । पर्वत द्वितीया अम् । 'भिदूंपी विदारणे' (१४७७) भिद् । सप्तमी यात् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अकारस्य लुक् ।

**[ अपि खारीपाकं भुञ्जीत ]** अपि । खारीपाक द्वितीया अम् । 'भुञ्जीत' पूर्ववत् (५।४।२०) ।

**[ अपि समुद्रं दोर्भ्यां तरेत् ]** दोस् तृतीया भ्याम् । 'सो रुः' (२।१।७२) स० → र० । 'तृ प्लवन-तरणयोः' (२७) तृ । सप्तमी यात् । कर्त्तर्य'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० अर् । 'यः सप्तम्याः (४।२।१२२) या० → इ० । 'अवर्णस्येव'० (१।२।६) ए ।

**[ निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यति ]** निदेशे तिष्ठतीत्येवंशीलः = निदेशस्थायी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'आत एः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । मे षष्ठी ङस् । प्रायेण प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप्-तृतीयान्तो वा ।

**[ शक्तश्चैत्रो धर्मं करिष्यति ]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्नोतीति शक्तः । 'ज्ञानेच्छाऽर्चाऽर्थ'० (५।२।९२) क्तप्र० → त ।

अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिर्भवति -

**[ अपि पर्वतं शिरसाऽभेत्स्यत् ]** 'भिदूंपी विदारणे' (१४७७) भिद् । क्रियातिपत्तिः स्यत् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । 'अड् धातोरादि'० (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[काकिन्या हेतोरपि मातुः स्तनं छिन्द्यात्]** 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । सप्तमी यात् । 'रुधां स्वराच्श्नो'० (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । अत्र 'क्षेपेऽपि-जात्वोर्वर्त्तमाना' (५।४।१२) इति वर्त्तमानां बाधित्वा परत्वादनेन सप्तम्येव भवति ।

**[चित्रमाश्चर्यमपि शिरसा पर्वतं भिन्द्यात्]** 'भिदृंपी विदारणे' (१४७७) भिद् । सप्तमी यात् । 'रुधां स्वराच्श्नो'० (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अकारस्य लुक् । अत्र तु 'शेषे भविष्यन्त्ययदौ' (५।४।२०) इति भविष्यन्तीं बाधित्वा परत्वादनेन सप्तम्येव भवति ॥छ॥

## अयदि श्रद्धाधातौ नवा ॥ ५।४।२३ ॥

**[अयदि]** न यद् = अयद्, तस्मिन् ।

**[श्रद्धाधातौ]** श्रद्धाया हे(धा)तुः = श्रद्धाहे(धा)तुस्तस्मिन् ।

**[नवा]** नवा प्रथमा सि ।

पूर्वेण नित्यं प्राप्ते विकल्पः ।

**[श्रद्दधे, संभावयामि, अवकल्पयामि, भुञ्जीत भवान्, पक्षे-भोक्ष्यते भवान्, अभुक्त भवान्, अभुङ्क्त भवान्]** श्रत् 'डुधांग्क् धारणे च' (११३९) धा । वर्त्तमाना ए । 'हवः शिति' (४।१।१२) "धा"द्विः । 'ह्रस्वः' (४।१।३९) ह्रस्वः । द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) धस्य दः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक् । 'भुञ्जीत' पूर्ववत् (५।४।२०) ।

भुज् । भविष्यन्ती स्यते । 'भुनजोऽत्राणे' (३।३।३७) इत्यनेनात्मनेपदम् ।

भुज् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'धुड्-ह्रस्वाल्लुगनिटस्तथोः' (४।३।७०) सिच्लुक । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'अड् धातोरादि'० (४।४।२९) अट् ।

भुज् । ह्यस्तनी त । 'रुधां स्वराच्श्नो'० (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० - क० । 'म्नां धुड्'० (१।३।३९) अनुस्वारः (न० → ङ०) । अड् धातोरादि'० (४।४।२९) अट् ।

**[संभावयामि यद् भुञ्जीत भवान्]** यद् 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अनतो लुप्' (१।४।५९) अम्लुप्।

अग्रेतने सापि क्रियातिपत्तिः-

**[संभावयामि नाभोक्ष्यत भवान्]** भुज् । क्रियातिपत्तिः स्यत । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ॥छ॥

## सतीच्छार्थात् ॥ ५।४।२४ ॥

**[सति]** सत् सप्तमी ङि ।

**[इच्छार्थात्]** इच्छा अर्थो यस्य सः = इच्छार्थः, तस्मिन्(तस्मात् ) । विध्यादि अभावार्थोऽयमारम्भः ।

**[इच्छेत्]** 'इषत् इच्छायाम्' (१४१९) इष् । सप्तमी यात् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'गमिषद्यमश्छः' (४।२।१०६) षस्य छ० । 'स्वरेभ्यः' (१।३।३०) छकारस्य द्विः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छस्य च । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इच्छति]** इष् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ० । 'गमिषद्य'० (४।२।१०६) ष० → छ० । 'स्वरेभ्यः' (१।३।३०) छकारस्य द्विः । 'अघोषे'० (१।३।५०) छ० → च० ।

**[उश्यात्]** 'वशक् कान्तौ' (११०१) वश् । सप्तमी यात् । 'वशेरयङि' (४।१।८३) वस्य उ० ।

**[वष्टि]** वश् । वर्त्त० तिव् । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-परिव्राजः शः षः' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां'० (१।३।६०) तस्य ट० ।

**[कामयेत]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः क० → का० । सप्तमी ईत । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अवर्णस्ये'० (१।२।६) ए ।

**[कामयते]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः क० → का० । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[वाञ्छेत्]** 'वाछु इच्छायाम्' (१२२) वाछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । सप्तमी यात् । 'कर्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्ये'० (१।२।६) ए ।

**[वाञ्छति]** 'वाछु इच्छायाम्' (१२२) वाछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । 'कर्त्तर्यन'० (३।४।७१) शव् ।

'क्षेपेऽपि-जात्वोर्वर्त्तमाना' (५।४।१२) इत्यादावपि परत्वादयमेव विकल्पः-

**[अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत् ? धिग् गर्हामहे]** 'इषत् इच्छायाम्' (१४१९) इष् । सप्तमी यात् । शेषं पूर्ववत् ।

**[अपि संयतः सन्नकल्प्यं सेवितुमिच्छति ? धिग् गर्हामहे]** 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्त० तिव् । शेषं पूर्ववत् ॥छ॥

## वत्स्यति हेतु-फले ॥ ५।४।२५ ॥

**[वत्स्यति]** वत्स्यतीति वत्स्यत्, तस्मिन् ।

**[हेतुफले]** हेतुश्च फलं च = हेतुफलम्, तस्मिन् ।

**[यदि गुरूनुपासीत शास्त्रान्तं गच्छेत्]** उपपूर्व० 'आसिक् उपवेशने' (१११९) आस् । सप्तमी ईत । अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । सप्तमी यात् । 'कर्त्तर्य'० (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) मस्य छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छस्य च० । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येवर्णादि'० (१।२।६) ए ।

**[यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति]** उपपूर्व० 'आसिक् उपवेशने (१११९) आस् । भविष्यन्ती स्यते । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । गम् । भविष्यन्ती स्यति । 'गमोऽनात्मने' (४।४।५१) इट् । अत्र गुरूपासनं हेतुः, शास्त्रान्तगमनं फलम् ।

**[दक्षिणेन चेद् याति न शकटं पर्याभवति]** दक्षिणेन प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । शकट प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । परि-आङ्पूर्व० भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[दक्षिणेन चेद् यायान्न शकटं पर्याभवेत्]** 'यांक् प्रापणे' (१०६२) या । सप्तमी यात् । चान्द्रादीनां व्याकरणानां मते इयं सप्तमी ।

**[दक्षिणेन चेदयासीन्न शकटं पर्याभूत्]** 'यांक् प्रापणे' (१०६२) या । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'अड् धातोरादि'० (४।४।२९) अट् । पर्याभूत् - परि-आङ्पूर्व० 'भू सत्तायाम्' (१) भू । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'पिबैति - दा - भू'० (४।३।६६) सिच्लुप् । 'अड् धातोरादि'० (४।४।२९) अट् ।

अग्रेतनेऽपि सा क्रियातिपत्तिः -

**[दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत्]** परि-आङ्पूर्व० 'भू सत्तायाम्' (१) भू । क्रियातिपत्तिः स्यत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।५) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् ।

**अमङ्क्ष्यद्** वसुधा तोये, च्युतशैलेन्द्रबन्धना ।

नारायण इव श्रीमान्, यदि त्वं **नाधरिष्यथाः** ॥

**[अमङ्क्ष्यत्]** 'टुमस्जोंत् शुद्धौ' (१३५२) मस्ज् । क्रियातिपत्तिः स्यत् । 'मस्जेः सः' (४।४।११०) सकारस्य न० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) अन्त्यः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'क-षयोगे क्ष० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[अधरिष्यथाः]** 'धृंग् धारणे' (८८७) धृ । क्रियातिपत्तिः स्यथास् । 'स्ताद्यशितो'० (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् ।

वर्त्स्यर्त्येवायं प्रयोगः । सप्तम्या हि हेतुफलभावस्येति शब्देनैव द्योतितत्वात् सप्तमी न भवति ॥छ॥

## कामोक्तावकच्चिति ॥ ५।४।२६ ॥

**[कामोक्तौ]** काम-इच्छा, तस्य उक्तिः - प्रवेदनं = कामोक्तिस्तस्याम् ।

**[अकच्चिति]** न कच्चित् = अकच्चित्, तस्मिन् ।

नवेति निवृत्तम् ।

**[कामो मे भुञ्जीत भवान्]** काम प्रवेदने, विभक्त्यन्तरप्रयोगादर्शनात् 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । सप्तमी ईत । शेषं पूर्ववत् (५।४।२०) ।

**[इच्छा मे, अभिप्रायो मे, श्रद्धा मे, अभिलाषो मे, अधीयीत भवान्]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । सप्तमी ईत । शेषं पूर्ववत् (५।४।२०) ।

**[कच्चिज्जीवति मे माता]** कच्चित् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'कच्चित् स्यात् प्रश्नकामयाः' ॥छ॥

## इच्छार्थे सप्तमी-पञ्चम्यौ ॥ ५।४।२७ ॥

**[इच्छार्थे]** इच्छा अर्थो यस्य सः = इच्छार्थस्तस्मिन् ।

**[सप्तमीपञ्चम्यौ]** सप्तमी च पञ्चमी च = सप्तमीपञ्चम्यौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[इच्छामि भुञ्जीत, भुङ्क्तां भवान्]** 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्तमाना तिव्(मिव्) । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'गमिषद्यमश्छः' (४।२।१०६) ष० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे'० (१।३।५०) छस्य च० । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । सप्तमी ईत । पञ्चमी ताम् । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) अन्त्यः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[कामये, प्रार्थये, अभिलषामि, वश्मि, अधीयीत भवान्, अधीतां भवान्]** 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः क० → का० । वर्त्त० ए । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

'अर्थणि उपयाचने' (१९३१) अर्थ, प्रपूर्व० । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'अतः' (४।३।८२) अलुक् । वर्त्त० ए । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

'लषी कान्तौ' (९२७) लष्, अभिपूर्व० । वर्त्त० मिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'म-व्यस्याः' (४।२।११३) दीर्घः ष० → षा० ।

'वशक् कान्तौ' (११०१) वश् । वर्त्त० मिव् ।

अधि 'इंङ्क् अध्ययने' (११०४) इ । सप्तमी ईत । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् । 'समानानां'० (१।२।१) दीर्घः ।

अधि 'इंङ्क् अध्ययने' (११०४) इ । पञ्चमी ताम् । 'समानानां'० (१।२।१) दीर्घः ।

**[इच्छया, इच्छतः, कामयमानः, कामयमानस्य भुङ्क्ते]** इच्छा तृतीया टा । 'टौस्येत्' (१।४।१९) आ० → ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

इच्छतीति इच्छन्, तस्य = इच्छतः । 'शत्रानशावे'० (५।२।२०) शतृप्र० → अत् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'गमिषद्यमश्छः' (४।२।१०६) ष० → छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे'० (१।३।५०) छ० → च० ।

कमूङ् कान्तौ (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः क० → का० । कामयते = कामयमानः, तस्य वा । 'शत्रानशावे'० (५।२।२०) आनश्प्र० → आन । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'अतो म आने' (४।४।११४) मोऽन्तः ।

नात्र प्रयोक्तुः कामोक्तिः ।।छा।

## विधि-निमन्त्रणा-ऽऽमन्त्रणा-ऽधीष्ट-संप्रश्न-प्रार्थने ।। ५।४।२८ ।।

**[विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थने]** विधिश्च निमन्त्रणं च आमन्त्रणं च अधीष्टं च संप्रश्नश्च प्रार्थनं च = विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थनम्, तस्मिन् ।

**विधिरप्राप्ते नियोगः, क्रियायां प्रेरणेति यावत् -**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[कटं कुर्यात्, करोतु भवान्]** 'डुकृंग् करणे' (८८८) कृ । सप्तमी यात् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो'० (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।८९) अकारस्य उ० । 'कृगो यि च' (४।२।८८) उलोपः ।

'डुकृंग् करणे' (८८८) कृ । पञ्चमी तुव् । कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो'० (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[प्राणिनो न हिंस्यात्, न हिनस्तु भवान्]** प्राणिन् द्वि०शस् । 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वराान्नोऽन्तः' (४।४।९८) हिंस् । सप्तमी यात् । हिन्स् । पञ्चमी तुव् । रुधां स्वरा'० (३।४।८२) श्नप्र० → न, अग्रेतनस्य लुक् च ।

**प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्,** इच्छामन्तरेणापि नियोगतः कर्तव्यमिति यावत् ।

**[द्विसंध्यमावश्यकं कुर्यात्, करोतु भवान्]** द्वे संध्ये यस्य तत् । 'क्लीबे' (२।४।९७) ह्रस्वः । अम् । 'आवश्यकं कुर्यात्, करोतु वा । अवश्यं भावः = आवश्यकम् । 'चोरादेः' (७।१।७३) अकञ्प्र० → अक । 'प्रायोऽव्ययस्य' (७।४।६५) अन्त्यस्वरादिलोपः - अम्लु० ।

**यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणम् ।**

**[इहासीत, आस्तां भवान्, यदि रोचते]** इह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'आसिक् उपवेशने' (१११९) आस् । सप्तमी ईत । पञ्चमी ताम् ।

**[इह शयीत, शेतां भवान्, यदि रोचते]** इह प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'शीङ्क् स्वप्ने' (११०५) शी । सप्तमी ईत । पञ्चमी ताम् । 'शीङ एः शिति' (४।३।१०४) शी → शे० । 'एदैतोऽयाय्' (१।२।२३) अय् । यदि रोचते ।

**प्रेरणैव सत्कारपूर्विकाऽधीष्टम् - अध्येषणम् ।**

**[तत्त्वज्ञानं नः प्रसीदेयुः, प्रसीदन्तु गुरुपादाः]** 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । सप्तमी युस् । पञ्चमी अन्तु । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'याम्-युसोरियमियुसौ' (४।२।१२३) युस्० → "इयुस्" आदेशः । 'श्रौति-कृवु-धिवु-पा'० (४।२।१०८) "सीद"आदेशः । 'अवर्णस्येव'० (१।२।६) ए । तत्त्वज्ञानं-कर्मतापन्नं, नोऽस्मभ्यम्, प्रसादपूर्वकं दद्युः - प्रसीदेयुः, गुरुपादाः ।

**[व्रतं रक्षेत्, रक्षतु भवान्]** 'रक्ष पालने' (५६७) रक्ष् । सप्तमी यात् । पञ्चमी तुव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येव'० (१।२।६) ए । व्रत द्वितीया अम् ।

**संप्रश्नः-संप्रधारणा ।**

**[किन्नु खलु भो ! व्याकरणमधीयीय, अध्ययै, उत सिद्धान्तमधीयीय, अध्ययै]** किम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । प्रश्न इत्यर्थः । एवं-नु वितर्के । एवं-खलु निश्चये । एवं-भोस् आमन्त्रणे । 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । सप्तमी ईय । पञ्चमी ऐव् । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) इय् । 'समानानां'० (१।२।१) दीर्घः । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । उत प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'अधीयीय'- 'अध्ययै' पूर्ववत् ।

**प्रार्थनं-याच्ञा ।**

**[प्रार्थना मे व्याकरणमधीयीय, अध्ययै]** व्याकरण द्वितीया अम् । 'अधीयीय'-'अध्ययै' पूर्ववत् ॥छ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ ॥ ५।४।२९ ॥

**[प्रैषाऽनुज्ञाऽवसरे]** प्रैषा च (प्रैषश्च) अनुज्ञा च अवसरश्च = प्रैषाऽनुज्ञाऽवसरम्, तस्मिन् ।

**[कृत्यपञ्चम्यौ]** कृत्यश्च पञ्चमी च = कृत्यपञ्चम्यौ ।

**न्यत्कारपूर्विका प्रेरणा = प्रैषः ।** प्रेषणं = प्रैषः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'प्रस्थैषैष्योढोढ्यूहे स्वरेण' (१।२।१४) इत्यादिना अकार-एकारयोः ऐ ।

**अनुज्ञा = कामचारानुमतिः, अतिसर्ग इति यावत् ।** अनुज्ञानं = अनुज्ञा । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**अवसरः = प्राप्तकालता निमित्तभूतकालोपनतिः ।** अवपूर्व० 'सृं गतौ'(२५) सृ । अवसरन्त्यस्मिन्निति अवसरः । 'पुं-नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

**[भवता खलु कटः कार्यः, कर्तव्यः, करणीयः, कृत्यः]** भवत् तृतीया टा । खलु प्रथमा सि । कट प्रथमा सि । 'डुकृंग् करणे' (८८८) कृ । क्रियत इति कार्यः - कर्तव्यः - करणीयः । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'तव्या-ऽनीयौ' (५।१।२७) तव्य-अनीयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । एवम् - कृत्यन्ते(क्रियन्ते) = कृत्याः । क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[भवान् कटं करोतु, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे]** भवान् कटं करोतु । 'डुकृंग् करणे' (८८८) कृ । पञ्चमी तुव् । हि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । यस्मात्कारणादित्यर्थः । प्रेष्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'सह-लुभेच्छ-रुष-रिषस्तादेः' (४।४।४६) इट् । अनुज्ञायतेऽनुज्ञातः ।

यद्यपि कृत्याः सामान्येन भाव-कर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते ॥ छ ॥

## सप्तमी चोर्ध्वमौहूर्त्तिके ॥ ५।४।३० ॥

**[सप्तमी]** सप्तमी प्रथमा सि ।

**[च]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ऊर्ध्वमौहूर्त्तिके]** 卐 ऊर्ध्वं मुहूर्त्ताद् भवः = ऊर्ध्वमौहूर्त्तिकः । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अत एव निर्देशात् उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'नाम नाम्नैकार्थ्ये समासो बहुलम्' (३।१।१८) इत्यादिना समासः । सप्तमी ङि ।

**[ऊर्ध्वं मुहूर्त्तात् कटं कुर्याद् भवान्, कार्यः, कर्तव्यः, करणीयः, कृत्यः कटो भवता, कटं करोतु भवान्, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे]** ऊर्ध्व 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अतः स्यमोऽम्' (१।४।५७) अम् । प्रेष्यते स्म = प्रेषितः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'सह-लुभेच्छ-रुष-रिषस्तादेः' (४।४।४६) इट् ॥छ॥

---

卐 मध्यमवृत्तौ - मुहूर्त्ताद् ऊर्ध्वं = ऊर्ध्वमुहूर्त्तम्, ऊर्ध्वमुहूर्त्ताद् भवः = ऊर्ध्वमौहूर्त्तिकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## स्मे पञ्चमी ॥ ५।४।३१ ॥

**[ स्मे ]** स्म सप्तमी ङि ।

**[ पञ्चमी ]** पञ्चमी प्रथमा सि ।

कृत्यानां 'सप्तमी चोर्ध्वमौहूर्त्तिके' (५।४।३०) इत्यादिना प्राप्तायाः सप्तम्याश्चापवादः ॥छ॥

## अधीष्टौ ॥ ५।४।३२ ॥

**[ अधीष्टौ ]** अध्येषणं = अधीष्टिः, तस्याम् ।

ऊर्ध्वमौहूर्त्तिक इति निवृत्तम्, पृथग्योगात् । 'विधि-निमन्त्रणा'० (५।४।२८) इत्यादिना प्राप्तायाः सप्तम्या अपवादः ।

**[ अङ्ग ! स्म विद्वन् ! अणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्व ]** अङ्ग इति प्रकाशे - कोमलामन्त्रणे च(वा) । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वन् ! 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस्, तस्यामन्त्रणं हे विद्वन् ! । आमन्त्र्ये सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

अणूनि व्रतानि = अणुव्रतानि । द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

'रक्ष पालने' (५६७) रक्ष् । पञ्चमी हि । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलुक् । शिक्षा द्वितीया शस् ।

प्रति 'पदिच् गतौ' (१२५७) पद् । पञ्चमी स्व । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य ॥छ॥

## काल-वेला-समये तुम् वाऽवसरे ॥ ५।४।३३ ॥

**[ कालवेलासमये ]** कालश्च वेला च समयश्च = कालवेलासमयम्, तस्मिन् ।

**[ तुम् ]** तुम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ वा ]** वा प्रथमा सि ।

**[ अवसरे ]** अवसर सप्तमी ङि । अवसरन्त्यस्मिन्नित्यवसरः । 'पुंनाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् ।

'प्रैषा-ऽनुज्ञा'० (५।४।२९) इत्यादिना प्राप्तेऽयं विकल्प इति ।

**[ कालो भोक्तुम्, वेला भोक्तुम्, समयो भोक्तुम् ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुज्यतां-भोक्तव्यस्य च यद्वा भोजनस्य = भोक्तुम् । अनेन, तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । षष्ठ्येकवचनं ङस् । 'अव्ययस्य' (३।२।७) ङस्लुप् । कालो वेला समयो वा ।

वावचनाद् यथाप्राप्तं च -

**[ कालो भोक्तव्यस्य ]** भुज्यते = भोक्तव्यस्तस्य । तव्यप्र० । षष्ठ्येकवचनं ङस् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वं मुहूर्त्तात् कालो भोक्तुमित्यादिप्रयोगत्रये ननु तुम् विकल्पेन भवति तत् कथं तुमेवेत्युक्तम् ? उच्यते - विकल्पेन तुमेव भवति नाऽनडादयः । 'सप्तमी चोर्ध्व'० (५।३।१२) इति, 'स्मे पञ्चमी' (५।४।३१) 'अधीष्टौ' (५।४।३२) इति च यथाक्रमं प्रवर्त्तत एव । भोक्तुमित्यस्य वाक्यं पूर्ववत् ॥छ॥

## सप्तमी यदि ॥ ५।४।३४ ॥

**[ सप्तमी ]** सप्तमी प्रथमा सि ।

**[ यदि ]** यदि प्रथमा सि । (यद् सप्तमी ङि) ।

तुमोऽपवादः ।

**[ कालो यदधीयीत भवान् ]** काल प्रथमा सि । 'अधीयीत' पूर्ववत् (५।४।२०) ।

**[ वेला यद् भुञ्जीत भवान् ]** 'भुञ्जीत' पूर्ववत् (५।४।२०) ।

**[ समयो यच्छयीत भवान् ]** 'शीङ्क् स्वप्ने' (११०५) शी । सप्तमी ईत । 'शीङ एः शिति' (४।३।१०४) शी० → शे० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

बहुलाधिकारात् - **[ कालो यदध्ययनस्य ]** काल प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अधीयते = अध्ययनम्, तस्य । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वेला यद् भोजनस्य ]** भुज्यते = भोजनम्, तस्य । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ समयो यच्छयनस्य ]** शय्यते = शयनम्, तस्य । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## शक्तार्हे कृत्याश्च ॥ ५।४।३५ ॥

**[ शक्तार्हे ]** शक्तश्च अर्हश्च = शक्तार्हम्, तस्मिन् ।

**[ कृत्याः ]** कृत्य प्रथमा जस् ।

**[ च ]** च प्रथमा सि ।

**[ भवता खलु भारो वाह्यः, वोढव्यः, वहनीयः, उह्येत ]** भवत् तृतीया टा । खलु प्रथमा सि । भार प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'वहीं प्रापणे' (९९६) वह् । वोढुं शक्यः = वाह्यः, वोढव्यः, वहनीयः । अनेन घ्यण्प्र० → य - तव्य - अनीयप्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'हो धुट्-पदान्ते' (२।१।८२) हस्य ढः । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) धस्य ढः । 'सहि-वहेरोच्चाऽवर्णस्य' (१।३।४३) ढलुक् - पूर्वाकारस्य ओ । वह् । सप्तमी ईत । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० । 'अवर्णस्येव'० (१।२।६) ए ।

**[ भवान् भारं वहेत् ]** 'वहीं प्रापणे' (९९६) वह् । सप्तमी यात् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्येव'० (१।२।६) ए ।

**[ भवान् हि शक्तः ]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्नोतीति शक्तः । 'ज्ञानेच्छाऽर्चाऽर्थे'० (५।२।९२) क्तप्र० → त ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हे- **[ भवता खलु कन्या वाह्या, वोढव्या, वहनीया ]** भवता कन्या वोढुं शक्या(क्ता) = वाह्या, वोढव्या, वहनीया । अनेन घ्यणादयः प्रत्ययाः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ भवता खलु छेदसूत्रं वाह्यम्, वोढव्यम्, वहनीयम् ]** वोढुमर्हं = वाह्यम्, वोढव्यम्, वहनीयम् । अनेन घ्यणादयः, प्रत्ययाः । सि-अम् ।

सप्तम्या बाधो मा भूदिति कृत्यग्रहणम् । बहुवचनमिहोत्तरत्र च यथासंख्यनिवृत्त्यर्थम् ॥छा।

## णिन् चाऽऽवश्यकाऽऽधमर्ण्ये ॥ ५।४।३६ ॥

**[ णिन् ]** णिन् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ आवश्यकाऽऽधमर्ण्ये ]** ऋणेऽधमोऽधमर्णः । 'राजदन्ताऽऽदिषु' (३।१।१४९) इति पूर्वनिपातः । अधमर्ण्यस्य भावः = आधमर्ण्यम् । 'पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आवश्यकं च आधमर्ण्यं च = आवश्यकाऽऽधमर्ण्यम्, तस्मिन् ।

**[ कारी ]** अवश्यं करोतीति कारी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ हारी ]** अवश्यं हरतीति हारी । अनेन णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'इन्-हन्'० (१।४।८७) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

यदा त्ववश्यमोऽपि प्रयोग उभाभ्यामपि द्योतनात् तदा मयूरव्यंसकादित्वात् समासः -

**[ अवश्यंकारी ]** अवश्यं करोति = अवश्यंकारी । अनेन णिन्प्र० → इन् । शेषं पूर्ववत् ।

**[ अवश्यंहारी ]** अवश्यं हरति = अवश्यंहारी । अनेन णिन्प्र० → इन् । शेषं पूर्ववत् ।

अवश्यशब्दप्रयोगे तु अवश्यं करोति **अवश्यकारी** अकारान्तोऽपि ह्यनव्ययमवश्यशब्दोऽस्ति ।

**[ अवश्यं गेयो गाथको गीतस्य ]** अवश्यम् कैं (३६) - 'गैं शब्दे' (३७) गै । 'आत् सन्ध्यक्षरस्य' (४।२।१) गा । अवश्यं गायतीति अवश्यं गेयः । 'य एच्चातः' (५।१।२८) यप्र०-आकारस्य एच्च ।

**[ अवश्यं भव्यश्चैत्रः ]** अवश्यं भूयते = अवश्यं भव्यः । 'भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा' (५।१।७) भव्यनिपातः ।

आधमर्ण्ये - **[ शतं दायी ]** शत द्वितीया अम् । दास्यतीति दायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ सहस्रं दायी ]** सहस्र द्वितीया अम् । दास्यतीति दायी । अनेन णिन्प्र० → इन् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ कारी मे कटमसि ]** करिष्यति-करोतीति वा = कारी । अनेन णिन्प्र० → इन् । मे कटम् ।

**[ हारी मे भारमसि ]** हरिष्यति-हरति वा = हारी । अनेन णिन्प्र० → इन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ गेयो गाथानाम् ]** गायतीति गेयः । 'य एच्चातः' (५।१।२८) यप्र० - आ० → ए०, गाथानाम् ।

णिना बाधो मा भूदिति कृत्यविधानम् । कृत्त्वाच्च कर्तरि णिनो विधानात् कृत्यानामपि कर्त्तर्येव विधानम्, भाव - कर्मणोस्तु सामान्येन विधानात् सिद्धा एव बाधकाभावात् ॥छ॥

## अर्हे तृच् ॥ ५।४।३७ ॥

**[ अर्हे ]** अर्ह सप्तमी ङि ।

**[ तृच् ]** प्रथमा सि ।

**[ भवान् कन्याया वोढा ]** 'वहीं प्रापणे' (९९६) वह् । वोढुमर्हति = वोढा । अनेन तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य धः । 'तवर्गस्य०' (१।३।६०) धस्य ढः । 'सहि-वहेरोच्चाऽवर्णस्य' (१।३।४३) ढलुक्-अवर्णस्य ओच्च ।

**[ भवान् खलु छेदसूत्रस्य वोढा ]** 'वहीं प्रापणे' (९९६) वह् । वोढुमर्हति = वोढा । शेषं पूर्ववत् ।

सप्तम्या बाधा मा भूदित्यर्हे तृज्विधानम् ॥छ॥

## आशिष्याशीः-पञ्चम्यौ ॥ ५।४।३८ ॥

**[ आशिषि ]** आशिष् सप्तमी ङि ।

**[ आशीःपञ्चम्यौ ]** आशीश्च पञ्चमी च = आशीःपञ्चम्यौ ।

**[ जीयात् ]** 'जि अभिभवे' (८) जि । आशीः क्यात् → यात् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

**[ जीयास्ताम् ]** जि । आशीः क्यास्ताम् → यास्ताम् । 'दीर्घश्च्वि'० (४।३।१०८) दीर्घः ।

**[ जीयासुः ]** जि । आशीः क्यासुस् → यासुस् । 'दीर्घश्च्वि'० (४।३।१०८) दीर्घः ।

**[ जयतात् ]** जि । पञ्चमी तुव् । 'आशिषि तु-ह्योस्तातङ्' (४।२।११९) तु → तातङ् → तात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ जयताम् ]** जि । पञ्चमी ताम् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ जयन्तु ]** जि । पञ्चमी अन्तु । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ चिरं जीवति मैत्रः ]** चिरम् अव्ययम् । 'जीव प्राणधारणे' (४६५) जीव् । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । मैत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । चिरशब्दोऽकारान्तो वा 'काला-ऽध्वनोर्व्याप्तौ' (२।२।४२) इत्यादिना कर्म ।

परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कश्चिदाह - **[ समुद्रः शोषयितुमशक्यः ]** 'शुषंच् शोषणे' (१२०८) शुष् । शुष्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । शोषणाय = शोषयितुम् । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

स आह -[समुद्रमपि शोषयाणि] शोषि ण्यन्तो मण्ड्यते । मतान्तरे पञ्चमी आनिव्प्र० → आनि । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् ।

**[ पर्वतमप्युत्पाटयानि ]** 'पट गतौ' (१९५) पट्, उत्पूर्व० । उत्पटन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । मतान्तरे पञ्चमी आनिव्प्र० → आनि । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## माङ्यद्यतनी ॥ ५।४।३९ ॥

**[ माङि ]** माङ् सप्तमी ङि ।

**[ अद्यतनी ]** अद्यतनी प्रथमा सि ।

**[ मा कार्षीदधर्मम् ]** मा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'डुकृंग् करणे' (८८८) कृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै०' (४।३।४४) वृद्धिः आर् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । अधर्मम् ।

**[ मा हार्षीत् परस्वम् ]** मा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'हृंग हरणे' (८८५) हृ । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचि परस्मै समान'० (४।३।४४) वृ० आर् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'अड् धातोरादि'० (४।४।२९) अट् । परस्वम् ॥छ॥

## सस्मे ह्यस्तनी च ॥ ५।४।४० ॥

**[ सस्मे ]** सह स्मेन वर्त्तते, तेन(तस्मिन्) । 'सहस्य सोऽन्यार्थे (३।२।१४३) सहस्य सभावः ।

**[ ह्यस्तनी ]** ह्यस्तनी प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ मा स्म करोत् ]** मा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'डुकृंग् करणे' (८८८) कृ । ह्यस्तनी दिव् → त् । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो'० (४।३।१) गु० अर् । 'उ-श्नोः' (४।३।२) गु० ओ ।

**[ मा स्म कार्षीत् ]** मा स्म प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'कार्षीत्' पूर्ववत् (५।४।३९) ।

**[ मा चैत्र ! स्म हरः परद्रव्यम् ]** 'हृंग् हरणे' (८८५) हृ । ह्यस्तनी सिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० अर् ॥छ॥

## धातोः संबन्धे प्रत्ययाः ॥ ५।४।४१ ॥

**[ धातोः ]** धातु षष्ठी ङस् ।

**[ संबन्धे ]** संबन्धनं = संबन्धस्तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ प्रत्ययाः ]** प्रत्यय प्रथमा जस् ।

धातुशब्देन धात्वर्थ उच्यते ।

**[ विश्वदृश्वाऽस्य पुत्रो भविता ]** विश्व 'दृशृं प्रेक्षणे' (४९५) दृश् । विश्वं दृष्टवान् । 'दृशः क्वनिप्' (५।१।१६६) क्वनिप्प्र० → वन् । प्रथमा सि । 'नि दीर्घः' (१।४।८४) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

'भू सत्तायाम्' (१) भू । श्वस्तनी ता । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ भावि कृत्यमासीत् ]** भू । भविष्यतीत्येवंशीलं = भावि । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । करिष्यतीति कृत्यम् । 'कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा । (५।१।४२) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । सि-अम् ।

'असक् भवे (भुवि)' (११०२) अस् । 'ह्यस्तनी दिव् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'एत्यस्तेर्वृद्धिः' (४।४।३०) वृ० आ ।

विश्वदृश्वेति भूतकालः प्रत्ययो भवितेति भविष्यत्कालेन प्रत्ययेन संबध्यमानः साधुर्भवति ।

बहुवचनादधात्वधिकारविहिता अपि प्रत्ययास्तद्धिता धातुसंबन्धे सति कालभेदे साधवो भवन्ति -

**[ गोमानासीत् ]** गो । गोरस्यास्ति = गोमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् । 'आसीत्' पूर्ववत् साध्यः ।

**[ गोमान् भविता ]** गो । गौरस्यास्ति = गोमान् । शेषं पूर्ववत् । 'भविता' पूर्ववत् साध्या ।

अस्तिविवक्षायां हि मतुरुक्तः, स कालान्तरे न स्यादिति ॥छ॥

## भृशा-ऽऽभीक्ष्ण्ये हि-स्वौ यथाविधि, त-ध्वमौ च तद्युष्मदि ॥ ५।४।४२ ॥

**[ भृशाऽऽभीक्ष्ण्ये ]** भृशश्च आभीक्ष्ण्यश्च = भृशाऽऽभीक्ष्ण्यम्, तस्मिन् ।

**[ हिस्वौ ]** हिश्च स्वश्च = हिस्वौ ।

**[ यथाविधि ]** विधिरनतिक्रमेण = यथाविधि । प्रथमा सि । 'अनतो लुप्' (३।२।६) सिलुप् ।

**[ तध्वमौ ]** तश्च ध्वम् च = तध्वमौ ।

**[ च ]** च प्रथमा सि ।

**[ तद्युष्मदि ]** तश्च ध्वम् च = तध्वमौ, तयोः = तध्वमोः, तध्वमोः संबन्धी बहुत्वविशिष्टो युष्मद् = तद्युष्मद्, तस्मिन् ।

गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्यं फलातिरेको वा **भृशत्वम्** । प्रधानक्रियाया विक्लेदादेः क्रियान्तरैरव्यवहितायाः पौनःपुण्य(न्य)**माभीक्ष्ण्यम्** ।

यथाविधि धातोः संबन्धे - यत एव धातोर्यस्मिन्नेव कारके हि-स्वौ विधीयेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव संबन्धेऽनुप्रयोगरूपे सति, तथा त-ध्वमौ हि-स्वसाहचर्यात् पञ्चम्या एव संबन्धिनौ, तयोः त-ध्वमौ(मोः) संबन्धी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुत्वविशिष्टो युष्मत्, तस्मिंस्तद्युष्मदि अभि(भी)ष्टस्यैव संबंधेऽनुप्रयोगरूपे सति धेयं (अभिधेये) भवतः, चकारात् हि-स्वौ च यथाविधि धातोः संबन्धे ।

**[लुनीहि लुनीहीत्येवायं लुनाति]** 'लूग्श् छेदने' (१५१९) लू । पं० हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'भृशा-ऽऽभीक्ष्ण्याऽविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) "लुनीहि" द्विर्वचनम् । इत्येव इति कोऽर्थः ? इत्यस्यैव उदाहरणस्याऽनुप्रयोगोऽर्थदर्शनार्थं दृश्यत इत्यर्थः, तथा च दृश्यन्ते(ते)ऽयं लुनाति अयं देवदत्तो भृशं लुनातीत्यर्थः, अग्रेतनेष्वपि एवं बहुप्रकाराणि ज्ञातव्यानीत्यर्थः ।

अनुप्रयोगात् कालवचनभेदोऽभिव्यज्यन्ते(ते) । इतिशब्दं संबंधापादानार्थोऽन्यथा - भूतवाचिनोराख्यातयो(:) परस्परेण संबंधो ता(ना)वगम्यते । अष्टसु उदाहरणेषु वर्त्तमानाया अष्टौ वचनानि ज्ञातव्यानि ।

**[लुनीहि लुनीहीत्येवायमलावीत्]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । अद्यतनी दि → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् → ई । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'इट ईति' (४।३।७१) सिच्लुक् । 'समानाना'० (१।२।१) दीर्घः । 'सिचि परस्मै समानस्याऽङिति' (४।३।४४) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । पूर्वं वृद्धिः ततो लुप्(क्) । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[लुनीहि लुनीहीत्येवायमलुनात्]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । ह्यस्तनी दिव् → त् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्व' (४।२।१०५) ह्रस्वः । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[लुनीहि लुनीहीत्येवायं लुलाव]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । परोक्षा णव् → अ । 'द्विर्धातुः परोक्षा-ङे प्राक्'० (४।१।१) द्विः । 'ह्रस्वः' (४।१।३९), ह्रस्वः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[लुनीहि लुनीहीत्येवायं लविष्यति]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । भविष्यन्ती स्यति । 'स्ताद्यशि'० (४।४।३२) इट् । गुणे सति अव् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् ।

**[लुनीहि लुनीहीत्येवायं लविता]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । श्वस्तनी ता। 'स्ताद्यशि'० (४।४।३२) इट् । गुणे सति अव् ।

**[लुनीहि लुनीहीत्येवायं लुनीयात्]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । सप्तमी यात् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आ० → ई० । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[लुनीहि लुनीहीत्येवायं लुनातु]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । पञ्चमी तुव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

**[लुनीहि लुनीहीत्येवायं लूयात्]** 'लुनीहि लुनीहीति' पूर्ववत् ज्ञेया । 'लूग्श् छेदने' (१५१९) लू । आशीः क्यात् → यात् ।

**[अधीष्वाऽधीष्वेत्येवायमधीते]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । पञ्चमी स्व । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विः । अधि 'इंङ्क् अध्ययने' (११०४) इ । वर्त्त० ते । 'समानानां'० (१।२।१) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ इमावधीयाते ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । वर्त्त० आते । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् । 'समानानां तेन'० (१।२।१) दीर्घः ।

**[ इमेऽधीयते ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । वर्त्त० अन्ते । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इय् । 'समानानां तेन'० (१।२।१) दीर्घः । 'अनतोऽन्तोऽदात्मने' (४।२।११४) अन्ते० → अते० ।

एवमग्रेतनेषु षड्सु वचनेषु ज्ञेयो विधिः ।

**[ अधीष्वाऽधीष्वेत्येवायमध्यगीष्ट ]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'वाऽद्यतनी-क्रियातिपत्त्योर्गीङ्' (४।४।२८) "गीङ्" आदेशः → गी । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग' (१।३।६०) त० → ट० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ अधीष्वाऽधीष्वेत्येवायमध्यैत ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । ह्यस्तनी त । 'एत्यस्तेर्वृद्धिः' (४।४।३०) वृ० ऐ । (स्वरा'० (४।४।३१) वृद्धिः) ।

**[ अधीष्वाऽधीष्वेत्येवायमधिजगे ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । परोक्षा ए । 'गा परोक्षायाम्' (४।४।२६) इ० → "गा"आदेशः । 'द्विर्धातुः परोक्षा-ङे प्राक्'० (४।१।१) "गा"द्विः । 'ह्रस्वः" (४।१।३९) ह्रस्वः । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'इडेत् पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् ।

**[ अधीष्वाऽधीष्वेत्येवायमध्येष्यते ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । भविष्यन्ती स्यते । 'नामिनो'० (४।३।१) गु० ए ।

**[ अधीष्वाऽधीष्वेत्येवायमध्येता ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । श्वस्तनी ता । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए ।

**[ अधीष्वाऽधीष्वेत्येवायमधीयीत ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । सप्तमी ईत । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) इ० → इय्० । 'समानाना'० (१।२।१) दीर्घः ।

**[ अधीष्वाऽधीष्वेत्येवायमधीताम् ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । पञ्चमी ताम् । 'समानानां'० (१।२।१) दीर्घः ।

**[ अधीष्वाऽधीष्वेत्येवायमध्येषीष्ट ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । आशीः सीष्ट । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'नामिनो'० (४।३।१) गु० ए, ततः षत्वम् ।

एवं सर्वविभक्तिवचनान्तरेष्वपि हि-स्वावुदाहरणीयौ ।

एवं भाव-कर्मणोरपि-

**[ शय्यस्व शय्यस्वेत्येव शय्यते, अशायि, शायिष्यते भवता ]** 'शीङ्क् स्वप्ने' (११०५) शी । पञ्चमी स्व । क्यप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) "शय्"आदेशः । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) "शय्यस्व" द्विः ।

शी । वर्त्त० ते । क्यप्र० → य । 'क्ङिति यि शय्' (४।३।१०५) "शय्"आदेशः ।

शी । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ - तलोपश्च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । 'अड् धातोरादि'० (४।४।२९) अट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शी । भविष्यन्ती स्यते । 'स्वर-ग्रह-दृश-हन्भ्यः स्य-सिजाशीः-श्वस्तन्यां ञिट् वा' (३।४।६९) ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ लूयस्व लूयस्वेत्येव लूयते, अलावि, लाविष्यते केदारः ]** 'लूगृश् छेदने' (१५१९) लू । पञ्चमी स्व । क्यप्र० → य । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) "लूयस्व" द्विः ।

इति - एव प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । लू । वर्त्त० ते । क्यप्र० → य ।

लू । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच् → इ - तलोपश्च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अड् धातोरादि'० (४।४।२९) अट् ।

लू । भविष्यन्ती स्यते । 'स्वर-ग्रह'० (३।४।६९) इ । गुणे सति अव् । (ञिट् → इ० । वृद्धौ सति आव्) ।

तश्च ध्वम् च = तध्वमौ, तयोः = तध्वमोः, तध्वमोः संबन्धी युष्मद् = तद्युष्मद्, तस्मिन् = तद्युष्मदि ।

**[ लुनीत लुनीतेत्येव, यूयं लुनीथ ]** 'लूगृश् छेदने' (१५१९) लू । पञ्चमी त । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आकारस्य ई । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । 'भृशाऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विः ।

लुनीथ । लू । वर्त्त० थव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) आकारस्य ई । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः ।

एवं हि-स्वविषये ।

**[ अधीध्वमधीध्वामित्येव यूयमधीध्वे ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । पञ्चमी ध्वम् । 'समानानां'० (१।२।१) दीर्घः । 'भृशाऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विः ।

अधीध्वे । अधि 'इंङ्क् अध्ययने' (११०४) इ । वर्त्त० ध्वे । 'समानानां तेन'० (१।२।१) दीर्घः ।

**[ लुनीत लुनीतेत्येव यूयमलाविष्ट ]** 'लूगृश् छेदने' (१५१९) लू । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'स्वर-ग्रह'० (३।४।६९) ञिट् → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० । 'अड् धातोरादि'० (४।४।२९) अट् ।

**[ लुनीहि लुनीहीत्येव यूयमलाविष्ट ]** 'लूगृश् छेदने' (१५१९) लू । अद्यतनी त । (४।४।२९) शेषं पूर्ववत् ।

**[ अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम्, अधीष्वाऽधीष्वेत्येव यूयमध्यगीढ्वम् ]** अधि 'इंङ्क् अध्ययने' (११०४) इ । अद्यतनी ध्वम् । सिच् । 'स्वरा'० (४।४।३१) वृ० ऐ । 'वाऽद्यतनी-क्रियातिपत्त्योर्गीङ्' (४।४।२८) द्वितीये इ० → गीङ्० → गी० । 'सो धि वा' (४।३।७२) उभयत्र सिच्लुक् । एवम् - ह्यस्तन्यादिष्वप्युदाहार्यम् ।

ननु च भृशाभीक्ष्ण्ययोर्यङपि विधीयते न तु तत्र द्विर्वचनम्, भृशाभीक्ष्ण्यनिरपेक्षं 'सन्-यङश्च' (४।१।३) इत्यनेन द्विर्वचनमिह तु द्विर्वचनमित्यत्र को हेतुः ? उच्यते - यङ् स्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये समर्थोऽवद्योतयितुमिति तदभिव्यक्ते द्विर्वचनं नापेक्ष्यते इति ॥छ॥

## प्रचये नवा सामान्यार्थस्य ॥ ५।४।४३ ॥

**[ प्रचये ]** प्रचयनं = प्रचयस्तस्मिन् ।

**[ नवा ]** नवा प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सामान्यार्थस्य]** समान एव = सामान्यः । स्वार्थट्यणन्तो वाचस्पतिना निर्णीतः सामान्योऽर्थो यस्य, यद्वा सा(स)मानस्य भावः । 'पति-राजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सामान्यं अर्थो यस्य सः = सामान्यार्थस्तस्य ।

भृशा-ऽऽभीक्ष्ण्ये यथाविधीति च नानुवर्त्तते प्रचय इति भणनात्, सामान्यार्थस्य भणनाच्च प्रचयः-समुच्चयः, स्वतः साधनभेदेन वा भिद्यमानस्य एकत्रानेकस्य धात्वर्थस्याध्यावापः प्रक्षेपः इति यावत् ।

**[व्रीहीन् वप, लुनीहि, पुनीहीत्येव यतते, चेष्टते, समीहते, यत्यते, चेष्ट्यते, समीह्यते, पक्षे - व्रीहीन् वपति, लुनाति, पुनातीत्येव यतते, यत्यते]** व्रीहि द्वितीया शस् । 'डुवपीं बीजसन्ताने' (९९५) वप् । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलुक् । 'यतैङ् प्रयत्ने' (७११) यत् । 'चेष्टि चेष्टायाम्' (६७०) चेष्ट् । 'ईहि चेष्टायाम्' (८५७) ईह्, सम्पूर्व० । वर्त्त० ते । 'कर्त्तर्य'० (३।४।७१) शव् । क्यश्च । पक्षे-वर्त्तमाना ज्ञेया ।

**[देवदत्तोऽद्धि, गुरुदत्तोऽद्धि, जिनदत्तोऽद्धि इत्येव भुञ्जते, भुज्यते, पक्षे-देवदत्तोऽत्ति, गुरुदत्तोऽत्ति, जिनदत्तोऽत्तीत्येव भुञ्जते, भुज्यते]** देवदत्त - गुरुदत्त - जिनदत्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'अदं भक्षणे' (१०५९) अद् । पञ्चमी हि । 'हु-धुटो हेर्धिः' (४।२।८३) हस्य धः । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । क्यश्च । पक्षे-वर्त्तमाना ।

**[ग्राममट, वनमट, गिरिमटेत्येवाटति, घटते, अट्यते, घट्यते, पक्षे-ग्राममटति, वनमटति, गिरिमटतीत्येवाटति, घटते, अट्यते, घट्यते]** ग्राम-वन-गिरि द्वितीया अम् । 'अट गतौ' (१९४) अट् । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलुक् । 'अट गतौ' (१९४) अट् । 'घटिष् चेष्टायाम्' (१०००) घट् । वर्त्त० तिव् - ते । 'कर्त्तर्य'० (३।४।७१) शव् । क्यश्च । पक्षे-सर्वत्र वर्त्तमाना ।

**[सक्तून् पिब, धानाः खाद, ओदनं भुङ्क्ष्वेत्येवाभ्यवहरति, अभ्यवह्रियते पक्षे-सक्तून् पिबति, धानाः खादति, ओदनं भुङ्क्ते इत्येवाभ्यवहरति, अभ्यवह्रियते]** 'पां पाने' (२) पा । पञ्चमी हि । 'कर्त्तर्य'० (३।४।७१) शव् । 'श्रौति-कृवु-धिवु-पा'० (४।२।१०८) पिबादेशः ।

खादृ भक्षणे' (२९४) खाद् । पञ्चमी हि । 'कर्त्तर्यन'० (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक् (४।२।८५) हिलुक् उभयत्र ।

भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । पञ्चमी स्व । 'रुधां स्वरा'० (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ।

'हृंग् हरणे' (८८५) हृ, अभि-अवपूर्व० । वर्त्त ० तिव्-ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'क्यः शिति' (३।४।७०) क्यप्र० । रिः श-क्या-ऽऽशीर्ये (४।३।११०) रि० । पक्षे-वर्त्तमाना ।

**[सूत्रमधीष्व, निर्युक्तिमधीष्व, भाष्यमधीष्वेत्येवाधीते, पठति, अधीयते, पठ्यते, पक्षे-सूत्रमधीते, निर्युक्तिमधीते, भाष्यमधीते, इत्येवाधीते, पठति, अधीयते, पठ्यते]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । पञ्चमी स्व । 'नाम्यन्तस्था-कवर्गात्'० (२।३।१५) षत्वम् । 'समानानां'० (१।२।१) दीर्घः ।

अधि 'इंङ्क् अध्ययने' (११०४) इ । वर्त्त० ते-क्यश्च । 'समानानां'० (१।२।१) दीर्घः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पठ व्यक्तायां वाचि' (२१३) पठ् । वर्त्त० तिव्-ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

त-ध्वमौ च तद्युष्मदि-

**[ व्रीहीन् वपत, लुनीत, पुनीतेत्येव यतध्वे, चेष्टध्वे, समीहध्वे; व्रीहीन् वप, लुनीहि, पुनीहीत्येव यतध्वे, चेष्टध्वे, समीहध्वे, पक्षे-व्रीहीन् वपथ, लुनीथ, पुनीथेत्येव यतध्वे, चेष्टध्वे, समीहध्वे ]** 'डुवपीं बीजसन्ताने' (९९५) वप् । पञ्चमी त । 'कर्त्तर्यन'० (३।४।७१) शव् । लुनीत-पुनीत इत्यत्र पञ्चमी त । यतध्वं इत्यादिषु वर्त्तमाना ध्वे, द्वितीये हि-स्वौ ज्ञेयौ, पक्षे-वर्त्तमाना ।

**[ ग्राममटत, वनमटत, गिरिमटतेत्येवाटथ, घटध्वे, ग्राममट, वनमट, गिरिमटेत्येवाटथ, घटध्वे, पक्षे-ग्राममटथ, वनमटथ, गिरिमटथेत्येवाटथ, घटध्वे ]** ग्रामं-वनं-गिरिं । अटत-पञ्चमी त । अटथ-वर्त्तमाना थ । घटध्वे-वर्त्तमाना ध्वे । पक्षे-वर्त्तमाना ।

**[ सूत्रमधीध्वं, निर्युक्तिमधीध्वं, भाष्यमधीध्वमित्येवाधीध्वे, पठथ, सूत्रमधीष्व, निर्युक्तिमधीष्व, भाष्यमधीष्वेत्येवाधीध्वे, पठथ, पक्षे-सूत्रमधीध्वे, निर्युक्तिमधीध्वे, भाष्यमधीध्वे, इत्येवाधीध्वे, पठथ ]** अधीध्वम् -अधीध्वे । वर्त्त० ध्वे । पठथ-वर्त्त० थव् । पक्षे-वर्त्तमाना !

एवं वचनान्तरे त्रिकान्तरे विभक्त्यन्तरेऽप्युदाहार्यम् ॥छ॥

## निषेधेऽलं-खल्वोः क्त्वा ॥ ५।४।४४ ॥

**[ निषेधे ]** निषेधनं = निषेधस्तस्मिन् ।

**[ अलंखल्वोः ]** अलम् च खलुश्च = अलंखलू, तयोः = अलंखल्वोः । सप्तमी ओस् ।

**[ क्त्वा ]** क्त्वा प्रथमा सि ।

**[ अलं कृत्वा ]** अलम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अलं करणेन = अलं कृत्वा । अनेन क्त्वाप्र० → त्वा । प्रथमा सि । 'क्त्वा-तुमम्' (१।१।३५) इत्यव्ययत्वात् 'अव्ययस्य' (३।२।७) सिलुप् । न कर्तव्यमित्यर्थः ।

**[ खलु कृत्वा ]** खलु प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । खलु करणेन = खलु कृत्वा । अनेन क्त्वाप्र० → त्वा । प्रथमा सि । 'क्त्वा-तुमम्' (१।१।३५) इत्यव्ययत्वात् 'अव्ययस्य' (३।२।७) सिलुप् । न कर्तव्यमित्यर्थः ।

**[ अलं वत्स ! रोदनेन ]** अलम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । वत्स आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । 'रुदृक् अश्रुविमोचने' (१०८७) रुद् । रुद्यते = रोदनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'कृताऽऽद्यैः' (२।२।४७) इत्यनेन तृतीया ।

**[ अलं रुदितम् ]** अलम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'रुदृक् अश्रुविमोचने' (१०८७) रुद् । रोदनं = रुदितम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् ।

क्त्वान्तयोग एव खलुशब्दो निषेधवाचीति पक्षे खलुशब्दो नोदाह्रियते ।

**[ अलङ्कारः स्त्रियाः ]** अलङ्क्रियते-विभूष्यते एभिरिति अलङ्कारः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सिद्धं खलु]** खलु निश्चयेन सिद्धम् ।

**[मा कारि भवता]** मा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'डुकृंग् करणे' (८८८) कृ । अद्यतनी त ।'भाव-कर्मणोः' (३।४।६८) ञिच् → इ - तलोपश्च । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । भवत् तृतीया टा ।।छा।

## परा-ऽवरे ॥ ५।४।४५ ॥

**[पराऽवरे]** परश्च अवरश्च = पराऽवरम्, तस्मिन् ।

**[अतिक्रम्य नदीं पर्वतः]** 'क्रमू पादविक्षेपे' (३८५) क्रम्, अतिपूर्व० । अतिक्रमेण = अतिक्रम्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) क्त्वा० → यप्० । नदी द्वितीया अम् । नद्याः परः पर्वत इत्यर्थः ।

**[बाल्यमतिक्रम्य यौवनम्]** 'अतिक्रम्य' पूर्ववत् ।

अवरे - **[अप्राप्य नदीं पर्वतः]** न प्र 'आप्लृंट् व्याप्तौ' (१३०७) आप् । न प्रापणेन = अप्राप्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नञत्' (३।२।१२५) न० → अ० । नदी द्वितीया अम् । नद्या अर्वाक् पर्वत इत्यर्थः ।

**[अप्राप्य यौवनं बाल्यम्]** 'अप्राप्य' पूर्ववत् ।

नदी-पर्वतयोर्बाल्य-यौवनयोर्वा परावरत्वमात्रं प्रतीयते, अस्ति प्राप्यत इति वा, न द्वितीया क्रियेति तुल्यकर्तृकक्रियान्तराभावात् । 'प्राक्काले' (५।४।४७) इति न सिध्यतीति वचनम् ।

वाऽधिकाराद् यथाप्राप्तं च -

**[नद्यतिक्रमेण पर्वतः]** नद्या अतिक्रमणं = नद्यतिक्रमः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'अमोऽकम्यमि-चमः' (४।२।२६) न वृद्धिः ।

**[नद्यप्राप्त्या पर्वतः]** नद्या अप्रापणं = नद्यप्राप्तिस्तया । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति, पर्वतः ।।छा।

## निमील्यादिमेङस्तुल्यकर्तृके ॥ ५।४।४६ ॥

**[निमील्यादिमेङः]** निमीलिरादिर्येषां ते = निमील्यादयः । निमील्यादयश्च मेङ् च = निमील्यादिमेङ्, तस्मात् ।

**[तुल्यकर्तृके]** तुल्यः कर्त्ता यस्य सः = तुल्यकर्तृकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क, तस्मिन् ।

तुल्यो धात्वर्थान्तरेण कर्त्ता यस्य निमील्यादिः क्रियाविशेषस्य स तुल्यकर्तृकस्तस्मिन्....

निमील्यादीनां समानकालार्थो मेङस्तु परकालार्थ आरम्भः । स्वभावात् मेङ् व्यतिहार एव वर्त्तते ।

**[अक्षिणी निमील्य हसति]** अक्षि औ । 'औरीः' (१।४।५६) ई । 'अनाम्स्वरे नोऽन्तः' (१।४।६४) नोऽन्तः । 'मील निमेषणे' (४१५) मील्, निपूर्व० । निमीलनेन = निमील्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप्, हसति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ मुखं व्यादाय स्वपिति ]** मुखं वि-आङ् 'डुदांग्क् दाने' (११३८) दा । व्यादानेन = व्यादाय । अनेन क्त्वाप्र० । 'ञिष्वपंक् शये' (१०८८) ष्वप् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्वप् । वर्त्त० तिव् । 'रुत्पञ्चकाच्छिदयः' (४।४।८८) इट् ।

**[ पादौ प्रसार्य पतति ]** पाद औ । प्र 'सृं गतौ' (२५) सृ । प्रसरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रसारणेन = प्रसार्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'णेरनिटि' (४।३।८३) णिग्लुक्, पतति ।

**[ दन्तान् प्रकाश्य जल्पति ]** दन्त द्वितीया शस् । प्र 'काशृङ् दीप्तौ' (८३०) काश् । प्रकाशनेन = प्रकाश्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप्, जल्पति ।

**[ शिशुरयं मातरं भक्षयित्वोपजातः ]** शिशुरयं-मातृ द्वितीया अम् । 'अर्डौ च' (१।४।३९) अर् । 'भक्षण् अदने' (१७१७) भक्ष् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । भक्षणेन = भक्षयित्वा । अनेन क्त्वाप्र० → त्वा । इट् । गुणे सति अय् ।

**[ अपमाय, अपमित्य याचते ]** 'मेंङ् प्रतिदाने' (६०३) मे । 'आत् सन्ध्यक्षरस्य' (४।२।१) मा, अपपूर्व० । अपमातुं = अपमाय-अपमित्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'मेङो वा मित्' (४।३।८८) "मित्"आदेशो विकल्पेन । अपमातं(नं) = अपमातुम् । क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र० । अपमातुं-प्रतिदातुं याचत इत्यर्थः, पूर्वं ह्यसौ याचते पश्चादपमयत इति ।

याचेस्तु पूर्वकालेऽपि क्त्वा न भवति, मेङः परकालभाविन्या क्त्वया याचि प्राक्कालस्योक्तत्वात् । पक्षे -

**[ याचित्वाऽपमयते ]** याचनं पूर्वं = याचित्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । इट् । अप 'मेंङ् प्रतिदाने' (६०३) मे । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ अपमातुं याचते ]** अपमानं = अपमातुम् । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र०, याचते ॥छा।

## प्राक्काले ॥ ५।४।४७ ॥

**[ प्राक्काले ]** प्राङ्-पूर्वः कालोऽस्य सः = प्राक्कालस्तस्मिन् ।

**[ आसित्वा भुङ्क्ते ]** 'आसिक् उपवेशने' (१११९) आस् । आसनं पूर्वं = आसित्वा । अनेन क्त्वाप्र० → त्वा । इट् । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । 'वर्त्त० ते । 'रुधां स्वरा'० (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'म्नां धुड्'० (१।३।३९) न० → ङ० ।

**[ स्नात्वा, भुक्त्वा, पीत्वा व्रजति ]** 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै०' (२।३।९८) स्ना । स्नानं पूर्वं = स्नात्वा । 'भुजंप् पालना-ऽभ्यवहारयो' (१४८७) भुज् । भोजनं पूर्वं = भुक्त्वा । 'पां पाने' (२) पा । पानं पूर्वं = पीत्वा । अनेन क्त्वाप्र० → त्वा । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) ई, व्रजति । पक्षे-

**[ आस्यते भोक्तुम् ]** 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनाय = भोक्तुम् । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० ॥छा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## खणम् चाभीक्ष्ण्ये ॥ ५।४।४८ ॥

**[ खणम् ]** खणम् प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ आभीक्ष्ण्ये ]** आभीक्ष्ण्य सप्तमी ङि ।

**[ भोजं भोजं, भुक्त्वा भुक्त्वा व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । आभीक्ष्ण्यं भोजनं पूर्वं = भोजं भोजम् । अनेन खणम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप्, ततो 'भृशा-ऽऽभीक्ष्ण्या'० (७।४।७३) द्विः । एवम्-भुक्त्वा । अनेन क्त्वाप्र० → त्वा । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विः ।

**[ पायं पायं पीत्वा पीत्वा गच्छति ]** 'पां पाने' (२) पा । अ(आ)भीक्ष्ण्यं पानं पूर्वं = पायं पायम् । अनेन खणम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । एवं-पीत्वा पीत्वा। अनेन क्त्वाप्र० → त्वा । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) ई ।

**[ अग्रे भोजं भोजं, भुक्त्वा भुक्त्वा व्रजति ]** अग्रे प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अ(आ)भीक्ष्ण्यं भोजनं पूर्वं = भोजं भोजम् । अनेन खणम्प्र० → अम् । एवम्-भुक्त्वा भुक्त्वा । अनेन क्त्वाप्र० → त्वा । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । अत्र क्त्वा-खणमोर्हि स्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीत्याभीक्ष्ण्याभिव्यक्तये द्विर्वचनं भवति ।

इह कस्मात् खणम् न भवति -

**[ यदयं पुनः पुनर्भुक्त्वा व्रजति ]** यदयं पुनः पुनः भोजनं पूर्वं = भुक्त्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क०, व्रजति ।

अधीते एव ततः परम्, आभीक्ष्ण्यस्य स्वशब्देन पुनःशब्देनैवोक्तत्वात् । क्त्वापि तर्हि न प्राप्नोति ? मा भूदाभीक्ष्ण्ये, प्राक्काले भविष्यति । वाऽधिकारेणैव पक्षे क्त्वाप्रत्ययस्य सिद्धौ चकारेण तस्य विधानं वर्त्तमानादिप्रत्ययान्तरनिषेधार्थम् ।

卐**[ चोरंकारमाक्रोशति ]** चोरस्य करणं पूर्वं = चोरंकारम् । 'शापे व्याप्यात्' (५।४।५२) खणम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'खित्यनव्ययाऽरुषो'० (३।२।१११) मोऽन्तः, आक्रोशति ।

**[ स्वादुंकारं भुङ्क्ते ]** स्वादुं कृत्वा = स्वादुंकारम् । 'स्वाद्वर्थाद् अदीर्घात्' (५।४।५३) खणम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'खित्यनव्ययाऽरुषो'० (३।२।१११) मोऽन्तः ।

खित्त्वमुत्तरार्थम् ।।छा।

## पूर्वा-ऽग्रे-प्रथमे ॥ ५।४।४९ ॥

**[ पूर्वाऽग्रेप्रथमे ]** पूर्वश्च अग्रेश्च प्रथमश्च = पूर्वाऽग्रेप्रथमम्, तस्मिन् ।

अनाभीक्ष्ण्यार्थं वचनम् । उदाहरणेषु पूर्वाऽग्रे प्रथमेभ्यः 'काला-ऽध्वनो'० (२।२।४२) इत्यादिना द्वितीया ।

---

卐 बृहद्वृत्तौ - चौरंकारमाक्रोशति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पूर्वं भोजं, भुक्त्वा व्रजति ]** भोजनं पूर्वं = भोजम् । अनेन ख्णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । एवम्-भुक्त्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० ।

एवमग्रेऽपि, पूर्व-प्रथमसाहचर्यात् अग्रेशब्दः कालवाची अव्ययं 'क्रियाविशेषणात्' (२।२।४१) अम्, एवं प्रथमशब्दादम्, विकल्पपक्षे वर्त्तमानादयोऽपि । पूर्वादयश्चात्र व्यापारान्तरापेक्षे प्राक्काल्ये, व्रज्यापेक्षे तु क्त्वा-ख्णमाविति नोक्तार्थता, ततश्चायमर्थोऽन्यभोक्तृभुजिक्रियाभ्यः स्वक्रियान्तरेभ्यो वा पूर्वं भोजनं कृत्वा व्रजतीत्यर्थः ॥छ॥

## अन्यथैवं - कथमित्थमः कृगोऽनर्थकात् ॥ ५।४।५० ॥

**[ अन्यथैवंकथमित्थमः ]** अन्यथा च एवं च कथम् च इत्थम् च = अन्यथैवंकथमित्थम्, तस्मात् ।

**[ कृगः ]** कृग् पञ्चमी ङसि ।

**[ अनर्थकात् ]** न विद्यतेऽर्थो यस्य सः = अनर्थकस्तस्मात् । 'शेषाद्वा' (७।३।१७५) कच्समासान्तः, अर्थरहित इत्यर्थः ।

**[ अन्यथाकारं, अन्यथा कृत्वा भुङ्क्ते ]** अन्यथा करणं = अन्यथाकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, भुङ्क्ते ।

**[ एवंकारं, एवं कृत्वा भुङ्क्ते ]** एवं करणं = एवंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, भुङ्क्ते ।

**[ कथंकारं, कथं कृत्वा भुङ्क्ते ]** कथं करणं पूर्वं = कथंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, भुङ्क्ते ।

**[ इत्थंकारं इत्थं कृत्वा भुङ्क्ते ]** इत्थं करणं पूर्वं = इत्थंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, भुङ्क्ते ।

पक्षे - अन्यथादि अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) इत्यनेन क्त्वा, एवमुत्तरत्रापि । आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात् ।

**[ अन्यथा कृत्वा शिरो भुङ्क्ते ]** अन्यथा । अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । शिरस् द्वि० अम् । 'अनतो लुप्' (१।४।५९) अम्लुप्, भुङ्क्ते । अत्रान्यथाशब्दः शिरःप्रकारे करोतेश्च शिरःकर्म, तत्र(त्र) करोतिना विना गम्यते ॥छ॥

## यथा-तथादीर्ष्योत्तरे ॥ ५।४।५१ ॥

**[ यथातथात् ]** यथा च तथा च = यथातथम्, तस्मात् । 'क्लीबे' (२।४।९७) हृस्वत्वम् ।

**[ ईर्ष्योत्तरे ]** ईर्ष्य ईर्ष्यार्थाः (४०२) ईर्ष्य् । ईर्ष्यतीति ईर्ष्यः । 'अच्' (५।१।४९) अच्प्र० । ईर्ष्य उत्तरं = ईर्ष्योत्तरम्, तस्मिन् ।

ईर्ष्यश्चेदुत्तरयति-ईर्ष्यां कुर्वन् चेदुत्तरं करोतीत्यर्थः ।

**[ कथं भवान् भोक्ष्यत ? इति पृष्टोऽसूयया तं प्रत्याह-यथाकारमहं भोक्ष्ये, तथाकारमहं भोक्ष्ये, किं तवाऽनेन ? किं ते मया ? ]** कथम् । अम् । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । भवान् प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भविष्यन्ती स्यते । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ।

इति प्रथमा सि । पृष्ट प्रथमा सि । असूयया-तृतीया टा । तं-द्वितीया अम् । प्रति प्रथमा सि ।

'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० तिव् । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) ब्रू० → आह० - तिव् → णव् च ।

यथा करणं पूर्वं = यथाकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथम सि । 'अव्ययस्य' (३।२।७) सिलुप् । एवं-तथा करणं पूर्वं = तथाकारम् । अनेन ख्णम्प्र० → अम् ।

अस्मद् प्रथमा सि । 'त्वमहं सिना प्राक् चाऽकः' (२।१।१२) "अहम्"आदेशः ।

भोक्ष्ये-भविष्यन्ती स्ये । शेषं पूर्ववत् । किं तवाऽनेन ? किं ते मया ? यथाहं भोक्ष्ये तथाऽहं भोक्ष्ये इत्यर्थः ।

**[ यथा कृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि ]** यथा-तथा । अम् । 'अव्ययस्य' (३।२।७) लुप् । करणं पूर्वं = कृत्वा। 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । अहं भोक्ष्ये तथा द्रक्ष्यसि । 'दृशृं प्रेक्षणे' (४९५) दृश् । भविष्यन्ती स्यसि । 'अः सृजि-दृशोऽकिति' (४।४।१११) अकारागमः । 'इवर्णादेरस्वे'० (१।२।२१) रत्वम् । 'यज-सृज-मृज-राज'० (२।१।८७) श० → ष० । 'ष-ढोः कस्सि' (२।१।६२) ष० → क० । 'नाम्यन्तस्था'० (२।३।१५) षत्वम् । क-षयोगे क्ष० ॥छा।

## शापे व्याप्यात् ॥ ५।४।५२ ॥

**[ शापे ]** शाप सप्तमी ङि ।

**[ व्याप्यात् ]** व्याप्य पञ्चमी ङसि ।

**अनर्थकादिति निवृत्तम्, शापे असंभवाद्, व्याप्यादिति भणनाद्वा ।**

卐**[ चोरंकारमाक्रोशति ]** चोर 'डुकृंग् करणे' (८८८) कृ । चोरं कृत्वा = चोरंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'खित्यनव्ययाऽरुषो'० (३।२।१११) मोऽन्तः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । करोतेरिहोच्चारणे-चोरं कृत्वा-चोरशब्दमुच्चार्याक्रोशति, चोरोऽसीत्याक्रोशतीत्यर्थः ।

**[ दस्युंकारमाक्रोशति ]** दस्युं कृत्वा = दस्युंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप्, आक्रोशति ।

**[ व्याधंकारमाक्रोशति ]** व्याधं कृत्वा = व्याधंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'खित्यनव्ययाऽरुषो'० (३।२।१११) मोऽन्तः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप्, आक्रोशति ।

+ **[ चोरं कृत्वा हेतुभिः कथयति ]** चोर द्वितीया अम् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ॥छा।

## स्वाद्वर्थाददीर्घात् ॥ ५।४।५३ ॥

**[ स्वाद्वर्थात् ]** स्वादुरर्थो यस्य सः = स्वाद्वर्थस्तस्मात् ।

**[ अदीर्घात् ]** न दीर्घः = अदीर्घस्तस्मात् ।

---

卐 बृहद्वृत्तौ - चौरंकारमाक्रोशति । + बृहद्वृत्तौ - चौरं... ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[स्वादुंकारं, स्वादुं कृत्वा भुङ्क्ते]** स्वादुं कृत्वा = स्वादुंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । पक्षे-स्वादु अम् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[संपन्नंकारं भुङ्क्ते]** संपन्नं कृत्वा = संपन्नंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[मिष्टंकारं, मिष्टं कृत्वा भुङ्क्ते]** मृ(मि)ष्टं कृत्वा = मृ(मि)ष्टंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । पक्षे-मृ(मि)ष्ट अम् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[लवणंकारं, लवणं कृत्वा भुङ्क्ते]** लवणं कृत्वा = लवणंकारम् । अनेन ख्णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । पक्षे-लवण अम् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[स्वाद्वीं कृत्वा यवागूं भुङ्क्ते]** स्वादु 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । 'इवर्णादेरस्वे'० (१।२।२१) व० । अम् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[स्वादूकृत्य यवागूं भुङ्क्ते]** स्वादु 'स्वरादुतो'० (२।४।३५) ङी । 'इवर्णादेरस्वे'० (१।२।२१) व० । अस्वाद्वीं स्वाद्वीं करणं पूर्वं = स्वादूकृत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां'० (७।२।१२६) च्विप्र० । 'च्वौ क्वचित्' (३।२।६०) पुंवद्भावः - ङीगतेत्यर्थः । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । 'दीर्घश्वि'० (४।३।१०८) दीर्घः ऊ । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ॥छा॥

## विद्-दृग्भ्यः कार्त्स्न्ये णम् ॥ ५।४।५४ ॥

**[विद्दृग्भ्यः]** विच्च विच्च विच्च = विदः, विदश्च दृश् च = विद्दृश्, तेभ्यः = विद्दृग्भ्यः । पञ्चमी भ्यस् ।

**[कार्त्स्न्ये]** कृत्स्नस्य भावः = कार्त्स्न्यम्, तस्मिन् ।

**[णम्]** णम् प्रथमा सि । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् ।

विद्यतेरकर्मकत्वात् तद्वर्जास्त्रयो विदयो गृह्यन्ते ।

**[अतिथिवेदं भोजयति]** अतिथि 'विदक् ज्ञाने' (१०९९) विद् । विद्लृंती लाभे' (१३२२) विद् । 'विदिंप् विचारणे' (१४९७) विद् । अतिथिं विदित्वा = अतिथिवेदम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'क्त्वा-तुमम्' (१।१।३५) इत्यनेन अम्प्रत्ययान्तस्य अव्ययसंज्ञा ।

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भुञ्जन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए। 'एदैतोऽयाय्' (१।२।२३) अय् ।

यं यमतिथिं जानाति, लभते, विचारयति वा तं तं सर्वं भोजयतीत्यर्थः ॥छा॥

## यावतो विन्द-जीवः ॥ ५।४।५५ ॥

**[यावतः]** यावत् पञ्चमी ङसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ विन्दजीवः ]** विन्दश्च जीव् च = विन्दजीव्, तस्मात् = विन्दजीवः । पञ्चमी ङसि ।

**[ भावद्वेदं भुङ्क्ते ]** यावत् 'विद्लृंती लाभे' (१३२२) विद् । यावतो वेदनम् = यावद्वेदम् । अनेन णम्प्र० → अम् । 'लघोरुपा०' (४।३।४) गु० ए । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । वर्त्त० ते । 'रुधां स्वरा०' (३।४।८२) श्नप्र० → न० । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलोपः । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । 'म्नां धुड्वर्गे०' (१।३।३९) न० → ङ० ।

**[ यावज्जीवमधीते ]** यावत् 'जीव प्राणधारणे' (४६५) जीव् । यावतो जीवनम् = यावज्जीवम् । अनेन णम्प्र० → अम् । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) द० → ज० । 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० ते । 'समानानां०' (१।२।१) दीर्घः । यावज्जीवति तावदधीते इत्यर्थः ।।छ।।

## चर्मोदरात् पूरेः ॥ ५।४।५६ ॥

**[ चर्मोदरात् ]** चर्म च उदरं च = चर्मोदरम्, तस्मात् = चर्मोदरात् । पञ्चमी ङसि ।

**[ पूरेः ]** पूरि पञ्चमी ङसि ।

**[ चर्मपूरमास्ते ]** चर्मन् 'पूरैचि आप्यायने' (१२६८) पूर् । 'पूरण् आप्यायने' (१७४९) पूर् । चर्मणः पूरणम् = चर्मपूरम् । अनेन णम्प्र० → अम् । 'आसिक् उपवेशने' (१११९) आस् । वर्त्त० ते । चर्म पूरयित्वाऽऽस्ते इत्यर्थः ।

**[ उदरपूरं शेते ]** उदर-पूर् । उदरस्य पूरणम् = उदरपूरम् । अनेन णम्प्र० → अम् । 'शीङ्क् स्वप्ने' (११०५) शी । वर्त्त० ते । 'शीङ एः शिति' (४।३।१०४) शी० → शे० । उदरं पूरयित्वा शेते इत्यर्थः ।।छ।।

## वृष्टिमान ऊलुक् चास्य वा ॥ ५।४।५७ ॥

**[ वृष्टिमाने ]** 'वृषू सेचने' (५२७) वृष् । वर्षणम् = वृष्टिः । क्तिप्र० → ति । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ति० → टि० । 'मांङ्क् मान-शब्दयोः' (११३७) मा । मीयते = मानम् । अनट्प्र० → अन । सि-अम् । वृष्टेर्मानम् = वृष्टिमानम्, तस्मिन् ।

**[ ऊलुक् ]** ऊवर्णस्य लुक् = ऊलुक् ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ वा ]** वा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ गोष्पदप्रं - गोष्पदपूरं वृष्टो मेघः ]** गोः पदम् = गोष्पदम् । 'वर्चस्कादिष्व०' (३।२।४८) षोऽन्तः । 'पूरैचि आप्यायने' (१२६८) पूर् । 'पूरण् आप्यायने' (१७४९) पूर् । गोष्पदस्य पूरणम् = गोष्पदप्रम् - गोष्पदपूरम् । अनेन णम्प्र० → अम् - पूर ऊकारस्य लुग्वा । यावता गोष्पदं पूर्यते तावत्प्रमाणो मेघो वृष्ट इत्यर्थः ।

**[ सीताप्रं-सीतापूरं वृष्टो मेघः ]** सीता-हलदण्डस्य पद्धतिर्लेखेत्यर्थः । सीतायाः पूरणम् = सीताप्रम् - सीतापूरम् । अनेन णम्प्र० → अम् - पूर ऊकारस्य लुग्वा । यावता सीता पूर्यते तावत्प्रमाणो मेघो वृष्ट इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[गोष्पदप्रम्]** गोष्पद 'प्रांक् पूरणे' (१०७२) प्रा । गोष्पदं प्रातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[गोष्पदपूरम्]** गोष्पद-पूर् । पूर्यमाणं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । गोष्पदं पूरयतीति । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिलुक् । सि-अम् ।

**[गोष्पदप्रंतरां वृष्टो मेघः]** अयं गोष्पदप्रं वृष्टो मेघः(२) । अयमनयोर्मध्येऽतिशयेन गोष्पदप्रं वृष्टो मेघः = गोष्पदप्रंतरां वृष्टो मेघः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'किं-त्याद्ये०' (७।३।८) तर० → तराम् ।

**[गोष्पदपूरंतरां वृष्टो मेघः]** अयं गोष्पदप्रं वृष्टो मेघः(२) । अयमनयोर्मध्येऽतिशयेन गोष्पदप्रं वृष्टो मेघः = गोष्पदप्रंतरां वृष्टो मेघः । 'द्वयोर्विभज्ये०' (७।३।६) तरप्प्र० → तर । 'किं-त्याद्ये०' (७।३।८) तर० → तराम् ।

**[गोष्पदप्रंतमां वृष्टो मेघः]** अतिशयेन गोष्पदप्रं वृष्टो मेघः = गोष्पदप्रंतमां वृष्टो मेघः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'किं-त्याद्ये०' (७।३।८) तम० → तमाम्० ।

**[गोष्पदपूरंतमां वृष्टो मेघः]** अतिशयेन गोष्पदप्रं वृष्टो मेघः = गोष्पदपूरंतमां वृष्टो मेघः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । 'किं-त्याद्ये०' (७।३।८) तम० → तमाम्० ।

**[गोष्पदप्रंरूपं वृष्टो मेघः]** प्रशस्तं गोष्पदप्रं वृष्टो मेघः = गोष्पदप्रंरूपं वृष्टो मेघः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रुप ।

**[गोष्पदपूरंरूपं वृष्टो मेघः]** प्रशस्तं गोष्पदपूरं वृष्टो मेघः = गोष्पदपूरंरूपं वृष्टो मेघः । 'त्यादेश्च०' (७।३।१०) रूपप्प्र० → रूप ।

**[गोष्पदप्रंकल्पम्]** ईषदपरिसमाप्तं गोष्पदप्रम् = गोष्पदप्रंकल्पम् । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प ।

**[गोष्पदप्रंदेश्यम्]** ईषदपरिसमाप्तं गोष्पदप्रम् = गोष्पदप्रंदेश्यम् । 'अतमबादे०' (७।३।११) देश्यप्प्र० → देश्य ।

**[गोष्पदप्रंदेशीयम्]** ईषदपरिसमाप्तं गोष्पदप्रम् = गोष्पदप्रंदेशीयम् । 'अतमबादे०' (७।३।११) देशीयर्प्र० → देशीय ।

**[गोष्पदपूरंकल्पम्]** ईषदपरिसमाप्तं गोष्पदपूरम् = गोष्पदपूरंकल्पम् । 'अतमबादे०' (७।३।११) कल्पप्प्र० → कल्प ।

**[गोष्पदपूरंदेश्यम्]** ईषदपरिसमाप्तं गोष्पदपूरम् = गोष्पदपूरंदेश्यम् । 'अतमबादे०' (७।३।११) देश्यप्प्र० → देश्य ।

**[गोष्पदपूरंदेशीयम्]** ईषदपरिसमाप्तं गोष्पदपूरम् = गोष्पदपूरंदेशीयम् ।'अतमबादे०' (७।३।११) देशीयरप्र० → देशीय ।

**[गोष्पदप्रेण]** गोष्पद 'प्रांक् पूरणे' (१०७२) प्रा । गोष्पदं प्राति । 'आतो डोऽह्वा०' (५।१।७६) डप्र० → अ । 'डित्यन्त्य०' (२।१।११४) आलुक्, तेन ।

**[-गोष्पदपूरेण]** पूरणम् = पूरः । घञ्प्र० → अ । 'गोष्पदस्य पूरः = गोष्पदपूरस्तेन ॥छ॥

## चेलार्थात् क्नोपेः ॥ ५।४।५८ ॥

**[चेलार्थात्]** चेलं अर्थो यस्य तत् = चेलार्थम्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[क्नोपेः]** क्नोपि पञ्चमी ङसि ।

**[चेलक्नोपं वृष्टो मेघः]** चेलं 'क्नूयैङ् शब्दोन्दनयोः' (८०२) क्नूय् । क्नूयमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली'० (४।२।२१) पोऽन्तः । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलुक् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । चेलस्य क्नोपनं = चेलक्नोपम् । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[वस्त्रक्नोपं वृष्टो मेघः]** वस्त्र 'क्नूयैङ् शब्दोन्दनयोः' (८०२) क्नूय् । क्नूयमानं प्रयुङ्क्ते । शेषं पूर्ववत् । वस्त्रस्य क्नोपनं = वस्त्रक्नोपम् । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[वसनक्नोपं वृष्टो मेघः]** वसन 'क्नूयैङ् शब्दोन्दनयोः' (८०२) क्नूय् । क्नूयमानं प्रयुङ्क्ते । शेषं पूर्ववत् । वसनस्य क्नोपनं = वसनक्नोपम् । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिग्लुक् । यावता चेलं क्नूयते-आर्द्रीभवति तावद् वृष्ट इत्यर्थः ।

अर्थग्रहणादत्र स्वरूप-पर्याय-विशेषाणां त्रयाणामपि ग्रहणम्, तेन -

**[पटिकाक्नोपं वृष्टो मेघः]** पटिकायाः क्नोपनं = पटिकाक्नोपम् । अनेन णम्प्र० → अम् ।

**[कम्बलक्नोपं वृष्टो मेघः]** कम्बलस्य क्नोपनं = कम्बलक्नोपम् । अनेन णम्प्र०, इत्यादौ चेलविशेषादपि भवति ।

अयमप्यप्राक्काले विधिः ॥छ॥

## गात्र-पुरुषात् स्नः ॥ ५।४।५९ ॥

**[गात्रपुरुषात्]** गात्रश्च पुरुषश्च = गात्रपुरुषम्, तस्मात् ।

**[स्नः]** स्ना पञ्चमी ङसि । 'लुगाऽऽतोऽनापः' (२।१।१०७) आलुक् ।

**[गात्रस्नायं वृष्टो मेघः]** गात्र 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । गात्रस्य स्नानं = गात्रस्नायम् । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[पुरुषस्नायं वृष्टो मेघः]** पुरुष 'ष्णांक् शौचे' (१०६४) ष्णा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्ना । पुरुषस्य स्नानं = पुरुषस्नायम् । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । यावता गात्रं पुरुषश्च स्नाप्यते तावद् वृष्ट इत्यर्थः ॥छ॥

## शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव ॥ ५।४।६० ॥

**[शुष्कचूर्णरूक्षात्]** शुष्कश्च चूर्णश्च रूक्षश्च = शुष्कचूर्णरूक्षम्, तस्मात् ।

**[पिषः]** पिष् पञ्चमी ङसि ।

**[तस्य]** तद् षष्ठी ङस् ।

**[एव]** एव प्रथमा सि ।

पिषस्यैव इत्यर्थः ।

**[शुष्कपेषं पिनष्टि]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । शुष्कस्य पेषणं = शुष्कपेषम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । शुष्कं पिनष्टीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चूर्णपेषं पिनष्टि]** चूर्णस्य पेषणं = चूर्णपेषम् । अनेन णम्प्र० → अम् ।

**[रूक्षपेषं पिनष्टि]** रूक्षस्य पेषणं = रूक्षपेषम् । अनेन णम्प्र० → अम् ।

**[शुष्कपेषं पिष्टः]** पिष्यते स्म = पिष्टः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[शुष्कपेषं षेष्टव्यः]** पिष्यते = पेष्टव्यः । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[शुष्कपेषं पिष्यते]** पिष् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।

क्तादिभिरुक्तेऽपि व्याप्ये तदुपपदताऽस्त्येव, धातोरनुप्रयोगस्तत्र णमन्तस्य 'क्रियाविशेषणात्' (२।२।४१) अम्, अव्ययस्य प्रयोगानुप्रयोगक्रिययोरैक्यात् तुल्यकर्तृकत्वं प्राक्कालत्वं च नास्तीत्यत्र प्रकरणे पक्षे क्त्वा न भवति । घञादय एव तु भवन्ति-

**[शुष्कस्य पेषं पिनष्टि]** शुष्क षष्ठी ङस् । पेषणं = पेषम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

**[निमूलं कषित्वा कषति]** निमूलस्य कषणं इति अर्थकथनम् । निमूल द्वितीया अम् । 'कष हिंसायाम्' (५०७) कष् । कषणं पूर्वं = कषित्वा । मतान्तरे 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । इट् । कषति ॥छ॥

## कृग्-ग्रहोऽकृत-जीवात् ॥ ५।४।६१ ॥

**[कृग्ग्रहः]** कृग् च ग्रह् च = कृग्ग्रह्, तस्मात् ।

**[अकृतजीवात्]** अकृतश्च जीवश्च = अकृतजीवम्, तस्मात् ।

**[अकृतकारं करोति]** अकृतस्य करणं = अकृतकारम् । अनेन णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । अकृतं करोतीत्यर्थः ।

**[जीवग्राहं गृह्णाति]** जीवस्य ग्रहणं = जीवग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । जीवन्तं गृह्णातीत्यर्थः ॥छ॥

## निमूलात् कषः ॥ ५।४।६२ ॥

**[निमूलात्]** निमूल पञ्चमी ङसि ।

**[कषः]** कष् पञ्चमी ङसि ।

**[निमूलकाषं, निमूलस्य काषं कषति]** मूलस्याऽत्ययो निमूलम् । यद्वा निर्गतानि मूलान्यस्य = निमूलः । 'कष हिंसायाम्' (५०७) कष् । निमूलस्य कषणं = निमूलकाषम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । निमूलं कषतीत्यर्थः । पक्षे-निमूल षष्ठी ङस् । कषणं = काषम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । द्वि० अम् । कषति ॥छ॥

## हनश्च समूलात् ॥ ५।४।६३ ॥

**[हनः]** हन् पञ्चमी ङसि ।

**[च]** च प्रथमा सि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ समूलात् ]** समूल पञ्चमी ङसि ।

**[ समूलघातं हन्ति ]** मूलैः साकल्यं = समूलम् । 'अकालेऽव्ययीभावे' (३।२।१४६) सहस्य सभावः । 'हनंक् हिंसा-गत्योः' (११००) हन् । समूलस्य हननं = समूलघातम् । अनेन णम्प्र० → अम् । 'ञ्णिति घात्' (४।३।१००) "घात्"आदेशः । समूलं हन्तीत्यर्थः ।

**[ समूलकाषं कषति ]** समूलं समूलस्य वा कषणं = समूलकाषम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । समूलं कषतीत्यर्थः ॥छ॥

## करणेभ्यः ॥ ५।४।६४ ॥

**[ करणेभ्यः ]** करण पञ्चमी भ्यस् ।

**[ पाणिघातं कुड्यमाहन्ति ]** पाणिना हननं = पाणिघातम् । अनेन णम्प्र० → अम् । 'ञ्णिति घात्' (४।३।१००) "घात्"आदेशः । पाणिना कुड्यमाहन्तीत्यर्थः । 'आङो यम-हनः०' (३।३।८६) इत्यनेन सकर्मकत्वादात्मनेपदं न ।

**[ पादघातं शिलां हन्ति ]** पादेन हननं = पादघातम् । अनेन णम्प्र० → अम् । 'ञ्णिति घात्' (४।३।१००) "घात्"आदेशः । पादेन शिलां हन्तीत्यर्थः ।

**बहुवचनं व्याप्त्यर्थम्, तेन करणपूर्वाद्धिंसार्थादपि हन्तेरनेनैव णम् -**

**[ अस्युपघातमरीन् हन्ति ]** असिना उपहननं = अस्युपघातमरीन् हन्ति । अनेन णम्प्र० → अम् ।

**[ शरोपघातं मृगान् हन्ति ]** शरैरुपहननं = शरोपघातम् । अनेन णम्प्र० → अम् । मृगान् हन्ति ॥छ॥

## स्व-स्नेहनार्थात् पुष-पिषः ॥ ५।४।६५ ॥

**[ स्वस्नेहनार्थात् ]** 'ष्णिहौच् प्रीतौ' (१२४१) ष्णिह् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्निह् । स्निह्यतेऽनेनेति स्नेहनम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 卐स्वश्च स्नेहनं च = स्वस्नेहने, स्वस्नेहनेऽर्थो(र्थौ) यस्याऽसौ स्वस्नेहनार्थस्तस्मात् ।

**[ पुषपिषः ]** पुषश्च पिष् च = पुषपिष्, तस्मात् ।

**आत्मा-आत्मीयं-ज्ञातिर्धनं च स्वम् ।**

**[ स्वपोषं पुष्णाति, पुष्यति, पोषति वा ]** 'पुषश् पुष्टौ' (१५६४) पुष् । 'पुषंच् पुष्टौ' (११७५) पुष् । स्वेन पोषणं = स्वपोषणम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । पुष्यति, पोषति वा ।

**[ आत्मपोषं पुष्णाति, पुष्यति, पोषति वा ]** आत्मना पोषणम् ।

**[ गोपोषं पुष्णाति, पुष्यति, पोषति वा ]** गोभिः पोषणम् ।

**[ महिषीपोषं पुष्णाति, पुष्यति, पोषति वा ]** महिषीभिः पोषणम् ।

**[ पितृपोषं पुष्णाति, पुष्यति, पोषति वा ]** पित्रा पोषणम् ।

---

卐 श० म० न्या० - स्वं च स्नेहनं च = स्वस्नेहने, ते अर्थावस्येति विग्रहकरणे ह्येकस्यैवोपपदस्योभयार्थत्वमायातम्, तत्र युक्तमेकस्योपपदस्योभयार्थत्वायोगात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ मातृपोषं पुष्णाति, पुष्यति, पोषति वा ]** मात्रा पोषणम् । अनेन णम्प्र० ।

**[ धनपोषं पुष्णाति, पुष्यति, पोषति वा ]** धनेन पोषणम् ।

**[ रैपोषं पुष्णाति, पुष्यति, पोषति वा ]** राया-द्रव्येण पोषणं = रैपोषम् । अनेन णम्प्र० → अम् ।

स्वादिभिः पुष्णातीत्याद्यर्थः ।

स्नेहनार्थात् - **[ उदपेषं पिनष्टि ]** उदकस्य पेषणम् । अनेन णम्प्र० → अम् । 'उदकस्योदः पेषं-धि-वास-वाहने' (३।२।१०४) उदकस्य "उद"भावः ।

**[ घृतपेषं पिनष्टि ]** घृतेन पेषणं = घृतपेषम् ।

**[ तैलपेषं पिनष्टि ]** तैलेन पेषणं = तैलपेषम् ।

**[ क्षीरपेषं पिनष्टि ]** क्षीरेण पेषणं = क्षीरपेषम् । अनेन णम्प्र० → अम् । उदकादिना पिनष्टीत्यर्थः ॥छ॥

## हस्तार्थाद् ग्रह-वर्ति-वृतः ॥ ५।४।६६ ॥

**[ हस्तार्थात् ]** हस्तोऽर्थो यस्य तत् = हस्तार्थम्, तस्मात् ।

**[ ग्रहवर्तिवृतः ]** ग्रहश्च वृतिश्च(वर्तिश्च) वृच्च = ग्रहवर्तिवृत्, तस्मात् ।

**[ हस्तग्राहं गृह्णाति ]** हस्तेन ग्रहणं = हस्तग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ करग्राहं गृह्णाति ]** करेण ग्रहणं = करग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ पाणिग्राहं गृह्णाति ]** पाणिना ग्रहणं = पाणिग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । हस्तेन गृह्णातीत्यर्थः ।

**[ हस्तवर्तं वर्तयति ]** 'वृतूङ् वर्तने' (९५५) वृत् । वर्तमानं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । हस्तेन वर्तनं = हस्तवर्तम् । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ करवर्तं वर्तयति ]** 'वृतूङ् वर्तने' (९५५) वृत् । वर्तमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । करेण वर्तनं = करवर्तम् । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ पाणिवर्तं वर्तयति ]** 'वृतूङ् वर्तने' (९५५) वृत् । वर्तमानं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । पाणिना वर्तनं = पाणिवर्तम् । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिग्लुक् । हस्तेन वर्तयतीत्यर्थः ।

**[ हस्तवर्तं वर्तते ]** 'वृतूङ् वर्तने' (९५५) वृत् । हस्तेन वर्तनं = हस्तवर्तम् । अनेन णम्प्र० → अम् । । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ करवर्तं वर्तते ]** 'वृतूङ् वर्तने' (९५५) वृत् । करेण वर्तनं = करवर्तम् । अनेन णम्प्र० → अम् । । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पाणिवर्तं वर्तते ]** 'वृतूङ् वर्तने' (९५५) वृत् । पाणिना वर्तनं = पाणिवर्तम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । हस्तेन वर्तते इत्यर्थः ॥छ॥

## बन्धेर्नाम्नि ॥ ५।४।६७ ॥

**[ बन्धेः ]** बन्धि पञ्चमी ङसि ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

नाम्नीत्यस्य संबंधात् बन्धिशब्दो बन्धिधातुप्रकृतौ बन्धविशेषनाम्नि च क्रौञ्चादौ विशेषणत्वेन प्रत्ययान्तो वर्त्तते, अतो बन्धविशेषक्रौञ्चशब्दादयो बन्धिधातुस्तस्मात् णम् भवतीत्यर्थः ।

**[ क्रौञ्चबन्धं बद्धः ]** क्रौञ्चाकारो बन्धः = क्रौञ्चः । 'बन्धंश् बन्धने' (१५५२) बन्ध् । क्रौञ्चेन बन्धनं = क्रौञ्चबन्धनम् । अनेन णम्प्र० → अम् ।

**[ मयूरिकाबन्धं बद्धः ]** मयूरिकया बन्धनं = मयूरिकाबन्धम् । अनेन णम्प्र० → अम् ।

**[ चण्डालिकाबन्धं बद्धः ]** चण्डालिकया बन्धनं = चण्डालिकाबन्धम् । अनेन णम्प्र० → अम् ।

क्रौञ्चादीनि बन्धनामधेयानि, क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते, तेन बन्धेन बद्ध इत्यर्थः ॥छ॥

## आधारात् ॥ ५।४।६८ ॥

**[ आधारात् ]** आधार पञ्चमी ङसि ।

**[ चक्रबन्धं बद्धः ]** चक्रे बन्धनं = चक्रबन्धम् । अनेन णम्प्र० → अम् ।

**[ चारकबन्धं बद्धः ]** चारके बन्धनं = चारकबन्धम् । अनेन णम्प्र० → अम् ।

**[ कूटबन्धं बद्धः ]** कूटे बन्धनं = कूटबन्धम् । अनेन णम्प्र० → अम् ।

**[ गुप्तिबन्धं बद्धः ]** गुप्तौ बन्धनं = गुप्तिबन्धम् । अनेन णम्प्र० → अम् ।

चक्रादिषु बद्ध इत्यर्थः ॥छ॥

## कर्तुर्जीव-पुरुषान्नश-वहः ॥ ५।४।६९ ॥

**[ कर्तुः ]** कर्तृ पञ्चमी ङसि ।

**[ जीवपुरुषात् ]** जीवश्च पुरुषश्च = जीवपुरुषम्, तस्मात् ।

**[ नशवहः ]** नशश्च वह् च = नशवह, तस्मात् ।

**[ जीवनाशं नश्यति ]** जीव 'नशौच् अदर्शने' (१२०२) नश् । जीवस्य नशनं = जीवनाशम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । जीवन् नश्यतीत्यर्थः ।

**[ पुरुषवाहं वहति ]** पुरुष 'वहीं प्रापणे' (९९६) वह् । पुरुषस्य वहनं = पुरुषवाहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः ॥छ॥

## ऊर्ध्वात् पूः-शुषः ॥ ५।४।७० ॥

**[ ऊर्ध्वात् ]** ऊर्ध्व पञ्चमी ङसि ।

**[ पूःशुषः ]** पूश्च शुष् च = पूःशुष्, तस्मात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ऊर्ध्वपूरं पूर्यते]** ऊर्ध्व 'पूरैचि आप्यायने' (१२६८) पूर् । ऊर्ध्वस्य पूरणं = ऊर्ध्वपूरम् । अनेन णम्प्र० → अम् ।

**[ऊर्ध्वशोषं शुष्यति]** ऊर्ध्व 'शुषंच् शोषणे' (१२०८) शुष् । ऊर्ध्वस्य शोषणं = ऊर्ध्वशोषम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । ऊर्ध्वः शुष्यतीत्यर्थः ॥छ॥

## व्याप्याच्चेवात् ॥ ५।४।७१ ॥

**[व्याप्यात्]** व्याप्य पञ्चमी ङसि ।

**[च]** च प्रथमा ङसि ।

**[इवात्]** इव पञ्चमी ङसि ।

**[सुवर्णनिधायं निहितः]** सुवर्ण-निपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । सुवर्णस्येव निधानं = सुवर्णनिधायम् । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । सुवर्णमिव निहित इत्यर्थः ।

**[रत्ननिधायं निहितः]** रत्न-निपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । रत्नस्येव निधानं = रत्ननिधायम् । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[घृतनिधायं निहितः]** घृत-निपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । घृतस्येव निधानं = घृतनिधायम् । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[शाकक्लेशं क्लिष्टः]** शाक 'क्लिशौश् विबाधने' (१५५७) क्लिश् । शाकस्येव क्लेशनं = शाकक्लेशम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । क्लिश्यते स्म = क्लिष्टः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यज-सृज-मृज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

**[ओदनपाचं पक्वः]** ओदन 'डुपचींष् पाके' (८९२) पच् । ओदनस्येव पचनं = ओदनपाकम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । पच्यते स्म = पक्वः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'क्षै-शुषि-पचो म-क-वम्' (४।२।७८) त० → व० । 'च-जः क-गम् (२।१।८६) च० → क० ।

कर्तुः - **[काकनाशं नष्टः]** काक 'नशौच् अदर्शने' (१२०२) नश् । काकस्येव नशनं = काकनाशम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । नश्यते स्म = नष्टः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'नशो धुटि' (४।४।१०९) नोऽन्तः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'यज-सृज-मृज-राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० । काक इव नष्ट इत्यर्थः ।

**[जमालिनाशं नष्टः]** चमू (३८०) - छमू (३८१) - 'जमू अदने' (३८२) जम् । जमतीति जमः । 'अच्' (५।१।४९) अच्प्र० → अ । 'अलं(ली) भूषण-पर्याप्ति-वारणेषु' (९१९) अल् । जमं-भोजनं कारकं अलति-वारयतीत्येवंशीलः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

जमश्चासावलिश्च = जमालिस्तस्मै नशनं = जमालिनाशम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । नश्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'नशो धुटि' (४।४।१०९) नागमः । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । शेषं पूर्ववत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अभ्रविलायं विलीनः]** अभ्र विपूर्व० 'लींङ्च् श्लेषणे' (१२४८) ली । अभ्रमिव विलीनं = अभ्रविलायम् । अनेन णम्प्र० → अम् । 'लीङ्-लिनोर्वा' (४।२।९) ला । 'आत ऐः कृञ्जौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । विलीयते स्म । क्तप्र० → त । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । अभ्रमिव विलीन इत्यर्थः ।।छा।

## उपात् किरो लवने ।। ५।४।७२ ।।

**[उपात्]** उप पञ्चमी ङसि ।

**[किरः]** किर् पञ्चमी ङसि ।

**[लवने]** लवन सप्तमी ङि ।

लवन इति वचनात् तस्यैवेति निवृत्तम्, इत ऊर्ध्वं तस्यैव अन्यस्यैव कामचारः, परं यत्र तस्यैव तत्र क्रियाविशेषणमेव ।

**[उपस्कारं मद्रका लुनन्ति]** उपपूर्व० 'कृत् विक्षेपे' (१३३४) कृ । 'किरो लवने' (४।४।९३) स्सट् → स० । उपस्कीर्यते = उपस्कारम् । अनेन णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । प्रथमा सि । 'अव्ययस्य (३।२।७) सिलुप् । मद्रक प्रथमा जस् । 'लूगृश् छेदने' (१५१९) लू । वर्त्त० अन्ति । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । 'श्नश्चाऽऽतः' (४।२।९६) आलुक् । विक्षिपन्तो लुनन्तीत्यर्थः । पूर्वं विक्षिपन्त(:) पश्चाल्लुनन्तीत्यर्थः ।

**[उपकीर्य गच्छति]** उपकरणं पूर्वं = उपकीर्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४), क्त्वा → यप् । 'ॠतां क्ङितीर्' (४।४।११६) इर् । 'भ्वादेर्नामिनो'० (२।१।६३) कि० → की० गच्छति ।।छा।

## दंशेस्तृतीयया ।। ५।४।७३ ।।

**[दंशेः]** दंशि पञ्चमी ङसि ।

**[तृतीयया]** तृतीया तृतीया टा । तिसृणां पूरणी = तृतीया, तया ।

**[मूलकेनोपदंशं, मूलकोपदंशं भुङ्क्ते, पक्षे-मूलकेनोपदश्य भुङ्क्ते]** उपपूर्व० 'दंशं दशने' (४९६) दंश् । मूलकेनोपदश्य = मूलकोपदंशं भुङ्क्ते । अनेन णम्प्र० । 卐'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'तृतीयोक्तं वा' (३।१।५०) समासः । 'ऐकार्थ्ये' (३।२।८) तृतीयालोपः । पक्षे-उपदंशनं पूर्वं = उपदश्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 卐'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक्, भुङ्क्ते ।

**[आर्द्रकेणोपदंशं, आर्द्रकोपदंशं भुङ्क्ते, पक्षे-आर्द्रकेणोपदश्य भुङ्क्ते]** उपपूर्व० 'दंशं दशने' (४९६) दंश् । आर्द्रकेणोपदश्य = आर्द्रकेणोपदंशम् । अनेन णम्प्र० → अम् । 卐'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'तृतीयोक्तं वा' (३।१।५०) समासः । 'ऐकार्थ्ये' (३।२।८) तृतीयालोपः । पक्षे उपदंशनं पूर्वं = उपदश्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 卐 'नो व्यञ्जन'० (४।२।४५) नलुक्, भुङ्क्ते ।

मूलकाद्युपदंशेः कर्मापि प्रधानस्य भुजेः करणमिति तृतीयैव भवति । प्रधानक्रियोपयुक्ते हि कारके गुणक्रिया न स्वानुरूपं(पां) विभक्तिमुत्पादयितुमलमप्रधानत्वादेव, यथेष्यते ग्रामो गन्तुम् ।।छा।

## हिंसार्थादेकाप्यात् ।। ५।४।७४ ।।

**[हिंसार्थात्]** हिंसा अर्थो यस्य सः = हिंसार्थस्तस्मात् ।

---

卐 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) इति सूत्रस्य प्रवृत्तिरत्र असङ्गता भाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[एकाप्यात्]** एकमाप्यं-कर्म यस्य सः = एकाप्यस्तस्मात् ।

**हिंसा - प्राणिघातस्तदर्थात् ।**

**[दण्डेनोपघातं, दण्डोपघातं गाः सादयति]** उप 'हनंक् हिंसा-गत्योः' (११००) हन् । दण्डेनोपहत्य = दण्डेनोपघातं - दण्डोपघातम् । अनेन णम्प्र० → अम् । 'ञ्णिति घात्' (४।३।१००) घात् ।

गो द्वितीया शस् । 'आ अम्-शसोऽता' (१।४।७५) गाः ।

'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव'० (२।३।९८) सद् । सीदतीः प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'ञ्णिति घात्' (४।३।५०) उपान्त्यवृद्धिः आ । वर्त्त० तिव् । 'कर्त्तर्यनदभ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[खड्गेन प्रहारं खड्गप्रहारं शत्रून् विजयते]** 'हृंग् हरणे'(८८५) हृ, प्रपूर्व० । खड्गेन प्रहृत्य = खड्गेन प्रहारं-खड्गप्रहारम् । अनेन णम्प्र० → अम् । 'नामिनोऽकलि-हलिः' (४।३।५१) वृ० आर् ।

**[दण्डेनाताडं, दण्डाताडं गाः कलयति]** 'तडण् आघाते' (१६२६) तड्, आङ्पूर्व० । दण्डेनाताड्य = दण्डेनाताडं - दण्डाताडम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

गो द्वितीया शस् । 'आ अम्-शसोऽता' (१।४।७५) गाः ।

'कलण् रक्षणे (संख्यान-गत्योः') (१९१२) कल । 'चुरादि'० (३।४।१७) णिच्प्र० । वर्त्त० तिव् । 'कर्त्तर्यनदभ्यः शव्' (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

पक्षे - **[दण्डेनोपहत्य गाः कलयति]** उपहननं पूर्वं = उपहत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'यपि' (४।२।५६) पञ्चमलोपे 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः ।

**[चन्दनेनानुलिप्य जिनं पूजयन्ति]** चन्दनेन अनु 'लिपींत् उपदेहे' (१३२४) लिप् । अनुलेपनं पूर्वं = अनुलिप्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्'(३।२।१५४) यप् । जिन द्वितीया अम् । 'पूजण् पूजायाम्' (१५८६) पूज् । 'चुरादि'० (३।४।१७) णिच्प्र० । वर्त्त० अन्ति । 'कर्त्तर्य'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[दण्डेनाहत्य चौ(चो)रं गोपालको गाः खेटयति]** 'हनंक् हिंसा-गत्योः' (११००) हन्, आङ्पूर्व० । आहननं पूर्वं = आहत्य । 'यपि' (४।२।५६) नलुक् । चोर द्वितीया अम् । किट (१७७) - खिट उत्त्रासे (१७८) खिट् । खेटन्तं प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । वर्त्त० तिव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।।छ।।

## उपपीड-रुध-कर्षस्तत्सप्तम्या ॥ ५।४।७५ ॥

**[उपपीडरुधकर्षः]** पीडश्च रुधश्च कर्षश्च = पीडरुधकर्षम् । उपात् पीडरुधकर्षं = उपपीडरुधकर्षम्, अत एवं निर्देशात् सूत्रत्वात् कर्षस्य अकारलोपः ।

**[तत्सप्तम्या]** तया-तृतीयया युक्ता सप्तमी = तत्सप्तमी, तया ।

**[पार्श्वाभ्यामुपपीडं, पार्श्वोपपीडं शेते]** 'पीडण् गहने' (१६२५) पीड्, उपपूर्व० । 'चुरादि'० (३।४।१७) णिच्प्र० । पार्श्वाभ्यामुपपीडं(पीड्य) = पार्श्वोपपीडम् । अनेन णम्प्र० → अम्, शेते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पार्श्वयोरुपपीडं, पार्श्वोपपीडं शेते ]** पार्श्वयोरुपपीड्य = पार्श्वयोरुपपीडं-पार्श्वोपपीडम् । अनेन णम्प्र० → अम्, शेते ।

**[ व्रजेनोपरोधं, व्रजोपरोधं गाः सादयति ]** उप 'रुधूंपी आवरणे' (१४७३) रुध् । व्रजेन उपरुध्य । अनेन णम्प्र० → अम् । गाः-द्वितीया शस् ।

**[ व्रजे उपरोधं, व्रजोपरोधं गाः स्थापयति ]** व्रजे उपरुध्य । अनेन णम्प्र० → अम् । गाः-द्वितीया शस् । तिष्ठतीः प्रयुङ्क्ते । 'प्रयोक्तृ'० (३।४।२०) णिग्प्र० । 'अर्त्ति-री-व्ली-ह्री-क्नूयि'० (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्य'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पाणिनोपकर्षं, पाण्युपकर्षं धानाः पिनष्टि ]** 'कृषं विलेखने' (५०६) कृष्, उपपूर्व० । न तु तौदादिकस्य ग्रहणम् । पाणिना उपकृष्य । अनेन णम्प्र० → अम् । धानाः - द्वितीया शस् । पिनष्टि ।

**[ पाणावुपकर्षं, पाण्युपकर्षं धाना गृह्णाति ]** उप 'कृषं विलेखने' (५०६) कृष् । पाणावुपकृष्य । अनेन णम्प्र० → अम् । धानाः-द्वितीया शस् । गृह्णाति ।

कर्ष इति शव्निर्देशाद् भौवादिकस्य **"कर्षति( न्ति ) शाखां ग्रामम्"** इति द्विकर्मकस्याकर्षणार्थस्य ग्रहणम् ।

**[ पार्श्वेन निपीड्य तिष्ठति ]** पार्श्व तृतीया टा । निपीडनं पूर्वं = निपीड्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ व्रजरोधं गाः स्थापयति ]** व्रजे-व्रजेन वा रुध्य = व्रजरोधम् । मतान्तरे अनेनैव णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ हस्तरोधं दधद् धनुः ]** हस्ते - हस्तेन वा रुध्य = हस्तरोधम् । मतान्तरेऽनेनैव णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ ।

**[ व्रजानुरोधं गाः स्थापयति ]** व्रजेन-व्रजे वा अनुरुध्य = व्रजानुरोधम् । मतान्तरे णम्प्र० → अम् ।

**[ पाणिकर्षं धाना गृह्णाति ]** पाणिना-पाणौ वा कृष्य = पाणिकर्षम् । मतान्तरे णम्प्र० → अम् ।

एवमग्रेऽपि, परं विभक्तिर्न लुप्यते ॥छ॥

### प्रमाण-समासत्त्योः ॥ ५।४।७६ ॥

**[ प्रमाणसमासत्त्योः ]** प्रमाणश्च समासत्तिश्च = प्रमाणसमासत्ती, तयोः = प्रमाणसमासत्त्योः । सप्तमी ओस् ।

**आयाममानं-प्रमाणम् । समासत्तिः-संरम्भपूर्वकः संनिकर्षः ।**

**मनःक्षोभपूर्वको वाक्कायविकारविशेषः = संरम्भः ।**

**[ द्व्यङ्गुलेनोत्कर्षं, द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति ]** द्वि-अङ्गुलि मण्ड्यते । द्वयोरङ्गुल्योः समाहारः = द्व्यङ्गुलम्, तेन । 'संख्या-ऽव्ययादङ्गुलेः' (७।३।१२४) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

द्वे अङ्गुली प्रमाणमस्येति तु न कर्त्तव्यं, तस्मिन् हि न प्रमाणप्रतीतिः, किन्तु प्रमावतः(प्रमाणतः) द्व्यङ्गुलेनोत्कर्षं = द्व्यङ्गुलोत्कर्षम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । एवम्-

**[ द्व्यङ्गुले उत्कर्षं, द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति ]** द्व्यङ्गुले उत्कृष्य । अनेन णम्प्र० → अम् ।

समासत्तौ - **[ केशैर्ग्राहं, केशग्राहं युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । केशैर्गृहीत्वा । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ केशेषु ग्राहं, केशग्राहं युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । केशेषु गृहीत्वा । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ हस्तग्राहं युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । हस्तेन-हस्ते वा गृहीत्वा = हस्तग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

**[ अस्युपनोदं युध्यन्ते ]** उप 'णुदंत् प्रेरणे' (१३७०) णुद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नुद् । असिना उपनुद्य = अस्युपनोदम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । युद्धार्थसंरम्भादत्यन्तं संनिकृष्य युध्यन्ते इत्यर्थः ।

पक्षे - **[ द्व्यङ्गुलेनोत्कृष्य, द्व्यङ्गुले उत्कृष्य गण्डिकाश्छिनत्ति ]** द्व्यङ्गुलाय(द्व्यङ्गुलेन) उत्कर्षणं पूर्वं = उत्कृष्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) क्त्वा → यप् । एवम् सप्तम्याम् ।

**[ केशैर्गृहीत्वा, केशेषु गृहीत्वा युध्यन्ते ]** केशैः - केशेषु वा ग्रहणं पूर्वं = गृहीत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ॥छ॥

## पञ्चम्या त्वरायाम् ॥ ५।४।७७ ॥

**[ पञ्चम्या ]** पञ्चमी तृतीया टा ।

**[ त्वरायाम् ]** त्वरा सप्तमी ङि ।

**त्वरा परीप्सा - औत्सुक्यमिति यावत् ।**

**[ शय्याया उत्थायं, शय्योत्थायं धावति ]** 'शीङ्क् स्वप्ने' (११०५) शी । शेरते जना अस्यामिति शय्या । 'समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः' (५।३।९९) क्यप्प्र० → य । 'क्ङिति यि शय्' (४।३।१०५) ''शय्''आदेशस्तत आप्प्र० । उत् 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव'० (२।३।९८) स्था । निमित्ताभावे'० (न्या० सं० वक्ष० (१)/सूत्र (२९)) स्था । शय्याया उत्थायं = शय्योत्थायं धावति । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । 'उदः स्था-स्तम्भः सः' (१।३।४४) सलुक् ।

एवं नाम त्वरयते(त्वरते) यदावश्यकादिकमपि नापेक्षते ।

**[ स्तनरन्ध्रादपकर्षं, स्तनरन्ध्रापकर्षं पयः पिबति ]** स्तनं(न)रन्ध्रादपकर्षं = स्तनरन्ध्रापकर्षम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । पयस् द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लुप्, पिबति । एवं नाम त्वरयते(त्वरते), यत् पात्रे दोहमप्यप्रतीक्ष्य मुखे एव पयः पिबतीत्यर्थः ।

पक्षे - **[ शय्याया उत्थाय धावति ]** शय्या पञ्चमी ङसि । उत्थानं पूर्वं = उत्थाय । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'धावूग् गति-शुद्ध्योः' (९२०) धाव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ॥छ॥

## द्वितीयया ॥ ५।४।७८ ॥

**[ द्वितीयया ]** द्वितीया तृतीया टा ।

**[ लोष्टान् ग्राहं, लोष्टग्राहं युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । लोष्टान् गृहीत्वा = लोष्टान् ग्राहं - लोष्टग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'युधिंच् सम्प्रहारे' (१२६०) युध् । वर्त्त० अन्ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ यष्टीर्ग्राहं, यष्टिग्राहं युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । यष्टीर्गृहीत्वा = यष्टीर्ग्राहं - यष्टिग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'युधिच् सम्प्रहारे' (१२६०) युध् । वर्त्त० अन्ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'लुगस्या'० (२।१।११३) अलुक् ।

**[ दण्डमुद्यामं, दण्डोद्यामं धावति ]** उत् 'यमूं उपरमे'(३८६) यम् । दण्डमुद्यम्य = दण्डमुद्यामं - दण्डोद्यामम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ, धावति । एवं नाम योद्धुं त्वरन्ते, यद् आयुधग्रहणमपि नाद्रियन्ते, यत् किञ्चिदासन्नं तदेव गृह्णन्तीत्यर्थः । पक्षे -

**[ लोष्टान् यष्टीर्गृहीत्वा युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७)ग्रह् । ग्रहणं पूर्वं = गृहीत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'ग्रह-व्रस्व-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

**[ खड्गं गृहीत्वा युध्यन्ते ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । ग्रहणं पूर्वं = गृहीत्वा । शेषं पूर्ववत् ॥छा॥

## स्वाङ्गेनाऽध्रुवेण ॥ ५।४।७९ ॥

**[ स्वाङ्गेन ]** स्वमङ्गं = स्वाङ्गम्, तेन = स्वाङ्गेन ।

**[ अध्रुवेण ]** न ध्रुवमध्रुवम्, तेन = अध्रुवेण ।

"अविकारोऽद्रवं मूर्त्तम्" इत्यादिलक्षणं **स्वाङ्गम्,** यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते **तदध्रुवम्,** यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी म्रियते तद् **ध्रुवमिति** सामर्थ्यादुक्तं भवति ।

**[ भ्रुवौ विक्षेपं, भ्रूविक्षेपं जल्पति ]** विपूर्व० 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । भ्रुवौ विक्षिप्य = भ्रूविक्षेपम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए, जल्पति ।

**[ अक्षिणी निकाणमक्षिनिकाणं हसति ]** 'कणण् निमीलने' (१७३७) कण् । 'चुरादि'० (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । अक्षिणी निकाणमक्षिनिकाणं हसति । अनेन णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ केशान् परिधायं, केशपरिधायं नृत्यति ]** परिपूर्व० 'डुधांग्क् धारणे च' (११३९) धा । केशान् परिधायं = केशपरिधायं नृत्यति । अनेन णम्प्र० → अम् । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ प्रतिमायाः पादावनुलेपं, पादानुलेपं प्रणमति ]** अनुपूर्व० 'लिपींत् उपदेहे' (१३२४) लिप् । पादावनुलिप्य = पादावनुलेपं प्रणमति । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । पक्षे -

**[ भ्रुवौ विक्षिप्य जल्पति ]** विपूर्व० 'क्षिपींत् प्रेरणे' (१३१७) क्षिप् । विक्षेपणं पूर्वं = विक्षिप्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ कफमुन्मूल्य जल्पति ]** उत्पूर्व० 'मूल प्रतिष्ठायाम्' (४२७) मूल् । उन्मूलनमुन्मूल्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ।

**[ शिर उत्क्षिप्य कथयति ]** उत्पूर्व० क्षिपींत् प्रेरणे' (१३१७) क्षिप् । शिरस् द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लुप् । उत्क्षेपणं = उत्क्षिप्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप्, कथयति ॥छा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परिक्लेश्येन ॥ ५।४।८० ॥

**[ परिक्लेश्येन ]** परि क्लिशैं(शि)च् परि(उप)तापे (१२७६) क्लिश् । परि-समन्तात् क्लिश्यमानं-पीड्यमानं = परिक्लेश्यम्, तेन = परिक्लेश्येन । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए ।

ध्रुवार्थोऽयमारम्भः ।

**[ उरांसि प्रतिपेषमुरःप्रतिपेषं युध्यन्ते ]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष्, प्रतिपूर्व० । उरांसि प्रतिपेषमुरः-प्रतिपेषम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । उरांसि परितः पीडयन्तो युध्यन्त इत्यर्थः ।

**[ शिरांसि च्छेदं, शिरश्छेदं युध्यन्ते ]** 'छिदूंपी द्वैधीकरणे' (१४७८) छिद् । शिरांसि छिद्य(छित्त्वा) = शिरांसि च्छेदं-शिरश्छेदम्। अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । शिरांसि छिन्दन्तो युध्यन्त इत्यर्थः ।

पक्षे - **[ उरांसि प्रतिपिष्य युध्यन्ते ]** उरस् द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । प्रतिपेषणं पूर्वं = प्रतिपिष्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) क्त्वा → यप्० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ शिरांसि छित्त्वा युध्यन्ते ]** 'छिदूंपी द्वैधीकरणे' (१४७८) छिद् । छेदनं पूर्वं = छित्त्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अघोषे'० (१।३।५०) द० → त० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ॥छा॥

## विश-पत-पद-स्कन्दो वीप्सा-ऽऽभीक्ष्ण्ये ॥ ५।४।८१ ॥

**[ विशपतपदस्कन्दः ]** विशश्च पतश्च पदश्च स्कन्द् च = विशपतपदस्कन्द, तस्मात् ।

**[ वीप्साऽऽभीक्ष्ण्ये ]** वीप्सा च आभीक्ष्ण्यं च = वीप्साऽऽभीक्ष्ण्यम्, तस्मिन् ।

**श्रुतत्वाद् विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा = वीप्सा । प्रकृत्यर्थस्य 卐 पौनःपुण्यस्या-सेवनमाभीक्ष्ण्यम् ।** अनुष्ठातुमारब्धाया क्रियाया व्यापारा(रे)तरपरिहारेणानुष्ठानमाभीक्षीक्ष्ण्यमित्यर्थः । यदाहुः - सुप्सु सुबन्तेषु स्याद्यन्तेषु वीप्सा, तिङ्षु त्याद्यन्तेषु अव्ययकृत्सु क्तादिषु चाभीक्ष्ण्यम् ।

**[ गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते ]** अनु-प्रपूर्व० 'विशंत् प्रवेशने' (१४१५) विश् । गेहमनुप्रविश्य = गेहं गेहमनुप्रवेशं-गेहानुप्रवेशम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'वीप्सायाम्' (७।४।८०) द्विर्वचनम् ।

**[ गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते ]** गेहमनुप्रविश्य = गेहमनुप्रवेशमनुप्रवेशम् । अनेन णम्प्र० → अम् । 'भृशा-ऽऽभीक्ष्ण्याऽविच्छेदे'० (७।४।७३) द्विर्वचनम् । गेहमनुप्रविश्य = गेहानुप्रवेशम् । अनेन णम्प्र० → अम् । 'तृतीयोक्तं वा' (३।१।५०) इत्यत्र समासः ।

**[ गेहं गेहमनुप्रपातं गेहानुप्रपातमास्ते ]** प्रपूर्व० 'पत्लृ गतौ' (९६२) पत् । गेहमनुप्रपत्य = गेहं गेहमनुप्रपातम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'वीप्सायाम्' (७।४।८०) द्विर्वचनम् ।

**[ गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते ]** प्रपूर्व० 'पत्लृ गतौ (९६२) पत् । गेहमनुप्रपत्य = गेहमनुप्रपातमनुप्रपातम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विर्वचनम् ।

---

卐 बृहद्वृत्तौ - पौनःपुन्येनासेवनमाभीक्ष्ण्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते ]** अनु-प्रपूर्व० 'पदिंच् गतौ' (१२५७) पद् । गेहमनुप्रपद्य = गेहं गेहमनुप्रपादम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'वीप्सायाम्' (७।४।८०) द्विर्वचनम् ।

**[ गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते ]** अनु-प्रपूर्व० 'पदिंच् गतौ' (१२५७) पद् । गेहमनुप्रपद्य = गेहमनुप्रपादमनुप्रपादम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विर्वचनम् ।

**[ गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते ]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द्, अवपूर्व० । गेहमवस्कन्द्य = गेहं गेहमवस्कन्दम् । अनेन णम्प्र० → अम् । 'वीप्सायाम्' (७।४।८०) द्विः ।

**[ गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते ]** 'स्कन्दृं गति-शोषणयोः' (३१९) स्कन्द्, अवपूर्व० । गेहमवस्कन्त्वा = गेहमवस्कन्दमवस्कन्दम् । अनेन णम्प्र० → अम् । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विर्वचनम् । पक्षे -

**[ गेहं गेहमनुप्रविश्यास्ते ]** गेह द्वितीया अम् । 'वीप्सायाम्' (७।४।८०) द्विः । अनुप्रवेशनं पूर्वं = अनुप्रविश्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ।

**[ गेहमनुप्रविश्याऽनुप्रविश्यास्ते ]** गेहमनुप्रवेशनं पूर्वं = अनुप्रविश्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे'० (७।४।७३) द्विर्वचनम् ।

वीप्सायामुपपदस्य, आभीक्ष्ण्ये तु धातोर्द्विर्वचनम् ।

**[ गेहानुप्रवेशमास्ते ]** गेहं(२) अनुप्रविश्य = गेहानुप्रवेशम् । यद्वा गेहमनुप्रविश्य अनुप्रविश्य = गेहानुप्रवेशम् । अनेन णम्प्र० इत्यादौ तु वीप्साक्षीक्ष्ण्ये शब्दशक्तिस्वाभाव्यात् समासेनैवोक्ते इति द्विर्वचनं न भवति ।

आभीक्ष्ण्ये णम् सिद्ध एव, 'तृतीयोक्तं वा' (३।१।५०) इत्यनेन विकल्पेनोपपदसमासार्थं वचनम्, तेन हि समासाभावः स्यात् ॥छा॥

## कालेन तृष्यस्वः क्रियान्तरे ॥ ५।४।८२ ॥

**[ कालेन ]** काल तृतीया टा ।

**[ तृष्यस्वः ]** तृषिश्च असूश्च = तृष्यसूः, तस्मात् ।

**[ क्रियान्तरे ]** अन्तरं करोति । 'णिज्बहुलं'० (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । क्रियामन्तरयतीति क्रियान्तरः, तस्मिन् । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

**[ द्व्यहं तर्षं, द्व्यहतर्षं गावः पिबन्ति ]** द्वि-अहन् मण्ड्यते । द्वयोरह्नोः समाहारः, द्वे अह्नी समाहृते वा । 'द्विगोरन्नह्नोऽट्' (७।३।९९) अट्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । द्वि० अम् । 'कालाध्वनोर्व्याप्तौ' (२।२।४२) इत्यनेन द्वितीया । 'ञितृषच् पिपासायाम्' (१२१२) तृष् । द्व्यहं तर्षित्वा = द्व्यहं तर्षं-द्व्यहतर्षम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[ द्व्यहमत्यासं, द्व्यहात्यासं गावः पिबन्ति ]** अति 'असूच् क्षेपणे' (१२२१) अस् । द्व्यहमत्यस्य = द्व्यहमत्यासं-द्व्यहात्यासम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । गावः-प्रथमा जस् । पिबन्ति । तर्षेण अत्यासेन च गवां पानक्रिया व्यधीयते, अद्य पीत्वा द्व्यहमतिक्रम्य पिबन्तीत्यर्थः ।

**[ अन्तर्मुहूर्त्तमत्यासमन्तर्मुहूर्त्तात्यासं सम्यक् पश्यन्ति ]** अन्तर्मुहूर्त्त द्वितीया अम् । अन्तर्मुहूर्त्तमत्यस्य = अन्तर्मुहूर्त्तमत्यासमन्तर्मुहूर्त्तात्यासम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । सम्यक् पश्यन्ति । सम्यग्दृष्ट्याऽन्तर्मुहूर्त्तं मिथ्यात्वमनुभूय पुनः सम्यग्दृष्टयो भवन्तीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[योजनं तर्षित्वा गावः पिबन्ति]** योजन द्वितीया अम् । 'ञितृषच् पिपासायाम्' (१२१२) तृष् । तर्षणं पूर्वं = तर्षित्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् ।

**[योजनमत्यस्य गावः पिबन्ति]** अतिपूर्व० 'असूच् क्षेपणे' (१२२१) अस् । अत्यसनं पूर्वं = अत्यस्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) क्त्वा० → यप् ।

**[द्व्यहमुपोष्य भुङ्क्ते]** उपपूर्व० 'वसं निवासे' (९९९) वस् । उपवसनं पूर्वं = उपोष्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'यजादि-वचेः किति' (४।१।७९) य्वृत् वस्य उ० । 'घस्-वसः' (२।३।३६) षत्वम् । 'अनञः क्त्वो यप् । 'अवर्णस्ये'० (१।२।६) ओ । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप्, भुङ्क्ते ।

**[अहरत्यस्येषून् गतः]** अहन् 'कालाध्वनोर्व्याप्तौ' (२।२।४२) द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लुप् । 'रो लुप्यरि' (२।१।७५) रत्वम् । अत्यसनं पूर्वं = अत्यस्य । इषून्-द्वितीया शस्, गतः । इहात्यासेनाहः-इषवश्च व्याप्यन्ते न तु गतिक्रिया व्यवधीयते ॥छा॥

## नाम्ना ग्रहा-ऽऽदिशः ॥ ५।४।८३ ॥

**[नाम्ना]** नामन् तृतीया टा ।

**[ ग्रहाऽऽदिशः]** ग्रहश्च आदिश् च = ग्रहाऽऽदिश्, तस्मात् ।

**[नामानि ग्राहं, नामग्राहमाह्वयति]** नामन् द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शि० → इ० । 'नि दीर्घः' (१।४।८५) दीर्घः ।

'ग्रहीश् उपादाने' (१५१७) ग्रह् । नामानि गृहीत्वा = नामानि ग्राहं - नामग्राहम् । अनेन णम्प्र० → अम् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ ।

आङ्पूर्व० 'ह्वेंग् स्पर्धा-शब्दयोः' (९९४) ह्वे । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[नाम्नी देवदत्तो ग्राहं, नामग्राहं देवदत्त आह्वयति]** नाम्नी-औ । देवदत्तो ग्राहं-नाम्नी गृहीत्वा वाक्यं, नामग्राहम् । अनेन णम्प्र० । 'यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन सः' (न्या० सं० वक्ष० (३)/सूत्र(२)) इति न्यायात् देवदत्तपदेन व्यवधानेऽपि भवति ।

**[नामान्यादेशं, नामादेशं ददाति]** 'दिशीं्त् अतिसर्जने' (१३१८) दिश्, आङ्पूर्व० । नामान्यादिश्य = नामान्यादेशं-नामादेशम् । अनेन णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए, ददाति । पक्षे -

**[नाम गृहीत्वा दत्ते]** नामन् द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लुप् । ग्रहीश् उपादाने (१५१७) ग्रह् । ग्रहणं पूर्वं = गृहीत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । इट् । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः ।

**[नामाऽऽदिश्य दत्ते]** नामन् द्वितीया अम् । 'अनतो लुप्' (१।४।५९) अम्लुप् । आङ्पूर्व०, 'दिशीं्त् अतिसर्जने' (१५१७) दिश् । आदेशनं पूर्वं = आदिश्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ॥छा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वा-णमौ ॥ ५।४।८४ ॥

**[कृगः]** कृग् पञ्चमी ङसि ।

**[अव्ययेन]** अव्यय तृतीया टा ।

**[अनिष्टोक्तौ]** 卐न इष्टं = अनिष्टम्, अनिष्टस्य उक्तिरनिष्टोक्तिः, तस्याम् ।

**[क्त्वाणमौ]** क्त्वा च णम् च = क्त्वाणमौ ।

**[ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! नीचैः कृत्वा, नीचैःकृत्य कथयसि, किं तर्हि नीचैर्वृषल ! कारं वृषल ! नीचैःकारं कथयसि, उच्चैर्नाम प्रियमाख्येयम्]** ब्राह्मण-आमन्त्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् ।

पुत्र-प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

युष्मद् षष्ठी ङस् । 'ङे-ङसा ते-मे' (२।१।२३) ते ।

'जनैचि प्रादुर्भावे' (१२६५) जन् । जायते स्म = जातः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'आः खनि-सनि-जनः' (४।२।६०) न० → आ० ।

किम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

तद् । तस्मिन् अनद्यतने काले = तर्हि । 'अनद्यतने र्हिः' (७।२।१०१) र्हिप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

वृषल आमन्त्ये सि । नीच्चै(चै)स् 'क्रियाविशेषणात्' (२।२।४१) सि(अम्) । 'अव्ययस्य' (३।२।७) अम्लुप् । नीचैः करणं पूर्वं = नीचैः कृत्वा-नीचेःकृत्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः, कथयसि ।

नीचैः करणं पूर्वं = नीचैर्वृषल ! कारम् । अनेन णम्प्र० → अम् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[किं तर्हि वृषल ! उच्चैः कृत्वा, उच्चैःकृत्य कथयसि, किं तर्हि उच्चैर्वृषल ! कारं वृषलोच्चैःकारं कथयसि, नीचैर्नामाप्रियमाख्येयम्]** उच्चैः करणं पूर्वं = उच्चैः कृत्वा-उच्चैःकृत्य । अनेन क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः ।

**[उच्चैः कृत्वाऽऽचष्टे ब्राह्मण ! पुत्रस्ते जात इति]** उच्चैस् अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[नीचैः कृत्वाऽऽचष्टे ब्राह्मण ! कन्या ते गर्भिणी जातेति]** नीचैस् अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[किं तर्हि वृषल ! मन्दं कृत्वा कथयसि]** मन्दं पूर्ववत् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

---

卐 श० म० न्या० - अनिष्टोक्तिः - प्रियस्योच्चैरप्रियस्य नीचैःकथनमिष्टम्, तद्विपरीतमनिष्टम्, तथा चाप्रियस्योच्चैरुक्तिः प्रियस्य नीचैरनिष्टोक्तिरिति फलितम्, तदनुकूलमेव लक्ष्येषु सङ्गतिः स्पष्टीकृत्य प्रदर्शयिष्यते । तथा चात्रानिष्टा चासौ उक्तिश्चेति व्याख्येयम्, न त्वनिष्टस्योक्तिरिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ किं तर्हि वृषल ! तारं कृत्वा कथयसि ]** तार-अम् ।

वाऽधिकारेणैव पक्षे क्त्वायाः सिद्धौ समासार्थं तद्विधानम्, अन्यथा हि णम एव पाक्षिकः समासः स्यात्, न तु क्त्वः । क्त्वा चेत्यकृत्वा णम्विधानमुत्तरत्रोभयानुवृत्त्यर्थम् ॥छा॥

## तिर्यचाऽपवर्गे ॥ ५।४।८५ ॥

**[ तिर्यचा ]** तिर्यच् तृतीया टा ।

**[ अपवर्गे ]** वृजैण् वर्जने (१९५५) वृज्, अपपूर्व० । अपवृज्यत इति अपवर्गः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । 'क्तेऽनिटश्च-जोः क-गौ घिति' (४।१।१११) ज० → ग० । तस्मिन् ।

**अपवर्गः - क्रियासमाप्तिः, समाप्तिपूर्वको वा विरामः त्यागो वा ।**

**[ तिर्यक् कृत्वा, तिर्यक्कृत्य, तिर्यक्कारमास्ते ]** तिरस् 'अञ्चू गतौ च' (१०५) अञ्च् । तिरोऽञ्चति । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'तिरसस्तिर्यति (३।२।१२४) इति तिरसः "तिरि"आदेशः । तिर्यचि देशे = तिर्यक् । दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः' (७।२।११३) इत्यादिना धा । 'लुबञ्चेः' (७।२।१२३) इत्यनेन धालोपः । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लुप । तिर्यक्करणं पूर्वं = तिर्यक् कृत्वा, तिर्यक्कृत्य, तिर्यक्कारम् । अनेन क्त्वा - णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । 'ऐकार्थ्ये' (३।२।८) अम्लोपः । समाप्य-विरम्य वा-उत्सृज्य वाऽऽऽस्ते इत्यर्थः ।

**[ तिर्यक् कृत्वा काष्ठं गतः ]** तिर्यक् पूर्ववत् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । काष्ठ द्वितीया अम् ॥छा॥

## स्वाङ्गतश्च्व्यर्थे* नाना-विना - धार्थेन भुवश्च ॥ ५।४।८६ ॥

**[ स्वाङ्गतश्च्व्यर्थे नानाविनाधार्थेन ]** 卐नानाश्च विनाश्च धार्थश्च = नानाविनाधार्थम्, च्व्यर्थे नानाविनाधार्थं = च्व्यर्थनानाविनाधार्थम्, स्वाङ्गात् = स्वाङ्गतः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस्' (७।२।८९) पित्तस्प्र० । स्वाङ्गतश्च्व्यर्थनानाविनाधार्थं = स्वाङ्गतश्च्व्यर्थनानाविनाधार्थम्, तेन ।

**[ भुवः ]** भू पञ्चमी ङसि । 'धातोरिवर्णोवर्णस्येयुव्'० (२।१।५०) उव् ।

**[ च ]** च प्रथमा सि ।

स्वाङ्गमुक्तलक्षणम्, वचनभेदाद् धातु-प्रत्ययथासंख्यं नास्ति ।

**[ मुखतो भूत्वा, मुखतोभूय, मुखतोभावमास्ते ]** मुखे = मुखतः । 'आद्यादिभ्यः' (७।२।८४) तस्प्र० । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । मुखतो भवनं पूर्वं = मुखतो भूत्वा, मुखतोभूय, मुखतोभावम् । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव्, आस्ते ।

**[ मुखतः कृत्वा, मुखतःकृत्य, मुखतःकारमास्ते ]** मुखतः करणं पूर्वं = मुखतः कृत्वा, मुखतःकृत्य, मुखतः-कारम् । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् । आस्ते ।

---

卐 श० म० न्या० - नाना च विना च धार्थश्चेति विग्रहेऽत्र समासः ।

* ढुण्ढिकादर्शितप्रक्रियानुरूपं त्वत्र 'च्व्यर्थनाना०' इति सामासिकं पदं भवति - सं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ पार्श्वतो भूत्वा, पार्श्वतोभूय, पार्श्वतोभावं शेते ]** पार्श्वात् = पार्श्वतः । 'आद्यादिभ्यः' (७।२।८४) तस्प्र० । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । पार्श्वतो भवनं पूर्वं = पार्श्वतो भूत्वा, पार्श्वतोभूय, पार्श्वतोभावम् । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव्, शेते ।

**[ पार्श्वतः कृत्वा, पार्श्वतःकृत्य, पार्श्वतःकारं शेते ]** पार्श्वतः करणं पूर्वं = पार्श्वतः कृत्वा, पार्श्वतः कृत्य, पार्श्वतः-कारम् । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य' (४।४।११३) तोऽन्तः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव्, शेते ।

**[ नाना भूत्वा, नानाभूय, नानाभावं गतः ]** अनाना नाना भूत्वा गतः = नाना भूत्वा, नानाभूय, नानाभावम् । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, गतः ।

**[ नाना कृत्वा, नानाकृत्य, नानाकारं गतः ]** अनाना नाना कृत्वा गतः = नाना कृत्वा, नानाकृत्य, नानाकारम् । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः । 'नामिनो०' (४।३।५१) वृ० आर्, गतः ।

**[ विना भूत्वा, विनाभूय, विनाभावं गतः ]** अविना विना भूत्वा गतः = विना भूत्वा, विनाभूय, विनाभावं गतः । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव्, गतः ।

**[ विना कृत्वा, विनाकृत्य, विनाकारं गतः ]** अविना विना कृत्वा गतः = विना कृत्वा, विनाकृत्य, विनाकारं गतः । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर्, गतः ।

धाऽर्थाः-'धा-धमञ्-एधा-ध्यमञः' ।

**[ द्विधा भूत्वा, द्विधाभूय, द्विधाभावमास्ते ]** द्वाभ्यां प्रकाराभ्यां = द्विधा । 'सङ्ख्याया धा' (७।२।१०४) धाप्र० । द्विधा भवनं पूर्वं = द्विधा भूत्वा, द्विधाभूय, द्विधाभावमास्ते । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् ।

**[ द्विधा कृत्वा, द्विधाकृत्य, द्विधाकारं गतः ]** द्विधा करणं पूर्वं = द्विधा कृत्वा, द्विधाकृत्य, द्विधाकारं गतः । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य'० (४।४।११३) तोऽन्तः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० आर् ।

**[ द्वैधं भूत्वा, द्वैधंभूय, द्वैधंभावमास्ते ]** द्वाभ्यां प्रकाराभ्यां = द्वैधम् । 'द्वि-त्रेर्धमञेधौ वा' (७।२।१०७) धमञ्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृ० ऐ । द्वैधं भवनं पूर्वं = द्वैधं भूत्वा, द्वैधंभूय, द्वैधंभावमास्ते । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् ।

**[ द्वैधं कृत्वा, द्वैधंकृत्य द्वैधंकारं गतः ]** द्वैधं करणं पूर्वं = द्वैधं कृत्वा, द्वैधंकत्य, द्वैधंकारं गतः । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् ।

**[ द्वेधा भूत्वा, द्वेधाभूय, द्वेधाभावमास्ते ]** द्वाभ्यां प्रकारभ्यां = द्वेधा । 'द्वि-त्रेर्धमञेधौ वा' (७।२।१०७) एधा-प्र० । द्वेधा भवनं पूर्वं = द्वेधा भूत्वा, द्वेधाभूय, द्वेधाभावमास्ते । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ द्वेधा कृत्वा द्वेधाकृत्य, द्वेधाकारं गतः ]** द्वेधा करणं पूर्वं = द्वेधा कृत्वा, द्वेधाकृत्य, द्वेधाकारं गतः । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् ।

**[ ऐकध्यं भूत्वा, ऐकध्यंभूय, ऐकध्यंभावमास्ते ]** एकेन प्रकारेण = ऐकध्यम् । 'वैकाद् ध्यमञ्' (७।२।१०६) ध्यमञ्प्र० । 'वृद्धिः स्वरेष्वादे'० (७।४।१) वृ० ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ऐकध्यं भवनं पूर्वं = ऐकध्यं भूत्वा, ऐकध्यंभूय, ऐकध्यंभावमास्ते । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् ।

**[ ऐकध्यं कृत्वा, ऐकध्यंकृत्य, ऐकध्यंकारं गतः ]** ऐकध्यं करणं पूर्वं = ऐकध्यं कृत्वा, ऐकध्यंकृत्य, ऐकध्यंकारं गतः । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् ।

धणस्तु प्रकारविचालवदर्थत्वेनाधार्थत्वाद् अव्ययाधिकाराच्च निरासः । अव्ययाधिकारादेव अव्ययत्वाभावश्चास्य । 'अधण्तस्वाद्या शसः' (१।१।३२) इत्यत्र वर्जनात् ।

**[ सर्वतो भूत्वाऽऽस्ते ]** सर्वस्मात् = सर्वतः । 'किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित्तस्' (७।२।८९) पित्तस्प्र० । सर्वतो भवनं पूर्वं = सर्वतो भूत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा, आस्ते ।

**[ मुखे भूत्वा गतः ]** मुख सप्तमी ङि । भवनं पूर्वं = भूत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[ नाना कृत्वा भक्ष्याणि भुङ्क्ते ]** नाना करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ।

**[ द्विधा कृत्वा काष्ठानि गतः ]** द्विधा पूर्ववत् । करणं पूर्वं = कृत्वा । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा ॥छ॥

## तूष्णीमा ॥ ५।४।८७ ॥

**[ तूष्णीमा ]** तूष्णीम् तृतीया टा ।

**[ तूष्णीं भूत्वा, तूष्णींभूय, तूष्णींभावमास्ते ]** तूष्णीम् 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । तूष्णीं भवनं पूर्वं = तूष्णीं भूत्वा, तूष्णींभूय, तूष्णींभावमास्ते । अनेन क्त्वा-णम्प्र० । शेषं पूर्ववत् । तूष्णींशब्दो मौने तद्वति च, तेनायमर्थो मौनेन सह भूत्वा = मौनवान् भूत्वा आस्ते ॥छ॥

## आनुलोम्येऽन्वचा ॥ ५।४।८८ ॥

**[ आनुलोम्ये ]** अनुगतानि लोमानि अस्याऽसावनुलोमः । 'प्रत्यन्ववात् साम-लोम्नः' (७।३।८२) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्त्यस्वरादिलुक् । अनुलोमस्य भावः = आनुलोम्यम्, तस्मिन् । 'पतिराजान्त'० (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे'० (७।४।१) वृ० आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अन्वचा ]** अन्वच् तृतीया टा ।

**आनुलोम्यमनुकूलता-परचित्ताराधनम् ।**

**[ अन्वग् भूत्वा, अन्वग्भूय, अन्वग्भावमास्ते ]** अनु 'अञ्चू गतौ च' (१०५) अञ्च् । अन्वञ्चतीति, अन्वक् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अन्वचि देशे = अन्वक् । 'दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः' (७।२।११३) धाप्र० । 'लुबञ्चेः' (७।२।१२३) धालुप् । 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । अन्वग्भवनं पूर्वं = अन्वग् भूत्वा, अन्वग्भूय, अन्वग्भावमास्ते । अनेन क्त्वा-णम्प्र० । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृ० औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । अनुकूलो भूत्वा तिष्ठतीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ अन्वग् भूत्वा विजयते शत्रुः ]** अन्वग् भवनं = अन्वग् भूत्वा विजयते शत्रुः । पश्चाद् भूत्वेत्यर्थः ॥छा॥

**इच्छार्थे कर्मणः सप्तमी ॥ ५।४।८९ ॥**

**[ इच्छार्थे ]** इच्छा अर्थो यस्य सः = इच्छार्थस्तस्मिन् ।

**[ कर्मणः ]** कर्मन् पञ्चमी ङसि ।

**[ सप्तमी ]** सप्तमी प्रथमा सि ।

कर्मभूतात् धातोरिति कोऽर्थः ? कर्मभूतधात्वर्थवाचिनो धातोरित्यर्थः ।

**[ भुञ्जीयेतीच्छति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । सप्तमी ईय । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । इति प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । भुज्यर्थस्य कर्मत्वद्योतनार्थमितिशब्दः । 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'गमिषद्यमश्छः' (४।२।१०६) षस्य छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे प्रथमोऽशिटः' (१।३।५०) छस्य च० ।

**[ भुञ्जीयेति वाञ्छति ]** 'भुञ्जीयेति' पूर्ववत् । 'वाछु इच्छायाम्' (१२२) वाछ् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् ।

**[ भुञ्जीयेति कामयते ]** 'भुञ्जीयेति' पूर्ववत् । 'कमूङ् कान्तौ' (७८९) कम् । 'कमेर्णिङ्' (३।४।२) णिङ्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ भोजको व्रजति ]** भुज् । भोक्ष्ये = भोजकः । 'क्रियायां क्रियार्थायां तुम्'० (५।३।१३) णकच्प्र० → अक । 'लघोरुपान्त्यस्य'० (४।३।४) गु० ओ, व्रजति ।

**[ इच्छन् करोति ]** 'इषत् इच्छायाम्' (१४१९) इष् । इच्छतीति । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'गमिषद्यमश्छः' (४।२।१०६) षस्य छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषेः'० (१।३।५०) छस्य च० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्'० (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् । अत्र करोतीच्छत्योर्लक्ष्य-लक्षणभावो न तु कर्म-क्रियाभावः ।

**[ इच्छामि भुङ्क्तां भवान् ]** 'इषत् इच्छायाम्' (१४१९) इष् । वर्त्त० मिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'गमिषद्यमश्छः' (४।२।१०६) षस्य छ० । 'स्वरेभ्यः' (१।३।३०) छस्य द्विः । 'अघोषे'० (१।३।५०) छस्य च० । 'म-व्यस्याः' (४।२।११३) दीर्घः । 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । पञ्चमी ताम् । 'रुधां स्वरा'० (३।४।८२) श्नप्र० → न । श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० । 'म्नां धुड्'० (१।३।३९) न्० → ङ०, भवान् ॥छा॥

**शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटा-ऽस्ति-समर्थाऽर्थे च तुम् ॥ ५।४।९० ॥**

**[ शकधृषज्ञारभलभसहाऽर्हग्लाघटाऽस्तिसमर्थाऽर्थे ]** शकश्च धृषश्च ज्ञाश्च रभश्च लभश्च सहश्च अर्हश्च ग्लाश्च घटश्च अस्तिश्च समर्थश्च = शकधृषज्ञारभलभसहाऽर्हग्लाघटाऽस्तिसमर्थाः । शकधृषज्ञारभलभसहाऽर्हग्लाघटाऽस्तिसमर्थानां अर्था यस्य तत् = शकधृषज्ञारभलभसहाऽर्हग्लाघटाऽस्तिसमर्थाऽर्थम्, तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ **च** ] च प्रथमा सि ।

[ **तुम्** ] तुम् प्रथमा सि ।

[ **शक्नोति पारयति वा भोक्तुम्** ] 'शक्लृंट् शक्तौ' (१३००) शक् । 'वर्त्त० तिव् । 'स्वादेः श्नुः'(३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ ।

'पारण् कर्मसमाप्तौ' (१९०१) पार् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनं = भोक्तुम् । अनेन तुम्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे'० (१।३।५०) ग० → क० ।

[ **धृष्णोत्यध्यवस्यति वा भोक्तुम्** ] 'ञिधृषाट् प्रागल्भ्ये' (१३१२) धृष् । वर्त्त० तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ । 'र-षृवर्णान्नो ण'० (२।३।६३) णत्वम् । अधि-अवपूर्व'० 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव'० (२।३।९८) सो । वर्त्त० तिव् । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'ओतः श्ये' (४।२।१०३) ओलुक् ।

[ **जानाति वेत्ति वा भोक्तुम्** ] 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । वर्त्त० तिव् । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'जा ज्ञा-जनोऽत्यादौ' (४।२।१०४) ज्ञा० → जा० । 'विदक् ज्ञाने' (१०९९) विद् । वर्त्त० तिव् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'अघोषे'० (१।३।५०) द० → त० । 'भोक्तुम्' पूर्ववत् ।

[ **आरभते प्रक्रमते वा भोक्तुम्** ] आङ्पूर्व० 'रभि राभस्ये' (७८५) रभ् । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । प्रपूर्व० 'क्रमू पादविक्षेपे' (३८५) क्रम् । 'प्रोपादारम्भे' (३।३।५१) इत्यात्मनेपदम् । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'भोक्तुम्' पूर्ववत् ।

[ **लभते विन्दते वा भोक्तुम्** ] 'डुलभिष् प्राप्तौ' (७८६) लभ् । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'विद्लृंती लाभे' (१३२२) विद् । वर्त्त० ते । 'तुदादेः शः' (३।४।८१) शप्र० । 'मुचादि-तृफ-दृफ-गुफ'० (४।४।९९) नोऽन्तः । 'भोक्तुम्' पूर्ववत् ।

[ **सहते क्षमते वा भोक्तुम्** ] 'षहि मर्षणे' (९९०) षह् । 'षः सोऽष्ट्यै-ष्ठिव'० (२।३।९८) सह् । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'क्षमौषि सहने' (७८८) क्षम् । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'भोक्तुम्' पूर्ववत् ।

[ **अर्हति प्राप्नोति वा भोक्तुम्** ] 'अर्ह पूजायाम्' (५६४) अर्ह् । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । प्रपूर्व० 'आप्लृंट् व्याप्तौ' (१३०७) आप् । वर्त्त० तिव् । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'उ-श्नोः' (४।३।२) गु० ओ । 'भोक्तुम् पूर्ववत् ।

[ **ग्लायति म्लायति वा भोक्तुम्** ] 'ग्लैं हर्षक्षये' (३१) ग्लै । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) आय् । 'म्लैं गात्रविनामे' (३२) म्लै । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'एदैतोऽयाय्' (१।२।२३) आय् । 'भोक्तुम् पूर्ववत् ।

[ **घटते युज्यते वा भोक्तुम्** ] 'घटिष् चेष्टायाम्' (१०००) घट् । वर्त्त० ते । 'कर्त्तर्यन'० (३।४।७१) शव् । 'युजिंच् समाधौ' (१२५४) युज् । वर्त्त० ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'भोक्तुम् पूर्ववत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[अस्ति विद्यते वा भोक्तुम्]** 'असक् भुवि' (११०२) अस् । वर्त्त० तिव् । 'विदिंच् सत्तायाम्' (१२५८) विद् । वर्त्त० ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'भोक्तुम् पूर्ववत् ।

समर्थोऽलम् - **[प्रभवति ईष्टे वा भोक्तुम्]** प्रपूर्व० 'भू सत्तायाम्' (१) भू । वर्त्त० तिव् । 'कर्त्तर्यन'० (३।४।७१) शव् । 'नामिनो'० (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । 'ईशिक् ऐश्वर्ये' (१११६) ईश् । वर्त्त० ते । 'यज-सृज-मृज-राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० । 'भोक्तुम् पूर्ववत् ।

समर्थार्थप्रतीतावपि भवति -

**[द्रष्टुं चक्षुः]** 'दृशृं प्रेक्षणे' (४९५) दृश् । दर्शनं = द्रष्टुम् । अनेन तुम्प्र० । 'अः सृजि-दृशोऽकिति' (४।४।११) अकारागमः । 'इवर्णादेरस्वे'० (१।२।२१) रत्वम् । 'यज-सृज-मृज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट०, चक्षुः ।

**[योद्धुं धनुः]** 'युधिंच् सम्प्रहारे' (१२६०) युध् । योधनं = योद्धुम् । अनेन तुम्प्र० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) तस्य ध० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) ध० → द०, धनुः ।

अनयोर्द्वयोर्भवतीत्यादेरुत्तरपदस्य समर्थार्थस्याध्याहारेण प्रतिपत्तिः ।

**[भोक्तुं वष्टि]** भोजनं = भोक्तुम् । अनेन तुम्प्र० । 'वशक् कान्तौ' (११०१) वश् । वर्त्तमाना तिव् । 'यज-सृज-मृज-राज'० (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग'० (१।३।६०) त० → ट० ।

समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थम् । कर्मण इति च सामर्थ्याच्छकादिष्वर्हपर्यन्तेषु इच्छार्थेषु चोपपदेषु सत्सु सम्बन्धनीयम् । अतादर्थ्यार्थमक्रियोपपदार्थं चेदं प्रस्तूयत इति ।।छ।।

**इत्याचार्यश्रीहेमचन्द्रविरचितायां व्याकरणबृहद्वृत्तौ कृतस्य चतुर्थपाददविवरणं समाप्तमिति ।।छ।। ।।छ।। ।। श्री ।। ।।छ।।**

**संवत् १९५१ मिति आसोज वद १०**

• • •

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अकारादिवर्णक्रमेण सूत्रान्तर्गतोदाहरणसूचिः ॥१॥


अंशहरो दायादः ५।१।९५
अः ५।१।१७१
अकरणिस्ते वृषल ! भूयात् ५।३।११७
अकरोत् ५।२।७
अकर्ता कटस्य चैत्रः ५।१।५३
अकारी धर्मस्य बालातपः ५।१।५३
अकार्षीत् ५।२।४
अकृतकारं करोति ५।४।६१
अकृतिस्तस्य पटस्य ५।३।११७
अक्तिः ५।३।१०६
अक्षद्यूः ५।१।१४८
अक्षाणां ग्लहः ५।३।३१
अक्षिणी निकाणं हसति ५।४।७९
अक्षिणी निमील्य हसति ५।४।४६
अक्षिनिकाणं हसति ५।४।७९
अगच्छाम घोषान् ५।२।५
अगमनिस्ते वृषल ! भूयात् ५।३।११७
अगमाम घोषान् ५।२।५
अगात् ५।२।३
अगारगः ५।१।१३१
अगो वृक्षः पर्वतश्च ५।१।१३१
अगो वृषलः शीतेन ५।१।१३१
अग्निकुण्डस्योपासनं सुखम् ५।३।१२५
अग्निचायः ५।१।१६४
अग्निचित् ५।१।१६४
अग्निचित्या ५।१।३७
अग्निभूतिः ५।१।७१
अग्निष्टोमयाजी ५।१।१५८
अग्रगः ५।१।१३१
अग्रणीः ५।१।१४८
अग्रतःसरः ५।१।१४०
अग्रेगावा ५।१।१४७
अग्रेसरः ५।१।१४०
अङ्कुशग्रहः ५।१।९२
अङ्गमेजयः ५।१।११८
अङ्गुलित्रम् ५।१।७६
अजः ५।१।१७१
अजननिस्ते वृषल ! भूयात् ५।३।११७
अजयत् सिद्धः सौराष्ट्रान् ५।२।८
अजयद् गर्तो हूणान् ५।२।५
अजरः पटः ५।१।५
अजरिता कम्बलः ५।१।५
अजर्यमार्यसंगतम् ५।१।५
अजस्रं श्रवणम् ५।२।७९
अजस्रा प्रवृत्तिः ५।२।७९
अजार्यं संगतेन ५।१।५
अजीवनिस्ते वृषल ! भूयात् ५।३।११७
अटाटा ५।३।१०३
अटाट्या(२) ५।३।१०३
अट्या ५।३।९७
अण्डसूः ५।१।१४८
अतिक्रम्य नदीं पर्वतः ५।४।४५
अतिचारी ५।२।६२
अतिथिवेदं भोजयति ५।१।१३
अतिथिवेदं भोजयति ५।४।५४
अतिशयितं शिष्येण ५।१।९
अतिशयितो गुरुं शिष्यः ५।१।९
अतिशयितो गुरुः शिष्येण ५।१।९
अतीसारो व्याधिः ५।३।१७
अत्यन्तगः ५।१।१३१
अत्ययी ५।२।७२
अत्यायः ५।१।६४
अदद्र्यङ् ५।१।१४८
अदूरगः ५।१।१३१
अद्मरः ५।२।७३
अद्य श्वो वा गमिष्यति ५।३।५
अद्य ह्यो वाऽभुक्ष्महि ५।२।५
अधरिष्यथाः ५।४।२५
अधिकरणम् ५।३।१२९
अधिजः ५।१।१७१
अधीत्यः ५।१।४०
अधीयन् द्रुमपुष्पीयम् ५।२।२५
अधीयानः ५।२।२०
अधीष्टिः ५।३।११३
अधीष्वाऽधीष्वेत्येवायमधिजगे ५।४।४२
अधीष्वाऽधीष्वेत्येवायमधीताम् ५।४।४२
अधीष्वाऽधीष्वेत्येवायमधीयीत ५।४।४२
अधीष्वाऽधीष्वेत्येवायमध्यगीष्ट ५।४।४२
अधीष्वाऽधीष्वेत्येवायमध्येता ५।४।४२
अधीष्वाऽधीष्वेत्येवायमध्येषीष्ट ५।४।४२
अधीष्वाऽधीष्वेत्येवायमध्येष्यते ५।४।४२
अधीष्वाऽधीष्वेत्येवायमध्यैत ५।४।४२
अधीष्वाधीष्वेत्येवायमधीते ५।४।४२
अध्यवस्यति भोक्तुम् ५।४।९०
अध्यायः(२) ५।३।१९
अध्यायः ५।३।१३४
अध्येयम् ५।१।४०
अध्येषणा ५।३।११३
अध्वगः ५।१।१३१
अनग्नङ्करणः पटः ५।१।१२९


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनग्नम्भविष्णुः ५।१।१२८
अनग्नम्भावुकः ५।१।१२८
अनन्तकरः ५।१।१०२
अनन्तगः ५।१।१३१
अनाशकः ५।३।१२१
अनाश्वान् ५।२।३
अनुजः ५।१।१७१
अनुजातं माणवकेन ५।१।९
अनुजीर्णं चैत्रेण ५।१।९
अनुजीर्णा वृषली चैत्रेण ५।१।९
अनुजीर्णो वृषलीं चैत्रः ५।१।९
अनुज्यः ५।१।५६
अनुद्यम् ५।१।३२
अनुभावः ५।३।२३
अनुरोधी ५।२।६३
अनुवादी ५।२।५८
अनुवाद्यम् ५।१।३५
अनुशिष्टिः ५।३।९२
अनूचानः ५।२।३
अनूवाच ५।२।३
अनूवास ५।२।१
अनूषितं भवता ५।१।९
अनूषितो गुरुं भवान् ५।१।९
अनूषितो गुरुर्भवता ५।१।९
अनेकपः ५।१।१४२
अन्तकरः ५।१।१०२
अन्तगः ५।१।१३१
अन्तरायः ५।१।६४
अन्तरिक्षसत् ५।१।१४८
अन्तर्धा ५।३।१०१
अन्तर्धिः ५।३।८९
अन्धङ्करणः शोकः ५।१।१२९
अन्धम्भविष्णुः ५।१।१२८
अन्धम्भावुकः ५।१।१२८
अन्नं भुक्तास्ते ५।१।११
अन्नादः ५।१।१५०
अन्यथा कृत्वा भुङ्क्ते ५।४।५०
अन्यथा कृत्वा शिरो भुङ्क्ते ५।४।५०
अन्यथाकारं भुङ्क्ते ५।४।५०
अन्यादृक् ५।१।१५२
अन्यादृक्षः ५।१।१५२
अन्यादृक्षा ५।१।१५२
अन्यादृशः ५।१।१५२
अन्यादृशी ५।१।१५२
अन्वग् भूत्वा आस्ते ५।४।८८
अन्वग्भावमास्ते ५।४।८८
अन्वग्भूय आस्ते ५।४।८८
अन्वब्रवीत् ५।२।३
अन्ववक् ५।२।३
अन्ववसत् ५।२।१
अन्ववात्सीत् ५।२।१
अन्ववोचत् ५।२।३
अन्वेषणा ५।३।११२
अपघनोऽङ्गम् ५।३।३६
अपघातः ५।३।३६
अपचारी ५।२।६२
अपचितिः ५।३।१०६
अपत्रपिष्णुः ५।२।२८
अपत्राप्यम् ५।१।२०
अपमातुं याचते ५।४।४६
अपमाय याचते ५।४।४६
अपमित्य याचते ५।४।४६
अपराधी ५।१।५३
अपलाषी ५।२।४२
अपलाषी ५।२।६०
अपलाषुकं नीचसांगत्यम् ५।२।४१
अपलाषुकः ५।२।४२
अपलितङ्करणो रसः ५।१।१२९
अपां विन्दुः ५।२।३४
अपादानम् ५।३।१२८
अपामार्गः ५।३।१३२
अपि कुर्यात् ५।४।२१
अपि खारीपाकं भुञ्जीत ५।४।२२
अपि मासमुपवसेत् ५।४।२२
अपिधास्यति द्वारम् ५।४।२१
अपिबाम पयः ५।२।५
अप्यकरिष्यत् ५।४।२१
अप्रयाणिस्ते वृषल ! भूयात् ५।३।११७
अप्राप्य नदीं पर्वतः ५।४।४५
अप्राप्य यौवनं बाल्यम् ५।४।४५
अप्सरसः ५।२।९३
अप्सुजम् ५।१।१६९
अब्जम् ५।१।१६९
अभयङ्करः ५।१।१०६
अभवत् सगरो राजा ५।२।१४
अभिचारी ५।२।६२
अभिचार्यम् ५।१।३१
अभिजः ५।१।१७१
अभिजित् ५।१।१४८
अभिभावी ५।१।५३
अभिलषणः ५।२।४२
अभिलषामि अधीतां भवान् ५।४।२७
अभिलषामि अधीयीत भवान् ५।४।२७
अभिलाप्यम् ५।१।२०
अभिलावः ५।३।२१
अभिलाषी ५।२।६०
अभिलाषुकः ५।२।४१
अभिव्याहृतः ५।२।९२
अभिसंमादः ५।३।३३
अभिहवः ५।३।४२
अभूवन् ५।२।१४
अभ्यमी ५।२।७२
अभ्याघाती ५।२।५०
अभ्योषखादिका ५।३।१२१
अभ्रंलिहः प्रासादः ५।१।१२३
अभ्रङ्कषो गिरिः ५।१।११०
अभ्रविलायं विलीनः ५।४।७१
अभ्रस्य घनः ५।३।३७


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमङ्क्ष्यत् ५।४।२५
अमावस्या ५।१।२१
अमावास्या ५।१।२१
अमितङ्गमो हस्ती ५।१।१३१
अमुत्रावसम् ५।२।६
अमृतः ५।२।९२
अम्भोऽतिगमा ५।१।७३
अम्भोऽतिगामी ५।१।७३
अयाची ५।१।५३
अयोघनः ५।३।३८
अयोहननी ५।३।३८
अरण्यं भ्रमिता ५।२।४९
अरविन्दः ५।१।६१
अरित्रम् ५।२।८७
अरिन्दमः राजा ५।१।११२
अरिमेजयः ५।१।११८
अरिव्रणा शक्तिः ५।१।५०
अरिसूदनः ५।१।५२
अरिसूदनः ५।२।४५
अरुणत् सिद्धराजोऽवन्तीम् ५।२।८
अरुन्तुदः पीडाकरः ५।१।१२४
अरुष्करः ५।१।१०२
अरोचकः ५।३।१२१
अर्घ्यम् ५।१।४१
अर्जयन् वसति ५।२।२०
अर्थस्य पदनः ५।२।४२
अर्दिका ५।३।९२
अर्धभाक् ५।१।१४६
अर्यः स्वामी ५।१।३३
अर्यः ५।१।३३
अर्यो वैश्यः ५।१।३३
अर्हति भवान् इक्षुभक्षिकाम् ५।३।१२०
अर्हति भवान् ओदनभोजिकाम् ५।३।१२०
अर्हति भवान् पयःपायिकाम् ५।३।१२०
अर्हति भोक्तुम् ५।४।९०
अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः ५।२।९२
अलं कृत्वा ५।४।४४
अलं रुदितम् ५।४।४४
अलं वत्स ! रोदनेन ५।४।४४
अलंजः ५।१।१७१
अलङ्करिष्णुः ५।२।२८
अलङ्कर्ता कन्याम् ५।२।४२
अलङ्कारः स्त्रियाः ५।४।४४
अलङ्कारकः ५।२।६७
अलवणभोजी ५।१।१५७
अल्पम्पचा मुनयः ५।१।१०९
अवगमः ५।३।२८
अवगृह्यं पदम् ५।१।४४
अवग्रहः पदस्य ५।३।५०, ५।३।५६
अवग्रहः ५।३।५०
अवग्रहोऽर्थस्य ५।३।५०
अवग्राहः ५।३।५०
अवग्राहो ह ते जाल्म ! भूयात् ५।३।५६
अवतरः ५।३।१३३
अवतानः ५।१।६४
अवतारः ५।३।१३३
अवतारो नद्याः ५।३।१३३
अवतीर्णकः ५।२।९२
अवदाभ्यम् ५।१।२०
अवद्यं गर्ह्यं चेत् ५।१।३२
अवद्यं पापम् ५।१।३२
अवद्या हिंसा ५।१।३२
अवनायः ५।३।६२
अवमूर्धशयः ५।१।१३६
अवरोधी ५।१।५३
अवरोधी ५।२।६३
अवश्यं भव्यश्चैत्रः ५।४।३६
अवश्यंकारी ५।४।३६
अवश्यंहारी ५।४।३६
अवश्यपाव्यम् ५।१।१९
अवश्यलवनीयम् ५।१।१६
अवश्यलवितव्यम् ५।१।१६
अवश्यलाव्यम् ५।१।१६
अवश्यलाव्यम् ५।१।१९
अवश्यस्तुत्यः ५।१।१९
अवश्यस्तुत्यः ५।१।४०
अवश्यायः ५।१।५६
अवश्यायः ५।१।६४
अवसन्निह पुरा छात्राः ५।२।१५
अवसरः ५।३।१३०
अवसायः ५।१।६३
अवसेचनम् ५।३।१२८
अवस्तारः ५।३।१३३
अवस्रावणम् ५।३।१२८
अवहारः ५।१।६३
अवहारः ५।३।१३४
अवात्सुरिह पुरा छात्राः ५।२।१५
अवादी ५।१।५३
अवाद्या ५।१।३२
अवासी ५।१।५३
अविलवनः ५।३।१२९
अवोषखादिका ५।३।१२१
अव्यथी ५।२।७२
अव्यथ्यो मुनिः ५।१।६
अव्याहारी ५।१।५३
अव्राजी ५।१।५३
अशनम् ५।३।१२८
अश्राद्धभोजी ५।१।१५७
अश्रावि ५।२।१
अश्रूयत ५।२।१
अश्वत्थः ५।१।१४२
अश्वत्थामा ५।१।१४७
अश्वयुक् ५।१।१४८
असंव्यवहारी ५।१।५३
असंव्याहारी ५।१।५३
असिता ५।२।४९
असिवध्यः ५।१।२९
असुरहा ५।१।१६१


Jain Education International For Private & Personal Use Only www.jainelibrary.org

असूयकः ५।२।६८
असूर्यम्पश्या राजदाराः ५।१।१२६
अस्ति भोक्तुम् ५।४।९०
अस्थिहरः श्वशिशुः ५।१।९५
अस्युपघातमरीन् हन्ति ५।४।६४
अस्युपनोदं युध्यन्ते ५।४।७६
अहन् कंसं वासुदेवः ५।२।१४
अहरत् ५।२।७
अहरत्यस्येषून् गतः ५।४।८२
अहस्करः ५।१।१०२
अहारी शीतस्य शिशिरः ५।१।५३
अहार्षीत् ५।२।४
अहिहा ५।१।१६१
अहो द्वादशाङ्गस्य विस्तरः ५।३।६९
अहो मौष्टिकस्य संग्राहः ५।३।५८
आकरः ५।३।१३०
आकषः ५।३।१३१
आकायमग्निं चिन्वीत ५।३।७९
आक्रुष्टः ५।२।९२
आक्रीडी ५।२।५१
आक्रुष्टश्चैत्रेण ५।२।९२
आक्रोशकः ५।२।६९
आक्रोशनः ५।२।४३
आखः ५।३।१३७
आखनः ५।३।१३७
आखनिकः ५।३।१३७
आखनिकवकः ५।३।१३७
आखरः ५।३।१३७
आखा ५।१।१७१
आखानः ५।३।१३७
आखुघातो बिडालः ५।१।८३
आखुहा ५।१।१६१
आखूत्थो वर्तते ५।३।८२
आगमप्रज्ञः ५।१।१४४
आगामी ५।३।१
आगामुकः स्वगृहम् ५।२।४०
आगामुकः ५।२।४२
आघातुको व्याधः ५।२।४०
आघ्रा नासिका ५।१।५७
आचर्यं भवता ५।१।३१
आचर्यो देशः ५।१।३१
आचाम्यम् ५।१।२०
आचार्यो गुरुः ५।१।३१
आच्छादनम् ५।३।१२८
आजिवान् ५।२।२
आज्यं घृतम् ५।१।३९
आञ्जनम् ५।१।३९
आढ्यः ५।३।८२
आढ्यङ्करणं वित्तम् ५।१।१२९
आढ्यम्भविष्णुः ५।१।१२८
आढ्यम्भावुकः ५।१।१२८
आढ्यीभविता ५।१।१२८
आतपत्रम् ५।१।१४२
आत्मपोषं पुष्णाति ५।४।६५
आत्मपोषं पुष्यति ५।४।६५
आत्मपोषं पोषति ५।४।६५
आत्मभूः कामः ५।२।८३
आत्मम्भरिः ५।१।९०
आत्मानुजः ५।१।१६८
आदरः ५।३।२८
आदरी ५।२।७२
आदायचरः ५।१।१३९
आदिः ५।३।८७
आदिकरः ५।१।१०२
आदिगः ५।१।१३१
आदृत्यः ५।१।४०
आदेवकः(२) ५।२।६९
आधा ५।३।११०
आधारः ५।३।१३४
आधिः ५।३।८७
आधीः ५।२।८३
आनाम्यम् ५।१।२०
आनायो मत्स्यानाम् ५।३।१३६
आनायो मृगाणाम् ५।३।१३६
आनाय्यो गोधुक् ५।१।२५
आनाय्यो दक्षिणाग्निः ५।१।२५
आनेयः ५।१।२५
आपगा नदी ५।१।१३१
आपणः ५।३।१३१
आपत् ५।३।११४
आपवः ५।३।१३०
आपाकः ५।३।१३२
आपात्यः ५।१।७
आपात्यमनेन ५।१।७
आप्तिः ५।३।१०६
आप्लवः ५।३।४९
आप्लावः ५।३।४९
आप्लाव्यः ५।१।७
आप्लाव्यमनेन ५।१।७
आभरणम् ५।३।१२८
आमात् ५।१।१५०
आमोषी ५।२।५१
आयतस्तूः ५।२।८३
आयस्तः ५।२।९२
आयामी ५।२।५२
आयाम्यम् ५।१।३०
आयासी ५।२।५२
आयुधम् ५।३।८२
आरब्धः ५।२।९२
आरभते भोक्तुम् ५।४।९०
आरवः ५।३।४९
आरा शस्त्री ५।३।१०८
आरामः ५।३।१३२
आरावः ५।३।४९
आरूढं भवता ५।१।९
आरूढः ५।२।९२
आरूढो वृक्षं भवान् ५।१।९
आरूढो वृक्षो भवता ५।१।९


Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरोहः ५।१।५०
आर्द्रकेणोपदंशं भुङ्क्ते ५।४।७३
आर्द्रकेणोपदश्य भुङ्क्ते ५।४।७३
आर्द्रकोपदंशं भुङ्क्ते ५।४।७३
आर्यः ५।१।३३
आलवः ५।३।१३०
आवायः ५।३।१३४
आविधः ५।३।८२
आव्याधः ५।३।४७
आशंसु ५।२।३३
आशास्यमन्यत् पुनरुक्तभूतम् ५।१।४०
आशितम्भव ओदनः ५।१।१३०
आशितम्भवा पञ्चपूली ५।१।१३०
आशितम्भवो वर्तते भवतः ५।१।१३०
आशितस्य भवनम् ५।१।१३०
आशीः ५।३।९२
आशीः ५।३।११४
आशुगः शरः ५।१।१३१
आश्चर्यं यदि स भुञ्जीत ५।४।२०
आश्लिष्टं कामुकेन ५।१।९
आश्लिष्टः कान्तां कामुकः ५।१।९
आश्लिष्टा कान्ता कामुकेन ५।१।९
आश्वासः ५।१।६४
आसत्तिः ५।३।९२
आसनम् ५।३।१२९
आसना ५।३।१११
आसाव्यम् ५।१।२०
आसि(शि)तः ५।२।९२
आसिका ५।३।१२२
आसितं भवता ५।१।११
आसितो भवान् ५।१।११
आसित्वा भुङ्क्ते ५।४।४७
आसीनम् ५।२।२०
आसुतिः ५।३।९३
आसुत्या ५।३।९३
आसेदिवान् ५।२।२
आस्तारपङ्क्तिः ५।३।७०
आस्था ५।३।९६
आस्थानम् ५।३।१२९
आस्यते भोक्तुम् ५।४।४७
आस्यन्धयः ५।१।११९
आस्या ५।३।९२
आस्या ५।३।९७
आस्रवः ५।१।६२
आस्रावः ५।१।६२
आहर्ता ५।१।५६
आहवो युद्धम् ५।३।४३
आहारः ५।३।१८
आहावः पशूनाम् ५।३।४४
आहावः शकुनीनाम् ५।३।४४
आह्वः ५।१।५६
आह्वयो नाम ५।३।४१
आह्वानम् ५।३।४३, ५।३।४४
आह्वायः ५।३।४३,५।३।४४,५।३।४५
इक्षुभक्षिका मे उदपादि ५।३।१२०
इक्षुभक्षिकां मे धारयसि ५।३।१२०
इच्छति ५।४।२४
इच्छतो भुङ्क्ते ५।४।२७
इच्छन् करोति ५।४।८९
इच्छया भुङ्क्ते ५।४।२७
इच्छा ५।३।९२
इच्छा ५।३।१०१
इच्छामि भुङ्क्तां भवान्५।४।२७,५।४।८९
इच्छामि भुञ्जीत भवान् ५।४।२७
इच्छुः ५।२।३४
इच्छेत् ५।४।२४
इज्या ५।३।९२
इज्या ५।३।९७
इति स्मोपाध्यायः कथयति ५।२।१६
इति ह चकार ५।२।१३
इति हाऽकरोत् ५।२।१३
इत्थं कृत्वा भुङ्क्ते ५।४।५०
इत्थंकारं भुङ्क्ते ५।४।५०
इत्यः ५।१।४०
इत्या ५।३।९३
इत्या ५।३।९९
इत्वरः ५।२।७७
इत्वरी ५।२।७७
इदं गवां पीतम् ५।१।१२
इदं गोभिः पीतम् ५।१।११
इदं तेषां भुक्तम् ५।१।१२
इदं तेषां यातम् ५।१।१२
इदं तेषामशितम् ५।१।१२
इदं तैरभ्यवहृतम् ५।१।१२
इदं तैरशितम् ५।१।१२
इदं तैर्जग्धम् ५।१।१२
इदं तैर्भुक्तम् ५।१।११
इदमहेः सृप्तम् ५।१।१२
इदमेषां जग्धम् ५।१।१२
इदमेषां शयितम् ५।१।१२
इदमेषामभ्यवहृतम् ५।१।१२
इदमेषामासितम् ५।१।१२
इद्धः ५।२।९२
इध्मव्रश्चनः ५।३।१२६, ५।३।१२९
इन्द्रभूतिः ५।१।७१
इन्द्रशर्मा ५।१।१४७
इमावधीयाते ५।४।४२
इमेऽधीयते ५।४।४२
इरम्मदः ५।१।१२७
इषुधिः ५।३।८८
इष्टिः(२) ५।३।९२
इह गोभिः पीतम् ५।१।११
इह ते अन्नं प्राशिताः ५।१।१२
इह ते मधु प्रलीढाः ५।१।१२
इह तैरभ्यवहृतम् ५।१।१२
इह तैरशितम् ५।१।१२
इह तैर्जग्धम् ५।१।१२
इह तैर्भुक्तम् ५।१।११

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| इहासीत भवान् | ५।४।२८ |
| इहास्तां भवान् | ५।४।२८ |
| ईक्षा | ५।३।१०६ |
| ईक्षा | ५।३।१२२ |
| ईयिवान् | ५।२।३ |
| ईर्ष्यालुः | ५।२।३७ |
| ईश्वरः | ५।२।८१ |
| ईश्वरा | ५।२।८१ |
| ईश्वरी | ५।२।८१ |
| ईषच्छयं भवता | ५।३।१३९ |
| ईषच्छासनः | ५।३।१४१ |
| ईषत्करं भवता | ५।३।१३९ |
| ईषत्करः कटो भवता | ५।३।१३९ |
| ईषत्पानं पयो भवता | ५।३।१४१ |
| ईषत्पानः | ५।१।१६ |
| ईषदाढ्यंकरश्चैत्रो भवता | ५।३।१४० |
| ईषदाढ्यंभवं भवता | ५।३।१४० |
| ईषदुत्थानं भवता | ५।३।१४१ |
| ईषद्दरिद्रः | ५।३।१४१ |
| ईषल्लभ्यं धनं कृपणात् | ५।३।१३९ |
| ईष्टे भोक्तुम् | ५।४।९० |
| ईहा | ५।३।१०६ |
| ईहा | ५।३।१२२ |
| उक्तः | ५।२।९२ |
| उक्षा | ५।३।१०६ |
| उखास्रत् | ५।१।१४८ |
| उग्रम्पश्यः | ५।१।१२६ |
| उच्छ्रयः | ५।३।५३ |
| उच्छ्रायः | ५।३।५३ |
| उज्जिघ्रः | ५।१।५८ |
| उज्झिता | ५।१।३९ |
| उष्ट्रप्रणायः | ५।१।७२ |
| उत कुर्यात् | ५।४।२१ |
| उत दण्डः पतिष्यति ? | ५।४।२१ |
| उत सिद्धान्तमधीयीय | ५।४।२८ |
| उत सिद्धान्तमध्ययै | ५।४।२८ |
| उताऽकरिष्यत् | ५।४।२१ |
| उत्कन्दकः | ५।३।१२१ |
| उत्कर्णकः | ५।३।१२१ |
| उत्कारो धान्यस्य | ५।३।७३ |
| उत्किरः | ५।१।५४ |
| उत्क्रोशः | ५।१।६२ |
| उत्खेयम् | ५।१।३८ |
| उत्तरपरिग्राहः | ५।३।६५ |
| उत्तानः | ५।१।६४ |
| उत्तानशयः | ५।१।१३६ |
| उत्पचिष्णुः | ५।२।२९ |
| उत्पतिष्णुः | ५।२।२९ |
| उत्पदिष्णुः | ५।२।२९ |
| उत्पश्यः | ५।१।५८ |
| उत्पातुकं ज्योतिः | ५।२।४१ |
| उत्पावः | ५।३।५४ |
| उत्पिबः | ५।१।५८ |
| उत्पुच्छयिता | ५।२।४५ |
| उत्साही | ५।१।५३ |
| उदकस्पर्शः | ५।१।१४९ |
| उदकेन स्पर्ष्टा | ५।१।१४९ |
| उदकेविशीर्णम् | ५।१।१ |
| उदकोदञ्चनः | ५।३।१३५ |
| उदगादद्यादित्यः | ५।२।८ |
| उदजः पशूनाम् | ५।३।३० |
| उदपेषं पिनष्टि | ५।४।६५ |
| उदयी | ५।२।७२ |
| उदरपूरं शेते | ५।४।५६ |
| उदरम्भरिः | ५।१।९० |
| उदरशयः | ५।१।१३५ |
| उदाजः खगानाम् | ५।३।३० |
| उदासारी | ५।१।१५४ |
| उदेजयः | ५।१।५९ |
| उद्गारः | ५।३।७२ |
| उद्ग्राहः | ५।३।५५ |
| उद्घः प्रशस्तः | ५।३।३६ |
| उद्घनः | ५।३।३६ |
| उद्घातः(२) | ५।३।३६ |
| उद्दालकपुष्पभञ्जिका | ५।३।१२१ |
| उद्दासी | ५।१।५३ |
| उद्द्रावः | ५।३।५४ |
| उद्धमः | ५।१।५८ |
| उद्धयः | ५।१।५८ |
| उद्धयी | ५।१।५८ |
| उद्ध्यः | ५।१।३९ |
| उद्भासी | ५।१।५३ |
| उद्यतः | ५।२।९२ |
| उद्यावः | ५।३।५४ |
| उद्यावः | ५।३।१३४ |
| उद्वहः | ५।१।४९ |
| उद्वेजनीयः खलः | ५।१।२ |
| उन्नयः | ५।३।६१ |
| उन्नायः | ५।३।६१ |
| उन्मदिष्णुः | ५।२।२९ |
| उन्मादः | ५।३।४७ |
| उन्मादी | ५।२।४९ |
| उपकीर्य गच्छति | ५।४।७२ |
| उपखा | ५।१।१७१ |
| उपघातः | ५।३।३६ |
| उपघातः | ५।३।८२ |
| उपघ्न आसन्नः | ५।३।३६ |
| उपचाय्यः | ५।१।२५ |
| उपचेयः | ५।१।२५ |
| उपजः | ५।१।१७१ |
| उपजापः | ५।३।४७ |
| उपदा | ५।३।११० |
| उपद्रवः | ५।३।५९ |
| उपधा | ५।३।११० |
| उपधिः | ५।३।८७ |
| उपनिषत् | ५।३।९२ |
| उपनिषत् | ५।३।११४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपपादुका देवाः ५।२।४१
उपभृत् ५।३।११४
उपभोक्ता ५।१।१५४
उपयमः ५।३।२५
उपयामः ५।३।२५
उपरावः ५।३।२२
उपरोधी ५।१।५३
उपशयः ५।३।७७
उपशुश्राव ५।२।१
उपशुश्रुवान् ५।२।२
उपश्रुतः ५।२।१
उपश्रुतवान् ५।२।१
उपश्रुत् ५।३।११४
उपसत् ५।१।१४८
उपसत् ५।३।११४
उपसरजः ५।१।१६९
उपसर्या गौः ५।१।३२
उपससाद ५।२।१
उपसारो भृत्यै राज्ञाम् ५।३।३१
उपसार्या शरदि मथुरा ५।१।३२
उपसेदिवान् ५।२।२
उपस्कारं मद्रका लुनन्ति ५।४।७२
उपस्थानीयः शिष्येण गुरुः ५।१।८
उपस्थानीयः शिष्यो गुरोः ५।१।८
उपस्थायी ५।१।५३
उपस्थायुको गुरुम् ५।२।४०
उपस्थितं शिष्येण ५।१।९
उपस्थितिः ५।३।९६
उपस्थितो गुरुं शिष्यः ५।१।९
उपस्थितो गुरुः शिष्येण ५।१।९
उपस्पृशति ५।१।१४९
उपहतिः ५।१।३६
उपहवः ५।३।४२
उपागात् ५।२।३
उपाध्यायः ५।३।१९
उपाध्याया ५।३।१९
उपाध्यायी ५।३।१९
उपानत् ५।३।११४
उपावृत् ५।३।११४
उपाशृणोत् ५।२।१
उपाश्रौषीत् ५।२।१
उपासदत् ५।२।१
उपासना ५।३।९२
उपासना ५।३।१११
उपासितं शिष्येण ५।१।९
उपासितो गुरुं शिष्यः ५।१।९
उपासितो गुरुः शिष्येण ५।१।९
उपासीदत् ५।२।१
उपास्तिः ५।३।९२
उपेयम् ५।१।४०
उपेयाय ५।२।३
उपेयिवान् ५।२।३
उपैत् ५।२।३
उप्तिः ५।३।१०८
उप्त्रिमम् ५।३।८४
उरःप्रतिपेषं युध्यन्ते ५।४।८०
उरगः ५।१।१३१
उरङ्गमः ५।१।१३१
उरश्छदः ५।३।१३०
उरांसि प्रतिपिष्य युध्यन्ते ५।४।८०
उरांसि प्रतिपेषं युध्यन्ते ५।४।८०
उर्वीरुहो वृक्षः ५।१।१४४
उश्यात् ५।४।२४
उष्टिः ५।३।१०८
उष्ट्रक्रोशी ५।१।१५३
उष्णभोज आतुरः ५।१।१५४
उष्णभोजी ५।१।१५४
उष्णिक् छन्दः ५।१।१४८
ऊः ५।१।१४८
ऊः ५।३।११५
ऊर्क् ५।२।८३
ऊतिः ५।३।११५
ऊना ५।३।१०९
ऊर्जः ५।२।८३
ऊर्जौ ५।२।८३
ऊर्ध्वपूरं पूर्यते ५।४।७०
ऊर्ध्वशयः ५।१।१३६
ऊर्ध्वशोषं शुष्यति ५।४।७०
ऊषुरिह पुरा छात्राः ५।२।१५
ऊहा ५।३।१०६
ऊहा ५।३।१२२
ऋक् ५।१।१५
ऋतिः ५।३।१०८
ऋतिङ्करः ५।१।१०६
ऋतीया ५।३।१०५
ऋत्विग् याजकः ५।१।१४८
ऋफिडः ५।२।९३
ऋषिनिकायः ५।३।७९
ऋष्टिग्रहः ५।१।९२
एकः कारः ५।३।८१
एककरः ५।१।१०२
एकस्तण्डुलनिश्चायः ५।३।८१
एकस्तण्डुलावक्षायः ५।३।८१
एका तिलोच्छ्रितिः ५।३।८१
एको निघासः ५।३।८१
एधिता ५।२।४४
एवं कृत्वा भुङ्क्ते ५।४।५०
एवंकारं भुङ्क्ते ५।४।५०
एषणा ५।३।११२
एषणी ५।३।१२९
ऐकध्यं कृत्वा गतः ५।४।८६
ऐकध्यं भूत्वा आस्ते ५।४।८६
ऐकध्यंकारं गतः ५।४।८६
ऐकध्यंकृत्य गतः ५।४।८६
ऐकध्यंभावमास्ते ५।४।८६
ऐकध्यंभूय आस्ते ५।४।८६
ओघोपकरणं पवित्रम् ५।२।८६
ओदनं भोजको व्रजति ५।३।१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| ओदनपाकं सुप्तो भवान् | ५।१।११ |
| ओदनपाचं पक्वः | ५।४।७१ |
| ओदनभोजनं सुखम् | ५।३।१२५ |
| ओदनस्य पाचको व्रजति | ५।३।१३ |
| कः | ५।१।१७१ |
| कङ्कचित् | ५।१।१६५ |
| कच्छपः | ५।१।१४२ |
| कटं करोतु भवान् | ५।४।२८ |
| कटं कारको व्रजति | ५।३।१४ |
| कटं कुर्यात् भवान् | ५।४।२८ |
| कटचिकीः | ५।१।१४८ |
| कटप्रूः | ५।२।८३ |
| कणादः | ५।१।१५० |
| कण्टकानां मर्दनम् | ५।३।१२५ |
| कण्डूः | ५।३।९२ |
| कण्डूः | ५।३।११५ |
| कण्डूतिः | ५।३।९२ |
| कण्डूया | ५।३।९२ |
| कण्डूया | ५।३।१०५ |
| कण्डूया | ५।३।११५ |
| कण्डूयिता | ५।२।६८ |
| कतमो भवतां भिक्षां ददाति ? | ५।३।९ |
| कतमो भवतां भिक्षां दाता ? | ५।३।९ |
| कतमो भवतां भिक्षां दास्यति ? | ५।३।९ |
| कतरो भवतोर्भिक्षां ददाति ? | ५।३।९ |
| कतरो भवतोर्भिक्षां दाता ? | ५।३।९ |
| कतरो भवतोर्भिक्षां दास्यति ? | ५।३।९ |
| कतीह शिखण्डं वहमानाः | ५।२।२४ |
| कतीह हस्तिनं निघ्नानाः | ५।२।२४ |
| कतीहात्मानं वर्णयमानाः | ५।२।२४ |
| कथं कृत्वा भुङ्क्ते | ५।४।५० |
| कथंकारं भुङ्क्ते | ५।४।५० |
| कथा | ५।३।१०९ |
| कदा बुभुजे | ५।३।८ |
| कदा भुक्तवान् | ५।३।८ |
| कदा भुङ्क्ते | ५।३।८ |
| कदा भोक्ता | ५।३।८ |
| कदा भोक्ष्यते | ५।३।८ |
| कद्वदः | ५।१।५० |
| कन्यां मण्डयति | ५।१।७२ |
| कन्यावरः | ५।१।५० |
| कपाटघ्नश्चौरः | ५।१।८६ |
| कपित्थः | ५।१।१४२ |
| कफमुन्मूल्य जल्पति | ५।४।७९ |
| कमण्डलुग्राहः | ५।१।७२ |
| कमना युवतिः | ५।२।४२ |
| कमनी | ५।३।१२६ |
| कमिता | ५।२।७९ |
| कम्पनः | ५।२।४३ |
| कम्पना शाखा | ५।२।४२ |
| कम्प्रः | ५।२।७९ |
| कम्प्रा शाखा | ५।२।४२ |
| कम्बलक्नोपं वृष्टो मेघः | ५।४।५८ |
| कम्बलदः | ५।१।७६ |
| कम्रः | ५।२।७९ |
| कम्रा युवतिः | ५।२।७९ |
| करः | ५।१।४९ |
| करः | ५।३।२८ |
| करः | ५।३।१३० |
| करग्राहं गृह्णाति | ५।४।६६ |
| करणीयं भवता | ५।१।२७ |
| करन्धमः | ५।१।१२१ |
| करन्धमाः पन्थानः | ५।१।१२१ |
| करन्धयः | ५।१।१२१ |
| करवर्तं वर्तते | ५।४।६६ |
| करवर्तं वर्तयति | ५।४।६६ |
| करिष्यामीति व्रजति | ५।३।१३ |
| करीषङ्कषा वात्या | ५।१।११० |
| कर्णधारः | ५।१।९४ |
| कर्णेजपः सूचकः | ५।१।१४३ |
| कर्णेजपिता मन्त्री | ५।१।१४३ |
| कर्तव्यम् | ५।१।२७ |
| कर्ता | ५।१।३ |
| कर्तुं व्रजति | ५।१।१३ |
| कर्तुं व्रजति | ५।३।१३ |
| कर्तृकरः | ५।१।१०२ |
| कर्त्ता कटम् | ५।२।२७ |
| कर्त्ता कटस्य | ५।२।२७ |
| कर्त्ता विकटः | ५।२।२७ |
| कर्त्ता श्वः | ५।३।५ |
| कर्मकरी दासी | ५।१।१०४ |
| कर्मकरो भृतकः | ५।१।१०४ |
| कर्मकारः | ५।१।१०४ |
| कर्मकृत् | ५।१।१६२ |
| कर्मजित् | ५।१।१४८ |
| कर्षति(न्ति) शाखां ग्रामम् | ५।४।७५ |
| कर्हि भुङ्क्ते | ५।३।८ |
| कर्हि भोक्ता | ५।३।८ |
| कर्हि भोक्ष्यते | ५।३।८ |
| कलहकारः | ५।१।१०३ |
| कल्प्यम् | ५।१।४१ |
| कल्याणभागी | ५।२।५० |
| कल्याणाचारः | ५।१।७३ |
| कल्याणाचारा | ५।१।७३ |
| कवचहरः क्षत्रियकुमारः | ५।१।९५ |
| कषः | ५।३।१३१ |
| कषायपायिणो गान्धाराः | ५।१।१५७ |
| कषिः | ५।१।१५ |
| कषिः | ५।२।९३ |
| कषिताः शत्रवः शूरेण | ५।३।३ |
| कष्टम्(२) | ५।३।३ |
| कष्टा दिशस्तमसा | ५।३।३ |
| काकगुहास्तिलाः | ५।१।१४४ |
| काकनाशं नष्टः | ५।४।७१ |
| काण्डधारः | ५।१।९४ |
| काण्डलावः | ५।१।७२ |
| काण्डलावो व्रजति | ५।३।१४ |
| काण्डानि लविष्यामीति व्रजति | ५।३।१४ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

कान्तः ५।२।९२
कामदुघा ५।१।१४५
कामधुक् ५।१।१४५
कामधुक् ५।१।१४८
कामना ५।३।१११
कामप्रदः ५।१।१४४
कामयते ५।४।२४
कामयमानस्य भुङ्क्ते ५।४।२७
कामयमानो भुङ्क्ते ५।४।२७
कामये अधीतां भवान् ५।४।२७
कामये अधीयीत भवान् ५।४।२७
कामयेत ५।४।२४
कामुकः ५।२।४०
कामुका युवतिः ५।२।४२
कामुकी रिरंसुः ५।२।४०
कायः शरीरम् ५।३।७९
कारं कारं व्रजति ५।१।१३
कारः ५।३।१८
कारकः ५।१।३
कारकरः ५।१।१०२
कारको व्रजति ५।३।१३
कारणम् ५।३।१२७
कारणा ५।३।१११
कारभूः पण्यमूल्यादिनिर्णेता ५।२।८३
कारा गुप्तिः ५।३।१०८
कारिका ५।३।१२२
कारी मे कटमसि ५।४।३६
कारी ५।४।३६
कारुः ५।१।१५
कारुः ५।२।९३
कार्यम्(२) ५।१।१६, ५।१।१७
कार्य्यसारः ५।३।१७
कालो भोक्तव्यस्य ५।४।३३
कालो भोक्तुम् ५।४।३३
कालो यदधीयीत भवान् ५।४।३४
कालो यदध्ययनस्य ५।४।३४
कालो यदभोक्ष्यत भवान् ५।४।११
काष्ठनिचयः ५।३।७९
काष्ठभित् ५।१।१४८
काष्ठभेदः ५।१।५४
काष्ठोद्घनः ५।३।३६
किं जगन्थ त्वं मथुराम् ? ५।२।१३
किंकरः ५।१।१०१
किंकरा ५।१।१०१
किंकरी ५।१।१०१
किंजः ५।१।१७१
किमगच्छस्त्वं मथुराम् ? ५।२।१३
किरः ५।१।५४
कीः ५।१।१४८
कीर्तिः ५।३।९४
कीर्त्तना ५।३।९४
कीलालपाः ५।१।१४७
कुक्षिम्भरिः ५।१।९०
कुटुम्बभारः ५।१।११२
कुट्टाकः ५।२।७०
कुट्टाकी ५।२।७०
कुड्यचायः ५।१।१६४
कुण्डधारः ५।१।९४
कुण्डपानोऽन्यः ५।१।२२
कुण्डपाय्यः क्रतुः ५।१।२२
कुण्डा ५।३।१०६
कुप्यं धनम् ५।१।३९
कुमारघाती ५।१।८२
कुमारनीतिः ५।१।७१
कुमारभृत्या ५।१।४५
कुमुदं कैरवम् ५।१।१४४
कुम्बा ५।३।१०९
कुम्भकारः ५।१।७२
कुम्भकारो व्रजति ५।३।१४
कुरुचरः ५।१।१३८
कुरुचरी ५।१।१३८
कुरुविन्दः ५।१।६१
कुर्वच्चरः ५।२।२०
कुर्वत्पाशः ५।२।२०
कुर्वत्प्रियः ५।२।२०
कुर्वद्भक्तिः ५।२।२०
कुर्वाणभक्तिः ५।२।२०
कुलकरं धनम् ५।१।१०३
कुलत्थः ५।१।१४२
कुलदमनः ५।१।५२
कुलार्हः ५।१।९१
कुल्माषखादाश्चौराः ५।१।१५७
कुविन्दः ५।१।६१
कुशेशयः ५।१।१३७
कुहना ५।३।१०८
कुहा नाम नदी ५।३।१०८
कूटबन्धं बद्धः ५।४।६८
कूटस्थः ५।१।१४२
कूप आसीत् ५।२।१९
कूपो बभूव ५।२।१९
कूलङ्कषा नदी ५।१।११०
कूलन्धयः ५।१।११९
कूलमुद्रुजो गजः ५।१।१२२
कूलमुद्वहा नदी ५।१।१२२
कृच्छ्रसाध्यः ५।३।१३९
कृतः ५।१।१७४
कृतघ्नः ५।१।८५
कृतवान् ५।१।१७४
कृतिः ५।१।१६
कृतिः ५।३।९१
कृतिः ५।३।१००, ५।३।१०१
कृतिः ५।३।११५
कृतिः ५।३।१३९
कृतो देवदत्तः ५।१।११
कृत् ५।३।११५
कृत्यम् ५।१।४२
कृत्या ५।३।१००
कृत्रिमम् ५।३।८४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्वा ५।१।१४७
कृत्वा व्रजति ५।१।१३
कृत्वानौ ५।१।१४७
कृपा ५।३।१०१
कृपालुः ५।२।३७
कृशः ५।१।५४
कृष्टपच्याः शालयः ५।१।४
के के भवन्तो भोजयन्ति ? ५।३।९
के के भवन्तो भोजयितारः ? ५।३।९
के के भवन्तो भोजयिष्यन्ति ? ५।३।९
केशग्राहं युध्यन्ते(२) ५।४।७६
केशपरिधायं नृत्यति ५।४।७९
केशान् परिधायं नृत्यति ५।४।७९
केशेषु गृहीत्वा युध्यन्ते ५।४।७६
केशेषु ग्राहं युध्यन्ते ५।४।७६
केशैर्गृहीत्वा युध्यन्ते ५।४।७६
केशैर्ग्राहं युध्यन्ते ५।४।७६
कोपः ५।१।५०
कोपनः ५।२।४२
कौर्वतः ५।२।२०
कौशल्याजः ५।१।१७०
क्नूयिता ५।२।४५
क्रमः ५।३।१३२
क्रयः ५।३।२८
क्रव्यात् आममांसभक्षः ५।१।१५१
क्रव्यादः पक्वमांसभक्षः ५।१।१५१
क्रिया ५।३।१००
क्रीडाकरः ५।१।१०३
क्रुङ् ५।१।१४८
क्रुत् ५।३।११४
क्रुद्धः ५।२।९२
क्रुधिः ५।३।१३८
क्रोधनः ५।२।४२
क्रोशहः ५।१।८०
क्रौञ्चबन्धं बद्धः ५।४।६७
क्लमी ५।२।४९
क्लेशकः ५।२।६८
क्लेशापहः ५।१।८१
क्वणः ५।३।४८
क्वणो वीणायाः ५।३।२७
क्वाणः ५।३।४८
क्वाणो वीणायाः ५।३।२७
क्षणदाकरः ५।१।१०२
क्षत्रियजं युद्धम् ५।१।१७१
क्षपा रात्रिः ५।३।१०८
क्षपाकरः ५।१।१०२
क्षमते भोक्तुम् ५।४।९०
क्षमा ५।३।१०७
क्षमी ५।२।४९
क्षयः ५।३।२८
क्षयी ५।२।७२
क्षवः ५।३।७१
क्षवः ५।३।८३
क्षवथुः ५।३।८३
क्षान्तः ५।२।९२
क्षान्तिः ५।३।१०७
क्षिपा प्रेरणम् ५।३।१०८
क्षिप्नुः ५।२।३२
क्षिया आचारभ्रंशः ५।३।१०८
क्षीरपा बाला ५।१।७५
क्षीरपायिण उशीनराः ५।१।१५७
क्षीरपेषं पिनष्टि ५।४।६५
क्षुधितक्लान्तव्रीडिताः ५।२।९२
क्षेत्रकरः ५।१।१०२
क्षेमकारः ५।१।१०५
क्षेमङ्करः ५।१।१०५
क्षेष्णुः ५।२।३१
क्ष्मायिता ५।२।४५
क्ष्विण्णः ५।२।९२
खगः पक्षी ५।१।१३१
खड्गं गृहीत्वा युध्यन्ते ५।४।७८
खड्गप्रहारं शत्रून् विजयते ५।४।७४
खदिरसारः ५।३।१७
खनकः ५।१।६५
खनकी ५।१।६५
खनित्रम् ५।२।८७
खम् ५।१।१७१
खरधः ५।१।१२०
खरध्मः ५।१।१२०
खरनादी ५।१।१५३
खरिन्धमः ५।१।१२०
खरिन्धयः ५।१।१२०
खरुसंगायः ५।१।७४
खलः ५।३।१३१
खलतिः ५।१।१४
खलपूः ५।१।१४८
खलम् ५।३।२९
खलु कृत्वा ५।४।४४
खशयः ५।१।१३७
खादकः ५।२।६८
खादितारौ वृकाविव ५।२।६७
खानकः ५।१।६५
खेयम् ५।१।३८
गङ्गामित्त्रः ५।१।७१
गणकः ५।२।६८
गतं मतङ्गजस्य ५।३।१२३
गतम् ५।४।४
गतं मैत्रेण ५।१।११
गतो मैत्रेण ग्रामः ५।१।११
गतो मैत्रो ग्रामम् ५।१।११
गत्वरः ५।२।७८
गत्वरी ५।२।७८
गद्यम् ५।१।३०
गन्ता खेलः ५।२।२७
गन्ता खेलः ५।२।४२
गमः ५।३।२८
गमनम् ५।३।१२४
गमी ग्रामम् ५।३।१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | | | |
|---|---|---|---|---|---|
| गम्यम् | ५।१।२९ | गेयानि माणवकेन सामानि | ५।१।७ | गोमान् भविता | ५।४।४१ |
| गरः | ५।३।२८ | गेयो गाथको गीतस्य | ५।४।३६ | गोविन्दः | ५।१।६१ |
| गर्त्ताशयः | ५।१।१३७ | गेयो गाथानाम् | ५।४।३६ | गोष्पदपूरं वृष्टो मेघः | ५।४।५७ |
| गर्धनः | ५।२।४२ | गेयो माणवकः साम्नाम् | ५।१।७ | गोष्पदपूरंकल्पम् | ५।४।५७ |
| गलेचोपकः | ५।१।२ | गेहं गेहमनुप्रपातमास्ते | ५।४।८१ | गोष्पदपूरंतमां वृष्टो मेघः | ५।४।५७ |
| गल्भा | ५।३।१०५ | गेहं गेहमनुप्रपादमास्ते | ५।४।८१ | गोष्पदपूरंतरां वृष्टो मेघः | ५।४।५७ |
| गवामुपसरः | ५।३।३१ | गेहं गेहमनुप्रविश्यास्ते | ५।४।८१ | गोष्पदपूरंदेशीयम् | ५।४।५७ |
| गां दोग्धा | ५।२।५० | गेहं गेहमनुप्रवेशमास्ते | ५।४।८१ | गोष्पदपूरंदेश्यम् | ५।४।५७ |
| गात्रस्नायं वृष्टो मेघः | ५।४।५९ | गेहं गेहमवस्कन्दमास्ते | ५।४।८१ | गोष्पदपूरंरूपं वृष्टो मेघः | ५।४।५७ |
| गाथकः | ५।१।६६ | गेहमनुप्रपातमनुप्रपातमास्ते | ५।४।८१ | गोष्पदपूरम् | ५।४।५७ |
| गाथाकारः | ५।१।१०३ | गेहमनुप्रपादमनुप्रपादमास्ते | ५।४।८१ | गोष्पदपूरेण | ५।४।५७ |
| गामुकः | ५।२।४० | गेहमनुप्रवेशमनुप्रवेशमास्ते | ५।४।८१ | गोष्पदप्रं वृष्टो मेघः | ५।४।५७ |
| गायनः | ५।१।६७ | गेहमवस्कन्दमवस्कन्दमास्ते | ५।४।८१ | गोष्पदप्रंकल्पम् | ५।४।५७ |
| गायनी | ५।१।६७ | गेहानुप्रपातमास्ते | ५।४।८१ | गोष्पदप्रंतमां वृष्टो मेघः | ५।४।५७ |
| गिरिशः | ५।१।१३७ | गेहानुप्रपादमास्ते | ५।४।८१ | गोष्पदप्रंतरां वृष्टो मेघः | ५।४।५७ |
| गिरिशयः | ५।१।१३७ | गेहानुप्रवेशमास्ते | ५।४।८१ | गोष्पदप्रंदेशीयम् | ५।४।५७ |
| गिलः | ५।१।५४ | गेहावस्कन्दमास्ते | ५।४।८१ | गोष्पदप्रंदेश्यम् | ५।४।५७ |
| गीः | ५।१।१४८ | गोघ्नः पातकी | ५।१।८५ | गोष्पदप्रंरूपं वृष्टो मेघः | ५।४।५७ |
| गीः | ५।३।११४ | गोघ्नोऽतिथिः | ५।१।८५ | गोष्पदप्रम् | ५।४।५७ |
| गुणगृह्या वचने विपश्चितः | ५।१।४४ | गोचरो देशः | ५।३।१३१ | गोष्पदप्रेण | ५।४।५७ |
| गुणानधिष्ठायुकः | ५।२।४० | गोत्रभित् | ५।१।१४८ | गोसंख्यः | ५।१।७७ |
| गुप्तिबन्धं बद्धः | ५।४।६८ | गोदः | ५।१।१६ | गोसंदायः | ५।१।५६ |
| गुरुतल्पगः | ५।१।१३१ | गोदः | ५।१।७६ | गोसंदायः | ५।१।७६ |
| गुरूनिष्टवान् | ५।१।१५८ | गोदायो व्रजति | ५।१।१ | गोह्यम् | ५।१।४२ |
| गुरूपघ्नः | ५।३।३६ | गोदायो व्रजति | ५।३।१४ | ग्रन्थना | ५।३।१११ |
| गुहा पर्वतकन्दरा औषधिश्च | ५।३।१०८ | गोदोहनी | ५।३।१२९ | ग्रन्थस्य पदनः | ५।२।४२ |
| गुहाशयः | ५।१।१३७ | गोधा प्राणिविशेषो दोस्त्राणं च | ५।३।१०८ | ग्रहः सूर्यादिः | ५।१।६२ |
| गुह्यम् | ५।१।४२ | गोधुक् | ५।१।१४८ | ग्रहः | ५।३।२८ |
| गूढिः | ५।३।१०८ | गोपः | ५।१।५० | ग्रहः | ५।३।५५ |
| गृध्नुः | ५।२।३२ | गोपाया | ५।३।१०५ | ग्रामगः | ५।१।१३१ |
| गृध्यम् | ५।१।४१ | गोपोषं पुष्णाति | ५।४।६५ | ग्रामगृह्या श्रेणिः | ५।१।४४ |
| गृहमध्यगः | ५।१।१३१ | गोपोषं पुष्यति | ५।४।६५ | ग्रामणीः | ५।१।१४८ |
| गृहम् | ५।१।५५ | गोपोषं पोषति | ५।४।६५ | ग्रामोपघ्नः | ५।३।३६ |
| गृहयालुः | ५।२।३७ | गोप्यम् | ५।१।३९ | ग्रावस्तुतौ | ५।२।८३ |
| गृहाणि गृहाः | ५।१।५५ | गोमयनिकायः | ५।३।७९ | ग्रावस्तुत् | ५।२।८३ |
| गृह्याः कामिनः | ५।१।४४ | गोमानासीत् | ५।४।४१ | ग्राही | ५।१।५३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्राहो मकरादिः ५।१।६२
ग्राह्यं वचः ५।१।४४
ग्लानिः ५।३।११८
ग्लायः ५।१।६४
ग्लायति भोक्तुम् ५।४।९०
ग्लास्नुः ५।२।३१
घटग्रहः ५।१।९२
घटते भोक्तुम् ५।४।९०
घटधः ५।१।१२०
घटध्मः ५।१।१२०
घटा ५।३।१०७
घटिन्धमः ५।१।१२०
घटिन्धयः ५।१।१२०
घट्टना ५।३।१११
घनः ५।३।३७
घनघात्यः ५।१।१
घना व्रीहयः ५।३।३७
घनाः केशाः ५।३।३७
घर्मत्रम् ५।१।१४२
घर्मदुघा ५।१।१४५
घस्मरः ५।२।७३
घातः ५।१।३६
घातः(२) ५।३।४६
घातुकः ५।२।४०
घासः ५।३।२३
घृतनिधायं निहितः ५।४।७१
घृतपावा ५।१।१४७
घृतपेषं पिनष्टि ५।४।६५
घृतविक्रयी ५।१।१५९
घृतविक्रायः ५।१।१५९
घृतस्पृक् ५।१।१४९
घृतोदङ्कः ५।३।१३५
चंक्रमणः ५।२।४६
चकार कटं चैत्रः ५।२।८
चकासकः ५।२।६८
चक्रधरः ५।१।९४
चक्रबन्धं बद्धः ५।४।६८
चक्राणः ५।२।२
चक्रिः ५।२।३९
चण्डालिकाबन्धं बद्धः ५।४।६७
चत्यम् ५।१।२९
चन्दनतक्षा क्रीडा ५।३।१२१
चयः ५।३।२८
चयः ५।३।१३९
चरित्रम् ५।२।८७
चरिष्णुः ५।२।२८
चरुः ५।१।१४
चर्चा ५।३।१०९
चर्चापारः ५।१।७२
चर्त्यम् ५।१।४१
चर्म ५।१।१५
चर्म ५।२।९३
चर्मपूरमास्ते ५।४।५६
चर्यं भवता ५।१।३१
चर्या ५।३।९९
चर्यो देशः ५।१।३१
चलः ५।१।६२
चलनः ५।२।४३
चाचलिः ५।२।३८
चाटुकारः ५।१।१०३
चारकबन्धं बद्धः ५।४।६८
चारुनर्ती ५।१।१५५
चार्वाघाटः ५।१।८१
चार्वाघातः ५।१।८१
चालः ५।१।६२
चिकीर्षा मे उदपादि ५।३।१२०
चिकीर्षा ५।१।१६
चिकीर्षा ५।३।१०५
चिकीर्षिता कटम् ५।२।४२
चिकीर्षुः ५।२।३३
चितिः ५।१।१६
चितिः ५।३।९१
चितिः ५।३।१३९
चित्योऽग्निः ५।१।२५
चित्रं यदि सोऽधीयीत ५।४।२०
चित्रकरः ५।१।१०२
चिन्ता ५।३।१०९
चिरं जीवति मैत्रः ५।४।३८
चुरा चौर्यम् ५।३।१०८
चुलुम्पकः ५।२।६८
चूर्णपेषं पिनष्टि ५।४।६०
चूर्त्तिः ५।३।१०२
चेतनः ५।२।४४
चेतयः ५।१।५९
चेयः ५।१।२५
चेयम् ५।१।२८
चेलक्नोपं वृष्टो मेघः ५।४।५८
चेष्टनः ५।२।४३
चेष्टो बलम् ५।३।१३२
चोपनः ५।२।४३
चोरंकारमाक्रोशति ५।१।१३
चोरंकारमाक्रोशति ५।४।४८, ५।४।५२
चौरं द्विषन् ५।२।२६
चौरघातः ५।१।६०
चौरघातो राजा ५।१।८३
चौरस्य द्विषन् ५।२।२६
छत्रधारः ५।१।५९
छत्रधारः ५।१।९४
छत्रधारः ५।१।११३
छित् ५।१।१४८
छित् ५।३।११५
छित्तिः ५।३।११५
छित्तिश्चौर्यादिकरणाद् राजापराधः ५।३।१०८
छिदा द्वैधीकरणम् ५।३।१०८
छिदुरः ५।२।७५
छिदुरा रज्जुः ५।१।४
जंजपूकः ५।२।४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जगत् ५।२।८३
जग्मिवान् ५।२।२
जघान कंसं किल वासुदेवः ५।२।८,
जघान कंसं वासुदेवः ५।२।१२
जङ्घाकरः ५।१।१०२
जज्ञिः ५।२।३९
जटाधरः ५।१।९४
जनङ्गमश्चण्डालः ५।१।१३१
जनमेजयः ५।१।११८
जनार्दनः ५।१।५२
जन्यः ५।१।७
जन्यमनेन ५।१।७
जपः ५।३।४७
जप्यम् ५।१।४२
जमालिनाशं नष्टः ५।४।७१
जयः ५।३।२८
जयः ५।३।१३९
जयतात् ५।४।३८
जयताम् ५।४।३८
जयन्तु ५।४।३८
जयी ५।२।७२
जरती ५।१।१७३
जरन् ५।१।१७३
जरा ५।३।१०७
जरापहः ५।१।८१
जलधरः ५।१।९४
जलधिः ५।३।८८
जल्पतिकल्पम् ५।२।२०
जल्पत्कल्पः ५।२।२०
जल्पनः ५।१।५२
जल्पाकः ५।२।७०
जल्पाकी ५।२।७०
जवनः ५।२।४२
जागः ५।१।१४७
जागरा ५।३।१०४
जागरिता ५।२।४२
जागरूकः ५।२।४२
जागरूकः ५।२।४८
जागर्या ५।३।१०४
जातः ५।४।४
जानन् ५।२।२०
जानाति भोक्तुम् ५।४।९०
जाप्यम् ५।१।४२
जायाघ्नाः तिलकालकाः ५।१।८३
जायाघ्नो ब्राह्मणः ५।१।८४
जारः(२) ५।३।१३४
जारभरा ५।१।५०
जिघ्रः ५।१।५८
जित्या हलिः ५।१।४३
जित्यो हलिः ५।१।४३
जित्वरः ५।२।७७
जित्वरी ५।२।७७
जिष्णुः ५।२।३०
जिहीर्षा ५।१।१६
जिहीर्षुः ५।२।३३
जीयात् ५।४।३८
जीयासुः ५।४।३८
जीयास्ताम् ५।४।३८
जीर्णः ५।१।१७३
जीर्णवान् ५।१।१७३
जीवं न मारयति ५।२।१९
जीवकः ५।१।७०
जीवका ५।१।७०
जीवग्राहं गृह्णाति ५।४।६१
जीवनाशं नश्यति ५।४।६९
जीविका ५।१।७०
जीविका ५।३।१२२
जुगुप्सनः ५।२।४४
जुष्टः ५।२।९२
जुष्यः ५।१।४०
जुहूः ५।२।८३
जुह्वत् ५।२।२०
जूः ५।२।८३
जूः ५।३।११५
जूतिः ५।३।९४
जूर्तिः ५।३।११५
जेयम् ५।१।२८
ज्ञः ५।१।१६
ज्ञप्तिः ५।३।९४
ज्ञाता ५।१।१६
ज्ञानावरणीयम् ५।१।८
ज्ञायकः ५।१।१६
ज्यानिः ५।३।११८
ज्वलः ५।१।६२
ज्वलनः ५।२।४२
ज्वालः ५।१।६२
डेप्यम् ५।१।२०
तक्यम् ५।१।२९
तक्रपायिणः सौराष्ट्राः ५।१।१५७
तण्डुलसंग्राहः ५।३।८१
ततिराणः ५।२।२
तत्करः ५।१।१०१
तत्करा ५।१।१०१
तत्त्वप्राट् ५।२।८३
तत्त्ववित् ५।१।१४८
तदाऽभाषत राघवः ५।२।१५
तदाऽभाषिष्ट राघवः ५।२।१५
तनिः ५।२।९३
तनुः ५।१।१५
तन्तिः ५।१।७१
तन्तुवायः ५।१।७६
तन्द्रालुः ५।२।३७
तपनः ५।१।५२
तप्यम् ५।१।२९
तमश्छित् ५।१।१४८
तमी ५।२।४९
तमोऽपहः ५।१।८१
तमोपहा ५।१।१६१
तरः ५।३।२८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तव पर्यायो भोक्तुम् ५।३।७६
तव राजविशायः ५।३।७७
तस्करः ५।१।१०१
तस्थुः स्थास्यन्ति गिरयः ५।२।१९
ताडघः शिल्पी ५।१।८९
ताडघातः ५।१।८९
तादृक् ५।१।१५२
तादृक्षः ५।१।१५२
तादृक्षा ५।१।१५२
तादृशः ५।१।१५२
तादृशी ५।१।१५२
तानः ५।१।६४
ताम्रोद्घनः ५।३।३६
तारा ज्योतिः ५।३।१०८
तार्किकनिकायः ५।३।८०
तितीर्वान् ५।२।२
तिर्यक् कृत्वा आस्ते ५।४।८५
तिर्यक् कृत्वा काष्ठं गतः ५।४।८५
तिर्यक्कारमास्ते ५।४।८५
तिर्यक्कृत्य आस्ते ५।४।८५
तिर्यङ् ५।१।१४८
तिलन्तुदः काकः ५।१।१२४
तिलपीडनी ५।३।१२९
तिष्ठन्तोऽनुशासति गणकाः ५।२।२०
तिष्यः ५।१।३९
तीरगः ५।१।१३१
तीर्णि ५।३।१०८
तीर्थङ्करः ५।१।१०५
तीर्थकरः ५।१।१०५
तीर्थकारः ५।१।१०५
तीर्थकृत् ५।१।१६२
तुन्दपरिमार्ज आतुरः ५।१।१४३
तुन्दपरिमृजोऽलसः ५।१।१४३
तुरगः ५।१।१३१
तुरङ्गः ५।१।१३१
तुरङ्गमोऽश्वः ५।१।१३१
तुला उन्मानम् ५।३।१०८
तुष्टः ५।२।९२
तूः ५।३।११५
तूर्णः ५।२।९२
तूर्ति ५।३।११५
तूलिकाया उत्थानं सुखम् ५।३।१२५
तूष्णीं भूत्वा आस्ते ५।४।८७
तूष्णींभावमास्ते ५।४।८७
तूष्णींभूय आस्ते ५।४।८७
तृट् ५।३।११४
तृणस्य विस्तरः ५।३।६९
तृप्तः ५।२।९२
तृषितः ५।२।९२
तृष्णक् ५।२।८०
तृष्णजौ ५।२।८०
तृष्णा ५।३।१०१
तैलपेषं पिनष्टि ५।४।६५
तैलविक्रयी ब्राह्मणः ५।१।१५९
तैलविक्रायो वणिक् ५।१।१५९
तैलोदङ्कः ५।३।१३५
तोत्त्रम् ५।२।८८
तोमरग्रहः ५।१।९२
तोला ५।३।१०९
त्यागः ५।३।१८
त्यागी ५।२।५०
त्यादृक् ५।१।१५२
त्यादृक्षः ५।१।१५२
त्यादृक्षा ५।१।१५२
त्यादृशः ५।१।१५२
त्यादृशी ५।१।१५२
त्रयः काराः ५।३।८१
त्रस्नुः ५।२।३२
त्राः ५।३।११४
त्रिकरः ५।१।१०२
त्वद्गृह्यः ५।१।४४
त्वरा ५।३।१०७
त्विट् ५।३।११४
त्वेषणः ५।१।३९
त्सरुग्रहः ५।१।९२
दंदशूकः ५।२।४७
दंदहूकः ५।२।४७
दंद्रमणः ५।२।४६
दंष्ट्रा ५।२।९०
दण्डग्रहः ५।१।९२
दण्डग्राहः ५।१।९२
दण्डधारः ५।१।९४
दण्डमुद्यामं धावति ५।४।७८
दण्डाताडं गाः कलयति ५।४।७४
दण्डेनाताडं गाः कलयति ५।४।७४
दण्डेनोपघातं गाः सादयति ५।४।७४
दण्डेनोपहत्य गाः कलयति ५।४।७४
दण्डोद्यामं धावति ५।४।७८
दण्डोपघातं गाः सादयति ५।४।७४
दत्तिः ५।३।११०
ददः ५।१।६४
ददृतौ ५।२।८३
ददृत् ५।२।८३
दधः ५।१।६४
दधिः ५।२।३९
दधिघनः ५।३।३७
दधित्थः ५।१।१४२
दधिर्गाः ५।२।३६
दधृक् प्रगल्भः ५।१।१४८
दध्यङ् ५।१।१४८
दन्तच्छदः ५।३।१३०
दन्तान् प्रकाश्य जल्पति ५।४।४६
दमनः ५।१।५२
दमी ५।२।४९
दया अनुकम्पा ५।३।१०८
दयालुः ५।२।३७
दयितः ५।२।९२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दयिता ५।२।४५
दरः(२) ५।३।२८
दरिद्रहत्या ५।१।३६
दरिद्रायकः ५।२।६८
दर्पणः ५।१।५२
दर्पापहः ५।१।८१
दर्भः पवित्रः ५।२।८६
दर्शः ५।१।५०
दर्शनावरणीयम् ५।१।८
दर्शनीयमानी भार्यायाः ५।१।११६
दवः ५।१।६२
दवः ५।३।६०
दवथुः ५।३।८३
दस्युंकारमाक्रोशति ५।४।५०, ५।४।५२
दहनः ५।१।५२
दात्रम् ५।२।८८
दानीयोऽतिथिः ५।१।२
दाभ्यम् ५।१।२०
दायः ५।१।५६
दायादः ५।१।७८
दायो दत्तः ५।३।१८
दारा गृहाः ५।१।५५
दाराः(२) ५।३।१३४
दारु काष्ठम् ५।२।३६
दारुः ५।२।३६
दार्वाघाटः ५।१।८१
दार्वाघातः ५।१।८१
दावः ५।१।६२
दावः ५।३।६०
दाशः ५।३।१८
दिक् ५।१।१४८
दिक् ५।३।११४
दिग्धः ५।२।९२
दिग्धसहशयः ५।१।१३५
दित्स्यम् ५।१।२८
दिद्युतौ ५।२।८३
दिद्युत् ५।२।८३
दिनकरः ५।१।१०२
दिवसकरः ५।१।१०२
दिवाकरः ५।१।१०२
दिविषत् ५।१।१४८
दीक्षिता ५।२।४५
दीपनीयं चूर्णम् ५।१।८
दीपिता ५।२।४५
दीप्तिः ५।३।१०६
दीप्रो दीपः ५।२।७९
दुःखहः ५।१।८०
दुःखापहः ५।१।८१
दुःशयम् ५।३।१३९
दुःशासन ५।३।१४१
दुराढ्यंकरो मैत्रो भवता ५।३।१४०
दुराढ्यंभवं भवता ५।३।१४०
दुराढ्यः क्रियते ५।३।१४०
दुरुत्थानं भवता ५।३।१४१
दुर्गः पन्थाः ५।१।१३२
दुर्गन्ता ५।१।१३२
दुर्गमः ५।१।१३२
दुर्दर्शनः ५।३।१४१
दुर्धर्षणः ५।३।१४१
दुर्भेदः ५।३।१३९
दुर्मर्षणः ५।३।१४१
दुर्योधनः ५।३।१४१
दुर्लवम् ५।३।१३९
दुश्चयम् ५।३।१३९
दुष्करं भवता ५।३।१३९
दुष्करः ५।३।१३९
दुष्पानं पयो भवता ५।३।१४१
दुह्यम् ५।१।४२
दूरगः ५।१।१३१
दूरभाक् ५।१।१४६
दूषणः ५।१।५२
दृक् ५।३।११५
दृतिहरिः श्वा ५।१।९७
दृतिहारो व्याधः ५।१।९७
दृन्भूः व्यसनसहायः ५।२।८३
दृष्टिः ५।३।११५
देयम् ५।१।२८
देवः ५।१।५०
देवदत्तः ५।१।७१
देवद्र्यङ् ५।१।१४८
देवनः ५।२।६९
देवभूयं गतः ५।१।३६
देवयिता ५।२।६९
देवापिः ५।१।९९
देहः ५।१।५०
दोला ५।३।१०९
दोषाकरः ५।१।१०२
दोषापहः ५।१।८१
दोषी ५।२।५०
दोहनः ५।३।१३०
दोही ५।२।५०
दोह्यम् ५।१।४२
द्युसत् ५।१।१४८
द्रवः ५।३।६०
द्रवः ५।३।६७
द्रष्टुं भोक्तुम् ५।४।९०
द्रावः ५।३।६०
द्रुघनः कुठारः ५।३।३८
द्रुहननी ५।३।३८
द्रोणम्पचा दासी ५।१।१०९
द्रोही ५।२।५०
द्वारपालः ५।१।७२
द्विकरः ५।१।१०२
द्विजः ५।१।१७१
द्विधा कृत्वा गतः ५।४।८६
द्विधा भूत्वा आस्ते ५।४।८६
द्विधाकारं गतः ५।४।८६
द्विधाकृत्य गतः ५।४।८६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विधाभावमास्ते ५।४।८६
द्विधाभूय आस्ते ५।४।८६
द्विपः ५।१।१४२
द्विषतीतापः ५।१।१०८
द्विषत्तापः ५।१।१०८
द्विषन्तपः ५।१।१०८
द्वे प्रसृती ५।३।८१
द्वेधा कृत्वा गतः ५।४।८६
द्वेधा भूत्वा आस्ते ५।४।८६
द्वेधाकारं गतः ५।४।८६
द्वेधाकृत्य गतः ५।४।८६
द्वेधाभावमास्ते ५।४।८६
द्वेधाभूय आस्ते ५।४।८६
द्वेषी ५।२।५०
द्वैधं कृत्वा गतः ५।४।८६
द्वैधं भूत्वा आस्ते ५।४।८६
द्वैधंकारं गतः ५।४।८६
द्वैधंकृत्य गतः ५।४।८६
द्वैधंभावमास्ते ५।४।८६
द्वैधंभूय आस्ते ५।४।८६
द्वौ कारौ ५।३।८१
द्वौ निघासौ ५।३।८१
द्वौ सूर्यनिष्पावौ ५।३।८१
द्व्यहं तर्षं गावः पिबन्ति ५।४।८२
द्व्यहतर्षं गावः पिबन्ति ५।४।८२
द्व्यहमत्यासं गावः पिबन्ति ५।४।८२
द्व्यहमुपोष्य भुङ्क्ते ५।४।८२
द्व्यहात्यासं गावः पिबन्ति ५।४।८२
धनञ्जयः पार्थः ५।१।११२
धनपोषं पुष्णाति ५।४।६५
धनपोषं पुष्यति ५।४।६५
धनपोषं पोषति ५।४।६५
धनम् ५।३।२९
धनुर्ग्रहः ५।१।९२
धनुर्ग्राहः ५।१।९२
धनुर्धरः ५।१।९४
धनुष्करः ५।१।१०२
धमः ५।१।५८
धयः ५।१।५८
धर्मं दिदेश तीर्थकरः ५।२।१२
धर्मकामः ५।१।७३
धर्मकामा ५।१।७३
धर्मप्रदः ५।१।१४४
धर्मशीलः ५।१।७३
धर्मशीला ५।१।७३
धवित्रम् ५।२।८७
धात्री आमलकी ५।२।९१
धात्री स्तनदायिनी ५।२।९१
धान्यमायः ५।१।७६
धान्यविक्रायः ५।१।१५९
धायः ५।१।५६
धाय्या ऋक् ५।१।२४
धारयः ५।१।५९
धारयन् आचाराङ्गम् ५।२।२५
धारा प्रपातः खड्गादेर्वा ५।३।१०८
धारुर्वत्सो मातरम् ५।२।३६
धावतस्ते पतिष्यति वासः ५।३।१३
धित्स्यम् ५।१।२८
धीः(२) ५।२।८३
धीवा ५।१।१४७
धुरः ५।२।८३
धुरौ ५।२।८३
धुवित्रम् ५।२।८७
धूः ५।२।८३
धृतिः ५।३।१०८
धृष्टः ५।२।९२
धृष्णक् ५।२।८०
धृष्णजौ ५।२।८०
धृष्णुः ५।२।३२
धृष्णोति भोक्तुम् ५।४।९०
धेयम् ५।१।२८
धेया ५।१।२४
ध्वस्तिः ५।३।१०६
ध्वाङ्क्षरावी ५।१।१५३
न कलिङ्गेषु ब्राह्मणमहमहनम् ५।२।११
नक् ५।३।११५
नखमुचानि धनूंषि ५।१।१४४
नखम्पचा यवागूः ५।१।१०९
नगरकारः ५।१।७२
नगरगृह्या सेना ५।१।४४
नगरघातो हस्ती ५।१।८७
नगरघ्नो व्याघ्रः ५।१।८७
नगराध्वगः ५।१।१३१
नग्नङ्करणं द्यूतम् ५।१।१२९
नग्नम्भविष्णुः ५।१।१२८
नग्नम्भावुकः ५।१।१२८
नग्नीकुर्वन्त्यनेन ५।१।१२९
नटेन स्म पुराऽधीयते ५।२।१६
नदीष्णः ५।१।१४२
नद्ध्रः ५।२।८८
नद्ध्री ५।२।८८
नद्यतिक्रमेण पर्वतः ५।४।४५
नद्यप्राप्त्या पर्वतः ५।४।४५
नद्युत्तारः ५।३।१३३
नन्दकः ५।१।१६
नन्दका ५।१।७०
नन्दथुः ५।३।८३
नन्दनः ५।१।३
नन्दनः ५।१।१६
नन्दनी ५।३।१२६
नन्दयिता ५।१।१६
नन्दिका ५।१।७०
नम्रः ५।२।७९
नयः ५।१।६२
नयः ५।३।६०
नयप्रस्तारः ५।३।६८
नर्तः ५।१।५०
नर्तकः ५।१।६५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नर्तकी ५।१।६५
नर्तिका ५।१।६५
नर्दनः ५।१।५२
नवः ५।३।२८
नव्यम् ५।१।२८
नश्वरः ५।२।७७
नश्वरी ५।२।७७
नष्टिः ५।३।११५
नाऽऽश ५।२।३
नाऽऽशीत् ५।२।३
नाऽऽश्नात् ५।२।३
नाडिधः ५।१।१२०
नाडिध्मः ५।१।१२०
नाडिन्धमः ५।१।१२०
नाडिन्धमाः पन्थानः ५।१।१२१
नाडिन्धयः ५।१।१२०
नाथहरिः सिंहः ५।१।९७
नाथहारी गन्त्री ५।१।९७
नानशूकः ५।२।४७
नाना कृत्वा गतः ५।४।८६
नाना भूत्वा गतः ५।४।८६
नानाकारं गतः ५।४।८६
नानाकृत्य गतः ५।४।८६
नानाभावं गतः ५।४।८६
नानाभूय गतः ५।४।८६
नान्दीकरः ५।१।१०२
नाम गृहीत्वा दत्ते ५।४।८३
नामग्राहं देवदत्त आह्वयति ५।४।८३
नामग्राहमाह्वयति ५।४।८३
नामाऽऽदिश्य दत्ते ५।४।८३
नामादेशं ददाति ५।४।८३
नामानि ग्राहमाह्वयति ५।४।८३
नामान्यादेशं ददाति ५।४।८३
नाम्नी देवदत्तो ग्राहमाह्वयति ५।४।८३
नायः ५।१।६२
नायः ५।३।६०
नासिकन्धमः ५।१।१२०
नासिकन्धयः ५।१।१२०
निकषः ५।३।१३१
निकाय्यो निवासः ५।१।२४
निकारो धान्यस्य ५।३।७३
निकेचायः ५।३।७९
निक्वणः ५।३।२६
निक्वणो वीणायाः ५।३।२७
निक्वाणः ५।३।२६
निक्वाणो वीणायाः ५।३।२७
निखेयम् ५।१।३८
निगदः ५।३।२६
निगमः ५।३।१३१
निगादः ५।३।२६
निगाद्यम् ५।१।३०
निगारः ५।३।७२
निगिलः ५।१।५४
निग्रहश्चौरस्य ५।३।५६
निग्राहो ह ते वृषल ! भूयात् ५।३।५६
निघसः ५।३।२४
निघा बृहतिका ५।३।३६
निघा वृक्षाः ५।३।३६
निघाः शालयः ५।३।३६
निघातः ५।३।३६
निचेयम् ५।१।२४
निजागदूकः ५।२।४७
निद्रालुः ५।२।३७
निधिः ५।३।८७
निनदः ५।३।२६
निनादः ५।३।२६
निन्दकः ५।२।६८
निपकः ५।३।१३१
निपठः ५।३।२६
निपठितिः ५।३।१०६
निपत्तिः ५।३।९९
निपत्या ५।३।९९
निपद्या ५।३।९९
निपाठः ५।३।२६
निपातः ५।१।६२
निपिबः ५।१।५८
निमूलं कषित्वा कषति ५।४।६०
निमूलकाषं कषति ५।४।६२
निमूलस्य काषं कषति ५।४।६२
निम्नगा ५।१।१३१
नियः ५।१।१४८
नियमः ५।३।२५
नियम्यम् ५।१।३०
नियामः ५।३।२५
नियौ ५।१।१४८
निरक्षी ५।१।५३
निरदनम् ५।३।१२८
निरस्यन् ५।२।२०
निरस्यमानः ५।२।२०
निराकरिष्णुः ५।२।२८
निर्गमनः ५।१।१३३
निर्गो देशः ५।१।१३३
निर्झरणः ५।३।१२८
निलिपः ५।१।६१
निलिम्पा नाम देवाः ५।१।६१
निवरा कन्या ५।३।७४
निवापी ५।१।५३
निवायः ५।३।४२
निवासी ५।१।५३
निवित् ५।३।११४
निवेशी ५।१।५३
निशाकरः ५।१।१०२
निशाचरः ५।१।१३८
निशायी ५।१।५३
निश्चयः ५।३।२८
निश्चयः ५।३।८१
निश्रावी ५।१।५३
निषत्तिः ५।३।९९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| निषद्या | ५।३।९२ |
| निषद्या | ५।३।९९ |
| निषेदिवान् | ५।२।२ |
| निष्पावः | ५।३।२१ |
| निस्वनः | ५।३।२६ |
| निस्वानः | ५।३।२६ |
| निहवः | ५।३।४२ |
| नीः | ५।१।१४८ |
| नीतिः | ५।३।९१ |
| नीवारा नाम व्रीहिविशेषाः | ५।३।७४ |
| नीवृत् | ५।३।११४ |
| नीशारो निवृतम् | ५।३।२० |
| नुतिः | ५।३।९१ |
| नुतिः | ५।३।११५ |
| नुत् | ५।३।११५ |
| नुत् | ५।३।११५ |
| नुत्तिः | ५।३।११५ |
| नृत्तं मयूरस्य | ५।३।१२३ |
| नेगः | ५।३।१३२ |
| नेत्रम् | ५।२।८८ |
| नेमिः | ५।२।३९ |
| नेयम् | ५।१।२८ |
| न्यग्रोधः | ५।१।५० |
| न्ययं गतश्चौरः | ५।३।७५ |
| न्यादः | ५।३।२४ |
| न्यायः | ५।३।७५ |
| न्यायः | ५।३।१३४ |
| पंपशूकः | ५।२।४७ |
| पक् | ५।१।१४८ |
| पक् | ५।२।८३ |
| पक्तयः | ५।३।१८ |
| पक्तये व्रजति | ५।३।१५ |
| पक्ता | ५।१।१४८ |
| पक्ता व्रजति | ५।३।१३ |
| पक्तिः | ५।३।१८ |
| पक्तिम् | ५।३।११९ |
| पक्ती | ५।३।१८ |
| पक्तुं व्रजति | ५।२।२० |
| पक्त्रिमम् | ५।३।८४ |
| पक्ष्णुः | ५।२।३१ |
| पक्ष्यतितमाम् | ५।२।२० |
| पक्ष्यतितराम् | ५।२।२० |
| पक्ष्यत्तरः | ५।२।२० |
| पक्ष्यद्भक्तिः | ५।२।२० |
| पक्ष्यन् व्रजति | ५।२।२० |
| पक्ष्यन् | ५।२।२० |
| पक्ष्यमाणः | ५।२।२० |
| पक्ष्यमाणतमः | ५।२।२० |
| पक्ष्यमाणपाशः | ५।२।२० |
| पक्ष्यमाणप्रियः | ५।२।२० |
| पङ्क्त्यादिगः | ५।१।१३१ |
| पचः | ५।१।३ |
| पचच्चरः | ५।२।२० |
| पचतितमाम् | ५।२।२० |
| पचतितराम् | ५।२।२० |
| पचतिरूपम् | ५।२।२० |
| पचतिर्वर्तते | ५।३।१३८ |
| पचतेतमाम् | ५।२।२० |
| पचतेतराम् | ५।२।२० |
| पचत्तमः | ५।२।२० |
| पचत्तरः | ५।२।२० |
| पचत्पाशः | ५।२।२० |
| पचद्रूपः | ५।२।२० |
| पचनम् | ५।३।१८ |
| पचनानि | ५।३।१८ |
| पचनाय व्रजति | ५।३।१५ |
| पचने | ५।३।१८ |
| पचन् | ५।२।२० |
| पचमानः | ५।२।२० |
| पचमानतमः | ५।२।२० |
| पचमानतरः | ५।२।२० |
| पचा | ५।३।९२ |
| पचाम् | ५।३।११९ |
| पचेलिमा माषाः | ५।१।४ |
| पचो व्रजति | ५।३।१३ |
| पटपटाया | ५।३।१०५ |
| पटिकाक्नोपं वृष्टो मेघः | ५।४।५८ |
| पटुमानिनी | ५।१।११७ |
| पठः | ५।१।४९ |
| पठतिदेशीयम् | ५।२।२० |
| पठद्देशीयः | ५।२।२० |
| पठिता | ५।१।४८ |
| पठिता विद्याम् | ५।२।४३ |
| पठितिम् | ५।३।११९ |
| पठितो भवान् | ५।१।११ |
| पणः | ५।३।३२ |
| पण्डितमानी | ५।१।११७ |
| पण्डितमानी बन्धोः | ५।१।११६ |
| पण्डितम्मन्यः | ५।१।११७ |
| पण्यं विक्रेयं चेत् | ५।१।३२ |
| पण्या गौः | ५।१।३२ |
| पतगः पक्षी | ५।१।१३१ |
| पतनः | ५।२।४२ |
| पतयालुः | ५।२।३७ |
| पतिघ्नी कन्या | ५।१।८४ |
| पतिघ्नी पाणिरेखा | ५।१।८३ |
| पतिम्वरा कन्या | ५।१।११२ |
| पत्त्रम् | ५।२।८८ |
| पथिप्रज्ञः | ५।१।७९ |
| पदकारः | ५।१।१०३ |
| पदकारः | ५।१।१६२ |
| पदकृत् | ५।१।१६२ |
| पदनः क्षेत्राणाम् | ५।२।४२ |
| पदम् | ५।३।२९ |
| पदसंघाटः | ५।१।८१ |
| पदसंघातः | ५।१।८१ |
| पन्नगः सर्पः | ५।१।१३१ |
| पपिवान् | ५।२।२ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

पपुराणः ५।२।२
पयः पीता गावः ५।१।११
पयःपानं सुखम् ५।३।१२५
पयस्कामी ५।१।७३
पयोधरः ५।१।९४
परतापः ५।१।१०८
परदारगः ५।१।१३१
परन्तपः ५।१।१०८
परलोकदृश्वा ५।१।१६६
परलोकैषणा ५।३।११२
परानर्दनः ५।१।५२
परान् निन्दमानाः ५।२।२४
परावज्ञादुःखदग्धोऽपि ५।२।२१
परिक्रोशकः ५।२।६९
परिक्षिपः ५।२।६७
परिक्षेपकः ५।२।६७
परिक्षेपी ५।२।६६
परिक्षेप्यम्भसाम् ५।२।६६
परिखा ५।१।१७१
परिग्रहः कुटुम्बिनः ५।३।६५
परिघोऽर्गला ५।३।४०
परिचर्या ५।३।१०२
परिचाय्योऽग्निः ५।१।२५
परिचेयः ५।१।२५
परिजः ५।१।१७१
परिणयः कन्यायाः ५।३।६३
परिणायेन शारीन् हन्ति ५।३।६३
परिदाही ५।२।६५
परिदेवक(२) ५।२।६९
परिदेवी ५।२।६५
परिभवः(२) ५।३।६४
परिभवी ५।१।५३
परिभवी ५।२।७२
परिभावः ५।३।६४
परिभावी ५।१।५३
परिमाक्ष्णुः ५।२।३१
परिमोही ५।२।६५
परिरटः ५।२।६७
परिराटकः ५।२।६७
परिराटी ५।२।६६
परिवादकः ५।२।६७
परिवादी ५।२।५८
परिवारः ५।३।२८
परिवीः ५।१।१४८
परिव्यः ५।१।५६
परिव्राजौ ५।२।८३
परिव्राट् ५।२।८३
परिषत् ५।३।११४
परिसरः ५।३।१३०
परिसर्या ५।३।१०२
परिसारी ५।२।५५
परिस्रुत् ५।३।११४
परीष्टिः ५।३।११३
परुदगच्छत् ५।४।१
पर्णध्वत् ५।१।१४८
पर्ययः स्वाध्यायस्य ५।३।७६
पर्येषणा ५।३।११३
पर्वतमप्युत्पाटयानि ५।४।३८
पलाशशातनः ५।३।१२६, ५।३।१२९
पलिघः ५।३।४०
पलितङ्करणं तैलम् ५।१।१२९
पलितम्भविष्णुः ५।१।१२८
पलितम्भावुकः ५।१।१२८
पवः ५।३।२८
पवनः ५।१।५२
पवित्रोऽयमृषिः ५।२।८६
पवित्रोऽर्हन् ५।२।८५
पव्यम् ५।१।१९
पशुसंख्यः ५।१।७७
पशूनामुपसरः ५।३।३१
पश्यः ५।१।५८
पश्यतिदेश्यम् ५।२।२०
पश्यद्देश्यः ५।२।२०
पाः ५।१।१४८
पाकः(२) ५।३।१८
पाकाः ५।३।१८
पाकाय व्रजति ५।३।१५
पाकौ ५।३।१८
पाक्यम् ५।१।१७
पाक्ष्यतः ५।२।२०
पाक्ष्यमाणिः ५।२।२०
पाचकः ५।१।४८
पाचको व्रजति ५।२।२०
पाचतः ५।२।२०
पाचनायै व्रजति ५।३।१५
पाचयांचकृवान् ५।२।२
पाचिकाम् ५।३।११९
पाचिम् ५।३।११९
पाठकः ५।१।४८
पाठिकाम् ५।३।११९
पाठिम् ५।३।११९
पाणः ५।३।३२
पाणावुपकर्षं धाना गृह्णाति ५।४।७५
पाणिकर्षं धाना गृह्णाति ५।४।७५
पाणिग्राहं गृह्णाति ५।४।६६
पाणिघः शिल्पी ५।१।८९
पाणिघातं कुड्यमाहन्ति ५।४।६४
पाणिघातः ५।१।८९
पाणिनोपकर्षं धानाः पिनष्टि ५।४।७५
पाणिन्धमः ५।१।१२१
पाणिन्धमाः पन्थानः ५।१।१२१
पाणिन्धयः ५।१।१२१
पाणिवर्तं वर्तते ५।४।६६
पाणिवर्तं वर्तयति ५।४।६६
पाणिसर्ग्या रज्जुः ५।१।१८
पाण्यः साधुः ५।१।३२
पाण्युपकर्षं धाना गृह्णाति ५।४।७५
पाण्युपकर्षं धानाः पिनष्टि ५।४।७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पात्री ५।२।८८
पादः ५।३।१६
पादघातं शिलां हन्ति ५।४।६४
पादपः ५।१।१४२
पादभाक् ५।१।१४६
पादहारकः ५।१।२
पादौ प्रसार्य पतति ५।४।४६
पापकृत् ५।१।१६२
पापघातो यतिः ५।१।८३
पापतिः ५।२।३८
पापनुत् ५।१।१६२
पापयूकः ५।२।४७
पापहः ५।१।८०
पाप्मरेट् ५।१।१४७
पायं पायं गच्छति ५।४।४८
पायुः ५।२।९३
पाय्यं मानम् ५।१।२४
पारगः ५।१।१३१
पारयः ५।१।५९
पारयति भोक्तुम् ५।४।९०
पारापतः ५।१।५०
पार्श्वतः कृत्वा शेते ५।४।८६
पार्श्वतःकारं शेते ५।४।८६
पार्श्वतःकृत्य शेते ५।४।८६
पार्श्वतोभावं शेते ५।४।८६
पार्श्वतोभूय शेते ५।४।८६
पार्श्वयोरुपपीडं शेते ५।४।७५
पार्श्वशयः ५।१।१३५
पार्श्वशायी ५।१।१५७
पार्श्वाभ्यामुपपीडं शेते ५।४।७५
पार्श्वेन निपीड्य तिष्ठति ५।४।७५
पार्श्वोपपीडं शेते(२) ५।४।७५
पार्ष्णित्रम् ५।१।७६
पाव्यमवश्यम् ५।१।१९
पाव्यम् ५।१।१९
पाश्वर्तो भूत्वा शेते ५।४।८६
पिण्डैषणा ५।३।११२
पितृपोषं पुष्णाति ५।४।६५
पितृपोषं पुष्यति ५।४।६५
पितृपोषं पोषति ५।४।६५
पितृव्यघातः ५।१।१६०
पितृव्यघाती ५।१।१६०
पित्तघ्नं घृतम् ५।१।८३
पिप्पलादः ५।१।१५०
पिबः ५।१।५८
पीठगः ५।१।१३१
पीडा ५।३।१०९
पीत्वा पीत्वा गच्छति ५।४।४८
पीत्वा व्रजति ५।४।४७
पीवा ५।१।१४७
पुंसानुजः ५।१।१७१
पुण्यकृत् ५।१।१६२
पुत्रकाम्या ५।३।१०५
पुत्रस्य परिष्वञ्जनं सुखम् ५।३।१२५
पुत्रीया ५।३।१०५
पुनर्भूः पुनरूढा औषधिश्च ५।२।८३
पुमनुजः ५।१।१६८
पुरः ५।२।८३
पुरःसरः ५।१।१४०
पुरःसरी ५।१।१४०
पुरन्दरः शक्रः ५।१।११४
पुरा भुङ्क्ते ५।३।७
पुरुषघातः ५।१।१६१
पुरुषवाहं वहति ५।४।६९
पुरुषस्नायं वृष्टो मेघः ५।४।५९
पुरौ ५।२।८३
पुष्पन्धयः ५।१।११९
पुष्पप्रचायः ५।३।७८
पुष्पाणि हर्ता ५।१।९६
पुष्पाहरः ५।१।९६
पुष्पाहारः ५।१।९६
पुष्पोत्करः ५।३।७३
पुष्यन्ती ५।२।२०
पुष्यः ५।१।३९
पूः ५।२।८३
पूजा ५।३।१०९
पूजामर्हन् ५।२।२६
पूजार्हः साधुः ५।१।९१
पूजार्हा प्रतिमा ५।१।९१
पूर्तः ५।२।९२
पूर्वं भुक्त्वा व्रजति ५।४।४९
पूर्वं भोजं व्रजति ५।४।४९
पूर्वङ्गमाः पन्थानः ५।१।१३१
पूर्वपरिग्राहः ५।३।६५
पूर्वसरः ५।१।१४१
पूर्वसरी ५।१।१४१
पूर्वसारः ५।१।१४१
पृच्छति स्म पुरोधसम् ५।२।१६
पृच्छा प्रश्नः ५।३।१०८
पृष्ठशयः ५।१।१३५
पेचानः ५।२।२
पेचिवान् ५।२।२
पेस्वरः ५।२।८१
पेस्वरा ५।२।८१
पोत्रम् ५।२।८९
पोषणः ५।१।३९
प्रकृतं भवता ५।१।१०
प्रकृतः कटं देवदत्तः ५।१।१७४
प्रकृतः कटं भवान् ५।१।१०
प्रकृतः कटो भवता ५।१।१०
प्रक्रमते भोक्तुम् ५।४।९०
प्रक्वणो वीणायाः ५।३।२७
प्रक्वाणः ५।३।४८
प्रक्वाणो वीणायाः ५।३।२७
प्रख्यातः ५।१।११
प्रगहः(२) ५।३।५१
प्रगाहः ५।३।५१
प्रगीतिः ५।३।९५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रगृह्यं पदम् ५।१।४४
प्रग्रहः ५।१।६२
प्रघणो द्वारालिन्दकः ५।३।३५
प्रघसः ५।३।२३
प्रघाणो द्वारालिन्दकः ५।३।३५
प्रघातः ५।३।३५
प्रच्छदः ५।३।१३०
प्रच्छर्दिका ५।३।१२१
प्रच्छित् ५।१।१४८
प्रजनिष्णुः ५।२।२८
प्रजवी ५।२।७१
प्रजाः ५।१।१७१
प्रजित् ५।१।१४८
प्रज्यः ५।१।५६
प्रज्वलः ५।१।६२
प्रणयः ५।१।६२
प्रणयः ५।३।६०
प्रणवः ५।३।१३०
प्रणाय्यश्चौ(चो)रः ५।१।२३
प्रणाय्योऽन्तेवासी ५।१।२३
प्रणिंस्ते ५।१।१
प्रणीः ५।१।१४८
प्रणेयः ५।१।२३
प्रतर्दनः ५।१।५२
प्रतिपत् ५।३।११४
प्रतिबोधी ५।१।१५४
प्रतिबोधी ५।३।१
प्रतिभूः उत्तमर्णाधमर्णयोरन्तरस्थः ५।२।८३
प्रतिभूः ५।१।१४८
प्रतियायी ५।१।१५४
प्रतियायी ५।३।१
प्रतिरोधी ५।३।१
प्रतिश्यायः ५।१।५६
प्रतिश्यायः ५।१।६४
प्रतिश्रयः ५।३।२३
प्रतिश्रुत् ५।३।९२
प्रतिश्रुत् ५।३।११४
प्रतिसरः ५।३।१३०
प्रतिस्तुत् ५।३।९२
प्रतीपगः ५।१।१३१
प्रत्यङ् ५।१।१४८
प्रत्ययः ५।३।१३०
प्रत्यायः ५।१।६४
प्रत्यासारी ५।१।१५४
प्रथा ५।३।१०७
प्रदवः ५।१।६२
प्रदा ५।३।११०
प्रदिः ५।३।८७
प्रद्रावः ५।३।६७
प्रद्रावी ५।२।५४
प्रधा ५।३।११०
प्रधानम् ५।३।१३०
प्रधिः ५।३।८७
प्रधीः ५।२।८३
प्रधुक् ५।१।१४८
प्रध्रुक् ५।१।१४८
प्रपक्तिः ५।३।९५
प्रपतनः ५।३।१२८
प्रपा ५।३।८२
प्रपातुका गर्भाः ५।२।४१
प्रपाप्रदः ५।१।७९
प्रपीतिः ५।३।९५
प्रबोधी ५।३।१
प्रभवः ५।१।६२
प्रभवः ५।३।२३
प्रभवति भोक्तुम् ५।४।९०
प्रभव्यम् ५।१।३६
प्रभाकरः ५।१।१०२
प्रभाक् ५।१।१४६
प्रभावः ५।३।२३
प्रभावुकः क्षत्रियः ५।२।४०
प्रभित् ५।१।१४८
प्रभुः स्वामी ५।२।८४
प्रभुक्त ओदनं चैत्रः ५।१।१०
प्रभुक्त ओदनश्चैत्रेण ५।१।१०
प्रभुक्तं चैत्रेण ५।१।१०
प्रभोक्ता ५।१।१५४
प्रमदः कन्यानाम् ५।३।३३
प्रमद्वरः ५।२।८१
प्रमा ५।३।११०
प्रमाणसमुच्चयः ५।३।८०
प्रमाथी ५।२।५३
प्रमादः ५।३।३३
प्रमादी ५।२।४९
प्रमाद्यम् ५।१।३०
प्रमितिः ५।३।११०
प्रयामः ५।३।२५
प्रयामः ५।३।४८
प्रयामी ५।२।५२
प्रयायी ५।१।१५४
प्रयायी ५।३।१
प्रयासी ५।२।५२
प्रयुक् ५।१।१४८
प्रलापी ५।२।५३
प्रलिपः ५।१।६०
प्रवकः ५।१।६९
प्रवङ्गः ५।१।१३१
प्रवङ्गमः कपिः ५।१।१३१
प्रवचनीयं गुरुणा शासनम् ५।१।८
प्रवचनीयो गुरुः शासनस्य ५।१।८
प्रवरः ५।३।२८
प्रवरः ५।३।५२
प्रवरो यतिः ५।३।५२
प्रवर्षुकः पर्जन्यः ५।२।४०
प्रवादी ५।२।५८
प्रवाद्यम् ५।१।३५
प्रवासी ५।२।६१
प्रवाहिका ५।३।१२१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवित् ५।१।१४८
प्रशंसा ५।३।९२
प्रशस्तिः ५।३।९२
प्रशारुकः शरः ५।२।४०
प्रशीः ५।३।११४
प्रश्च्योतनः ५।३।१२८
प्रश्नः ५।३।८५
प्रश्रयः ५।३।२३
प्रसंमादः ५।३।३३
प्रसत् ५।१।१४८
प्रसरः ५।३।१३०
प्रसवी ५।२।७१
प्रसाधनः ५।२।४२
प्रसाधनः ५।३।१३०
प्रसारी ५।२।५५
प्रसाहयिता ५।१।५९
प्रसूः ५।१।१४८
प्रसेदिवान् ५।२।२
प्रसेनजित् ५।१।१४८
प्रसेवः ५।३।१८
प्रस्कन्दनः ५।३।१२८
प्रस्कन्दिका ५।३।१२१
प्रस्तारः ५।३।६८
प्रस्तारपङ्क्तिः छन्दोनाम ५।३।७०
प्रस्तावः ५।३।६७
प्रस्थः ५।१।५६
प्रस्थः सानुः ५।३।८२
प्रस्थम्पचा स्थाली ५।१।१०९
प्रस्थायी ५।१।१५४
प्रस्थायी ५।३।१
प्रस्थितिः ५।३।९६
प्रस्नः ५।३।८२
प्रस्रवः ५।१।६२
प्रस्रावः ५।३।६७
प्रहरः ५।३।१३०
प्रहरणो दण्डः ५।३।१३०
प्रहासः ५।३।४८
प्रह्वः ५।१।५६
प्रह्वायः ५।३।४२
प्राकारः ५।३।१८
प्राङ् ५।१।१४८
प्राट् ५।२।८३
प्राणत्यागी ५।२।५०
प्राणैषणा ५।३।११२
प्राप्नोति भोक्तुम् ५।४।९०
प्रार्थना मे व्याकरणमधीयीय ५।४।२८
प्रार्थना मे व्याकरणमध्ययै ५।४।२८
प्रार्थये अधीतां भवान् ५।४।२७
प्रार्थये अधीयीत भवान् ५।४।२७
प्रावकः ५।१।६९
प्रावरः ५।३।५२
प्रावारः(२) ५।३।५२
प्रावृट् ५।३।११४
प्रावृत्यः ५।१।४०
प्राशौ ५।२।८३
प्रासः ५।३।१८
प्रासादः ५।३।१३२
प्रियः ५।१।५४
प्रियकारः ५।१।१०५
प्रियङ्करः ५।१।१०५
प्रियङ्करणं शीलम् ५।१।१२९
प्रियम्भविष्णुः ५।१।१२८
प्रियम्भावुकः ५।१।१२८
प्रियम्वदः ५।१।१०७
प्रियाख्यः ५।१।७८
प्रेषणकरः ५।१।१०३
प्लवः ५।३।१३०
प्लवङ्गः ५।१।१३१
प्लवङ्गमो भेकः ५।१।१३१
फलनिकरः ५।३।७३
फलन्ती ५।२।२०
फलावचायः ५।३।७८
फलाहरः ५।१।९६
फलेग्रहिर्वृक्षः ५।१।९८
फलोच्चयः ५।३।७८
फलोच्चायः ५।३।७८
फुल्लः ५।२।९२
बकः ५।३।१३१
बन्धः ५।३।१३२
बभज्वान् ५।२।२
बभाषे राघवस्तदा ५।२।१५
बर्हिः पवित्रम् ५।२।८६
बर्हिष्प्रस्तरः ५।३।६८
बलभित् ५।१।१४८
बलसूदनः ५।२।४५
बलिकरः ५।१।१०२
बलिन्दमो कृष्णः ५।१।११२
बहुकरः ५।१।१०१
बहुकरी ५।१।१०१
बहुकारा ५।१।१०१
बहुक्षमः ५।१।७३
बहुक्षमा ५।१।७३
बहुदृश्वा ५।१।१६६
बहुन्तुदं युगम् ५।१।१२४
बालघ्नः ५।१।८५
बाल्यमतिक्रम्य यौवनम् ५।४।४५
बाहुकरः ५।१।१०२
बाहुघ्नो मल्लः ५।१।८६
बिलेशयः ५।१।१३७
बिसम् ५।२।२०
बुद्धिजः संस्कारः ५।१।१७०
बुधः ५।१।५४
बुभुक्षा मे उदपादि ५।३।१२०
ब्रह्मघातः ५।१।१६१
ब्रह्मघ्नः ५।१।८५
ब्रह्मघ्नः ५।१।१६१
ब्रह्मज्यः ५।१।१७१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्रह्मज्यः ५।१।७६
ब्रह्मभूयं गतः ५।१।३६
ब्रह्मवद्यम् ५।१।३५
ब्रह्मवादी ५।१।१५६
ब्रह्महत्या ५।१।३६
ब्रह्महा(२) ५।१।१६१
ब्रह्माध्यायः ५।१।१६१
ब्रह्मोद्यम् ५।१।३५
ब्राह्मणजः पशुवधः ५।१।१७१
ब्राह्मणब्रुवः ५।१।५१
ब्राह्मणानामन्त्रयिता ५।१।१५४
ब्रुवन्माठरः ५।२।२०
ब्रुवाणमाठरः ५।२।२०
भं नक्षत्रम् ५।१।१७१
भक्तिकरः ५।१।१०२
भगः ५।३।१३१
भगन्दरो व्याधिः ५।१।११४
भङ्गुरं काष्ठम् ५।१।४
भङ्गुरं काष्ठम् ५।२।७४
भजिः क्रियते ५।३।१३८
भज्यम् ५।१।२९
भञ्जिः ५।३।१३८
भयङ्करः ५।१।१०६
भयम् ५।३।२९
भयानकः ५।१।१४
भरः ५।३।१३०
भरतं विजिग्ये बाहुबली ५।२।१२
भवः ५।१।६२
भवः ५।३।१३०
भवकः ५।१।७०
भवका ५।१।७०
भवच्छित् ५।१।१४८
भवत आसिका ५।३।१२०
भवतः शायिका ५।३।१२०
भवता खलु कटः करणीयः ५।४।२९
भवता खलु कटः कर्तव्यः ५।४।२९
भवता खलु कटः कार्यः ५।४।२९
भवता खलु कटः कृत्यः ५।४।२९
भवतोऽग्रगामिका ५।३।१२०
भवान् कन्याया वोढा ५।४।३७
भवान् भारं वहेत् ५।४।३५
भवान् हि शक्तः ५।४।३५
भविता ५।२।४२
भविता ५।२।८३
भविष्णुः ५।२।२८
भव्यः ५।१।७
भव्यमनेन ५।१।७
भव्यम् ५।१।२८
भव्यम् ५।१।३६
भस्म ५।२।९३
भा ५।३।१०१
भाः ५।२।८३
भागी ५।२।५०
भाग्यम् ५।१।२९
भारवाहः ५।१।७२
भारहारः ५।१।७२
भारहारः ५।१।९५
भार्या पत्नी ५।१।४५
भार्या वधूः ५।३।९८
भार्यां द्वेष्टि परं पश्यन्तीम् ५।२।२६
भार्यो नाम क्षत्रियः ५।१।४५
भावः ५।१।६२
भावः ५।३।२३
भावना ५।३।१११
भावयिता ५।२।४५
भावि कृत्यमासीत् ५।४।४१
भाविका ५।१।७०
भावी ५।३।१
भावुकः ५।२।४०
भावुकः ५।२।४२
भाषते राघवस्तदा ५।२।१६
भाष्यकृत् ५।१।१६२
भासः ५।२।८३
भासनम् ५।२।४२
भासुरं वपुः ५।२।७४
भासुरः ५।१।४
भासुरम् ५।२।४२
भासौ ५।२।८३
भास्करः ५।१।१०२
भास्वरः ५।२।८१
भास्वरा ५।२।८१
भिक्षा ५।३।१०६
भिक्षाकः ५।२।७०
भिक्षाकी ५।२।७०
भिक्षाचरः ५।१।१३९
भिक्षाचरी ५।१।१३९
भिक्षिष्ये इत्यस्य जटाः ५।३।१३
भिक्षुः ५।२।३३
भित् ५।१।१४८
भित् ५।२।८३
भित् ५।३।११५
भित्तिः ५।३।११५
भित्तिः कुड्यम् ५।३।१०८
भिदा विदारणम् ५।३।१०८
भिदुरः कुशूलः ५।१।४
भिदुरः ५।२।७५
भिदेलिमास्तण्डुलाः ५।१।४
भिद्यः ५।१।३९
भीः ५।३।११५
भीतं बटुना ५।३।२९
भीतः ५।२।९२
भीतिः ५।३।११५
भीमः ५।१।१४
भीरुः ५।२।७६
भीरुकः ५।२।७६
भीलुकः ५।२।७६
भीषा ५।३।१०९
भीष्मः ५।१।१४


Jain Education International For Private & Personal Use Only www.jainelibrary.org

भुक्त्वा भुक्त्वा व्रजति ५।४।४८
भुक्त्वा व्रजति ५।४।४७
भुजङ्गः ५।१।१३१
भुजङ्गमः सर्पः ५।१।१३१
भुञ्जीयेति कामयते ५।४।८९
भुञ्जीयेति वाञ्छति ५।४।८९
भुञ्जीयेतीच्छति ५।४।८९
भुवौ विक्षेपं जल्पति ५।४।७९
भूः पृथिवी ५।२।८३
भूः ५।३।११५
भूतिः ५।३।९१
भूतिः ५।३।११५
भूधरः ५।१।९४
भूरिदावा ५।१।१४७
भूषणः कुलस्य ५।२।४२
भूषणः ५।१।५२
भूषा ५।३।१०९
भूष्णुः ५।२।३०
भृतः ५।२।९२
भृतिः ५।३।९२
भृतिः ५।३।९८
भृत्यः ५।१।४५
भृत्या ५।३।९२
भृत्या ५।३।९८
भेत्ता ५।१।३९
भोक्तुं वष्टि ५।४।९०
भोक्तुं व्रजति ५।३।१३
भोक्ष्यते ५।३।४
भोक्ष्यमाणो व्रजति ५।२।२०
भोक्ष्ये इति व्रजति ५।३।१३
भोगी ५।२।५०
भोजं भोजं व्रजति ५।४।४८
भोजको व्रजति ५।३।१३
भोजको व्रजति ५।४।८९
भोजनम् ५।३।१२४
भोजनम् ५।३।१२८
भ्राजिष्णुः ५।२।२८
भ्रासथुः ५।३।८३
भ्रुवौ विक्षिप्य जल्पति ५।४।७९
भ्रूणघ्नः ५।१।८५
भ्रूणहत्या ५।१।३६
भ्रूणहा ५।१।१६१
भ्रूविक्षेपं जल्पति ५।४।७९
मणिप्रस्तारः ५।३।६८
मण्डना गगनस्य भाः ५।२।४२
मतिः ५।३।९२
मत्तः ५।२।९२
मत्तोऽहं किल विचचार ५।२।११
मत्स्यघातो बकः ५।१।८३
मदः ५।३।४७
मदनः ५।१।५२
मदनीया योषित् ५।१।८
मद्गृह्यः ५।१।४४
मद्यम्(२) ५।१।३०
मद्रकारः ५।१।१०५
मद्रङ्करः ५।१।१०५
मद्रचरः ५।१।१३८
मद्रचरी ५।१।१३८
मधुसूदनः ५।१।५२
मधुसूदनः ५।२।४५
मधुहा ५।१।१६१
मनसिशयः ५।१।१३७
मनोभूः कामः ५।२।८३
मनोहरः प्रासादः ५।१।९५
मनोहरी मणिः ५।१।९५
मन्तूयिता ५।२।६८
मन्त्रकारः ५।१।१०३
मन्त्रकारः ५।१।१६२
मन्त्रकृत् ५।१।१६२
मन्त्रवित् ५।१।१६२
मन्त्रस्पृक् ५।१।१४९
मन्त्राध्यायः ५।१।१६२
मन्त्री ५।१।५३
मन्दुरजः ५।१।१६९
मन्या ५।३।९२
मन्या ५।३।९९
मम पर्यायो भोक्तुम् ५।३।७६
मम राजोपशायः ५।३।७७
मयूरिकाबन्धं बद्धः ५।४।६७
मर्मस्पृक् ५।१।१४९
मलग्रहिः कम्बलः ५।१।९८
मलयं पवमानः ५।२।२३
महत्या पुरा जेष्यति ग्रामम् ५।३।७
महित्थः ५।१।१४२
महिषीपोषं पुष्णाति ५।४।६५
महिषीपोषं पुष्यति ५।४।६५
महिषीपोषं पोषति ५।४।६५
महीध्रः शैलः ५।१।१४४
मा कारि भवता ५।४।४४
मा कार्षीदधर्मम् ५।४।३९
मा पचन् वृषलो ज्ञास्यति ५।२।२१
मा पचमानोऽसौ मर्तुकामः ५।२।२१
मा स्म करोत् ५।४।४०
मा स्म कार्षीत् ५।४।४०
मा हार्षीत् परस्वम् ५।४।३९
मांसं न भक्षयति ५।२।१९
मातुलघातः ५।१।१६०
मातुलघाती ५।१।१६०
मातृपोषं पुष्णाति ५।४।६५
मातृपोषं पुष्यति ५।४।६५
मातृपोषं पोषति ५।४।६५
मार्ग्यम् ५।१।४२
मितङ्गमोऽश्वः ५।१।१३१
मितम्पचा ब्राह्मणी ५।१।१०९
मित्रद्विट् ५।१।१४८
मित्रध्रुक् ५।१।१४८
मित्रभूः ५।१।१४८
मित्रभूः ५।१।७१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्रभूर्नाम कश्चित् ५।२।८३
मित्रवृद्धिः ५।१।७१
मित्रह्वः ५।१।७६
मित्रह्वः ५।१।१७१
मिन्नः ५।२।९२
मिष्टं कृत्वा भुङ्क्ते ५।४।५३
मिष्टंकारं भुङ्क्ते ५।४।५३
मीमांसनः ५।२।४४
मीमांसा ५।३।१०५
मुखं व्यादाय स्वपिति ५।४।४६
मुखतः कृत्वा आस्ते ५।४।८६
मुखतःकारमास्ते ५।४।८६
मुखतःकृत्य आस्ते ५।४।८६
मुखतो भूत्वा आस्ते ५।४।८६
मुखतोभावमास्ते ५।४।८६
मुखतोभूय आस्ते ५।४।८६
मुखे भूत्वा गतः ५।४।८६
मुञ्जन्धयः ५।१।११९
मुत् ५।३।११४
मुदितः ५।२।९२
मुश(स)लवध्यः ५।१।२९
मुष्टिन्धमः ५।१।१२०
मुष्टिन्धयः ५।१।१२०
मूः ५।३।११५
मूढः ५।२।९२
मूतिः ५।३।११५
मूर्तिः ५।३।१०६
मूलकपणः ५।३।३२
मूलकेनोपदंशं भुङ्क्ते ५।४।७३
मूलकेनोपदश्य भुङ्क्ते ५।४।७३
मूलकोपदंशं भुङ्क्ते ५।४।७३
मूलविभुजो रथः ५।१।१४४
मृगया ५।३।१०१
मृगयालुः ५।२।३७
मृजा शरीरसंस्कारः ५।३।१०८
मृज्यम् ५।१।४२
मृतिस्ते जाल्म ! भूयात् ५।३।११७
मृत् ५।३।११४
मृषोद्यम् ५।१।३८
मेघः ५।१।५०
मेघङ्करः ५।१।१०६
मेढ्रम् ५।२।८८
मेथः ५।१।५०
मेदुरः ५।१।४
मेदुरः ५।२।७४
मेधा बुद्धिः ५।३।१०८
मेयम् ५।१।२४
मेरुदृश्वा ५।१।१६६
मेषः ५।१।५०
मोहनीयं कर्म ५।१।२
मोहनीयं कर्म ५।१।८
म्लानिः ५।३।११८
म्लायः ५।१।६४
म्लायति भोक्तुम् ५।४।९०
म्लास्नुः ५।२।३१
यजमानः ५।२।२३
यजेरङ्गानि ५।३।१३८
यज्ञः ५।३।८५
यज्ञदत्तः ५।१।७१
यज्यम् ५।१।२९
यज्वा ५।१।१७२
यज्वानः ५।१।१७२
यज्वानौ ५।१।१७२
यत्करः ५।१।१०१
यत्करा ५।१।१०१
यत्नः ५।३।८५
यत्यम् ५।१।२९
यद्वदः ५।१।५०
यमः ५।३।४८
यम्यम् ५।१।३०
यवः ५।३।२८
यवः ५।३।६०
यवः ५।३।१३९
यवनः ५।१।५२
यवलूः ५।१।१४८
यशस्करी विद्या ५।१।१०३
यष्टिग्रहः ५।१।९२
यष्टिग्राहं युध्यन्ते ५।४।७८
यष्टीर्ग्राहं युध्यन्ते ५।४।७८
याचथुः ५।३।८४
याचित्रिमम् ५।३।८४
याचित्वाऽपमयते ५।४।४६
याच्ञा ५।३।१०१
याज्यम् ५।१।२९
याज्या ५।१।२६
यातं तैः ५।१।११
यातस्तैर्ग्रामः ५।१।११
यातास्ते ग्रामम् ५।१।११
यानीयोऽश्वः ५।१।२
यान् ५।२।२०
यान्तः ५।२।२०
यान्तौ ५।२।२०
यामः ५।३।४८
यायजूकः ५।२।४७
यायावरः ५।२।८२
यावः ५।३।६०
यावज्जीवं भृशमन्नमदात् ५।४।५
यावज्जीवं युक्तोऽध्यापयिष्यति ५।४।५
यावज्जीवं युक्तोऽध्यापिपत् ५।४।५
यावज्जीवमधीते ५।४।५५
यावद् भुङ्क्ते ५।३।७
यावद्वेदं भुङ्क्ते ५।४।५५
याव्यम् ५।१।२०
यास्यन् ५।२।२०
युक् ५।३।११५
युक्तिः ५।३।११५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युगन्धरः तीर्थङ्करः ५।१।११३
युगम् ५।३।२९
युग्यं वाहनं गजाश्वादि ५।१।३९
युङ् ५।१।१४८
युज्यते भोक्तुम् ५।४।९०
युञ्जः ५।१।१४८
युञ्जौ ५।१।१४८
युत् ५।३।११४
युधः ५।१।५४
यूतिः ५।३।९४
योक्त्रम् ५।२।८८
योगक्षेमकरी लोकस्य ५।१।१०५
योगी ५।२।५०
योग्यम् ५।१।३९
योत्रम् ५।२।८८
योद्धुं धनुः ५।४।९०
रक्षः ५।१।१४
रक्षणम् ५।१।१६
रक्षितः ५।२।९२
रक्षितम् ५।१।१६
रक्षितो मैत्रेण ५।२।९२
रक्ष्णः ५।३।८५
रघूद्वहः ५।१।५०
रङ्गः ५।३।१३२
रजकः ५।१।६५
रजकी ५।१।६५
रजनिकरः ५।१।१०२
रजोग्रहिः कञ्चुकः ५।१।९८
रज्जुच्छित् ५।१।१४८
रञ्जकः ५।१।६५
रणः ५।३।२८
रत्ननिधायं निहितः ५।४।७१
रथचक्रचित् ५।१।१६५
रथन्तरं साम ५।१।११२
रन्तिः ५।१।७१
रमणः ५।१।५२
रमणी ५।३।१२६
रमणीयो देशः ५।१।८
रम्यः(२) ५।१।७
रवः ५।३।२२, ५।३।२८
रवणः ५।२।४३
रसावहः ५।१।५०
रागः ५।३।१८
रागः ५।३।१३२
रागी ५।२।५०
राजघः ५।१।८८
राजपरिधानानि वासांसि ५।३।१२५
राजभोजनाः शालयः ५।३।१२५
राजयुध्वा ५।१।१६७
राजराट् ५।१।१४८
राजसूयः क्रतुः ५।१।२२
राजाच्छादनाः प्रावाराः ५।३।१२५
राज्ञां ज्ञातः ५।२।९२
राज्ञां पूजितः ५।२।९२
राज्ञां बुद्धः ५।२।९२
राज्ञां मतः ५।२।९२
राज्ञां विदितः ५।२।९२
राज्ञामर्चितः ५।२।९२
राज्ञामवगतः ५।२।९२
राज्ञामिष्टः ५।२।९२
राट् ५।१।१४८
राप्यम् ५।१।२०
रामो वनं जगाम ५।२।५
रावः ५।३।२२
रिपुदमनः ५।१।५२
रुक्(२) ५।३।११४
रुच्यो मोदको मैत्राय ५।१।६
रुजा रोगः ५।३।१०८
रुट् ५।३।११४
रुषितः ५।२।९२
रुष्टः ५।२।९२
रूक्षपेषं पिनष्टि ५।४।६०
रेखा राजिः ५।३।१०८
रेट् ५।१।१४७
रैपोषं पुष्णाति ५।४।६५
रैपोषं पुष्यति ५।४।६५
रैपोषं पोषति ५।४।६५
रोगः ५।३।१६
रोगघ्नमौषधम् ५।१।८३
रोगनाशनः ५।१।५२
रोगापहः ५।१।८१
रोचनः(२) ५।१।५२
रोचिष्णुः ५।२।२८
रोट् ५।१।१४७
रोषणः ५।२।४२
लक्षणा ५।३।१११
लग्नादयः ५।२।९२
लज्जालुः ५।२।३७
लब्धिः ५।३।९२
लब्धिमम् ५।३।८४
लभते भोक्तुम् ५।४।९०
लभा ५।३।९२
लयः ५।३।१३०
ललाटन्तपः सूर्यः ५।१।१२५
लवः ५।३।२८
लवः ५।३।१३९
लवकः ५।१।६९
लवणं कृत्वा भुङ्क्ते ५।४।५३
लवणंकारं भुङ्क्ते ५।४।५३
लवणः ५।१।५२
लवित्रम् ५।२।८७
लव्यम् ५।१।१९
लव्यम् ५।१।२८
लाङ्गलग्रहः ५।१।९२
लाप्यम् ५।१।२०
लाभो लब्धः ५।३।१८
लावकः ५।१।६९
लाव्यमवश्यम् ५।१।१९

लाव्यम् ५।१।१९
लिपिकरः ५।१।१०२
लिप्तदृप्तौ ५।२।९२
लिबिकरः ५।१।१०२
लिम्पः ५।१।६०
लुण्टाकः ५।२।७०
लुण्टाकी ५।२।७०
लूः ५।१।१४८
लूः ५।३।११५
लूनिः ५।३।११५
लेखः ५।३।१३२
लेखनी ५।३।१२९
लेखा राजिः ५।३।१०८
लेहः ५।१।५०
लोलूया ५।३।१०५
लोष्टग्राहं युध्यन्ते ५।४।७८
लोष्टान् ग्राहं युध्यन्ते ५।४।७८
लोहघनः ५।३।३७
लोहोद्घनः ५।३।३६
वक्रगः ५।१।७४
वक्रगायो व्रजति ५।३।१४
वक्रगी ५।१।७४
वक्रसंगायः ५।१।७४
वचनकरः ५।१।१०३
वचनम् ५।३।१२४
वज्रधरः ५।१।९४
वडवासंदायः ५।१।५६, ५।१।७६
वदिता जनापवादान् ५।२।२७
वधः(२) ५।३।४६
वनम् ५।३।२९
वनेचरः ५।१।१३८
वन्दना ५।३।१११
वन्दारुः ५।२।३५
वपा मेदोविशेषः ५।३।१०८
वपुर्व्यः ५।१।७६
वमथुः ५।३।८३
वमी ५।२।७२
वरः ५।३।२८
वराकः ५।२।७०
वराकी ५।२।७०
वराहः ५।१।१७१
वर्णसंघाटः ५।१।८१
वर्णसंघातः ५।१।८१
वर्त्तनः ५।२।४४
वर्त्तिष्णुः ५।२।२८
वर्त्म ५।१।९५
वर्त्म ५।२।९३
वर्धते ५।२।२०
वर्धनः ५।१।५२
वर्धनः ५।२।४२, ५।२।४३
वर्धमानः ५।१।७१
वर्धिष्णुः ५।२।२८
वर्धिष्णुः ५।२।४२
वर्म ५।१।१४७
वर्या उपेया चेद्भवति ५।१।३२
वर्षम् ५।३।२९
वर्षाभूर्दर्दुर-औषधिश्च ५।२।८३
वर्षुकः ५।२।४०
वर्ष्यम् ५।१।४२
वशः ५।३।२८
वशम्वदः ५।१।१०७
वशा स्नेहनद्रव्यं धातुविशेषश्च ५।३।१०८
वश्मि अधीतां भवान् ५।४।२७
वश्मि अधीयीत भवान् ५।४।२७
वष्टि ५।४।२४
वसनक्नोपं वृष्टो मेघः ५।४।५८
वसनम् ५।३।१२८
वसनीयम् ५।१।२७
वसन्तीह पुरा छात्राः ५।२।१६
वसिता वस्त्रम् ५।२।४४
वसुन्धरा पृथ्वी ५।१।११३
वस्तव्यम् ५।१।२७
वस्त्रक्नोपं वृष्टो मेघः ५।४।५८
वहंलिहो गौः ५।१।१२३
वहः वृषस्कन्धदेशः ५।३।१३१
वहाभ्रट् ५।१।१४८
वहित्रम् ५।२।८७
वह्यं शकटम् ५।१।३४
वाः ५।१।१४८
वाक् ५।२।८३
वाक्यम् ५।१।१७
वाग्यामोऽन्यः ५।१।११५
वाचंयमो व्रती ५।१।११५
वाञ्छति ५।४।२४
वाञ्छेत् ५।४।२४
वातघ्नं तैलम् ५।१।८३
वातन्धमः ५।१।१२०
वातन्धयः ५।१।१२०
वातपित्तकफापहः ५।१।८१
वातमजा मृगाः ५।१।१२५
वातापिः ५।१।९९
वाद्यम् ५।१।३५
वाप्यम् ५।१।२०
वायुः ५।१।९५
वायुः ५।२।९३
वायुभक्षः ५।१।७३
वायुभक्षा ५।१।७३
वायुभूतिः ५।१।७१
वारः क्रियाभ्यावृत्तिः ५।३।२८
वारः समूहः ५।३।२८
वारणपुष्पप्रचायिका ५।३।१२१
वारोऽवसरः ५।३।२८
वार्चो हंसः ५।१।१७१
वार्या ऋत्विजः ५।१।३२
वार्या ऋत्विजः ५।१।४०
वालधिः ५।३।८८
वावदूकः ५।२।४७
वावहिः ५।२।३८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाशनः ५।१।५२
वास्तव्यः ५।१।६
वाह्यम् ५।१।३४
विकत्थनः ५।२।४२
विकत्थी ५।२।४२
विकत्थी ५।२।५९
विकर्तनः ५।१।५२
विकस्वरः ५।२।८१
विकस्वरा ५।२।८१
विकाषी ५।२।५९
विकासी ५।२।५९
विक्षावः ५।३।७१
विक्षिपः ५।१।५४
विक्षिपो व्रजति ५।३।१३
विग्रहः ५।३।५५
विघनः(२) ५।३।३८
विघनेन्दुसमद्युतिः ५।३।३८
विघसः ५।३।२३
विघातः ५।३।८२
विघाती ५।२।५९
विघ्नः ५।३।८२
विचयनी ५।३।१२९
विचयनी ५।३।१३०
विचर्चिका ५।३।१२१
विच्छितिः प्रकारः ५।३।१०८
विजातं गवा ५।१।९
विजाता वत्सं गौः ५।१।९
विजातो वत्सो गवा ५।१।९
विजावा ५।१।१४७
विजिघ्रः ५।१।५८
विजोहवः ५।३।४२
वितानः ५।१।६४
वित् ५।२।८३
वित्तविनाशनः ५।१।५२
वित्तैषणा ५।३।११२
विदता कृतम् ५।२।२२
विदद्भक्तिः ५।२।२२
विदा विचारणा ५।३।१०८
विदाही ५।२।६४
विदितः ५।१।११
विदुरः ५।१।४
विदुरः ५।२।७५
विदुषा कृतम् ५।२।२२
विदुषिम्मन्या ५।१।११७
विद्यते भोक्तुम् ५।४।९०
विद्यमानः ५।२।२०
विद्या ५।३।९२
विद्या ५।३।९९
विद्याधरः ५।१।९४
विद्युतौ ५।२।८३
विद्युत् ५।२।८३
विद्रवः ५।३।५९
विद्रावी ५।२।५४
विद्वद्भक्तिः ५।२।२२
विद्वन्मन्यः ५।१।११७
विद्वन्मानिनी ५।१।११७
विद्वन्मानी ५।१।११७
विद्वाल्लँभते ५।२।२२
विधः ५।३।८२
विधमः ५।१।५८
विधयः ५।१।५८
विधयी ५।१।५८
विधा ५।३।११०
विधिः ५।३।८७
विधुन्तुदो राहुः ५।१।१२४
विध्रुक् ५।१।१४८
विना कृत्वा गतः ५।४।८६
विना भूत्वा गतः ५।४।८६
विनाकारं गतः ५।४।८६
विनाकृत्य गतः ५।४।८६
विनाभावं गतः ५।४।८६
विनाभूय गतः ५।४।८६
विनाशकः ५।२।६८
विनीयः कल्कः ५।१।४३
विनेयम् ५।१।४३
विन्दः ५।१।६०
विन्दते भोक्तुम् ५।४।९०
विन्दुः ५।२।३४
विपत् ५।३।११४
विपदिका ५।३।१२१
विपर्ययो मतेः ५।३।७६
विपव्यम् ५।१।४३
विपश्यः ५।१।५८
विपूयो मुञ्जः ५।१।४३
विप्रुट् ५।३।११४
विप्लवः ५।३।४९
विभक्तं भ्रातृभिः ५।१।९
विभक्तं भ्रातृभी रिक्थम् ५।१।९
विभक्ता भ्रातरो रिक्थम् ५।१।९
विभवः ५।३।२३
विभवी ५।१।५३
विभाकरः ५।१।१०२
विभाक् ५।१।१४६
विभावः ५।३।२३
विभावी(२) ५।१।५३
विभीषणः ५।१।५२
विभुर्व्यापकः ५।२।८४
विभ्राजौ ५।२।८३
विभ्राट् ५।२।८३
विमानप्रस्तारः ५।३।६८
वियमः ५।३।२५
वियामः ५।३।२५
विराट् ५।१।१४८
विरावः ५।३।२२
विरावः ५।३।४९
विरोचनः ५।१।५२
विरोधी ५।२।६३
विलाषी ५।२।६०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलासी ५।२।५९
विलिखः ५।१।५४
विवादी ५।२।५८
विवेकी ५।२।५९
विशयः ५।३।७७
विशयी ५।१।५३
विशरारुः ५।२।३५
विश्नः ५।३।८६
विश्रयी ५।२।७२
विश्रावः ५।३।७१
विश्वदृश्वा ५।१।१६६
विश्वम्भरा वसुधा ५।१।११२
विश्वाराट् ५।१।१४८
विषधरः ५।१।९४
विषमस्थः ५।१।१४२
विषयी प्रदेशः ५।१।५३
विषहरी मणिः ५।१।९५
विषाग्निदर्पापहः ५।१।८१
विष्टारपङ्क्तिः ५।३।७०
विष्णुश्रुतः ५।१।७१
विष्वाणः ५।३।४८
विसरः ५।३।१३०
विसर्गी ५।२।५७
विसारी ५।२।५५
विसारो मत्स्यः ५।३।१७
विस्तारः पटस्य ५।३।६९
विस्रम्भी ५।२।५९
विहङ्गः ५।१।१३१
विहङ्गमो नभसङ्गमश्च पक्षी ५।१।१३१
विहननी ५।३।३८
विहवः ५।३।४२
विहित्रिमम् ५।३।८४
वीमार्गः ५।३।१३२
वीरभूः ५।१।७१
वृक्षमूलवासी ५।१।१५७
वृत्तिकृत् ५।१।१६२
वृत्यम् ५।१।४१
वृत्या ५।१।३२
वृत्रघ्नः ५।१।८५
वृत्रस्य हन्तुः कुलिशम् ५।१।१६१
वृत्रहा ५।१।१६१
वृध्यम् ५।१।४१
वृष्टं मेघेन ५।३।२९
वृष्यम् ५।१।४२
वेगः ५।३।१३२
वेट् ५।१।१४७
वेत्ति भोक्तुम् ५।४।९०
वेत्तिः ५।३।१३८
वेदः ५।३।१३२
वेदना ५।३।९२
वेदना ५।३।१११
वेदपारगः ५।१।१३१
वेदयः ५।१।५९
वेदवित् ५।१।१४८
वेदाध्यायः ५।१।७२
वेपः ५।३।८३
वेपथुः ५।३।८३
वेला भोक्तुम् ५।४।३३
वेला यद् भुञ्जीत भवान् ५।४।३४
वेला यद् भोजनस्य ५।४।३४
वेशः ५।३।१६
वैक्षमाणिः ५।२।२०
वैदतः ५।२।२२
वैदुषः ५।२।२२
वैयाकरणनिकायः ५।३।८०
वैरकारः ५।१।१०३
व्यजः ५।३।१३१
व्यतिपाको वर्तते ५।३।११६
व्यतिपृच्छा ५।३।११६
व्यतीक्षा ५।३।१०६
व्यतीक्षा ५।३।११६
व्यतीहा ५।३।१०६
व्यतीहा ५।३।११६
व्यथा ५।३।१०७
व्यधः ५।३।४७
व्यभिचारी ५।२।६२
व्यवक्रुष्टिः ५।३।९२
व्यवक्रुष्टिः ५।३।११६
व्यवस्था ५।३।८२
व्यवस्था ५।३।९६
व्यवहृतिः ५।३।११६
व्याक्रुष्टिः ५।३।११६
व्याक्रोशी ५।३।११६
व्याघ्रः प्राणी ५।१।५७
व्याजः पशूनाम् ५।३।३०
व्यातिचोरी ५।३।११६
व्यात्युक्षी ५।३।११६
व्याधंकारमाक्रोशति ५।४।५०, ५।४।५२
व्याधः ५।१।६४
व्याधः ५।३।८२
व्यापत् ५।३।११४
व्याभाषकः ५।२।६८
व्यालः ५।१।५६
व्यावक्रोशी ५।३।९२
व्यावक्रोशी ५।३।११६
व्यावचर्ची ५।३।११६
व्यावमोषी ५।३।११६
व्यावलेखी ५।३।११६
व्यावहासी ५।३।११६
व्याहतं कोकी(कि)लस्य ५।३।१२३
व्योमस्पृक् ५।१।१४९
व्रजः ५।३।१३१
व्रजरोधं गाः स्थापयति ५।४।७५
व्रजानुरोधं गाः स्थापयति ५।४।७५
व्रजेनोपरोधं गाः सादयति ५।४।७५
व्रजोपरोधं गाः सादयति ५।४।७५
व्रज्या ५।३।९७
व्रतं रक्षतु भवान् ५।४।२८

व्रतं रक्षेत् भवान् ५।४।२८
शंभुः शंकरः ५।२।८४
शंभूः शिवः ५।२।८३
शंवदः ५।१।१३४
शंवरः ५।१।१३४
शंस्थाः ५।१।१४२
शंस्थो नाम कश्चित् ५।१।१४२
शंस्यम् ५।१।४२
शकहः ५।१।१४८
शकृत्करिर्वत्सः ५।१।१००
शकृत्कारः ५।१।१००
शक् ५।२।८३
शक् ५।३।११५
शक्तः ५।२।९२
शक्तिः ५।३।११५
शक्तिग्रहः ५।१।९२
शक्तिधरः ५।१।९४
शक्नोति भोक्तुम् ५।४।९०
शक्यम् ५।१।२९
शङ्करः ५।१।१३४
शङ्करा नाम परिव्राजिका ५।१।१३४
शङ्करी जिनदीक्षा ५।१।१३४
शङ्खोद्धरणः ५।३।१२८
शङ्गरः ५।१।१३४
शतं दायी ५।४।३६
शतघ्नी आयुधविशेषः ५।१।८३
शतद्रूः ५।२।८३
शतसूः ५।१।१४८
शत्रुंसहो राजा ५।१।११२
शत्रुघातः ५।१।१६०
शत्रुघ्नः ५।१।८५
शत्रुजित् ५।१।१४८
शत्रुञ्जयः पर्वतः ५।१।११२
शत्रुन्तपो राजा ५।१।११२
शत्रुहः ५।१।८०
शत्रूनभ्याहन्ता ५।२।५०
शङ्कुः ५।२।३६
शब्दकारः ५।१।१०३
शब्दनः ५।२।४३
शब्दप्राट् ५।२।८३
शमी ५।२।४९
शम्भवोऽर्हन् ५।१।१३४
शयनम् ५।३।१२९
शयनीयः पल्यङ्कः ५।१।२
शयनीयम् ५।१।२७
शयानः ५।२।२०
शयाना भुञ्जते यवनाः ५।२।२०
शयानाः ५।२।२०
शयानौ ५।२।२०
शयालुः ५।२।३७
शयितं भवता ५।१।११
शयितः ५।२।९२
शयितव्यम् ५।१।२७
शयिता ५।२।४४
शयितो भवान् ५।१।११
शयिष्यमाणः ५।२।२०
शय्या ५।३।९९
शय्याया उत्थाय धावति ५।४।७७
शय्याया उत्थायं धावति ५।४।७७
शय्योत्थायं धावति ५।४।७७
शरः ५।३।२०
शरः ५।३।२८
शरः ५।३।१३०
शरधिः ५।३।८८
शरलावः ५।१।७२
शरारुः ५।२।३५
शरोपघातं मृगान् हन्ति ५।४।६४
शर्द्धञ्जहा माषाः ५।१।१२५
शर्म ५।१।१४७
शर्ववर्मा ५।१।७१
शलभोत्थो वर्तते ५।३।८२
शलालुः ५।२।३७
शशघ्नी पक्षिजातिः ५।१।८५
शशधरः ५।१।९४
शशिराणः ५।२।२
शश्वच्चकार ५।२।१३
शश्वदकरोत् ५।२।१३
शस्त्रम् ५।२।८८
शस्यम् ५।१।२९
शस्यम् ५।१।४२
शाकक्लेशं क्लिष्टः ५।४।७१
शाकपणः ५।३।३२
शाखान्तगः ५।१।१३१
शान्तिः ५।१।७१
शायिका ५।३।१२२
शारुकः ५।२।४०
शारो वर्णः ५।३।२०
शारो वायुः ५।३।२०
शालभञ्जिका ५।३।१२१
शालीन् भोक्ता ५।१।१५४
शास्त्रकृत् ५।१।१६२
शास्त्रप्रज्ञः ५।१।१४४
शिक्षा ५।३।१०६
शिर उत्क्षिप्य कथयति ५।४।७९
शिरश्छेदं युध्यन्ते ५।४।८०
शिरांसि च्छेदं युध्यन्ते ५।४।८०
शिरांसि छित्त्वा युध्यन्ते ५।४।८०
शिरोऽभितप्तिः ५।३।१२१
शिरोऽर्तिः ५।३।९२
शिरोर्तिः ५।३।१२१
शिशीर्वान् ५।२।२
शिष्यः ५।१।४०
शीतभोजी ५।१।१५४
शीर्षघाती ५।१।८२
शीर्षार्त्तिः ५।३।१२१
शीलितः ५।२।९२
शीलितो मैत्रेण ५।२।९२
शुक् ५।३।११४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुनिन्धयः ५।१।११९
शुनिन्धयी ५।१।११९
शुभंयाः ५।१।१४७
शुश्रुवान् ५।२।२
शुश्रुवे ५।२।१
शुष्कपेषं पिनष्टि ५।४।६०
शुष्कपेषं पिष्टः ५।४।६०
शुष्कपेषं पिष्यते ५।४।६०
शुष्कपेषं षेष्टव्यः ५।४।६०
शुष्कस्य पेषं पिनष्टि ५।४।६०
शूलधरः ५।१।९४
शृध्यम् ५।१।४१
शेयम् ५।१।२८
शेवधिः ५।३।८८
शेषः ५।१।५०
शोककरी कन्या ५।१।१०३
शोकच्छित् ५।२।८३
शोकापनुदः प्रियः ५।१।१४३
शोकापनोदो धर्माचार्यः ५।१।१४३
शोचनः ५।२।४२
शोभनः ५।१।५२
शोभा कान्तिः ५।३।१०८
श्मश्रुकर्तनः ५।३।१२९
श्येनचित् ५।१।१६५
श्येनाया ५।३।१०५
श्रद्धा ५।३।१०१
श्रद्धालुः ५।२।३७
श्रन्थना ५।३।१११
श्रमी ५।२।४९
श्रवः ५।३।७१
श्राद्धकरः ५।१।१०३
श्रान्तविस्मितौ ५।२।९२
श्रायः ५।३।२३
श्रीः ५।२।८३
श्रीधरः ५।१।९४
श्रुतिः ५।३।९२
श्रूः ५।३।११५
श्रूतिः ५।३।११५
श्लिष्टः ५।२।९२
श्लेमघ्नं मधु ५।१।८३
श्वः पक्ता ५।२।२०
श्वघात्या वृषली ५।१।३६
श्वपचः ५।१।५०
श्वहत्या ५।१।३६
श्वासः ५।१।६४
पट्विम्मन्या ५।१।११७
संकर्षणः ५।१।५२
संकुटनमेषाम् ५।३।९०
संकोटः ५।३।९०
संक्रन्दनः ५।१।५२
संख्याकरी ५।१।१०२
संगीतिः ५।३।९५
संग्रहः शिष्यस्य ५।३।५८
संग्राहो मल्लस्य ५।३।५८
संघसः ५।३।२३
संचरः ५।३।१३१
संचाय्यः क्रतुः ५।१।२२
संचेयोऽन्यः ५।१।२२
संज्वरी ५।२।५६
संज्वारी ५।२।५६
संतोषजं सुखम् ५।१।१७०
संत्वरी ५।२।५६
संदावः ५।३।५९
संद्रावः ५।३।५९
संधा ५।३।११०
संधिः ५।३।८७
संनेयम् ५।१।२४
संपत् ५।३।९२
संपत् ५।३।११४
संपत्तिः ५।३।९२
संपन्नंकारं भुङ्क्ते ५।४।५३
संपर्की ५।२।५६
संपर्चिता ५।२।५६
संपीतिः ५।३।९५
संपृणक्ति शाकम् ५।२।५६
संप्रदानम् ५।१।२
संप्रमादः ५।३।३३
संभवः ५।३।२३
संभार्यः ५।१।४६
संभुर्जनिता ५।२।८४
संभृत्यः ५।१।४६
संभोक्ता ५।१।१५४
संमदः कोकिलानाम् ५।३।३३
संमर्दी ५।१।५३
संमादः ५।३।३३
संयतः ५।२।९२
संयत् ५।३।११४
संयमः ५।३।२५
संयामः ५।३।२५
संयावः ५।३।५९
संयोगं जनयति ५।१।७२
संरब्धः ५।२।९२
संरवणं वर्तते ५।३।९०
संरावः ५।३।२२
संरोधी ५।२।६३
संवादी ५।२।५८
संवासी ५।२।६१
संवाह्यः ५।१।२५
संवित् ५।३।९२
संवित्तिः ५।३।९२
संवीतिः ५।३।९९
संव्यः ५।१।५६
संशीतिः ५।३।१०६
संश्रयः ५।३।२३
संसत् ५।३।९२
संसत् ५।३।११४
संसर्गी ५।२।५७
संसृज्यम् ५।१।१८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| संसृतिः | ५।३।१०२ |
| संस्कारजा स्मृतिः | ५।१।१७० |
| संस्तवोऽन्यदृष्टे | ५।३।६६ |
| संस्तावश्छन्दोगानाम् | ५।३।६६ |
| संस्था | ५।३।८२ |
| संस्था | ५।३।९६ |
| संस्रावः | ५।१।६३ |
| संहर्षणः | ५।१।५२ |
| संहारः | ५।३।१३४ |
| सक्तुधानी | ५।३।१२९ |
| सङ्गरः | ५।३।७२ |
| सङ्घः | ५।३।३६ |
| सङ्घातः | ५।३।३६, ५।३।४६ |
| सञ्चारी | ५।२।६२ |
| सततगा | ५।१।१३१ |
| सत्यवद्यम् | ५।१।३५ |
| सत्योद्यम् | ५।१।३५ |
| सदृक् | ५।१।१५२ |
| सदृक्षः | ५।१।१५२ |
| सदृक्षा | ५।१।१५२ |
| सदृशः | ५।१।१५२ |
| सदृशी | ५।१।१५२ |
| सद्रुः | ५।२।३६ |
| सध्र्यङ् | ५।१।१४८ |
| सन् | ५।२।२० |
| सन्तिः | ५।१।७१ |
| सभासत् | ५।१।१४८ |
| समजः पशूनाम् | ५।३।३० |
| समज्या | ५।३।९९ |
| समयो भोक्तुम् | ५।४।३३ |
| समयो यच्छयनस्य | ५।४।३४ |
| समयो यच्छयीत भवान् | ५।४।३४ |
| समवसर्ग्यः | ५।१।१८ |
| समश्नानाः | ५।२।२४ |
| समस्थः | ५।१।१४२ |
| समाजः साधूनाम् | ५।३।३० |
| समाधिः | ५।३।८७ |
| समावर्त्तनीयो गुरुः | ५।१।२ |
| समाहारः | ५।३।१८ |
| समाह्वयः प्राणिद्यूतम् | ५।३।४१ |
| समितिः | ५।३।९३ |
| समित् | ५।३।११४ |
| समित् | ५।३।११४ |
| समित्संग्राहः | ५।३।८१ |
| समीयिवान् | ५।२।३ |
| समुद्रः शोषयितुमशक्यः | ५।४।३८ |
| समुद्रः | ५।१।१४ |
| समुद्रगा | ५।१।१३१ |
| समुद्रमपि शोषयाणि | ५।४।३८ |
| समूलकाषं कषति | ५।४।६३ |
| समूलघातं हन्ति | ५।४।६३ |
| समूह्यः | ५।१।२५ |
| सम्यङ् | ५।१।१४८ |
| सम्राट् | ५।१।१४८ |
| सरकः | ५।१।६९ |
| सरणः | ५।२।४२ |
| सरसिरुहं पद्मम् | ५।१।१४४ |
| सर्पः | ५।१।५० |
| सर्वंसहो मुनिः | ५।१।१११ |
| सर्वकर्मघ्नी शैलेशी | ५।१।८३ |
| सर्वगः | ५।१।१३१ |
| सर्वङ्कषः खलः | ५।१।१११ |
| सर्वतो भूत्वा आस्ते | ५।४।८६ |
| सर्वत्रगः | ५।१।१३१ |
| सर्वदमनः | ५।१।५२ |
| सर्वे सुन्वन्तः | ५।२।२६ |
| सवित्रम् | ५।२।८७ |
| सस्यघातो वृषभः | ५।१।८३ |
| सस्यात् | ५।१।१५० |
| सस्निः | ५।२।३९ |
| सस्वजानः | ५।२।२ |
| सहकृत्वा | ५।१।१६७ |
| सहकृत्वानौ | ५।१।१६७ |
| सहते भोक्तुम् | ५।४।९० |
| सहनः | ५।१।५२ |
| सहयुध्वा | ५।१।१६७ |
| सहयुध्वानौ | ५।१।१६७ |
| सहस्रं दायी | ५।४।३६ |
| सहित्रम् | ५।२।८७ |
| सहिष्णुः | ५।२।२८ |
| सह्यम् | ५।१।२९ |
| सांकोटिनमेषाम् | ५।३।९० |
| सांराविणं वर्तते | ५।३।९० |
| सांराविणम् | ५।३।२२ |
| सातयः | ५।१।५९ |
| सातिः | ५।३।९४ |
| साधनः | ५।१।५२ |
| साधुकारी | ५।१।१५५ |
| साधुदायी | ५।१।१५५ |
| साधुस्तत्त्वं विदन् | ५।२।२२ |
| साधुस्तत्त्वं विद्वान् | ५।२।२२ |
| साधुस्तत्त्वं वेत्ति | ५।२।२२ |
| सान्नायं हविः | ५।१।२४ |
| सामगः | ५।१।७४ |
| सामगी | ५।१।७४ |
| सारः स्थिरः पदार्थः | ५।३।१७ |
| सारकः | ५।१।६९ |
| सारसमुच्चयः | ५।३।८० |
| सारो बलम् | ५।३।१७ |
| सालसारः | ५।३।१७ |
| सासहिः | ५।२।३८ |
| साहयः | ५।१।५९ |
| सिंहनर्दी | ५।१।१५३ |
| सिद्धं खलु | ५।४।४४ |
| सिध्यः | ५।१।३९ |
| सीतापूरं वृष्टो मेघः | ५।४।५७ |
| सीताप्रं वृष्टो मेघः | ५।४।५७ |
| सीधुपः | ५।१।७५ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | | | |
|---|---|---|---|---|---|
| सीधुपी | ५।१।७५ | सुभगम्भविष्णुः | ५।१।१२८ | सेत्रम् | ५।२।८८ |
| सीमन्धरः तीर्थङ्करः | ५।१।११३ | सुभगम्भावुकः | ५।१।१२८ | सेदिवान् | ५।२।२ |
| सुकटंकराणि वीरणानि | ५।३।१४० | सुभेदः | ५।३।१३९ | सेधनः | ५।१।३९ |
| सुकरं भवता | ५।३।१३९ | सुम्लः | ५।१।५६ | सेधा सत्त्वम् | ५।३।१०८ |
| सुकरः | ५।३।१३९ | सुरः | ५।१।५६ | सेनाग्रगः | ५।१।१३१ |
| सुकरः कटो वीरणैः | ५।३।१४० | सुरां सुनोति | ५।२।२६ | सेनाचरः | ५।१।१३९ |
| सुकृत् | ५।१।१६२ | सुरापः | ५।१।७५ | सेनानीः | ५।१।१४८ |
| सुखप्रतीक्षः | ५।१।७३ | सुरापा | ५।१।७५ | सेरुः | ५।२।३६ |
| सुखप्रतीक्षा | ५।१।७३ | सुरापायो व्रजति | ५।३।१४ | सेवः | ५।१।५० |
| सुखसाध्यः | ५।३।१३९ | सुरापी | ५।१।७५ | सेविता विषयान् | ५।२।४४ |
| सुखाहरः(२) | ५।१।९६ | सुरासावः | ५।१।१६३ | सोमपा | ५।१।१६३ |
| सुगः पन्थाः | ५।१।१३२ | सुरासुत् | ५।१।१६३ | सोमभूतिः | ५।१।७१ |
| सुगन्ता | ५।१।१३२ | सुलवम् | ५।३।१३९ | सोमविक्रयी | ५।१।१५९ |
| सुगमः | ५।१।१३२ | सुवर्णनिधायं निहितः | ५।४।७१ | सोमसावः | ५।१।१६३ |
| सुग्लः | ५।१।५६ | सुशयम् | ५।३।१३९ | सोमसुत्(२) | ५।१।१६३ |
| सुचयम् | ५।३।१३९ | सुशर्मा | ५।१।१४७ | सौतङ्गमिः मुनिः | ५।१।१३१ |
| सुतर्मा | ५।१।१४७ | सुशासनः | ५।३।१४१ | सौवीरपायिणो बाह्लीकाः | ५।१।१५७ |
| सुत्या | ५।३।९९ | सुष्ठुगामी | ५।१।१५५ | स्तनन्धयः | ५।१।११९ |
| सुत्वा | ५।१।१७२ | सुहितः | ५।२।९२ | स्तनप्रधायः | ५।१।७९ |
| सुत्वानः | ५।१।१७२ | सूकरनिचयः | ५।३।८० | स्तम्बकरिर्व्रीहिः | ५।१।१०० |
| सुत्वानौ | ५।१।१७२ | सूत्थानं भवता | ५।३।१४१ | स्तम्बकारः | ५।१।१०० |
| सुदामा | ५।१।१४७ | सूत्रः | ५।१।५६ | स्तम्बघनो यष्टिः | ५।३।३९ |
| सुधीः | ५।२।८३ | सूत्रकारः | ५।१।१०३ | स्तम्बघातः | ५।३।३९ |
| सुधीवा | ५।१।१४७ | सूत्रकृत् | ५।१।१६२ | स्तम्बघ्ना | ५।३।३९ |
| सुनग्नङ्करणः पटः | ५।१।१२९ | सूत्रग्रहः प्राज्ञः सूत्रधारो वा | ५।१।९३ | स्तम्बघ्नीषीका | ५।३।३९ |
| सुनग्नम्भविष्णुः | ५।१।१२८ | सूत्रग्राहः | ५।१।९३ | स्तम्बघ्नो दण्डः | ५।३।३९ |
| सुनग्नम्भावुकः | ५।१।१२८ | सूत्रधारः | ५।१।७२ | स्तम्बहननी यष्टिः | ५।३।३९ |
| सुपानं पयो भवता | ५।३।१४१ | सूत्रधारः | ५।१।९४ | स्तम्बहेतिः | ५।३।३९ |
| सुपानः | ५।१।१६ | सूदिता | ५।२।४५ | स्तम्बेरन्ता पक्षी | ५।१।१४३ |
| सुपीवा | ५।१।१४७ | सूर्यो देवता | ५।१।३९ | स्तम्बेरमो हस्ती | ५।१।१४३ |
| सुप्तं भवता मासम् | ५।१।११ | सृज्यम् | ५।१।१८ | स्तवः | ५।३।२८ |
| सुप्तः | ५।२।९२ | सृत्वरः | ५।२।७७ | स्तवः | ५।३।६७ |
| सुप्तो भवता मासः | ५।१।११ | सृत्वरी | ५।२।७७ | स्तुतिः | ५।३।९२ |
| सुप्तो भवान् मासम् | ५।१।११ | सृप्तः | ५।२।९२ | स्तुतिः(२) | ५।३।९२ |
| सुप्तोऽहं किल विललाप | ५।२।११ | सृमरः | ५।२।७३ | स्तुतिः | ५।३।१३९ |
| सुभगङ्करणं रूपम् | ५।१।१२९ | सेक्त्रम् | ५।२।८८ | स्तुत्यः | ५।१।४० |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तोत्रम् ५।२।८८
स्त्रियं गच्छमानाः ५।२।२४
स्त्रीजमनृतम् ५।१।१७१
स्रुवस्य प्रग्रहः ५।३।५७
स्त्र्यगारगः ५।१।१३१
स्त्र्यनुजः ५।१।१६८
स्त्र्याख्यः ५।१।७८
स्थण्डिलवर्ती ५।१।१५७
स्थण्डिलशयः ५।१।१५७
स्थण्डिलस्थायी ५।१।१५७
स्थानीयं नगरम् ५।१।२
स्थायी ५।१।५३
स्थायुकः प्रमत्तः ५।२।४०
स्थावरः ५।२।८१
स्थावरा ५।२।८१
स्थास्नुः ५।२।३१
स्थितः ५।२।९२
स्थूलङ्करणं दधि ५।१।१२९
स्थूलम्भविष्णुः ५।१।१२८
स्थूलम्भावुकः ५।१।१२८
स्नात्वा व्रजति ५।४।४७
स्नानीयं चूर्णम् ५।१।२
स्निग्धः ५।२।९२
स्पर्द्धनः ५।२।४४
स्पर्शो व्याधिविशेषः ५।३।१६
स्पृहणीया विभूतिः ५।१।२
स्पृहयालुः ५।२।३७
स्पृहा ५।३।१०९
स्फूर्जथुः ५।३।८३
स्फूर्तिः(२) ५।३।१०६
स्मरणा ५।३।१२२
स्मेरं मुखम् ५।२।७९
स्रक् ५।१।१४८
स्रक् ५।३।११४
स्रजं विरचयति ५।१।७२
स्रवः ५।३।६७
स्रस्तिः ५।३।१०६
स्रावः ५।३।६७
स्रुक् ५।१।१४
स्रुतिः ५।३।९२
स्रुवः ५।१।१४
स्रूः ५।२।८३
स्वः पश्य ५।१।१३४
स्वनः ५।३।४८
स्वपोषं पुष्णाति ५।४।६५
स्वपोषं पुष्यति ५।४।६५
स्वपोषं पोषति ५।४।६५
स्वप्ता ५।२।४४
स्वप्नः ५।३।८५
स्वप्नक् ५।२।८०
स्वप्नजौ ५।२।८०
स्वभूर्विष्णुः ५।२।८३
स्वयंभुः ५।२।८४
स्वयंभूर्ब्रह्मा ५।२।८३
स्वर्गप्रदः ५।१।१४४
स्वर्गह्वायः ५।१।७६
स्वाढ्यंकरश्चैत्रो भवता ५।३।१४०
स्वाढ्यंभवं भवता ५।३।१४०
स्वादुं कृत्वा भुङ्क्ते ५।४।५३
स्वादुंकारं भुङ्क्ते ५।४।४८, ५।४।५३
स्वानः ५।३।४८
स्विन्नः ५।२।९२
हतिः ५।१।३६
हरः ५।१।४९
हलधरः ५।१।९४
हवः ५।३।४५
हव्यम् ५।१।२८
हसः ५।३।१२३
हसः ५।३।४८
हसनं छात्रस्य ५।३।१२४
हसितं छात्रस्य ५।३।१२३
हस्तग्राहं गृह्णाति ५।४।६६
हस्तग्राहं युध्यन्ते ५।४।७६
हस्तयिता ५।२।४५
हस्तरोधं दधद् धनुः ५।४।७५
हस्तवर्तं वर्तते ५।४।६६
हस्तवर्तं वर्तयति ५।४।६६
हस्तिघातो रसदः ५।१।८६
हस्तिघ्नो मनुष्यः ५।१।८६
हाता ५।१।६८
हानिः ५।३।११८
हायनः संवत्सरः ५।१।६८
हायना नाम व्रीह्यः ५।१।६८
हारणा ५।३।१११
हारा मानम् ५।३।१०८
हारी ५।४।३६
हारी मे भारमसि ५।४।३६
हार्यम् ५।१।१७
हासः ५।३।४८
हासः ५।३।१२३
हिंसकः ५।२।६८
हिंस्रो व्याधः ५।२।७९
हिमहा ५।१।१६१
हुण्डा ५।३।१०६
हृच्छयः ५।१।१३७
हृतिः ५।३।९१
हृतिः ५।३।१३९
हृतो देवदत्तः ५।१।११
हृदयङ्गमा वाचः ५।१।१३१
हृदयालुः ५।२।३७
हृष्टः ५।२।९२
हेतिः ५।३।९४
ह्रीः ५।३।११५
ह्रीतिः ५।३।११५
ह्लादनी ५।३।१२६
ह्वायः ५।३।४५

• • •

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अकारादिवर्णक्रमेण सूत्रान्तर्गतोदाहरणसूचिः ॥२॥


अग्रे भुक्त्वा भुक्त्वा व्रजति ५।४।४८

अग्रे भोजं भोजं व्रजति ५।४।४८

अङ्ग ! स्म विद्वन् ! अणुव्रतानि रक्ष ५।४।३२

अङ्ग ! स्म विद्वन् ! शिक्षाः प्रतिपद्यस्व ५।४।३२

अथाह वर्णी विदितो महेश्वरः, यावद् गिरः खे मरुतां चरन्ति ५।२।१६

अद्भुतं यच्च तत्रभवानकल्प्यं सेवेत ५।४।१९

अद्भुतं यत्र तत्रभवानकल्प्यं सेवेत ५।४।१९

अधीध्वमधीध्वमित्येव यूयमधीध्वे ५।४।४२

अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम् ५।४।४२

अधीष्वाऽधीष्वेत्येव यूयमध्यगीढ्वम् ५।४।४२

अनिवार्यो गजैरन्यैः स्वभाव इव देहिनाम् ५।१।४०

अनुजाता माणविका माणजकेन ५।१।९

अनुजातो माणवको माणविकाम् ५।१।९

अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ५।३।१३१

अन्तर्घणो वाहीकेषु देशविशेषः ५।३।३४

अन्तर्मुहूर्त्तमत्यासं सम्यक् पश्यन्ति ५।४।८२

अन्तर्मुहूर्त्तात्यासं सम्यक् पश्यन्ति ५।४।८२

अन्तर्घनो वाहीकेषु देशविशेषः ५।३।३४

अन्वग् भूत्वा विजयते शत्रुः ५।४।८८

अन्वनैषीत् ततो वाली न्यक्षिपच्चाङ्गदं सुग्रीवं प्रोचे सद्भावमागतः ५।२।१४

अपि तत्रभवान् जन्तून् हिनस्ति ? धिग् गर्हामहे ५।४।१२

अपि पर्वतं शिरसाऽभेत्स्यत् ५।४।२२

अपि पुण्डरीकाध्ययनमह्नाऽधीयीत ५।४।२२

अपि शिरसा पर्वतं भिन्द्यात् ५।४।२२

अपि संयतः सन्नकल्प्यं सेवितुमिच्छति ? धिग् गर्हामहे ५।४।२४

अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत् ? धिग् गर्हामहे ५।४।२४

अपि समुद्रं दोर्भ्यां तरेत् ५।४।२२

अपि स्कन्दकोद्देशं यामेनाऽधीयीत ५।४।२२

अभिजानासि चैत्र ! शश्वदध्यैमहि ५।२।१३


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| अभिजानासि देवदत्त ! कश्मीरेषु वत्स्यामः | ५।२।९ |
| अभिजानासि मित्र ! यत् कलिङ्गेष्ववसाम | ५।२।९ |
| अभिप्रायो मे अधीयीत भवान् | ५।४।२६ |
| अभिलाषो मे अधीयीत भवान् | ५।४।२६ |
| अभोक्ष्यत भवान् घृतेन यदि मत्समीपमागमिष्यत् | ५।४।९ |
| अयं नु कदाऽध्येता य एवमनभियुक्तः | ५।३।६ |
| अवकल्पयामि अभुक्त भवान् | ५।४।२३ |
| अवकल्पयामि अभुङ्क्त भवान् | ५।४।२३ |
| अवकल्पयामि भुञ्जीत भवान् | ५।४।२३ |
| अवकल्पयामि भोक्ष्यते भवान् | ५।४।२३ |
| अवश्यं गेयो गाथको गीतस्य | ५।४।३६ |
| आगामिनः संवत्सरस्याग्रहायण्याः परस्तात् द्विः सूत्रमध्येतास्महे | ५।४।८ |
| आगामिनः संवत्सरस्याग्रहायण्याः परस्तात् द्विः सूत्रमध्येष्यामहे | ५।४।८ |
| आश्चर्यं बधिरो नाम व्याकरणं श्रोष्यति | ५।४।२० |
| आश्चर्यं मूको नाम धर्मं कथयिष्यति | ५।४।२० |
| आश्चर्यं यच्च तत्रभवानकल्प्यं सेवेत | ५।४।१९ |
| आश्चर्यं यत्र तत्रभवानकल्प्यं सेवेत | ५।४।१९ |
| आश्चर्यमन्धो नाम पर्वतमारोक्ष्यति | ५।४।२० |
| आश्चर्यमपि शिरसा पर्वतं भिन्द्यात् | ५।४।२२ |
| इच्छा मे अधीयीत भवान् | ५।४।२६ |
| इयं नु कदा गन्ता यैवं पादौ निदधाति ? | ५।३।६ |
| इषे चेन्माधवोऽवर्षीत् समपत्सत शालयः | ५।४।४ |
| इह शयीत भवान्, यदि रोचते | ५।४।२८ |
| इह शेतां भवान्, यदि रोचते | ५।४।२८ |
| उच्चैः कृत्वाऽऽचष्टे ब्राह्मण ! पुत्रस्ते जात इति | ५।४।८४ |
| उपाध्यायश्चेच्छ्वः शीघ्रमागमिष्यति एते श्वः क्षिप्रमध्येष्यामहे | ५।४।३ |
| उपाध्यायश्चेदागच्छति अथ त्वं सूत्रमधीष्व | ५।३।११ |
| उपाध्यायश्चेदागच्छति अथ त्वमनुयोगमादत्स्व | ५।३।११ |
| उपाध्यायश्चेदागच्छति अरमेते सिद्धान्तमध्येष्यामहे | ५।४।३ |
| उपाध्यायश्चेदागच्छति अवकल्पये युक्तोऽधीयीय | ५।४।३ |
| उपाध्यायश्चेदागच्छति आशंसे युक्तोऽधीयीय | ५।४।३ |
| उपाध्यायश्चेदागच्छति आशु एते सिद्धान्तमध्येष्यामहे | ५।४।३ |
| उपाध्यायश्चेदागच्छति क्षिप्रमेते सिद्धान्तमध्येष्यामहे | ५।४।३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपाध्यायश्चेदागच्छति त्वरितमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागच्छति शीघ्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागच्छति संभावये युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागच्छति, एते तर्कमधीमहे, ५।४।२
उपाध्यायश्चेदागतः, एतैस्तर्कोऽधीतः, ५।४।२
उपाध्यायश्चेदागन्ता अथ त्वं सूत्रमधीष्व ५।३।११
उपाध्यायश्चेदागन्ता अथ त्वमनुयोगमादत्स्व ५।३।११
उपाध्यायश्चेदागन्ता अरमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागन्ता अवकल्पये युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागन्ता आशंसे युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागन्ता आशु एते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागन्ता क्षिप्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागन्ता त्वरितमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागन्ता शीघ्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागन्ता संभावये युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागन्ता, एते तर्कमध्येतास्महे ५।४।२
उपाध्यायश्चेदागमत् अरमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमत् अवकल्पये युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागमत् आशंसे युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागमत् आशु एते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमत् क्षिप्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमत् त्वरितमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमत् शीघ्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमत् संभावये युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागमत्, एते तर्कमध्यगीष्ममहि, ५।४।२
उपाध्यायश्चेदागमिष्यति अथ त्वं सूत्रमधीष्व ५।३।११
उपाध्यायश्चेदागमिष्यति अथ त्वमनुयोगमादत्स्व ५।३।११
उपाध्यायश्चेदागमिष्यति अरमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमिष्यति अवकल्पये युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागमिष्यति आशंसे युक्तोऽधीयीय ५।४।३
उपाध्यायश्चेदागमिष्यति आशु एते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमिष्यति क्षिप्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमिष्यति त्वरितमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमिष्यति शीघ्रमेते सिद्धान्तमध्येष्यामहे ५।४।३
उपाध्यायश्चेदागमिष्यति संभावये युक्तोऽधीयीय ५।४।३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपाध्यायश्चेदागमिष्यति, एते तर्कमध्येष्यामहे, ५।४।२
ऊर्ध्वं मुहूर्त्तात् कटं करोतु भवान् ५।४।३०
ऊर्ध्वं मुहूर्त्तात् कटं कुर्याद् भवान् ५।४।३०
ऊर्ध्वं मुहूर्त्तात् करणीयः कटो भवता ५।४।३०
ऊर्ध्वं मुहूर्त्तात् कर्तव्यः कटो भवता ५।४।३०
ऊर्ध्वं मुहूर्त्तात् कार्यः कटो भवता ५।४।३०
ऊर्ध्वं मुहूर्त्तात् कृत्यः कटो भवता ५।४।३०
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागच्छति अथ त्वं तर्कमधीष्व ५।३।१२
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागच्छति अथ त्वं सिद्धान्तमधीष्व ५।३।१२
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागच्छेत् अथ त्वं तर्कमधीष्व ५।३।१२
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागच्छेत् अथ त्वं सिद्धान्तमधीष्व ५।३।१२
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागन्ता अथ त्वं तर्कमधीष्व ५।३।१२
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागन्ता अथ त्वं सिद्धान्तमधीष्व ५।३।१२
ऊर्ध्वं मुहूर्त्तादुपाध्यायश्चेदागमिष्यति अथ त्वं सिद्धान्तमधीष्व ५।३।१२
कच्चिज्जीवति मे माता ५।४।२६
कतमो नाम यस्मै तत्रभवाननृतं ब्रूयात् ? ५।४।१४
कतमो नाम यस्मै तत्रभवाननृतं वक्ष्यति ? ५।४।१४
कतरो नाम यस्मै तत्रभवाननृतं ब्रूयात् ? ५।४।१४
कतरो नाम यस्मै तत्रभवाननृतं वक्ष्यति ? ५।४।१४
कथं नाम तत्रभवान् मांसं अबभक्षत् ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं अभक्षयत् ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयति ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयति ? ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयाञ्चकार ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयाञ्चकार ? ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयिता ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयिष्यति ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयेत् ? धिग् गर्हामहे, अन्याय्यमेतत् ५।४।१३
कथं नाम तत्रभवान् मांसं भक्षयेत् ? ५।४।१३
कथं नाम तत्रभवान् मांसमबभक्षत् ? ५।४।१३
कथं नाम तत्रभवान् मांसमभक्षयिष्यत् ? ५।४।१३
कथं नाम तत्रभवान् साधूनपूपुजत् ? ५।४।१३
कथं नाम संयतः सन्ननागाढे तत्रभवान् आधायकृतं सेवेत ? धिग् गर्हामहे ५।४।११
कथं नाम संयतः सन्ननागाढे तत्रभवान् आधायकृतमसेविष्यत ? धिग् गर्हामहे ५।४।११
कदा चैत्र ! आगतोऽसि ? अयमागच्छामि ५।४।१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| कदा चैत्र ! आगतोऽसि ? अयमागमम् | ५।४।१ |
| कदा चैत्र ! आगतोऽसि ? आगच्छन्तमेव मां विद्धि । | ५।४।१ |
| कदा चैत्र ! आगतोऽसि ? एषोऽस्म्यागतः | ५।४।१ |
| कदा भवान् इष्टवान् ? एषोऽस्मि यजमानः | ५।४।१ |
| कदा भवान् कन्यां करिष्यते ? एषोऽस्म्यलङ्करिष्णुरिति | ५।४।१ |
| कदा भवान् कन्यामलङ्कृतवान् ? एषोऽस्म्यलङ्करिष्णुरिति | ५।४।१ |
| कदा भवान् यक्ष्यते ? एषोऽस्मि यजमानः | ५।४।१ |
| कदा भवान् सोमं पविष्यते ? एषोऽस्मि पवमानः | ५।४।१ |
| कदा भवान् सोमं पूतवान् ? एषोऽस्मि पवमानः | ५।४।१ |
| कदा मैत्र ! गमिष्यसि ? एष गच्छामि | ५।४।१ |
| कदा मैत्र ! गमिष्यसि ? एष गमिष्यामि | ५।४।१ |
| कदा मैत्र ! गमिष्यसि ? गच्छन्तमेव मां विद्धि | ५।४।१ |
| कदा मैत्र ! गमिष्यसि ? गन्ताऽस्मि | ५।४।१ |
| कदा मैत्र ! गमिष्यसि ? गमिष्यन्तमेव मां विद्धि | ५।४।१ |
| कस्तत्रावोचत् ? अहं नु ब्रवीमि | ५।२।१८ |
| कस्तत्रावोचत् ? अहं न्ववोचम् | ५।२।१८ |
| कस्तत्रावोचत् ? ब्रुवन्तं नु मां पश्य | ५।२।१८ |
| कस्तत्रावोचत् ? ब्रुवाणं नु मां पश्य | ५।२।१८ |
| कां कारिकामकार्षीः ? सर्वां कारिकामकार्षम् | ५।३।११९ |
| कां कृतिमकार्षीः ? सर्वां कृतिमकार्षम् | ५।३।११९ |
| कां कृत्यामकार्षीः ? सर्वां कृत्यामकार्षम् | ५।३।११९ |
| कां क्रियामकार्षीः ? सर्वां क्रियामकार्यम् | ५।३।११९ |
| कां त्वं कारिमकार्षीः ? सर्वां कारिमकार्षम् | ५।३।११९ |
| काकिन्या हेतोरपि मातुः स्तनं छिन्द्यात् | ५।४।२२ |
| कान्तो हरिश्चन्द्र इव प्रजानाम् | ५।२।९२ |
| कामुका अन्यस्य स्त्रियो भवन्ति | ५।२।४० |
| कामो मे भुञ्जीत भवान् | ५।४।२६ |
| किं तत्रभवाननृतं ब्रूयात् ? | ५।४।१४ |
| किं तत्रभवाननृतं वक्ष्यति ? | ५।४।१४ |
| किं तत्रभवाननृतमवक्ष्यत् ? | ५।४।१४ |
| किं ब्रवीषि वृष्टो देवस्तर्हि शालयः संपत्स्यन्ते | ५।३।२ |
| किं ब्रवीषि वृष्टो देवस्तर्हि शालयः संपन्नाः | ५।३।२ |
| किन्नु खलु भो ! व्याकरणमधीयीय | ५।४।२८ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| किन्नु खलु भो ! व्याकरणमध्ययै | ५।४।२८ |
| किमकार्षीः कटं चैत्र ! ? न करोमि भोः ! | ५।२।१८ |
| किमकार्षीः कटं चैत्र ! ? न कुर्वन्तं पश्य माम् | ५।२।१८ |
| किमकार्षीः कटं चैत्र ! ? न कुर्वाणं पश्य माम् | ५।२।१८ |
| किमकार्षीः कटं चैत्र ! ? ननु करोमि भोः ! | ५।२।१७ |
| किमकार्षीः कटं चैत्र ! ? ननु कुर्वन्त मां पश्य | ५।२।१७ |
| किमकार्षीः कटं चैत्र ! ? ननु कुर्वाणं मां पश्य | ५।२।१७ |
| किमकार्षीः कटं चैत्र ! ? नाऽकार्षम् | ५।२।१८ |
| किमवोचः किञ्चिच्चैत्र ! ? ननु ब्रुवाणं मां पश्य | ५।२।१७ |
| किमवोचः किञ्चिच्चैत्र ! ? ननु ब्रवीमि भोः ! | ५।२।१७ |
| किमवोचः किञ्चिच्चैत्र ! ? ननु ब्रुवन्तं मां पश्य | ५।२।१७ |
| को नाम यस्मै तत्रभवाननृतं ब्रूयात् ? | ५।४।१४ |
| को नाम यस्मै तत्रभवाननृतं वक्ष्यति ? | ५।४।१४ |
| खड्गेन प्रहारं शत्रून् विजयते | ५।४।७४ |
| गौरिवाकृतनीसारः प्रायेण शिशिरे कृशः | ५।३।२० |
| चन्दनेनानुलिप्य जिनं पूजयन्ति | ५।४।७४ |
| चित्रं बधिरो नाम व्याकरणं श्रोष्यति | ५।४।२० |
| चित्रं मूको नाम धर्मं कथयिष्यति | ५।४।२० |
| चित्रं यच्च तत्रभवानकल्प्यं सेवेत(२) | ५।४।१९ |
| चित्रं यच्च तत्रभवानकल्प्यमसेविष्यत | ५।४।१९ |
| चित्रं यत्र तत्रभवानकल्प्यं सेवेत(२) | ५।४।१९ |
| चित्रं यत्र तत्रभवानकल्प्यमसेविष्यत | ५।४।१९ |
| चित्रमन्धो नाम पर्वतमारोक्ष्यति | ५।४।२० |
| चित्रमपि शिरसा पर्वतं भिन्द्यात् | ५।४।२२ |
| चोरं कृत्वा हेतुभिः कथयति | ५।४।५२ |
| जल्पिष्यन्ते ज्ञास्यन्ते पण्डिताः | ५।२।२० |
| जातु तत्रभवान् भूतानि हिनस्ति ? धिग् गर्हामहे | ५।४।१२ |
| तत्त्वज्ञानं नः प्रसीदन्तु, गुरुपादाः | ५।४।२८ |
| तत्त्वज्ञानं नः प्रसीदेयुः, गुरुपादाः | ५।४।२८ |
| तेन संगतमार्येण रामाजर्यं कुरु द्रुतम् | ५।१।५ |
| दक्षिणेन चेदयासीन्न शकटं पर्याभूत् | ५।४।२५ |
| दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् | ५।४।२५ |
| दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् | ५।४।९ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दक्षिणेन चेद् याति न शकटं पर्याभवति ५।४।२५
दक्षिणेन चेद् यायान्न शकटं पर्याभवेत् ५।४।२५
दण्डेनाहत्य चौ(चो)रं गोपालको गाः खेटयति ५।४।७४
दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाणः, अपरश्चातिथ्यर्थी, यदि स तेन दृष्टोऽभविष्यत्, उताऽभोक्ष्यत ५।४।१०
दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाणः, अपरश्चातिथ्यर्थी, यदि स तेन दृष्टोऽभविष्यत्, अप्यभोक्ष्यत ५।४।१०
द्विधा कृत्वा काष्ठानि गतः ५।४।८६
द्विसंध्यमावश्यकं करोतु भवान् ५।४।२८
द्विसंध्यमावश्यकं कुर्यात् भवान् ५।४।२८
द्व्यङ्गुले उत्कर्षं गण्डिकाश्छिनत्ति ५।४।७६
द्व्यङ्गुले उत्कृष्य गण्डिकाश्छिनत्ति ५।४।७६
द्व्यङ्गुलेनोत्कर्षं गण्डिकाश्छिनत्ति ५।४।७६
द्व्यङ्गुलेनोत्कृष्य गण्डिकाश्छिनत्ति ५।४।७६
द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति (२) ५।४।७६
धिग् गर्हामहे, यच्च तत्रभवानस्मानाक्रोक्ष्यत्(२) ५।४।१८
धिग् गर्हामहे, यच्च तत्रभवानस्मानाक्रोशेत्(२) ५।४।१८
धिग् गर्हामहे, यच्च तत्रभवान् परिवादमकथयिष्यत्(२) ५।४।१८
धिग् गर्हामहे, यत्र तत्रभवानस्मानाक्रोक्ष्यत्(२) ५।४।१८
धिग् गर्हामहे, यत्र तत्रभवानस्मानाक्रोशेत्(२) ५।४।१८
धिग् गर्हामहे, यत्र तत्रभवान् परिवादमकथयिष्यत्(२) ५।४।१८
धिग् मिथ्या तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
धिग् मिथ्या तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
न क्षमे जातु तत्रभवान् सुरां पिबेत्(२) ५।४।१७
न क्षमे जातु तत्रभवान् सुरामपास्यत् ५।४।१७
न क्षमे तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
न क्षमे तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
न क्षमे यच्च तत्रभवानस्मानाक्रोक्ष्यत् ५।४।१८
न क्षमे यच्च तत्रभवानस्मानाक्रोशेत् ५।४।१८
न क्षमे यच्च तत्रभवान् परिवादं कथयेत् ५।४।१८
न क्षमे यच्च तत्रभवान् परिवादमकथयिष्यत् ५।४।१८
न क्षमे यत्र तत्रभवानस्मानाक्रोक्ष्यत् ५।४।१८
न क्षमे यत्र तत्रभवानस्मानाक्रोशेत् ५।४।१८
न क्षमे यत्र तत्रभवान् परिवादं कथयेत् ५।४।१८
न क्षमे यत्र तत्रभवान् परिवादमकथयिष्यत् ५।४।१८
न क्षमे यदा तत्रभवान् सुरां पिबेत् ५।४।१७
न क्षमे यदि तत्रभवान् सुरां पिबेत् ५।४।१७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न क्षमे यद् तत्रभवान् सुरां पिबेत् ५।४।१७
न मर्षयामि अस्ति नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न मर्षयामि किङ्किल नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न मर्षयामि तत्रभवानदत्तं गृह्णीयात् ? ५।४।१५
न मर्षयामि तत्रभवानदत्तं ग्रहीष्यति ? ५।४।१५
न मर्षयामि तत्रभवानदत्तमग्रहीष्यत् ? ५।४।१५
न मर्षयामि तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
न मर्षयामि तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
न मर्षयामि भवति नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न मर्षयामि विद्यते नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न श्रद्दधे अस्ति नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न श्रद्दधे किं तत्रभवान् नामाऽदत्तमाददीत ? ५।४।१५
न श्रद्दधे किं तत्रभवान् नामाऽदत्तमादास्यते ? ५।४।१५
न श्रद्दधे किङ्किल नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न श्रद्दधे जातु तत्रभवान् सुरां पिबेत्(२) ५।४।१७
न श्रद्दधे जातु तत्रभवान् सुरामपास्यत् ५।४।१७
न श्रद्दधे तत्रभवानदत्तं गृह्णीयात् ? ५।४।१५
न श्रद्दधे तत्रभवानदत्तं ग्रहीष्यति ? ५।४।१५
न श्रद्दधे तत्रभवानदत्तमग्रहीष्यत् ? ५।४।१५
न श्रद्दधे तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
न श्रद्दधे तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
न श्रद्दधे भवति नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न श्रद्दधे यच्च तत्रभवानस्मानाक्रोक्ष्यत् ५।४।१८
न श्रद्दधे यच्च तत्रभवानस्मानाक्रोशेत् ५।४।१८
न श्रद्दधे यच्च तत्रभवान् परिवादं कथयेत् ५।४।१८
न श्रद्दधे यच्च तत्रभवान् परिवादमकथयिष्यत् ५।४।१८
न श्रद्दधे यत्र तत्रभवानस्मानाक्रोक्ष्यत् ५।४।१८
न श्रद्दधे यत्र तत्रभवानस्मानाक्रोशेत् ५।४।१८
न श्रद्दधे यत्र तत्रभवान् परिवादं कथयेत् ५।४।१८
न श्रद्दधे यत्र तत्रभवान् परिवादमकथयिष्यत् ५।४।१८
न श्रद्दधे यदा तत्रभवान् सुरां पिबेत् ५।४।१७
न श्रद्दधे यदि तत्रभवान् सुरां पिबेत् ५।४।१७
न श्रद्दधे यद् तत्रभवान् सुरां पिबेत् ५।४।१७
न श्रद्दधे विद्यते नाम तत्रभवान् परदारानुपकरिष्यते ५।४।१६
न संभावयामि किं तत्रभवान् नामाऽदत्तमाददीत ? ५।४।१५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न संभावयामि किं तत्रभवान् नामाऽदत्तमादास्यते ? ५।४।१५
न संभावयामि तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
न संभावयामि तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
नाना कृत्वा भक्ष्याणि भुङ्क्ते ५।४।८६
नावकल्पयामि किं तत्रभवान् नामाऽदत्तमाददीत ? ५।४।१५
नावकल्पयामि किं तत्रभवान् नामाऽदत्तमादास्यते ? ५।४।१५
नावकल्पयामि तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
नावकल्पयामि तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यति ५।४।२२
नीचैः कृत्वाऽऽचष्टे ब्राह्मण ! कन्या ते गर्भिणी जातेति ५।४।८४
नैतदस्ति तत्रभवान् नामाऽदत्तं गृह्णीयात् ५।४।१५
नैतदस्ति तत्रभवान् नामाऽदत्तं ग्रहीष्यति ५।४।१५
न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित् कञ्चिदाह - क्व भवानुषितः ? स आह - अमुत्रावात्समिति ५।२।६
पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षुः ५।३।५७
पुष्पप्रचयं करोति तरुशिखरे ५।३।७८
प्रतिमायाः पादानुलेपं प्रणमति ५।४।७९
प्रतिमायाः पादावनुलेपं प्रणमति ५।४।७९
प्रद्विट् द्विषो जेघ्नीयिषीष्ट वः ५।१।१४८
प्राणिनो न हिंस्यात् भवान् ५।४।२८
प्राणिनो न हिनस्तु भवान् ५।४।२८
प्राप्ता नौस्तर्हि नदी तरिष्यते ५।३।२
प्राप्ता नौस्तर्हि नदी तीर्णा ५।३।२
बुध्यसे चेतयसे चैत्र ! कलिङ्गेषु गमिष्यामः ५।२।९
बुध्यसे चेतयसे चैत्र ! कलिङ्गेषु गमिष्यामः ५।२।९
ब्राह्मण ! कन्या ते गर्भिणी जातेति किं तर्हि वृषल ! तारं कृत्वा कथयसि ५।४।८४
ब्राह्मण ! कन्या ते गर्भिणी, किं तर्हि उच्चैर्वृषल ! कारं वृषलोच्चैः कारं कथयसि ५।४।८४
ब्राह्मण ! कन्या ते गर्भिणी, किं तर्हि नीचैर्नामाप्रियमाख्येयम् ५।४।८४
ब्राह्मण ! कन्या ते गर्भिणी, किं तर्हि वृषल ! उच्चैः कृत्वा कथमसि ५।४।८४
ब्राह्मण ! कन्या ते गर्भिणी, किं तर्हि वृषल ! उच्चैःकृत्य कथयसि ५।४।८४
ब्राह्मण ! पुत्रस्ते जातः किं तर्हि नीचैर्वृषल ! कारं वृषल ! ऊच्चैर्नाम प्रियमाख्येयम् ५।४।८४
ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि नीचैर्वृषल ! कारं वृषल ! नीचैः कारं कथयसि ५।४।८४
ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! नीचैः कृत्वा कथयसि ५।४।८४
ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! नीचैःकृत्य कथयसि ५।४।८४
ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! मन्दं कृत्वा कथयसि ५।४।८४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| भवता खलु कन्या वहनीया | ५।४।३५ |
| भवता खलु कन्या वाह्या | ५।४।३५ |
| भवता खलु कन्या वोढव्या | ५।४।३५ |
| भवता खलु छेदसूत्रं वहनीयम् | ५।४।३५ |
| भवता खलु छेदसूत्रं वाह्यम् | ५।४।३५ |
| भवता खलु छेदसूत्रं वोढव्यम् | ५।४।३५ |
| भवता खलु भार उह्येत | ५।४।३५ |
| भवता खलु भारो वहनीयः | ५।४।३५ |
| भवता खलु भारो वाह्यः | ५।४।३५ |
| भवता खलु भारो वोढव्यः | ५।४।३५ |
| भवान् खलु छेदसूत्रस्य वोढा | ५।४।३७ |
| मा चैत्र ! स्म हरः परद्रव्यम् | ५।४।४० |
| यथा कृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि | ५।४।५१ |
| यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये, किं तवानेन ? | ५।४।५१ |
| यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये, किं ते मया | ५।४।५१ |
| यदयं पुनः पुनर्भुक्त्वा व्रजति | ५।४।४८ |
| यदि कमलकमाह्वास्यत्र शकटं पर्याभविष्यत् | ५।४।९ |
| यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति | ५।४।२५ |
| यदि गुरूनुपासीत शास्त्रान्तं गच्छेत् | ५।४।२५ |
| यावज्जीवं भृशमन्नं दत्तवान् | ५।४।५ |
| येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रवृत्तः | ५।४।५ |
| येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट | ५।४।५ |
| येयं पौर्णमास्यागामिनी अस्यां जिनमहः प्रवर्तिष्यते | ५।४।५ |
| यो भिक्षां ददाति स स्वर्गलोकं याति | ५।३।१० |
| यो भिक्षां दाता स स्वर्गलोकं याता | ५।३।१० |
| यो भिक्षां दास्यति स स्वर्गलोकं यास्यति | ५।३।१० |
| योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र द्विरोदनं भोक्तास्महे | ५।४।७ |
| योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता द्विरध्येतास्महे | ५।४।७ |
| योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यत् परं वलभ्यास्तत्र द्विः सक्तून् पातास्मः | ५।४।६ |
| योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यत् परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे | ५।४।६ |
| योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विः सक्तून् पास्यामः | ५।४।६ |
| योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे | ५।४।६ |
| योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विः सक्तून् पातास्मः | ५।४।६ |
| योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे | ५।४।६ |
| योऽयमध्वातिक्रान्त आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विः सक्तूनपिबाम | ५।४।६ |

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

| | |
|---|---|
| योऽयमध्वातिक्रान्त आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र युक्ता द्विरध्यैमहि | ५।४।६ |
| योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे | ५।४।७ |
| योजनं तर्षित्वा गावः पिबन्ति | ५।४।८२ |
| योजनमत्यस्य गावः पिबन्ति | ५।४।८२ |
| राक्षसेन्द्रस्ततोऽभैषीत् सैन्यं समस्तं सोऽयुयुत्सयत् स्वयं युयुत्सयांचक्रे | ५।२।१४ |
| लुनीत लुनीतेत्येव यूयं लुनीथ | ५।४।४२ |
| लुनीत लुनीतेत्येव यूयमलाविष्ट | ५।४।४२ |
| लुनीहि लुनीहीत्येव यूयमलाविष्ट | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लविता | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लविष्यति | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लुनाति | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लुनातु | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लुनीयात् | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लुलाव | ५।४।४२ |
| लुनीहि लुनीहीत्येवायं लूयात् | ५।४।४२ |
| लुनीहि लुनीहीत्येवायमलावीत् | ५।४।४२ |
| लुनीहि लुनीहीत्येवायमलुनात् | ५।४।४२ |
| लूयस्व लूयस्वेत्येव अलावि केदारः | ५।४।४२ |
| लूयस्व लूयस्वेत्येव लाविष्यते केदारः | ५।४।४२ |
| लूयस्व लूयस्वेत्येव लूयते केदारः | ५।४।४२ |
| लोष्टान् यष्टीर्गृहीत्वा युध्यन्ते | ५।४।७८ |
| वधूमूढां मुण्डयितारः श्राविष्ठायनाः | ५।२।२७ |
| विश्वदृश्वाऽस्य पुत्रो भविता | ५।४।४१ |
| विस्मनीयं यच्च तत्रभवानकल्प्यं सेवेत | ५।४।१९ |
| विस्मनीयं यत्र तत्रभवानकल्प्यं सेवेत | ५।४।१९ |
| शक्तश्चैत्रो धर्मं करिष्यति | ५।४।२२ |
| शङ्करा नाम शकुनिका तच्छीला च | ५।१।१३४ |
| शय्यस्व शय्यस्वेत्येव अशायि भवता | ५।४।४२ |
| शय्यस्व शय्यस्वेत्येव शय्यते भवता | ५।४।४२ |
| शय्यस्व शय्यस्वेत्येव शायिष्यते भवता | ५।४।४२ |
| शिशुरयं मातरं भक्षयित्वोपजातः | ५।४।४६ |
| शिष्येण गुरोः स्नापनं सुखम् | ५।३।१२५ |
| श्रद्दधे अभुक्त भवान् | ५।४।२३ |
| श्रद्दधे अभुङ्क्त भवान् | ५।४।२३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रद्दधे भुञ्जीत भवान् ५।४।२३
श्रद्दधे भोक्ष्यते भवान् ५।४।२३
श्रद्धा मे अधीयीत भवान् ५।४।२६
श्राद्धे सिद्धमन्नमपहर्तार आह्वरकाः ५।२।२७
संभावयामि अभुक्त भवान् ५।४।२३
संभावयामि अभुङ्क्त भवान् ५।४।२३
संभावयामि नाभोक्ष्यत भवान् ५।४।२३
संभावयामि भुञ्जीत भवान् ५।४।२३
संभावयामि भोक्ष्यते भवान् ५।४।२३
संभावयामि यद् भुञ्जीत भवान् ५।४।२३
समये चेत् प्रयत्नोऽभूत् उदभूवन् विभूतयः ५।४।४
साधु वादयति वादको वीणाम् ५।१।१५५
स्तनरन्ध्रादपकर्षं पयः पिबति ५।४।७७
स्तनरन्ध्रापकर्षं पयः पिबति ५।४।७७
स्रुवस्य प्रग्राहेण चरति दक्षिणार्थी द्विजः ५।३।५७
स्मरसि मित्र ! कश्मीरेषु वत्स्यामः पास्यामः पयांसि ५।२।१०
स्मरसि मित्र ! कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे ५।२।१०
स्मरसि मित्र ! कश्मीरेष्ववसाम तत्रौदनमभुञ्जमहि ५।२।१०
स्मरसि मित्र ! कश्मीरेष्वितिहाऽध्यैमहि ५।२।१३
स्मरसि साधो ! स्वर्गे स्थास्यामः ५।२।९
स्वादूकृत्य यवागूं भुङ्क्ते ५।४।५३
स्वाद्वीं कृत्वा यवागूं भुङ्क्ते ५।४।५३
हस्तघ्नो ज्याघातत्रो वर्ध्रपट्टः ५।१।८३

•••

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूमिं कामगवि ! स्वगोमयरसैरासिञ्च रत्नाकराः !
मुक्तास्वस्तिकमातनुध्वमुडुप ! त्वं पूर्णकुम्भीभव ।
धृत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा-
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः ॥

હે કામધેનુ ! તું પોતાના પવિત્ર ગોમય રસ વડે ભૂમિનું સિંચન કર, હે રત્નાકરો ! તમે મોતીઓના સાથિયા રચો, હે ચંદ્ર ! તું મંગલ સ્વરૂપ પૂર્ણકુંભ થઈ જા, હે દિગ્ગજો ! તમે સરળ સૂંઢ વડે કલ્પવૃક્ષોનાં પત્રો ધારણ કરી તોરણો બનાવો, ખરેખર વિશ્વ પર વિજય મેળવીને સિદ્ધરાજ પધારી રહ્યા છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org